THE ELEMENTS OF POLITY

THE ELEMENTS OF POLITY

By

DR. SISIR KUMAR MITRA

M.A., B.L., PH.D., F.A.S.



The Asiatic Society
1 Park Street • Kolkata 700 016

Bibliotheca Indica Series 309

THE NĪTISĀRA OR THE ELEMENTS OF POLITY
By KĀMANDAKI
Edited by
RAJA DR. RAJENDRALALA MITRA

Published in 1849 (Fasc. I)
1861 (Fasc. II)
1864 (Fasc. III)
1876 (Fasc. IV)
1884 (Fasc. V)

Published by
Professor Ramakanta Chakrabarty
General Secretary
The Asiatic Society
1 Park Street
Kolkata 700 016

Printed at
Lokenath Printers
17/4, Canal West Road
Kolkata 700 009

PREFACE TO THE FIRST EDITION

THIS, the first edition of Kamanadaki's "Elements of polity", has been printed from a modern but very correct manuscript obtained at Benares by the late enthusiastic antiquarian Major Markham Kittoe. The work is very scarce in Calcutta, and the only copy we could obtain for collation is contained in the Library of the Asiatic Society, No. 168 of the Sanskrita Catalogue. It has been copied for the Library of the late College of Fort William, and, like most works of that collection, abounds in errors and lacunae which render it utterly unreliable as an authority. It has, however, one redeeming merit, a Sanskrita commentary, not to be met with in the Benares MS., which has been of great use in settling the reading and meaning of a great number of technical terms. In this respect the Panchatantra and the Hitopadesa of Vishnusarma have also been of service.

Of the author of the work very little seems to be known. The commentary above cited, states that he was a disciple of the celebrated politician Chanakya, the Machiavel of India, who raised the first Mauriya king Chandragupta on the throne of Pataliputra (B.C. 319) ; and this statement is fully corroborated by tradition. From a report submitted by Dr. Frederich to the Batavian Society of Arts and Sciences on the Sanskrita literature of Bali, it appears that the most popular work in that Island on Polity is entitled Kamandakiya Nitisara, and all the Sanskrita books there extant are acknowledged to be the counterparts of purely Indian originals. The researches of Sir Stamford Raffles and Crawfurd shew that the predominance of Buddhism in the island of Java obliged the Hindu inhabitants of that place to retire, in the fourth century of the Christian era, with their household gods and their sacred scriptures to the island of Bali, where they and their descendants have, ever since, most carefully preserved the authenticity of their literature and their religion. It has also been shewn by the same authorities that since the period of their exile, they have not had any religious intercourse with India ; it would therefore follow that the Sanskrita works now available in Bali, including the Kamandakiya Niti, are of a date anterior to the 4th century. The contents, however, of the Balenese code of morals are unknown, and it would be premature, from the similarity of names, to infer its identity with the work now presented to the public yet the fact that the people of Bali themselves acknowledge all their Sanskrita literature to have been obtained from India would argue the existence of at least a Kamandakiya Nitisara at the time when that literature was imported from the shores of Bharatavarsha.

An internal evidence of some moment is in favour of the antiquity which tradition has ascribed to this work. It is dedicated to Chandragupta, and the author, a Buddhist, apparently with a view not to offend the

feelings of his Hindu patron with the name of a Buddhist deity, has thought fit to forego the usual invocation at the commencement of his work—a circumstance which has been made the theme of much erudite disquisition by the author of the Siddhanta Muktavali*.

Although written in verse its style is peculiarly unpoetical, and in its rude simplicity approaches the older Smritis. The work has not, however, any of the antiquated grammatical forms and obsolete expressions which are so freely met with in Manu and occasionally in the other Smritis, and its versification is unexceptionable. Indeed, had it to be judged by its metres alone they would have justified the inference that it's origin is due to a much later age than that of Kalidasa.

It has been observed by some that the use of the word *hora* in this work is fatal to its claim to antiquity, that word having been shown, in a paper published in the Journal of the Asiatic Society (Vol. p) to be of Arabic origin, and to have been borrowed by the Brahmans in the 10th century. Mr. Ravenshaw's speculations, however, have not yet obtained that confirmation which would justify our rejecting the testimony of the dedication and infer the date of the work from the use of a single word which may after all be the result of an interpolation or a mislection.

One of the most striking points in the general tone of the work is its gravity and sententiousness. Confucius, in his proverbs, scarely attempts anything more pithy; and yet in the anxiety of the author to lay down rules for even the most insignificant movements of kings, there is a dryness of detail which deprives it entirely of the charm of terseness. Its gravity is essentially Oriental, while the morality of its state policy is more worthy of the notorious historiographer of Florence than of the successors of Bhrigu and other great sages of ancient India. Its corner stone is cunning and artifice, intended to favour arbitrary power, and its main object is to overcome party opposition. Considering that the political life of Chanakya was devoted to one eternal round of stratagems and artifices for the overthrow of his powerful rival, Rakshasa, of which forgery, perjury and even poisoning formed the most salient points, it is not to be wondered at that his principles, even when systematised by his pupil, should retain some indications of their tortuosity. This defect, however, is confined entirely to the sections on diplomacy, and does not at all affect his rules regarding the general conduct of princes and their officers, which, in their earnest advocacy of truth, justice and honesty, would stand a very favourable comparison with works of much higher pretensions. Those rules are the originals whence the ethics of the Hitopadesa have been deduced, and the Hitopadesa is a work that has withstood the ordeal of criticism for near fifteen hundred years, and has not been found wanting. As a book on morality it is better known

* That author, however, gives us no information regarding the religious belief of Kamandaki.

and "has been translated more frequently and into a greater variety of languages than any other composition not sacred".

It might be argued that in the infancy of race, as in the childhood of man, the apologue or fable is the only form in which moral counsel is successfully imparted, and hence it would be much more reasonable to suppose the Hitopadesa to be the archetype of the Kamandakiya Niti, than the latter to be that of the former. But it is no less true that in the early state of society, concise rules and flashing proverbs, "the condensed conclusions of experience" form better guides of life, and are therefore, more generally esteemed, than protracted ratio-cinations in search of general principles, and hence it is that all our wise men of antiquity from Solomon downwards, are more noted for their proverbs than lengthy processes of inference. Probably apologues followed proverbs, and essays succeeded them next. The argument however, in either way, is not applicable with reference to the origin of either the Kamandakiya Niti or the Hitopadesa. The Mahabharata must be acknowledged to be anterior to both, and in the Rajadharma section of that epic, maxims are produced in almost the very words in which we see them in the later works hence the idea is suggested that those and similar maxims were among the Hindus, as they are among other nations, the heirlooms of remote antiquity which have been from time to time collected arranged amplified, and illustrated according to varying predilections of authors. The maxims of Kamandaki are arranged under nineteen different heads, and embrace almost all the subjects that may be fairly included under the term polity, besides some which have only the voucher of Hindu writers to appear in this work. The first chapter is devoted to the inculcation, in princes, of the necessity of study and of controlling their passions. The second has for its subjects the division of learning, the duties of the different castes and the importance of criminal jurisprudence. In the third occurs an exposition of the duty of princes to their subjects, of the necessity of impartial justice, and the impropriety of tyrannising over their people. The fourth affords a description of the essential constituents of a good government. It says "King, minister, kingdom, castle, treasury, army, and allies are known to form the seven constituents of a Government". They contribute to each other's weal, and the loss of even a single one of them renders the whole imperfect :—he who wishes to keep a government perfect should study well their natures.

"The first desideratum for a king is to attain royal qualities and having attained them he should look for them in others. A flourishing sovereignty cannot well be obtained by the worthless ; he (only) who has qualified himself is fit to be a king.

"Royal prosperity, so difficult to be obtained and more to retain, and which depends on the goodwill of multitudes, rests steadily only on moral purity, as water in a (fixed) vessel."

The duties of masters and servants engross the whole of the fifth chapter, and the mode of removing difficulties or rather of punishing the wicked, forms the subject of the sixth. The seventh is devoted to the duty of guarding the persons of kings and crown princes, and includes a variety of expedients against surprises, poisoning, the infidelity of servants, wives and relatives and the dishonesty of medical attendants. The mode of consolidating a kingdom by providing it with the necessary officers of state, and including within it a number of dependencies and subordinate chiefs, forms the subject of the next chapter. Then follow a series of rules regarding negotiations and disputes with foreign powers, conferences, embassies and spies, which take up the whole of the 9th, 10th, 11th and the 12th chapters. The 13th opens with an exhortation in favour of constant activity and attention to business, and the evils which attend idleness and vicious propensities. The latter are indicated by the term *vyasana,* and include a number of vices and frailties—such as over fondness for hunting and gambling, sleeping in the day, calummy, concupiscene, dancing, singing, playing, idleness, drinking, general depravity, violence, injury, envy, malice, pride and tyranny. The term is very comprehensive and when applied to other than men is made to imply "defects" generally, and the subsequent chapter particularises the various defects to which the seven members of government are frequently liable. It is followed by a dissertation on military expeditions. The 16th chapter has fortification, intrenchment and encamping of armies for its subjects and though short, is highly interesting, for the rules it contains on matters in which the modern Hindus are so entirely ignorant. The different expedients for overcoming enemies such as reconciliation, wealth, shew of military power, domestic discord, diplomacy, feigning, and stratagem are detailed in the following chapter and those failing a king is recommended to enter into actual warfare, and on the mode of carrying it on including surprises, guerilla fights, pitched battles and military strategies, the uses of the different members of an army such as the infantry cavalry and elephant; the arrays of soldiers into columns lines, squares etc., the duties of commanders, and the principle of selecting one's ground the two subsequent chapters contain the most curious details. With a view to affording an insight into these to those who do not read Sanskrit, it was once our anxious wish to annex to this edition a translation of the entire work, and we had rendered nearly three-fourths of it into English, but press of official duties having caused a long interruption, and an accident—the ravages of white ants—having deprived us of our MS., we feel compelled to abandon our design for the present.

In carrying the work through the press, we have derived much assistance from Pandita Visvanatha Sastri to whom we take this opportunity, publicly, to offer our grateful acknowledgments.

RAJENDRALALA MITRA

Table of Contents

PREFACE

The Nītisāra by Kāmandaki edited by R. L. Mitra in the *Bibliotheca Indica Series* of the Asiatic Society was published in parts in different years from 1849 to 1884. Since then a few new editions and translations of the text have come to light. For example, we can refer to (i) the edition published in the Trivandrum Sanskrit Series (no. 12, 1912), (ii) the text printed by the Ānandāśrama Sanskrit Series, Poone (1952), (iii) the translation in English made by M. N. Dutt (Calcutta, 1896) and (iv) *the Nītisāra di Kāmandaki* by C. Formichi (*Giornale della Societa Asiatica Italiana*). These publications and certain writings on the *Kāmandakīya Nītisāra,* now a recognised Indian text on the science of polity, have made a new revised edition of R. L. Mitra's work a desideratum. An attempt has been made here to fulfil this need.

In accomplishing the task we have taken help of the available manuscripts of the text and a commentary on it in the library of the Asiatic Society, Calcutta (nos. G. 890, G. 912, G. 4742 and IIA. 25) and also another manuscript. Variations in reading have been duly noted. A new English translation of the text has been furnished.

The *Kāmandakīya Nītisāra* is surely a post-Maurya treatise or at least *not* a pre-Maurya text, as it refers to the Maurya king Chandragupta Maurya (late 4th century B.C.) and is dependent on the *Arthaśāstra* (of Kauṭilya), which cannot be placed before the Maurya age. On the other hand, the reference in the *Mahābhārata* to Kāmanda (=Kāmandaka) (*Śāntiparvan,* 123, 11) should place the text before completion of the growth of the Great Epic. The *Mahābhārata* is generally considered to "have received its present form" not "earlier than the 4th century B.C. and not later than the 4th century A.D." (W. Winternitz, *A History of Indian Literature,* vol. I, p. 465). K. P. Jayaswal attributed the *Nītisāra* to the Gupta age (*Journal of Bihar and Orissa Research Society,* vol. XVIII, 1932, p. 37). Some scholars, however, have assigned it to a later period, even to c. A.D. 700 (R. N. Saletore, *Ancient Indian Political Thought and Institutions,* p. 9).

The Kāmandakīya Nītisāra in its twenty *sargas* and thirty-six *prakaraṇas* discusses various aspects of the science of polity. It deals *inter alia* with theories of social order, authority and obligation of the temporal ruler, theories of state structure and organs of government, principles and policies of government, inter-state relations, functions of envoys, ambassadors and spies, application of different political expedients (*upāyas*), varieties of battle arrays (*vyūhas*), attitude towards morality, etc. (See also U. N. Ghoshal, *A History of Indian Political Ideas,* pp. 570f).

In course of preparing the present edition of the *Nītisāra* valuable assistance and advice have been received from a number of my friends and erstwhile colleagues and I am deeply beholden to them all.

In this connection it is my solemn duty to offer tribute to the memory of my esteemed friend and classmate late Bijoy Ranjan Basu, M.A. (Double), who evinced keen interest in this translation project and I owe much to his assistance in bringing out the book in its present form. It is regretted that he passed away suddenly in December last (1981) before the book was printed off.

I take this opportunity of offering my respects to *Āchārya* Gaurinath Shastri, Vice-Chancellor, Sampurnanand Saṅskṛta Viśvavidyālaya, Varanasi, for his inspiring guidance in all my academic pursuits. Pandit Satyendra Chandra Bhattacharya, Smrititīrtha, Mm. Haraprasad Shastri Research Fellow of the Asiatic Society, gave me his learned assistance in preparing the press copy, and I am sincerely obliged to him.

My most hearty thanks are due to my former pupils for their ungrudging help and cooperation in the projected work. Still I have to mention the names of Dr. B. N. Mukherji, Carmichael Professor, Dr. Amitabha Bhattacharyya, and Dr. Asok K. Bhattacharyya, all my colleagues in the A.I.H.C. Department for their important suggestions incorporated in one or other portion of the book. I am particularly grateful to Sri Dilip Kumar Nag, M.A., Senior Research Fellow, Centre of Advanced Study, A.I.H.C., Calcutta University, for cheerfully taking upon himself the task of compiling the Glossary of Technical Terms as also the Word Index, to Sri Dipak Sen, M.A., LL.B., Publication Supervisor, Asiatic Society, for carefully seeing the book through the press, to Sri S. Chaudhuri, Librarian and Sri R. P. Banerji, Curator of the Society, for providing me library facilities. I have also to thank my young friends and pupils for rendering me active assistance in the Project. They are, Sri Prasaddas Bhattacharyya, M.A., Sri Ranabir Chakravarti, M.A., Lecturer, Visva Bharati, Sm. Seema Chakravarti, M.A., Miss Anu Malik, M.A. and Miss Jhara Ghoshal, M.A. Sriman Sankar Chaudhuri and Sriman Tilaksankar Mitra of the Students' Service Centre, deserve my thanks for preparing sketches and diagrams for *vyūhas* used in the book.

I would fail in my duty if I do not recall that it was my esteemed friend Sri Dilip K. Mitra, a reputed Solicitor of the Calcutta High Court and a former General Secretary of the Society, who encouraged me to take up the work, originally edited by his illustrious great grandfather, Raja Rajendralala. I have to express my gratefulness to the Council of the Society for bestowing on me the task of preparing a revised edition with English translation of the *Nītisāra*. I am fully conscious of my own limitations, but I have sincerely endeavoured to give my best for whatever it is worth. An errata has been provided which may

not be adequate. For further lapses and lacunae the editor craves the indulgence of his readers. The authorities and staff of Messrs K. P. Basu Printing Works deserve praise for the neat production of the book.

Lastly I have to admit that for the successful execution of the work I owe much to my daughter Mithu (Miss Yashodhara Mitra, B.A.) who helped me in all possible ways.

SISIR KUMAR MITRA

कामन्दकीय नीतिसारः

श्रीगणेशाय नमः

प्रथम सर्गः

१ । इन्द्रियजय प्रकरणम् ।

यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ।
देवः स जयति श्रीमान् दण्डधारो महीपतिः ॥ १ ।

KĀMANDAKĪYA NĪTISĀRAḤ

Salutation to Śrī Gaṇeśa

Sarga—1.

Prakaraṇa 1. Control of the sense organs.

1. Victory to the lord of the earth (*mahīpati*, king), the wielder of the rod (dispenser of justice, *daṇḍadhāra*) who is always endowed with prosperity and wisdom (*Śrīmān*) as well as with god-like qualities (representing God in human form), and under whose majestic influence (*prabhāva*) the world (*bhuvanam*, the society at large) is made to conform to the eternal norms of life and conduct.

॥ उपाध्यायनिरपेक्षा ॥

चतुर्मुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
चेतश्चकेऽखिलज्ञानव्याप्ति सामर्थ्यधारिणे ।
नमो विनिर्मितानन्तभवध्वंसाय शम्भवे ॥
व्याख्या सुखावबोधार्था स्पष्टा सूक्ष्मा सुसङ्गता ।
कामन्दकिप्रणीतस्य नीतिसारस्य[1] लिख्यते ॥

[1] शास्त्रस्य

शास्त्रकारः स्वशास्त्रादौ नमस्यति नमस्कारं करोति। किमर्थमिति चेत्, नमस्यन्नमस्कारात् पुण्यमुत्पद्यते। तदुत्पद्यमानं विरोधादपुण्यं निवर्त्तयति। तन्निवृत्तौ तु कार्याणां विघ्नादीनामभावं मन्यमानः सकलार्थशास्त्रपारावारपारदृश्वा कामन्दकिराह—यस्येति। स देवो महीपतिर्जयति। यस्य महीपतेः प्रभावात् प्रभुशक्तेः। कोशदण्डबलं[2] हि प्रभुशक्तिः, भुवनं जगदिदं, शाश्वते नित्ये पथि स्वर्गमोक्षगामिनि मार्गे, तिष्ठति अवस्थानं करोति। देव इति। दीव्यतीति। दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातूक्त समस्तगुणसम्पन्नत्वात् महीपतिरेव देवः। तथा चोक्तं स्मृतिकारैः—

अग्निवायुयमार्काणामिन्द्रस्य वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रानिर्हृत्य शाश्वतीः॥
यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः।
तस्मादभिभवत्येष सर्वभूतानि तेजसा॥
बालोऽपि नावमन्तव्यो मनुष्य इति पार्थिवः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

एवं देवांशैर्निर्मितत्वान् महीपतिरेव देवः। कौटिल्याचार्येणाप्युक्तम्—"इन्द्रयमस्थानमेतत् राजानः प्रत्यक्षहेडप्रसादाः, तानवमन्यमानान्दैवो दण्डः स्पृशति। तस्माद् राजानो नावमन्तव्याः। अपि च मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे। धान्यषड्भागं पण्य[3] दशभागं हिरण्यं चाग्रयं[4] भागधेयं कल्पयामासुः। तेन भृता राजानः प्रजानां योगक्षेमावहाः। तासां[5] किल्विषमदण्डकरा हरन्ति। अयोगक्षेमवहाश्च प्रजानाम्। तस्मादुञ्छषड्भागमारण्यका अपि निर्वपन्ति, तस्यैतद् भागधेयं योऽस्मान् गोपायतीति"। (कौः अर्थ—१।१३।६) अतः सर्वस्मात् महीपतिरेव देवः। विशिष्टदेवसद्भावेऽपि महीपतिरेव देवः अधिकृतः। अधिकृतानाधिकृतयोः अधिकृते प्रतिपत्तिर्गरीयसी। कौटिल्येन अतएव "राजर्षिः" इत्युक्तम्। स जयति, वाह्याभ्यन्तरानरीन् जयतीत्यर्थः। श्रीमानिति। श्रीर्हि नृपस्यात्मसम्पत्तिः। आत्मसम्पत्तिं च स्वयमेव वक्ष्यति, "शास्त्रं प्रज्ञा" इत्यादिना। दण्डधार इति। वधः परिक्लेशः अर्थग्रहणं (हरणं) च दण्डः। तं दण्ड्येषु प्रजापालनार्थं धारयतीति दण्डधारः। दण्डभयादेव भुवनं शाश्वते पथि तिष्ठतीति श्लोकार्थः॥ १॥

[2] फलं [3] पुण्य [4] चास्य [5] तेषां हि, तेन

वंशे विशालवंश्यानामृषीणामिव[1] भूयसाम्।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः॥ २।
जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत्॥ ३।

[1] वंशानाम

यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपातमूलतः[2] श्रीमान् सुपर्वा नन्दपर्वतः ॥ ४ ।
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥ ५ ।
नीतिशास्त्रामृतं धीमान्[2a]र्थशास्त्र महोदधेः ।
समुद्दध्रे[3] नमस्तस्मै विष्णुगुप्ताय वेधसे ॥ ६ ।

[2] पपातामूलतः [2a] श्रीमान [3] य उद्दध्रे

2-6. Salutation to the wise Viṣṇugupta, born of a great family with descendants renowned all over the world for their sage-like conduct in not accepting gifts of any kind; (salutation) to him who appears to be as effulgent as the sacrificial fire (*Jātavedā agni,* the symbol of all-pervasive knowledge or *Brahmatejah*), well-versed in the Vedas (the repository of the Supreme wisdom or *paramārtha*) so much so that with his own inherent faculty he mastered all the four Vedas as if they were one (*i.e.,* he perfectly realised the inner significance of all the Vedas, the oneness and indivisibility of the Ultimate Truth); (salutation) to him who by his magical powers, as irresistible as thunder in fury, (*abhicāra-vajra*) totally uprooted the great and powerful Nandas (the Nanda dynasty) (*suparvā Nandaparvatah*); (salutation) to him who like the god *Śaktidhara* (*Kārtikeya,* the war-god) single handed by the exercise of his power of counselling (*mantraśakti*) secured the world (*medinī* or the state) for Candragupta (Maurya), the prince among men (*nṛcandrāya*); salutation to that learned one, who produced the nectar of *Nītiśāstra* (the eternal laws of human conduct) out of the mighty ocean (extensively wide) of the *Arthaśāstra.*

अभिमतदेवतास्तुत्यनन्तरं च पञ्चश्लोककुलकेन[6] स्वगुरोरपि[7] नमस्कारं विदधाति । वंशे इति । विशालवंश्यानां वंशे यो बभूव तस्मै नम इति सम्बन्धः । विशालवंशे भवा विशालवंश्याः । विशालता हि वंशस्य प्रजाप्राचुर्यात् गुणातिशययोगात् च । गुणातिशयो वंशस्य उदितोदितत्वम् । यत्र वंशे वेद-विद्यादिमन्तो ब्राह्मणा अनुष्ठानसम्पन्नाः पूर्वपुरुषा। आ-चतुर्थादा-सप्तमाद्वा न चापरे, वंशः असौ उदितास्तमितः । तद्विपरीतः अस्तमितोदितः । यत्र यथोक्तगुणयुक्ता न पूर्वे न चापरे, सः अस्तमितास्तमितः । तद्विपरीत उदितोदित इति । गुणेन चानेन विशालता वंशस्य माख्या । भूयसां गुणैर्महताम् । ऋषीणामिवाप्रतिग्राहकाणाम, यथा ऋषयोऽप्रतिग्राहका निर्द्वन्द्वत्वात् तथा एते गार्हस्थ्यधर्ममनुपालयन्तोऽपि अप्रतिग्राहकाः । (कुटल) कुटिलत्वात् (कुटोष्ठ) कुटिर्घट उच्यते । तं धान्यपूर्णं (भृतं) लान्ति संगृह्णन्ति प्रातः समये होमाद्यर्थं नाधिकं, अधिकं तु ब्राह्मणानुद्दिश्य सद्यः

[6] श्लोकपञ्चकेन, श्लोककुलकेन ; [7] सुरगुरोरपि, परमगुरोरपि

प्रक्षालयन्ति इति कुटिलाः। कुम्भीधान्या इति प्रसिद्धाः। अतएव कुटिलानामापत्यं विष्णुगुप्तः कौटिल्य इत्युक्तः। भूयसां गुणैर्महतां बभूव सम्भूतः। भुवि विश्रुतः न्यायकौटिल्य-वात्स्यायन-गौतमीयस्मृतिभाष्य चतुष्टयेन प्रकाशितपुरुषार्थचतुष्टयोपाय इति महीतले प्रख्यातः ॥ २ ॥

स्वानुष्ठानतत्परतां प्रतिपादयितुमाह—जातवेदा इति। जातवेदा वैश्वानरः स इवार्चिः ब्रह्मतेजः तेन युक्तः। वेदानिति। सामादींश्चतुरोऽपि अधीतवान् (एकवेदवत्) अक्लेशेन। सुचतुर इति। सुष्ठु चातुर्ययुक्तः प्रज्ञातिशयात् परान् अतिसन्धत्ते, परैश्च नातिसन्धीयत इति। वेदविदां वर इति। न केवलं चतुर्वेदाध्यायी, वेदविदां वेदपरमार्थवेदिनां मध्ये वरः श्रेष्ठः। सम्यग्वेदपरिज्ञानात्। यश्च वेदविदां वरः स अर्थात् सर्ववित्। तत् नास्ति यत् न स वेद इति ॥ ३ ॥

न केवलं वेदार्थवित् तदुक्तकर्मणामपि अनुष्ठाता तत्फलभोक्ता च इत्येतत् दर्शयितुमाह—यस्येति। आभिमुख्येन साध्यं प्रति साधकप्रयुक्तानां मन्त्राणां मारणाद्यर्थं चारो गमनम् अभिचारः स एव वज्रः, तेन। यस्य सम्बन्धिना। वज्रज्वलनो वैद्युतवह्निः तस्य इव तेजो यस्येति। वज्र-ज्वलनो यथा प्रतिपक्षभूतै जलैः न उपशाम्यति तद्वत् कौटिल्य-कोपाग्निरपि न नन्दादिभिः। पपाताभूलत इति। मूलं बन्धुादिमूलबलं तदारभ्य। नन्द इति। नवनवतिकोटीश्वरः पृथिवीपतिः अतएव श्रीमान्। स एव पर्वतः। सुपर्वेति। पर्वशब्देन ख्यातिरुपलक्षिता, यथा पञ्चदश्यादि प्रदेशश्च सन्धिः पर्व अभिधीयते, तानि शोभनानि यस्य स तथा। पपात पतितः। आमूलत इति। पुनरनुत्थानाय ॥ ४ ॥

तस्य सुचतुरत्वमुक्तन्तत् समर्थयन्नाह—एकाकीति। प्रभुशक्त्यभावात् अदण्डकोशत्वात् एकाकी शरीरमात्रपरिच्छदः। मन्त्रशक्त्येति। प्रज्ञातिशयचातुर्येण। शक्त्या उत्साहशक्त्या। शक्तिधरोपमः कार्तिकेयसमः। आजहार आहृतवान्। नृषु मध्ये चन्द्राय, चन्द्रगुप्ताय मौर्यकुलप्रसूताय। चतुर्थी तादर्थ्ये। मेदिनीं पृथिवीम्। एवं च शास्त्रप्रज्ञागुणयोः प्राधान्यं प्रख्यापितं भवति ॥ ५ ॥

शुक्रबृहस्पत्योस्तृतीयम् आत्मगुरुं प्रख्यापयितुं दण्डनीतिविषये प्रयोक्तृत्वमभिधाय प्रवक्तृत्वमपि प्रतिपादयितुमाह—नीतिति। प्रत्यक्षपरोक्षानुमानलक्षण प्रमाणत्रयनिर्णीतायां फलसिद्धौ देशकालानु-कूल्ये सति यथासाध्यम् उपायसाधनविनियोगलक्षणा क्रिया नीतिः। तदर्थं शास्त्रं नीतिशास्त्रं कौटिल्य-भाष्यमित्यर्थः। तदेव अमृतं तदभ्यासात् नरदेवत्वमवाप्यत इति। श्रीमानिति। (धीमानिति मूलपाठः।) ब्रह्म (ब्राह्मया) श्रियायुक्तः। अर्थशास्त्रमहोदधेरिति। अर्थ्यन्त इत्यर्थाः धर्मार्थकामाः। तत्प्रतिपादकं धर्मशास्त्रम् अर्थशास्त्रं (कामशास्त्रं) च प्राजापत्यम्। तथाचोक्तं कामसूत्रे अस्मद्गुरुणा "प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य शासनम् अध्यायानां शतसहस्रेण अग्रे प्रोवाच। तस्य एकदेशं स्वायम्भुवो मनुः[8] धर्माधिकारिकं पृथक् चकार। बृहस्पतिः अर्थाधि-कारिकम्।" तच्च लक्षाध्यायतृतीयांशत्वेन कोटिग्रन्थविस्तृतं सम्भाव्यते। एवं च अर्थशास्त्रं गाम्भीर्यात् महाप्रमाणत्वाच्च महोदधिरिव। तस्मात् य उद्दध्रे[9] उद्धृतवान् तस्मै विष्णुगुप्ताय वेधसे नमः ॥ ३ ॥

[8] स्वायम्भुवो मुनिः इति मुनेर्विशेषणं [9] समुद्दध्रे ति मूलपाठः

दर्शनात् तस्य सुदृशो विद्यानां पारदृश्वनः ।
राजविद्याप्रियतया संक्षिप्तग्रन्थमर्थवत् ॥ ७ ।
उपार्जने पालने[a] च भूमेर्भूमीश्वरं प्रति ।
यत्किञ्चिदुपदेक्ष्यामो राजविद्याविदां मतम् ॥ ८ ।

[a] रक्षणे

7-8. Having studied the learned works of that master of sciences (*vidyānām pāradṛśvanu*) (i.e., Viṣṇugupta) and out of our love for the science of polity (*rājavidyā*), we set ourselves to the compilation of an abridged treatise following the views of the masters of the science of polity (*rājavidyāvidāṁ mataṁ*).

नमस्कारानन्तरं महाकाव्यस्वरूपनीतिसारस्य सम्बन्धाभिधेय प्रयोजनानि अभिधातुं श्लोकद्वयमाह —दर्शनादिति। तस्य परमगुरोः विष्णुगुप्तस्य दर्शनात् शास्त्रात् ज्ञानदृष्ट्या यद् दृष्टं तदेव उपदेक्ष्याम इति अभिधेय सङ्गतिः। महासम्बन्धश्चायं गुरुरर्थ (पर्व) क्रमागतः। तथा चोक्तम्—

ब्रह्माऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम्।
तन्नारदेन शक्रेण गुरुणा भार्गवेण च ॥
भारद्वाजविशालाक्षभीष्म पराशरैस्तथा।
संक्षिप्तं मनुना चैव तथा चान्यैर्महर्षिभिः ॥
प्रजानामायुषो ह्रासं विज्ञाय च महात्मना।
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये ॥ इति।

ब्रह्माद्याचार्यप्रणीत[10] संग्रहत्वात् अस्मत् प्रणीतप्रबन्धोऽपि प्रमाणमिति भावः। सुदृशः सुदृष्टः निर्मलज्ञानस्य। विद्यानां आन्वीक्षिकीत्रयीवार्तादण्डनीतीनां, पारदृश्वनः पारं दृष्टवानिति पारदृश्वा तस्य। राजविद्याप्रियतया इति। प्रियस्य भावः प्रियता, राजविद्यासु दण्डनीत्यादिकासु प्रियतया हेतुभूतया। यद् उपदेक्ष्याम इति सम्बन्धः। राजविद्याभिर्भूमीश्वरं व्युत्पाद्य रक्षादिभिः जगता-मुपकारात्[11] पुण्यं भवत्विति प्रयोजनम्। संक्षिप्तग्रन्थमर्थवत् इति। संक्षिप्तः उपसंहृत एव ग्रन्थो यस्य तत् संक्षिप्तग्रन्थं, अर्थतस्तु तावानेव विद्यते यस्य तद् अर्थवत्। अतएव सामर्थ्यात् नीतिसार मिदमेव ॥ ७ ॥

उपार्जने इति। उपार्जनं लाभः, स च त्रिविधः मानवो भूतसंघो मित्रश्चेति[12]। पालनं रक्षणं, तत् द्विविधं स्वेभ्यः परेभ्यश्चेति। चकारो दर्द्धन सत्पात्रतीर्थप्रतिपादनसमुच्चयार्थः। भूमेः पृथिव्याः। भूमीश्वरं प्रति महीपतिमुद्दिश्य। यदुपदेक्ष्यामः किञ्चित् स्वल्पमुपदेशं दास्यामः। राजविद्याविदामिति। बार्हस्पत्यौशनसादीनां मतमभिमतम्। विष्णुगुप्तदर्शनादेवोपदेक्ष्यामः। दृश्यते हि राजविद्याविन्मताद् भिन्नं विष्णुगुप्तदर्शनम्। तथा च कौटिल्यभाष्ये उपधाशुद्धि प्रकरणे— "अधार्मिकोऽयं राजा साध्वेनं हत्वा, अन्यं प्रतिपादयामः" इत्यादि धर्मोपधायाम्। परप्रयुक्तैर्भूम्यादि-

[10] ब्रह्माद्याप्तप्रणीत [11] उपकाराय। [12] नवो भूतपूर्वः पित्र्यश्चेति।

लाभैश्च स्वामिनि न विकुरुते इति, अर्थोपधायाम्। राजमहिषी त्वां कामयते, इति कामोपधायाम्। शौचपरीक्षोपदेशाः सर्वाचार्याणाम्। तत्र कौटिल्य आह—"न त्वेव···(कौः अर्थ १।१०।१७)

राजास्य जगतो हेतुर्वृद्धेर्वृद्धाभिसम्मतः।
नयनानन्दजननः शशाङ्क इव तोयधेः॥ ९।

---

9. The king (by the exercise of his royal power) is the root of the prosperity (*vṛddhi*) of the state, and this view is confirmed even by the wisemen (*vṛddha, vidyā-vṛddha*). A king (by providing good government and ensuring all round prosperity) becomes the source of delight to his people (*nayanānandajananah*) just as the moon causes delight to the sea (that demonstrates delight by swelling and dancing its waves).

भवति चात्र नीतिशास्त्रादौभावसूत्रं 'राजवृत्तिः' इति। नयसूत्रितमुपदेक्ष्यन्ति विष्णुगुप्तशिष्याः। प्रजारञ्जनाद् राजा। तस्य वृत्तमनुष्ठानं तदुपदिश्यत इति सूत्रार्थः। सम्बन्धात् तु यद्यपि यथायोगमितरजनवृत्तमपि सम्भाव्यते तथापि प्राधान्यात् राजवृत्तमभिधीयत इत्याह—राजास्येति। राजा विजिगीषुः। जगतश्चतुर्वर्णाश्रमलक्षणस्य हेतुः कारणम्, वृद्धेरभ्युदयस्य। वृद्धाभिसम्मतः इति। विद्यावृद्धानामभिसम्मतः। विद्याग्रहणाद् विद्योक्तानुष्ठानाच्च गुरूणां हृदयंगमो भवतीत्यर्थः। नयनानन्दजनन इति। नयनानां सौम्यत्वादानन्दं जनयतीति। शशाङ्क इव तोयधेरिति। समुद्रस्य चन्द्रो यथा वृद्धेः कारणं तद्वद्राजा नयानन्दनो भूत्वा तथा वर्तेत यथा जगतो वृद्धिर्भवतीति॥ ९॥

यदि न स्यान्नरपतिः सम्यङ् नेता ततः प्रजा।
अकर्णधारा जलधौ[5] विप्लवेतेह नौरिव॥ १०।

---

[5] Var. बलवद्

10. In the absence of a king, fit enough to act as the proper leader of his subjects (*samyak netā*), the latter perishes like a boat without a steersman (*a-karṇadhārā*) in a tormented sea.

अन्वयेन जगतो वृद्धेर्हेतुत्वमभिधाय नृपतेर्व्यतिरेकेणाप्यभिधातुमाह—यदि न स्यान् इति। यदि नरपतिर्न स्यात् तदा प्रजा विप्लवेतेति सम्बन्धः। सम्यङ्नेतेति सम्यक् शास्त्रस्थित्या नेता नायकः प्रजायाः, न्याय्येन मार्गेण प्रजां नयति। कर्णधारो नावमिव। ततः प्रजेति। तदनन्तरमेव प्रजा चातुर्वर्णाश्रमलक्षणो लोकः। अकर्णधारा इति। करिणोऽङ्कुशमिवनावां नियामकः काष्ठविशेषः कर्णः 'अरिण' इति लोके प्रसिद्धः। तं धारयतीति कर्णधारः। स न विद्यते यस्या नावः सा तथोक्ता। बलवदिति। प्रतीकारानुत्क्रम्येत्यर्थः। विप्लवेतेति। नश्येत्। इह जगति नौरिव यानपात्रवत्॥ १०॥

धार्मिकं पालनपरं सम्यक् परपुरञ्जयम्।
राजानमभिमन्येत[5a] प्रजापतिमिव प्रजा॥ ११।

[5a] मन्यन्ते

11. A king of righteous conduct, who governs the state justly and properly, and who (like a *vijigīṣu*, imbued with the policy of expansion), is capable of capturing enemy fortifications (*parapurañjayaṁ*), is acclaimed as the veritable *Prajāpati* (the Lord of all created beings) by his subjects.

सम्यक् नेतरि राजन्यपि प्रजाभिः कृतज्ञतया एवंभूताभिर्भवितव्यमित्याह—धार्मिकमिति। धर्मो हि राज्ञां नीतिशास्त्रोक्तः। तद्यथा—"राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम्। दक्षिणा वृत्तिसाम्यं तु दीक्षा तस्याभिषेचनम्।" गृहस्थ सामान्यतस्तु सर्वेषामहिंसा, सत्यं, शौचम्, अनसूया, आनृशंस्यं, क्षमा च। देवतातिथिपूजा, भृत्येषु त्यागः, शेषभोजनं चेत्यादिकम्। तेन चरतीति धार्मिकः, तम्। पालनपरमिति प्रजापालनपरम्। तथा चोक्तं गुरुणा—"प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्। नात्मप्रियं हितं राज्ञः प्रजानां च प्रियं हितम्॥" इति। सम्यक् परपुरञ्जयमिति। यथोक्तनीत्यनुष्ठानात् परेषां दुर्गाणि पुराणि जयतीति परपुरञ्जयो महाविजिगीषुः, तम्। राजानमभिमन्यन्ते मनस्यवधारयन्ति। प्रजापतिमिव सृष्टिकर्तारं यथोत्पत्तिस्थितिकर्तारम्। प्रजाश्चतुर्वर्णाश्रमलक्षणाः॥ ११॥

आयत्तं रक्षणं राज्ञि वार्ता रक्षणमाश्रिता।
वार्ताच्छेदे हि लोकोऽयं श्वसन्नपि न जीवति॥ १२। *

---

12. An essential duty of the king is to protect the subjects of his dominion (*āyattam*), particularly their gainful occupaions (*vārtā* i.e., agriculture, cattle rearing and trade), which flourish only under royal protection. Disruption of economic vocations causes the most distressing condition of the people when they gasp for breath with difficulty (on the verge of death) and ultimately cannot survive.

नरपतेरभावे प्रजाविप्लवस्य युक्तिमभिधातुमाह—आयत्तमिति। आयत्तं स्वायत्तम्। रक्षणं कण्टकादिभ्य परित्राणम्। राज्ञो दण्डधारस्य विजिगीषोः। वार्तेति। वृत्तिरेव वार्ता प्रजानाम्—"कृषिः पाशुपाल्यं वाणिज्यं च वार्ता" इति वचनात्। सा वार्ता रक्षणमाश्रिता चौरादिभ्यः परित्राणमाश्रिता। वार्ताच्छेदेन वार्तानाशेन। लोकोऽयम् जगदिदम्। श्वसन्नपि किञ्चित्कालमुच्छ्वसन्नपि। न जीवति न प्राणिति। एतदुक्तं भवति। नृपाभावाद् रक्षणाभावः, तदभावाद वार्ताभावः, वार्ताभावाल्लोकस्य प्राणाभावो भवतीति। जगद्रक्षणार्थं राज्ञा दण्डधारेण भवितव्यमित्तर्थः॥ १२॥

पर्जन्य इव भूतानामाधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ॥ १३। *

---

13. A king like *Parjanya* (the rain bearing clouds) is the receptacle of the world (i.e., just as the people depend on timely and adequate rains for the production of the food crops, the means of their sustenance, so also on the king for their protection and welfare). Still on the failure of rains the people may however sustain themselves (by alternative means,

i.e., by procuring other kinds of eatables), whereas on the failure of the king (in ensuring protection), the subjects are sure to perish.

अमुमेवार्थं द्रढयितुमाह—पर्जन्य इति। पर्जन्यः प्रावृट्कालः। स यथा शस्यादेरुत्पादनाद् भूतानां प्राणिणां जीवनहेतुत्वादाधारः, तथैव दण्डधार इति पृथिवीपतिः। स लोकानामाधारः। विकलेऽपि पर्जन्ये विनष्टेऽपि वर्षाकाले जीव्यते हि कन्दमूलफलाहारैः। श्रूयते हि द्वादशवार्षिक्यामप्यवृष्टौ वन्याहारैः प्राणिभिः प्राणधारणं कृतमिति। भूपतौ तु विकले दण्डधाराभावाद्- हरेव मात्स्यन्यायात् केनापि न जीव्यत इति ॥ १३ ॥

*Verses 12 and 13 are omitted in the B. I. edition text but included in the *Ṭīkā*.

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम्।
वर्धनाद्रक्षणं श्रेयस्तदभावे[6] सदप्यसत् ॥ १४ ।

---

[6] स्तन्नाशेऽन्यत्

14. A king should by all means protect his subjects, who in their turn contribute to his material prosperity (*pārthiva* i.e., *kośa* or treasury, augmented by contribution from the subjects in cash and kind in the form of royal share or *bhāga*). Thus preservation is always preferable to (measures for apparent) prosperity, for, in the absence of (adequate) preservation disorder prevails, and prosperity, if any, becomes futile.

प्रजापार्थिवयोः परस्परोपकारित्वं दर्शयितुमाह—प्रजामिति। प्रजां चातुर्वर्ण्यं, संरक्षति सम्यक् प्रतिपालयति। नृपः पृथिवीपतिः दण्ड्यदण्डनात्। सा प्रजा, वर्धयति वृद्धिं नयति धान्य हिरण्य पण्यादिभिः पार्थिवं पृथिवीश्वरम्। वर्धनादुक्तलक्षणाद् रक्षणं कण्टकेभ्यः पालनम्, श्रेयः श्रेयस्करम्। तन्नाशे (तदभावे) रक्षणाभावे, अन्यद् वर्धनम्, सदपि विद्यमानपि असत् अशोभनं, निरयहेतुत्वात् ॥ १४ ॥

न्यायप्रवृत्तो[7] नृपतिरात्मानपि च प्रजाः[8] ।
त्रिवर्गेणोपसन्धत्ते निहन्ति ध्रुवमन्यथा ॥ १५ ।

---

[7] न्यायप्रवृत्तौ [8] आत्मानमथ च प्रजाम्।

15. A king, who governs justly conforming to the traditional laws (*nyāyapravṛttah*), acquires merits of *Trivarga* (three ends of life, viz., *Dharma, Artha* and *Kāma*) for himself as well as for his subjects, whereas his failure leads to total ruination.

प्रजां संरक्षति नृपः, इत्युक्तं स किमनुष्ठानस्तद् रक्षणक्षमः, तद्दर्शयितुमाह—न्यायेति। नीतिशास्त्रोक्तमनुष्ठानं न्यायः तस्मिन् प्रवृत्तः न्यायप्रवृत्तः, नृपतिर्महीपतिरात्मानं त्रिवर्गेण धर्मार्थकामलक्षणेन उपसन्धत्ते संयोजयति प्रथमम्। तदनन्तरं प्रजास्त्रिवर्गेणोपसन्धत्ते, इति समुच्चयः। तथा

चोक्तं कौटिल्येन—"सुविज्ञाय प्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति, दुष्प्रणीतस्तु काम-क्रोधाभ्यामज्ञानाद्वावानप्रस्थ परिव्राजकानपि कोपयति, किं पुनर्गृहस्थान्" (कौ. अर्थ १।४।११-१२) इति। ततश्च सम्यक् दण्डप्रणयनमेव राज्ञां न्यायः। निहन्ति ध्रुवमन्यथा इति। अन्यायप्रवृत्तो ध्रुवं निश्चयेनात्मानं निहन्ति। अनन्तरं मात्स्यन्यायेन प्रजाश्च। तस्मान्न्यायप्रवृत्तेन राज्ञा भवितव्यमिति भावः॥ १५॥

धर्माद् वैजवनो[9] राजा चिराय बुभुजे भुवम्[10]।
अधर्माच्चैव नहुषः प्रतिपेदे रसातलम्॥ १६।

---

[9] द्वैयवनो [10] महीम्

16. It is only by adhering to the righteous path king Vaijavana (of the Sagara dynasty) ruled over the earth for a long period, but for unrighteousness king Nahuṣa (of the lunar race) was condemned to hell (*rasātala*).

एतदेव दृष्टान्तभूताभ्यामितिहासकथाभ्यां प्रदर्शयन्नाह—धर्मादिति। धर्मात् शास्त्रोक्तात् हेतुभूताद् वजवनः चिराय् चिरकालम्, महीं पृथिवीम् बुभुजे। अत्र कथा। सगरान्वये इन्द्रसेनोनाम राजा रजस्वलया स्वदेव्या सह सङ्गत इति राक्षसेनानुमारब्धः। उक्तश्चैवं तेन—त्वं यदि सर्वाः प्रजा अधर्मे नियोजयसि तदा न भक्षयामि इत्युक्तः। स प्राणभयात् तथैवानुष्ठितवान्। इत्यधर्मादचिरेण क्षयं गतः। तदनन्तरं तद्वंशजा अपि राक्षसवचनादचिरेणैवाधर्माद् विनाशं प्राप्ताः। ततस्तत्सन्ततावेव वैजवनो बभूव। तेन राक्षसवचनमनादृत्य भयं त्यक्त्वा सर्वाः धर्मे नियोजिताः। स्वयमपि च धर्मपरो बभुव। अतः शास्त्रविहितानुष्ठानात् वैजवनो राजा चिराय चिरकालं पृथिवीं बुभुजे। इत्यनेन न्यायप्रवृत्तेः फलं दर्शितं भवति। अधर्माच्चैव नहुषाख्य ऐन्द्रपदस्थोऽपि शचीमभिलषन् यानवाहिना अगस्त्येन शप्तः सर्पीभूतः सशरीर एव रसातलं नरकं प्रपेदे॥ १६॥

तस्माद् धर्मं पुरस्कृत्य यतेतार्थाय पार्थिवः[11]।
धर्मेण वर्द्धते राज्यं तस्य स्वादु फलं श्रियः॥ १७।

---

[11] भूपतिः

17. It is advisable therefore for a king to show due regard to righteousness (*dharmaṁ puraskṛtya*) even in matters of acquisition of wealth. Because a kingdom flourishes only by means of righteousness, the fruits of which (all round welfare or *śriyaḥ*), are also highly delicious (i.e., enjoyable both in this world and the next).

एवं चान्यायवृत्तेः फलं प्रदर्श्य अनुष्ठेयपक्षं दर्शयितुमाह—तस्माद्धर्म्मं पुरस्कृत्येति। यस्माद्धर्माधर्मफलमेव तस्मात् धर्मं न्यायं पुरस्कृत्य प्रधानं कृत्वा, अर्थाय भूम्यादि विभवाय, पार्थिवा

विजिगीषुः यतेत प्रयत्नं कुर्यात्। तत्र हेतुः धर्मेन वर्द्धते राज्यमिति। यस्माद् धर्मेण पुरस्सरेणोपार्जितं राज्यं वर्धते। राज्येनोपार्जितेन किं फलमिति चेत्? तस्य राज्यस्य स्वादु फलं मिष्टं फलं, श्रियः विभूतयः, सत्पात्रप्रतिपादनात्॥ १७॥

स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोशो बलं सुहृत्।
एतावदुच्यते राज्यं सत्त्वबुद्धिव्यपाश्रयम्॥ १८।

18. The king, ministers, kingdom, fortifications, treasury, army (military power or *daṇḍa*, the coercive power) and allies go to constitute the essential elements of a state (*Prakṛtis*) ; unfaltering attachment to moral sense and intelligent exertions (*sattva buddhi*) in discharging duties are the main stays of a government.

धर्मेण वर्धते राज्यमित्युक्तम्, तस्य राज्यस्य स्वरूपमभिधातुमाह—स्वाम्यमात्यश्चेति। स्वामी शेषाङ्गानाममात्यादीनाम् ईश्वरः प्राणभृतः। अमात्य इति। 'अमा' शब्दः सहार्थे, अमा राज्ञा सह, अतन्ति चरन्ति सर्वेषु कार्येषु इत्यमात्या, मन्त्र्यादयः। राष्ट्रं जनपदः। दुर्गं दुःखेन गम्यत इति पर्वतादि। कोशः कुश्यते अर्थिभिराश्रियते इति। (हिरण्यादिः।) बलं हस्त्यश्वरथपत्तिस्वरूपं चतुरङ्गम्। सुहृदिति मित्रम्। एतावदिति। एतावत्संख्याङ्गम्[13], उच्यत अभिधीयते। राज्यमिति राज्ञो भावः, सत्स्वमात्यादिष्वङ्गेषु राजा भवतीति। सत्त्वमिति व्यसनेऽभ्युदये च यदविकारि। बुद्धिरिति शुश्रूषाद्यष्टगुणा प्रज्ञा। सत्त्वं च बुद्धिश्च सत्त्वबुद्धी ते व्यपाश्रयः बलाधायकः अवष्टम्भः यस्य राज्यस्य तत् तथोक्तम्॥ १८॥

[13] संख्याकं

आलम्ब्य बलवत् सत्त्वं बुद्ध्यालोकित[12] निर्गमः।
सप्ताङ्गस्यास्य लाभाय यतेत सततोत्थितः॥ १९।

[12] लोचित

19. Following the dictates of the firm sense of judgement and deciding upon the cause of action after intelligent deliberations, the king should always be energetic enough (*satatotthita*) to apply the seven limbs (or the constituent elements) in the best interest (*lābhāya*) of the state.

धर्मं पुरस्कृत्य अर्थाय यतेतेत्युक्तम् तच्च कथमिति तदभिधातुमाह—आलम्ब्येति। आलम्ब्य अवष्टभ्य। बलवत् अदुर्बलं। सत्त्वं व्यसनेऽभ्युदये च यदविकारि, येनोत्तमबुद्धिरित्युच्यते। तथा च सुभाषितम्—

"प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता[14] विरमन्ति मध्याः। विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजन्ति।" (भर्तृनीतिशतके) इति। अतः प्रारब्ध निर्वहणाख्यं सत्त्वं विवक्षितं, तद्बलवत् सत्त्वमुच्यते[15]। बुद्ध्येत्यष्टगुणया प्रज्ञया, आलोकितो निर्णीतो निर्गमो निर्वाहो येन राज्ञा स तथोक्तः। सप्ताङ्गस्यास्यानन्तरोक्तस्य राज्यस्य लाभाय प्राप्तै, यतेत यत्नं कुर्यात्। सततोत्थित इति सर्वद्योमयुक्तः ॥ १९ ॥

[14] निहता [15] सत्त्वमित्युच्यते।

न्यायेनार्जनमर्थस्य रक्षणं वर्द्धनं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥ २० ॥

---

20. Acquisition of wealth by lawful means (by collection of revenue at standard rates etc.), its proper preservation and augmentation (also by lawful means), and its judicious application in deserving cases (evidently for the welfare of the state), are the four-fold functions of a ruler.

राज्ञोऽनुष्ठानं लाभार्थमेवेत्येतन्न, किन्तु चतुर्विधमित्येतद् दर्शयितुमाह—न्यायेनेति। न्यायेन शास्त्रोक्तेन। अर्जनं अलब्धलाभादिकमर्थस्स भूम्यादेः। रक्षणं पालनम्। वर्द्धनं लब्धस्योपचयः। तथा तेनैव प्रकारेण। सत्पात्रप्रतिपत्तिश्चेति। सत्पात्राण्यत्र त्रिविधानि, धर्मपात्राणि, अर्थपात्राणि, कामपात्राणि च। तेषां सत्त्वमुत्तमत्वं यदुद्दिश्य प्रतिपाद्यते विनियुज्यते इति। तस्यार्थस्य बहूकरणात्। तत्र धर्मपात्राणि सदनुष्ठाना ब्राह्मणास्तपस्विनश्च। अर्थपात्राणि मन्त्रिपुरोहितादयः वार्ताकर्तारश्च। कामपात्राणि कमनीयाः स्त्रियः। तेषु प्रतिपादनार्थमेव राजवृत्तं विजिगीषोरनुष्ठानं चतुर्विधं चतुष्प्रकारं भवति ॥ २० ॥

नयविक्रमसम्पन्नः सूत्थानश्चिन्तयेत् श्रियम्।
नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ॥ २१ ॥

---

21. Well-versed in the laws of polity, possessing courage (valour) an ever-energetic king should exert for the attainment of prosperity. For, discipline (*vinaya*) is the root of polity (*naya*) or in other words, perfect knowledge of the laws of polity can be acquired only through discipline.

चतुर्विधेऽपि राजवृत्ते, आद्यमर्थार्जनाख्यं चानुष्ठानमभिधातुमाह—नयेति। नयो नीतिशास्त्रपरिज्ञानम्। विक्रमः शौर्यम्, ताभ्यां सम्पन्नः। विक्रमे सत्यपि नयहीनोऽतिसन्धीयते। तथा च कौटिल्यः—"हस्तिनामिव लुब्धकः प्राज्ञः शूरमतिसन्धत्ते"[17]। नये सत्यपि विक्रमहीनः परैरभिभूयते। ततश्च नयविक्रमाभ्यां सम्पन्नेन भवितव्यमिति। सूत्थान इति। शोभनमुत्थानमुद्योगो यस्य स

[17] माभिसन्धत्ते।

तथोक्तः। शोभनत्वं चोत्थानस्य, प्रारम्भोपाय पुरुषद्रव्यसम्पदापत् प्रतीकारानुकूलदेशकालकार्यादि-निर्णयं कृत्वा उत्थानम्, कार्यमिति भावः। चिन्तयेत् श्रियमिति। श्रीर्हि श्रीहेतुत्वात् सप्ताङ्गं राज्यं, तदुपार्जनार्थं चिन्तां कुर्यादित्यर्थः। नयस्य विनयोमूलमिति। नयस्य नीतिशास्त्र परिज्ञानस्य, विनयः स्वाभाविकेन्द्रियजयो मूलं कारणम्। न हि स्वाभाविकेन्द्रियजयरहितेन शास्त्रं ज्ञातुं शक्यते, विषयाक्षिप्तचित्तत्वात्। विनयः शास्त्रनिश्चय इति। द्वितीयोऽपि विनयः शास्त्रनिर्णयः। तदेवं नयस्य कारणभूत (कार्यभूतौ) एको विनयः यो हीन्द्रियजयः। तद्युक्तः शास्त्रमृच्छतीति द्वितीयः। तथा च कौटिल्यः—"कृतकः स्वाभाविकश्च विनयः, क्रिया हि द्रव्यं विनयति नाद्रव्यम्" (कौ. अर्थ १।५।३-४) इति। स्वाभाविकविनयेन शास्त्रं सम्पद्यते, शास्त्रनिश्चयश्च कृतको विनयो भवतीति ॥ २१ ॥

विनयो हीन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति।
तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः परम्[13] ॥ २२।

[13] श्रियः

22. Discipline (of mind) means perfect control over the sense-organs (*indriyajayah*). One so disciplined (or having control over his senses), is considered fit for studying the *Śāstras* (laws of polity), because to a devoted student only the inner import of the text is revealed enabling him to achieve prosperity.

विनयशब्दः प्रश्रय-प्रावीण्यानौद्धत्येन्द्रियजयेषु वर्तते, तदत्र कस्मिन्नर्थे वर्तत इति सन्देहे सति तदपनोदार्थमाह—विनय इति। हि यस्मात्, अत्र विनयशब्देन इन्द्रियजय एव गृह्यते, इन्द्रियजय-प्रकरणत्वात्। इन्द्रियजयप्रकरणमेव व्याख्यातुं प्रस्तुतमिति। तद्युक्त इति। इन्द्रियजययुक्तः। शास्त्रमिति प्रकृतत्वान्नीतिशास्त्रम्। ऋच्छत्यवाप्नोति। तन्निष्ठस्य हीति। इन्द्रियजयतत्परस्य, शास्त्रार्था दुर्बोधशास्त्रप्रदेशाः। प्रसीदन्ति सुगमत्वेन निर्मलीभवन्ति। ततः श्रिय इति, तदनन्तरं सम्पदोऽपि प्रसन्ना भवन्तीति ॥ २२ ॥

शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता।
उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता ॥ २३।
प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता।
कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः ॥ २४।

23-24. In the following couple of verses the author enumerates the essential qualities of a king as constituting his *ātmasampad* or *Svāmisampad*). Knowledge of the *Śāstras* (laws of polity), wisdom, composure, (in all circumstances), skilfulness (in taking actions), dauntlessness, power of comprehension and retention in memory, energy, eloquence,

firmness (in the pursuit of actions decided upon), capacity in patiently bearing troubles and diffilulties (if any), majesty (*prabhāva* or *prabhu-śakti*), purity of conduct, amity (with all concerned), rewarding the deserving persons, truthfulness, gratefulness (in acknowledging services rendered by others), (consciousness of) the high lineage, good conduct and self restraint (in all circumstances) are the qualities essential for a king worth the name. These qualities go to constitute the wealth (*sampatti* or *ātmasampad*) of a king.

सप्ताङ्गस्यास्य लाभाय यतेतेत्युक्तम्, तत्राद्यमङ्गमात्मसम्पद्, ययाऽत्मास्वामिनः सम्पद्यते। तया विना तु स्वाम्याभासो निरात्मकशरीरसमानः। तेनात्मसम्पदं श्लोकद्वयेन प्रदर्शयितुमाह—शास्त्रमिति। शास्त्रमिदमेव नीति-प्रवर्तकम् (प्रतिपादकम्)। प्रज्ञा अष्टगुणा बुद्धिः। धृतिरिति विषादाभावात् सन्तुष्टचित्तता, तया कदाचिदपि विषण्णचित्तो न भवति। दाक्ष्यमिति दक्षस्य भावः, कुशलता। प्रागल्भ्यमिति प्रगल्भोऽपरिषद्भीरुः, तस्य भावः। धारयिष्णुता अवधारितस्यार्थस्याविस्मरण-शीलता। उद्साह इति, उत्साहो गुणत्रययुक्तः पठ्यते। तथा च कौटिल्य—"शौर्यममर्षोदाक्ष्यं च उत्साहगुणाः" (कौ. अर्थ. ६।१।५) इति। तत्र दाक्ष्यं यत् पृथगुपात्तं, तत्र कौशल्यमेव गृह्यते। अत्र तूत्साहग्रहणात् शीघ्रकारितेत्यपुनरुक्तम्। वाग्मिता प्रशस्त वाक् यस्य स वाग्मीत्युच्यते। प्राशस्त्यं च वाचां ललितमधुरैरल्पैरेवाक्षरैर्बह्वर्थ प्रतिपादनम्। दार्ढ्यमिति प्रतिज्ञातस्यार्थस्यापरित्यागः। आपत्क्लेशसहिष्णुतेति, आपदां दैवात् समुत्पन्नानां क्लेशानां च शीतोष्णक्षुत्तृष्णादीनां च सहनत्वम् ॥ २३ ॥

प्रभाव इति। पुण्यपरमाणुघटित शरीरत्वादकोशदण्डोऽपि तद्वानिव दृश्यते, समीहितैश्च घटितैर्द्विषद्भिर्नाभिभूयते येन गुणेनासौ प्रभावः। शुचिता परदारद्रव्यहिंसारहितः शुचिः, तस्य भावः। मैत्रीति सर्वसत्वेषु मित्रभावना। त्याग इति, अर्थानां सत्पात्रप्रतिपादनम्। सत्यमित्यमृषावादः। कृतज्ञतेति, कृतमुपकारं प्रत्युपकारबुद्धया (प्रत्युपचिकीर्षया) योऽभिजानाति स कृतज्ञः, तस्य भावः। कुलमिति शुद्धोभयपक्षता। शीलं विशुद्धभावः (सुस्वभावता)। दमश्चेत्युपशमः। चकारोऽनुक्ता-नामाभिगामिकगुणानां समुच्चयार्थः। गुणाः सम्पत्तिहेतव इति, एते गुणाः सम्पत्तेरात्मसम्पदो हेतवः कारणं भवन्तीति ॥ २४ ॥

आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततोऽमात्यांस्ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ॥ २५ ॥

25. The king (the premier element or *prakṛti*) should himself adopt the principles of self restraint and then only he will enforce the practice of restraint on his ministers, (the next important element in the body politic), thereafter on his servants (attendants) and on his sons (or members of the royal family) and lastly on the subjects. (The implication must have been that a ruler of unrestrained temperament will hardly be able to enforce restraint on others and the whole administration will

be vitiated. Whereas if the king, his officers and princes follow self-restraint themselves the subjects at large will be inspired to follow suit. Hence they have been mentioned last).

एभिगुणैः सम्पन्नो राजा आत्मवानुच्यते, स च राज्यस्याद्यमङ्गं भवति। यद्यपि स्वाभाविक विनयोपयोगाच्छास्त्रनिश्चयस्वरूपविनयं सम्पाद्य तदुपयोगाद् राज्यं प्राप्तम् (तथापि) तत्रस्थेनापि राज्ञा विनयेऽभ्यास एव कार्यः। चित्तानित्यत्वान् मनुष्याणां, विषयाणां चातिमनोहरत्वात्, तमेवाभ्यासं दर्शयितुमाह—आत्मानमिति। राजा महीपतिः, आत्मानं प्रथमं विनयेनेन्द्रियजयेनोपपादयेत्, इन्द्रियजयसम्पन्नं कुर्य्यादित्यर्थः। राज्ञि जितेन्द्रिये प्रकृतयो जितेन्द्रिया भवन्तीति। "राजा यच्छीलस्तच्छोलाः प्रकृतयो भवन्ति" इति कौटिल्यः (कौ. अर्थ ८।१।१७)। ततोऽमात्यान् मन्त्र्यादीन् दण्डधारो भूत्वा ततो भृत्यांस्ततः पुत्रानिति, भृत्यनामादौ विनयेप्राप्तेऽमात्यभृत्यरक्षिताहि पुत्रा विनयेन युज्यन्त इति भावः। ततः प्रजा विनयेनेन्द्रियजयेनोपपादयेत्, जितेन्द्रियाः कुर्यादिति भावः॥ २५॥

सदानुरक्तप्रकृतिः प्रजापालनतत्परः।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते॥ २६।

---

26. A king, whose *prakṛtis* (ministers and other elements of state) are loyal and devoted to him, and who is always engaged in providing good government to his subjects (*prajāpālana-tatpara*) and who is perfectly restrained in his dealings (with all concerned) achieves great prosperity.

विनयोपपादनस्य फलं दर्शयितुमाह—सदेति। विनीतात्मा हि नृपतिः सदा भूयसीं श्रियमश्नुत इति सम्बन्धः। अनुरक्त प्रकृतिरिति। आभिगामिकगुणैरनुरक्ताः प्रकृतयोऽमात्यादिका यस्य तथोक्तः। प्रजापालनतत्पर इति। प्रजापालन एव तत्परः परमतात्पर्यं यस्य स तथोक्तः। भूयसीं श्रियमिति, भूयस्त्वं श्रियं पृथिवीभूयस्त्वेन। विनीतात्मा नृपतिः सार्वभौमो भवतीत्यर्थः॥ २६॥

प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम्।
ज्ञानाङ्कुशेन कुर्वीत वश्यमिन्द्रियदन्तिनम्॥ २७।

---

27. The mind (under the influence of sense organs) roaming wildly like the tusker elephant (*indriya-dantinam*) in the dense forest of sensual pleasures (*viṣayāraṇye*) should be brought under control by means of the goad of knowledge (*jñānāṅkuśena*).

इन्द्रियजयोपदेशं दित्सुरिन्द्रियाणां दुर्जयत्वं दर्शयितुमाह—प्रकीर्णेति। विषयशब्देन शब्दस्पर्शरूपरसगन्धाः,[18] तेषां प्रकीर्णत्वं प्रत्येकं बहुभेदत्वान्मनोरमत्वाच्च। विषया एवारण्यं तत्र धावन्तं

रिरंसया। विप्रमाथिनामिति, विशेषेण प्रमथ्नातीत्येवंशीलम्। ज्ञानाङ्कुशेन वक्ष्यमानेन, कुर्वीत विदध्यात्, वश्यं विधेयम्। इन्द्रियमेव दन्तिनं द्विपम्॥ २७॥

[13] शब्दस्पर्शरसरूपगन्धा

आत्मा प्रयत्नेनार्थेभ्यो[14] मनः समधितिष्ठति।
संयोगादात्ममनसोः प्रवृत्तिरुपजायते॥ २८।

---

[14] प्रयत्नाद

28. The soul (*ātmā*) invigorates the mind (*manah*) and the soul and mind in union work for acquiring material wealth, as the initiative for energetic action is generated by the union (*saṁyoga*) of soul and mind.

यदुक्तं ज्ञानाङ्कुशेन इन्द्रियदन्तिनं वश्यं कुर्वीतेति तदेव दर्शयितुमाह—आत्मेति। आत्मा यन्त्रवाहकः, प्रयत्नेनात्मगुणेण प्रेरितः, अर्थेभ्य इन्द्रियार्थेभ्यः शब्दस्पर्शादिभ्यो भोगार्थं, तादर्थ्ये चतुर्थीयम्। मन इति वक्ष्यमाण लक्षणम्। समधितिष्ठति समधिरोहति। तदारूढ आत्मा प्रवर्तन-निवर्तने करोतीति वेक्ष्यति। संयोगादात्ममनसोरिति, प्रयत्नप्रेरितयोरात्ममनसोः प्रवृत्तिर्गतिर्विषयं प्रत्युपजायत इति॥ २८॥

विषयामिषलोभेन मनः प्रेरयतीन्द्रियम्।
तन्निरुन्ध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः॥ २९।

---

29. Out of lust for sensual pleasures, comparable to delicious meat preparations (*viṣayāmiṣa*), sense organs are roused by the mind. Therefore such a lust should be carefully suppressed and then only one becomes self-controlled or a conqueror of the sense organs (*jitendriya*).

प्रवृत्तेः कारणमभिधातुनाह—विषयेति। विषयमेवामिषमभिलषणीयं[15] भक्ष्यं, तल्लोभेण तदभिलाषेण, मनः कर्तृ, प्रेरयतीन्द्रियं, विषयामिषं प्रति। तन्निरुन्ध्यात् प्रयत्नेन, जिते तस्मिन्, जितेन्द्रियो भवतीति शेषः। यद्यपि प्रयत्नवदात्म-मनः-संयोगात् प्रवृत्तिस्तथापि मन एव प्रधानम्॥ २९

[15] विषय एवामिष

विज्ञानं हृदयं चित्तं मनो बुद्धिश्च तत्समम्।
अनेनात्मा करोतीह प्रवर्तन निवर्तने॥ ३०।

---

30. Perfect knowledge (*vijñāna*), the heart and the soul (*hṛdaya* and *citta,* both as seats of consciousness) the mind (*manah*) and intellect

(*buddhi*) are synonymous, conveying the same meaning). As such any of these surcharged by the soul discriminates between what should be done and what should not be done.

व्यवहारार्थं वृत्त्यर्थांस्तत्पर्यायांश्च दर्शयितुमाह—विज्ञानमिति। विविधानि विज्ञानान्युत्पाद्यन्ते इति मनो विज्ञानमित्युपचर्यते। हृदयमिति, गोप्यत्वादन्तर्हितत्वाच्च। चेतनाधारत्वाच्चित्तमिति। मन इति पदार्थानां मननात्। बोधाधारत्वात् बुद्धिरित्युच्यते। ततसममिति, तदेतत् संज्ञापञ्चकं समं समानार्थं बोद्धव्यम्—अनेनेति मनसा। आत्मेति अधिष्ठाता। करोति विदधाति। इहेति शरीरे। प्रवर्तन-निवर्तने कर्तव्याकर्तव्यं करणाकरणे। ज्ञात्वैवमात्मना शास्त्रविहिताानुष्ठानेष्वेव मनसः प्रवृत्तिरनुमन्तव्या, निषिद्धेषु निरोद्धव्येति भावः ॥ ३० ॥

धर्माधर्मौ सुखं दुःखमिच्छाद्वेषौ तथैव च।
प्रयत्नज्ञानसंस्कारा आत्मलिङ्गमुदाहृतम् ॥ ३१ ॥

---

31. Performance of acts of religious merit and otherwise (*dharmā-dharmau*), happiness and sorrow, fulfilment of desires and nurturing of hatred or malice, and actions according to one's wisdom and traditional norms (*prayatna jñāna-saṁskārā*), indicate the nature of one's soul (*ātmaliṅga*).

शास्त्रविहितानुष्ठानेष्वेव मनसः (आत्मा) प्रवृत्तिरनुमन्तव्येति किं प्रमाणमित्याशङ्कते तत्र प्रमाणमनुमानमेव दर्शयितुमाह—धर्म्माधर्म्माविति। धर्मः प्रवृत्तिनिवृत्तिलक्षणः स्वर्गापवर्गफलः। अधर्मस्तद्विपरीतो निरयहेतुः। सुखमिति, स्वशब्देन बुद्धीन्द्रियाण्यभिधीयन्ते, शोभनानि परितुष्टानि येन भवन्ति स्वानि तत् सुखम्। तद्विपरीतं दुःखम्। इच्छेति कामः। तद्विपरीतो द्वेषः। तथैवेति तेनैव प्रकारेण। प्रयत्न इति येन धृतं शरीरमवतिष्ठते। ज्ञानमिति पदार्थस्वरूपबोधः। संस्कार इति अनेकजन्मकर्माभ्यासवासनावशात् सद्योजातादीनां स्तन्यपिपासादिकं येन क्रियते। आत्मलिङ्गमुदाहृतमिति। एते गुणा आत्मनोऽस्तित्वे लिङ्गं भवन्ति। उदाहृतमिति (आचार्यैरुपदिष्टम्) धूमेनाग्निवदेभिर्लिङ्गैरात्मास्तित्वं प्रतीयत इति ॥ ३१ ॥

ज्ञानस्यायुगपद्भावो मनसो लिङ्गमुच्यते।
नानार्थेषु च सङ्कल्पः कर्म चास्य प्रकीर्त्तितम्[15] ॥ ३२ ॥

---

[15] प्रकीर्त्यते

32. Different kinds of knowledge or perception do not appear simultaneously (*ayugapadbhāva*), or in other words, cognition of the one or the other perception by the mind indicates the nature of the mind, which resolves upon acquisition of various forms of material wealth. That is known as the action of the mind.

मनसोऽस्तित्वे लिङ्गमभिधातमाह—ज्ञानस्येति। जातावेकवचनं, पञ्चानामपि श्रोत्रादीनां बुद्धीन्द्रियानां शब्दादिष्विन्द्रियार्थेषु, सर्वव्यापित्वाद् आत्मनो युगपत् समकालमेव ज्ञानोत्पत्तौ प्राप्तायां भिन्नकालेषु या ज्ञानोत्पत्तिः सा मनसोऽस्तित्वे लिङ्गं भवतीत्युच्यते। अस्ति मनः संज्ञकं षष्ठं किञ्चिद् बुद्धीन्द्रियं येनात्मनि समवेतेन सकलपदार्थानां ज्ञानानि क्रमादनुभूयन्ते। तदभावे युगपद् ज्ञानोत्पत्तिः न च दृश्यते, तस्मादस्ति मन इति। नानार्थेषु च सङ्कल्प इति, नानाभूता पृथग्भूता सुख-दुःखोत्पादका ये पदार्थास्तेषु सङ्कल्प इति सम्यग्भूता कल्पना। अयं पदार्थः सुखहेतुस्तस्मादुपादेयः, तथायं दुःखोत्पादकस्तमाद् हेयः, इत्यादिका सर्वदा कल्पना, तदेवास्य कर्म प्रकीर्तितम्। आचार्यैरिति शेषः। प्रयत्नस्य चास्तित्वे संधारकाख्यो गुणो लिङ्गं, येन धृतं शरीरं तिष्ठति, करे यथा शस्त्रादिकम्। एतच्चानुक्तमपि प्रसङ्गादात्तमिति[20] ॥ ३२ ॥

[20] प्रसङ्गाद् वाच्यमिति

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चेति पञ्चमी।
पायूपस्थे हस्तपादौ वागितीन्द्रिय[16] सङ्ग्रहः ॥ ३३ ॥

---

[16] पायुपस्थं हस्तपादं वाक्चेतीन्द्रिय

33. The ear (auditory), skin (touch or perception), eyes (visual), tongue (taste), nose (smell) are the five principal sense organs. These together with excretory organs of anus and penis, organs of movement, hands and feet and the organ of speech (*vāk*) constitute the group of organs of the body (*indriya saṁgraha*).

आत्ममनसोः स्वरूपमभिधायेन्द्रियाणामिन्द्रियार्थानां चाभिधातुमाह—श्रोत्रमिति। श्रोत्रं श्रवणेन्द्रियम्। त्वगित्याद्यः शरीरधातुः। चक्षुषी दृगिन्द्रियम्। जिह्वा रसनेन्द्रियम्। नासिका घ्राणेन्द्रियम्। उक्त समुच्चये च शब्दः, इतिशब्दो बुद्धीन्द्रियपरिसमाप्तौ। पञ्चमीति पञ्चैव पृथग्विषयो-न्मोगीनि बुद्धीन्द्रियाणि। मनस्तु सर्वगामीति। तद्व्यतिरिक्तं कर्मेन्द्रियाण्यभिधीयन्ते। पायू-पस्थमिति। पायुर्मलनिर्गमनरन्ध्रम्। उपस्थमिति तस्मैवोप समीपेतिष्टतीत्यानन्देन्द्रियम्। हस्तौ च पादौ चेति हस्त आदानशक्तिः, पादो गमनशक्तिः। वाक्चेति वागिन्द्रियं, यदालापक्रिययानुमीयते। इन्द्रिसंग्रह इति। एतावन्त्येव सर्वाण्यपीन्द्रियाणि संगृहीतानि भवन्तीति ॥ ३३ ॥

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
उत्सर्गानन्दनादानगत्यालापाश्च तत् क्रिया ॥ ३४ ॥

---

34. Functions of the different organs may be enumerated as follows: perception of sound, touch, vision, taste and smell are the actions of five sensory organs; discharging excretion, accepting and giving of objects and movement (by hands and feet), and speaking are the activities of the exterior organs.

शब्द इति। वीणावेण्वादिध्वनिः। स्पर्श इति, त्वगिन्द्रियस्य त्वगिन्द्रियेण सम्बन्धः। रूपमिति, रमणीयावयवसन्निवेशः। रस इति, स्वादुवस्तुनामास्वादः। गन्धो घ्राणेन्द्रियानन्दनः सुरभिः। पञ्चम इति, पञ्चानां पूरणः, एते पञ्चापि बुद्धीन्द्रियाणां यथासंख्यमुपभोग्या विषया इन्द्रियार्थाश्चाभिधीयन्ते। तथैव कर्मेन्द्रियाणां कर्माण्यभिधीयन्ते। उत्सर्गेति, तेषां पाय्वादीनां पञ्चानामपि कर्मेन्द्रियाणामुत्सर्गादिकाः पञ्चैव क्रियाः। तद् यथा पायोर्गुदस्यमलप्रेरणं क्रिया। उपस्थस्योभयरूपस्य मिथुन सम्बन्धिन्यानान्दक्रिया[21]। हस्तयोरादानं, पादयोर्गतिः, वागिन्द्रियस्यालाप इति ॥ ३४ ॥

[21] मिथुनसबन्धिन्यानन्दनक्रिया

आत्मा मनश्च तद्विद्यैरन्तःकरणमुच्यते।
आभ्यां[17] तु सप्रयत्नाभ्यां सङ्कल्प उपजायते ॥ ३५ ।

---

[17] ताभ्यां

35. The soul and mind constitute the internal senses (*antahkaraṇa*) and by their conscious efforts, desire (*saṁkalpa*) is generated.

आत्ममनोबुद्धिकर्मेन्द्रियाणां लक्षणमभिधाय बुद्धेरन्तः[21a] परिकल्पनया कारणविभागमभिधातुमाह—आत्मामनश्चेति। अभिहितेन लक्षनेण प्रतिपाद्यते यया विद्यया साऽन्वयविद्या, सा विद्यते येषां ते तद्विद्याः कणादाक्षपादादयः तैः, तद्विद्यैः। आत्मामनश्च, अन्तःकरणमुच्यते। आभ्यां आत्ममनोभ्यां, प्रयत्न सहिताभ्यां सङ्कल्पः प्रवृत्तिः, इन्द्रियप्रवर्तनम् उपजायते ॥ ३५ ॥

[21a] बहिरन्तः परिकल्पनया करण

आत्मा बुद्धीन्द्रियाण्यर्था बहिष्करणमुच्यते।
सङ्कल्पाध्यवसायाभ्यां सिद्धिरस्य प्रकीर्तिता ॥ ३६ ।

---

36. The exterior sense organs, charged by the motor power of the soul and mind (interior senses), fulfil desires by means of firm resolve and exertions.

बहिःकरणमभिधातुमाह—आत्माबुद्धीति। आत्मा, उक्तलक्षणः। बुद्धिर्मनः। इन्द्रियाणि-[बाह्याभ्यन्तररूपोभयरूपाणि]। अर्थाः शब्दादयो बुद्धीन्द्रियाणाम् कर्मेन्द्रियाणाम् चोत्सर्गादिकाः, तेऽपि कर्मेन्द्रियाणामर्थाः प्रयोजनम्। एतत् सर्वं बहिःकरणमुच्यते। सङ्कल्पाध्यवसायाभ्यामिति। सङ्कल्पः सम्यग्भूतकल्पनम्, बुद्ध्याऽध्यवसायोऽपि प्रयत्न एव, ताभ्यां सिद्धिरस्योपभोक्तुरात्मनः प्रकीर्तिताभिहिता। तद्यथा, आत्मा प्रयत्नप्रेरितो मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमात्ममनोऽधिष्ठितं यथाऽभिलषितं विषयं न प्राप्नोति, तदा मनसि सङ्कल्प एवंविध उपजायते, अभिलषितोऽयं सुखसाधनो विषय एभिरुपायैः सम्पद्यतेति। सङ्कल्पोत्पत्तेरनन्तरं बहिःकरणे कर्मेन्द्रियवर्गेऽध्यवसायः

प्रयत्नविशेष उत्पद्यते, तेन गत्यालापादिभिर्विषयप्राप्तिः, ततः सुखानुभवलक्षणा सिद्धिरस्यात्मनः प्रकीर्तिता। तदेवमन्तःकरण प्रवृत्तिः प्रयत्नात्। प्रवृत्तेः प्रयत्नो हेतुरिति एतदन्वयमन्तःकरण मिति। वहिःकरणप्रवृत्तिरप्यध्यवसाय लक्षणात् प्रयत्नादेव, इति दर्शितं भवति ॥ ३६ ॥

उभे एते हि करणे यत्नानन्तर्यके स्मृते।
तस्मात्प्रवृत्ति[18] संरोधाद् भावयेन्निर्मनस्कताम् ॥ ३७ ।

---

[18] प्रयत्न

37. Functions of the internal and external senses depend upon desires (*pravṛtti*) or conscious efforts (*prayatna*). Hence restraint of efforts leads to detachment of the mind (free from bias, *nirmanaskatām*).

एतदेव समर्थयन्नाह—उभे इति। उभे एते, अनन्तरोक्ते। हि स्फुटम्। करणे अन्तःकरण बहिःकरणसंज्ञके। प्रयत्नान्तर्यके इति, प्रयत्नानन्तरं वर्तेते, प्रयत्नप्रेरणादित्यर्थः। तस्मादिति यस्मादेवं तस्मात् प्रवृत्ति संरोधाद् उभयात्मकस्य प्रयत्नस्यैवं संरोधं कृत्वा, भावयेद् अभ्यस्येन्निर्मनस्कताम्। यावत् प्रयत्न एवं निरुद्धो भवति, तावदात्मा मनसा न संयुज्यते, ततश्च विद्यमानमपि मनो नास्त्येव, मनः कार्याकरणात् अन्तःकरण विरोधात् प्रवृत्तिर्नोपपद्यते। एवमन्तःकरणप्रवृत्त्यभावाद् बहिःकरण प्रवृत्तेरप्यभावः, तदभावादिन्द्रियाणां विषयैः सह सम्बन्ध एव न स्यात्। कुतो वाऽदानादिसम्भव इति,[22] जितेन्द्रियो भवति। कथमपि बहिःकरणं यावत् प्राप्तेऽप्यन्तःकरणे, अध्यवसायाख्यप्रयत्न-निरोधाद् गत्यालापाद्यभावाद् भूयोऽपीन्द्रियाणां विषयैः सम्बन्धो न घटत एवंति निर्मनस्कत्वं भवितेवेति ॥ ३७ ॥

[22] कुतो वासना सम्भवति

एवं करणसामर्थ्यात् संयम्यात्मानमात्मना।
नयापनयविद्राजा कुर्वीत हितमात्मनः ॥ ३८ ।

---

38. By controlling his passions in this way (on the line indicated above), a king, who is self-restrained and well versed in the rules of justice and injustice (*nayāpanayavid*), may devote himself to his own welfare (*hitamātmanah* i.e., the welfare of the state).

एवमिति। उक्तन्यायेन, करणयोरुभयोरपि सन्निरोधात् संयम्य निरुद्धचेष्टम् आत्मानमात्मनैव च न्यायेन कृत्वा। नयापनयविद्राजा इति। नयो नीतिशास्त्र परिज्ञानम्, अपनयस्तद्विपरीतः, तौ जानातीति, नयापनयविद् राजा, महीपतिः। कुर्वीत हितमात्मनः इति। नयानुष्ठानमेवात्मनो हितं प्रति, कुर्वीतानुतिष्ठेदिति ॥ ६८ ॥

एकस्यैव हि योऽशक्तो[19] मनसः सन्निबर्हणे ।
महीं सागरपर्यन्तां स कथं ह्यवजेष्यति[20] ॥ ३९ ।

[19] एकस्यापि न यः शक्तो [20] कथं नु य विजेष्यते

39. How can one, who is incapable of controlling his own mind, hope to conquer the earth bounded by seas (in the extensive dominion of a *cakravartī* ruler) ?

करणसंरोधः कर्तुं न शक्यते चेदभिमतफलमपि न प्राप्यत इत्येतद्दर्शयितुमाह—एकस्येति। एकस्याप्यसहायस्य शक्तः समर्थो यो न भवति, मनसश्चित्तस्य, सन्निबर्हणे निग्रहणे जयकरणे। महीं सागरपर्यन्तां, पृथ्वीं समुद्रमेखलां, स राजा, कथं केन प्रकारेण, हि स्फुटं, अवजेष्यति वश्यां करिष्यति। बहुभिर्जेतव्यैरधितिष्ठितत्वादिति ॥ ३९ ॥

क्रियावसानविरसैर्विषयैरपहारिभिः ।
गच्छत्याक्षिप्तहृदयः करीव नृपतिर्ग्रहम् ॥ ४० ।

40. A king, (of unrestrained mind), given up to enjoyment of fleeting sensual plesures, not only suffers from remorse when such enjoyment is over, but also runs the risk of subjugation (*grahaṁ*) by his enemies, just as the elephant is entrapped (due to his own folly).

अनिगृहीतमनसः परिणामं दर्शयितुमाह—क्रियेति। क्रिया विषयेऽनुष्ठानलक्षणा, तस्या अवसानं प्राप्तिः तत्र विरसा विगतरसा निःस्वादा इत्यर्थः। तथाचोक्तम् "आपातरम्या विषयाः पर्यन्त परितापिनः" इति। एवंभूतैर्विषयैः स्पर्शादिभिः, अपहारिभिः मनोहारिभिः. गच्छत्याक्षिप्तहृदयो गृहीतहृदयः। करीव करिण्याः स्पर्शेण, कलकूजितशब्देन, भद्रजातिसुरभिगन्धेन, मनोहररूपेण, अर्द्ध-जग्धेन च प्रेम्ना समर्पितेन सल्लकीपल्लवकवलेनेति। विषयैरिति बहुवचनमेवं करिणि घटते। नृपती राजा। ग्रहं बन्धनम्, करीव गजराज इव प्राप्नोति ॥ ४० ॥

सज्जमानो ह्यकार्येषु विषयान्धीकृतेक्षणः ।
आवहत्युभयभयदां[21] स्वयमेवापदं नृपः ॥ ४१ ।
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्याप्तं तस्माद् तितृषं त्यजेत् ॥ क्रोड़ः ॥ (४१ क)*

[21] त्युग्रभयदां
* The verse does not appear in the text, but in the *ṭīkā* only.

41. Excessive attachment to sensual pleasures and involvement in immoral acts makes a king blind to reason (when he loses his power of

discrimination between right and wrong). He thus invites a great calamity on himself.

41a. The earth has various kinds of material resources in the form of grains, gold and precious metals, cattle and women, and as possession of them never satisfies any body, so the wise gives up hankering for them.

न केवलं विषयैराक्षिप्तचित्तः पार्थिवो ग्रहं गच्छति, उग्रभयदामापदमपि प्राप्नोति। इत्येतद्दर्शयितुमाह—सज्जेति। सज्जमान आसक्तिं गच्छन्। हि स्फुटम्। अकार्येषु परस्त्रीगमनादिषु। विषयान्धीकृतेक्षणो विषयैः स्पर्शादिभिः, अन्धीकृते ईक्षणे शास्त्रमये धर्ममये च यस्य स तथोक्तः। आवहत्युग्रभयप्रदामिति। आवहति सम्पादयति, उग्रभयदां भीषणभयदायिणीं, स्वयमेव आत्मनैव, आपदं विपदं, नृपः पार्थिवः ॥ ४१ ॥

यत् पृथिव्या इति। स्पष्टम् ॥ ४१ क ॥

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
एकैकमलमेतेषां[22] विनाशप्रतिपत्तये ॥ ४२ ।

[22] एकैकमेषां भवति

42. Each one of the five sensory organs, viz., hearing, touch, viewing of beautiful objects, taste and smell, is sufficient to bring about the ruin of a being.

भूयोऽपि विषयाणां वैषम्यं[23] दर्शयितुमाह—शब्द इति। शब्दादयः पञ्चाप्युक्तलक्षणाः। एकैकमिति, प्रत्येकम्। द्वन्द्वत्वादेकवद्भावे विभाषा पक्षे नपुंसकता। अलं समर्थम्, एतेषां मध्ये, विनाशप्रतिपत्तये ध्वंसप्राप्तये एकैकमिति ॥ ४२ ॥

[23] वैधर्म्यं

शुचि[23]शष्पाङ्कुराहारो विदूरक्रमणक्षमः।
लुब्धकाद् गीतलोभेन मृगो मृगयते वधम् ॥ ४३ ।

[23] शुचिः

43. (By way of illustration the fate of beings afflicted with the different sensual pleasures is described). The deer that lives on green grass and roots and capable of covering distant regions, seeks his own death enraptured by the melodious song of the hunter.

एतदेव दर्शयितुमाह—शुचीति। शष्पाणि बालतृणानि, तेषामङ्कुरा अग्राणि च एवाहारो यस्य। शौचं चास्याहारस्यान्यापरिगृहीतत्वम्, परस्वादानं स्तेयं भवेदित्येवं सदोषता परिहृता भवति। विदूरक्रमणक्षम इति। विशेषेण दूरमतिव्यवधानं, तत्रक्रमणं लङ्घनं, तत्र क्षम इति। अनेन वेगबलादसाध्यता

प्रतिपादिता भवति। लुब्धकाद्गीतलोभेनेति। व्याधाद् गीतलोलुपतया मृगो हरिणः, मृगयते अन्वेषयते, वधं मृत्युम् ॥ ४३ ॥

गिरीन्द्रशिखराकारो[24] लीलयोन्मूलितद्रुमः।
करिणीस्पर्शसम्मोहादालानं[25] याति वारणः ॥ ४४ ।

[24] सदृशाकारो [25] संलोभाद्

44. The male elephant of a mighty stature, capable of uprooting trees with ease, becomes a captive due to his lust for the touch of the she-elephant.

शब्दात् केवलादेव विनाशं दर्शयित्वा स्पर्शं दर्शयन्नाह—गिरीन्द्रेति। गिरीन्द्रः सुरगिरिः, तस्य शिखरं तद्वदाकारो यस्य, अनेन महाकायता प्रतिपादिता। लीलयोन्मूलितद्रुम इति, अनायासेनोत्खात महावृक्षः। अनेन महाबलता ख्यापिता। एवंविधोऽपि करिणीस्पर्शसम्मोहादिति, सहचरीविशेष-स्पर्शसञ्जातमूढतया, आलानं बन्धनं, याति प्राप्नोति, वारणो महाद्विपः ॥ ४४ ॥

स्निग्ध दीपशिखालोक विलोभित विलोचनः।
मृत्युमृच्छत्य सन्देहात् पतङ्गः सहसा पतन् ॥ ४५ ।
दूरेऽपि हि भवन् दृष्टेरगाध[26] सलिले चरण्।
मीनस्तु सामिषं लोहमास्वादयति मृत्यवे ॥ ४६ ।

[26] दृष्टेरगाधे

45. Attracted by the sight of the flame of a lamp the insect throws itself on it only to meet sure death.

46. A fish living in the depth of water beyond human sight, gulps at the iron hook with the bait of meat to meet his own death.

रूपाख्यविषयेऽपि दोषं दर्शयन्नाह—स्निग्धेति। पूर्वार्द्धं सुगमम्। मृत्युं विनाशम्। ऋच्छति प्राप्नोति। असन्देहादसंशयम्। पतङ्गः शलभः। सहसा तत्क्षणात्। पतन् स तत्रात्मानं निक्षिपन्निति ॥ ४५ ॥

रसेऽपि तथैव दोषं दर्शयन्नाह—दूरे इति। दूरे व्यवधाने, भवन् वर्तमानोऽपि, दृष्टेर्दृगिन्द्रियस्य। किल दृष्टे वस्तुन्युपायाः प्रयुज्यन्ते, तत्र दर्शनादेरभावेऽपि अगाधे दूरवगाहे सलिले जलदुर्गे, चरण् व्यवहरण्। मीनस्तु पाठीनः, सामिषं समांसं, लोहं धीवरबडिशगलाग्रखचितं, आस्वादयति तद्रसमादत्ते, मृत्यवे विनाशायेति ॥ ४६ ॥

गन्धलुब्धो मधुकरो दानासवपिपासया ।
अभ्येत्यसुखसञ्चारान् गजकर्णं झनञ्झनान्[27] ॥ ४७ ।

[27] झलञ्झलान्

47. Drawn by the sweet scent of the ichor of the elephant and feeling thirsty for it, the bee striving for it with difficulty suffers sudden death by lashes of the elephant's ears.

गन्धेऽपि दोषमभिधातुमाह—गन्धेति । गन्धलुब्धो मदामोदलोलुपः । मधुकरो भ्रमरः । दानासवपिपासया मदमद्यपानेच्छया गन्धलोभकृतयेत्यर्थादापद्यते । अभ्येति प्राप्नोति । असुखसञ्चारामतिक्लेशेन सञ्चरणं यस्यां तां, गजकर्णझलञ्झलां झलशब्दानुकरणोपलक्षितां, दन्तिनः कर्णगतिः 'झलञ्झला' इत्युपचर्यते । तामभ्येति मृत्यव इत्यनुवर्तते ॥ ४७ ॥

एकैकशो विनिघ्नन्ति[28] विषया विषसन्निभाः ।
क्षेमी नु स कथं वा[28a] स्याद्‌ यः समं पञ्च सेवते ॥ ४८ ।

[28] एकैकशोऽपि निघ्नन्ति [28a] क्षेमी तु स कथं नु

48. When each of the five passions, dangerous as poison, can by itself bring about destruction of a being, one afflicted simultaneously with all the five (passions) is hardly expected to be happy and peaceful.

प्रागुक्तमुपसंहरन्नाह—एकेति । एवमुदाहृतेन न्यायेन, एकैकशोऽपि प्रत्येकमपि निघ्नन्ति नियमेन नाशयन्ति । विषयाः स्पर्शादयः, विषसन्निभाः मारणात्मकत्वात् । क्षेमी तु कुशली, स कथं नु वितर्के, स्याद् भवेत्, न भवत्येवेत्यर्थः[24] । यः पृथ्वीशः समं समासेनाग्रहेण पञ्च विषयान् सेवते सक्तो भवति ॥ ४८ ॥

[24] न कुशली भवतीत्यर्थः ।

सेवेत विषयान् काले मुक्त्वा तत्परतां वशी ।
सुखं हि फलमर्थस्य तन्निरोधे वृथा श्रियः ॥ ४९ ।

49. A self controlled person may enjoy material pleasures in proper time without any attachment for them. Happiness is the fruit of prosperity, but when happiness is disturbed or obstructed, prosperity is of no avail.

एवं सर्वथा विषयसेवानिषेधे प्राप्ते चायं नियम इति दर्शयन्नाह—सेवेतेति । सेवेतोपभुञ्जीत, विषयान् शब्दादीन, काले तत्सेवावसरे, तथा च कौटिल्यः—"धर्मार्थाविरोधेन कामं सेवेत, न च निःसुखः स्यात्" (कौ. अर्थ, १।७।३) शब्दादि-विषयसेवानुमता । रात्रेरपि तृतीयेऽष्टमे भागे

तूर्यघोषेण संविष्ट इति। संवेशनं हि सुरतमभिधीयते, एवमहोरात्रे विषयसेवार्थं याम एकोऽनुमतः, तस्मिन्नेव भुक्त्वा परित्यज्य तत्परतां तन्निष्ठताम्। अनुमतेऽपि काले यदि मन्त्रादिकमनुष्ठेयं स्यात् तदा न तत्परेण भवितव्यमित्यर्थः। वशी जितेन्द्रियः, शास्त्रोक्तां विषयसेवां कुर्वन् राजा जितेन्द्रिय उच्यते, कस्मात् पुनर्वेलाबाधा विषयसेवाऽनुमन्यत इत्याह-सुखं हि फलमर्थस्य, यस्मात् फलं भूम्याद्यर्थस्य सुखं, तन्निरोधे तत्प्रतिषेधे, वृथा निष्फलाः श्रियो विभूतयः ॥ ४९ ॥

निकामं[29] सक्तमनसां कान्तामुखविलोकने।
गलन्ति गलिताश्रूणां यौवनेन सह श्रियः ॥ ५० ॥

---

[29] निष्कामं

50. A king excessively attached to enjoyment in the company of his wives (engaged in fondly looking at their fair countenances, even neglecting his royal duties), loses his prosperity (failing to defend it against the inroads of his enemies), repents in vain like the one shedding tears for the passing away of his youth.

विषयसेवातत्परत्वे दोषं दर्शयन्नाह—निकाममिति। निकाममत्यर्थम्, सक्तमनसां संश्लिष्टचित्तानां, कान्तामुखविलोकने प्रियतमानन प्रेक्षणे, गलन्ति च्यवन्ते, गलिताश्रूणां च्युतनयनजलानां, यौवनेन सह युवभावेन समं, श्रियो विभूतयः। एतदुक्तं भवति, यावत्कान्तामुखविलोकनासक्तमना भवति तावदुद्योगाभावाद् अरिभिरपहृते राज्ये कान्तया सहैकान्ते स्थितस्याश्रुभिः सह श्रीभिश्च यौवनं गलतीति ॥ ५० ॥

धर्मादर्थोऽर्थतः कामः कामात् सुखफलोदयः।
आत्मानं हन्ति तान्[30] हत्वा युक्त्या यो न निषेवते ॥ ५१ ॥

---

[30] तौ

51. *Dharma* (piety or observance of duties in accordance with Sāstric injunctions) leads to *Artha* (acquisition of wealth), and the latter to *Kāma* (fulfilment of desires), which ultimately produces happiness. (So Dharma Artha and Kāma, the *trivarga,* should be equally attended to). Any one (particularly, the ruler) not attending to the three (ends of life) in the proper manner (as prescribed in the Sāstras) i.e., if he is excessively attached to any one of them and neglects the others, will bring about his own destruction along with the three (ends of life).

विषयासक्तौ दोषान्तरं त्रिवर्गस्य च कार्यकारणभावं दर्शयितुमाह—धर्मादिति। धर्मात्-शास्त्रोक्तलक्षणाद् विधिनिषेधस्वरूपात् कारणभूतादर्थो भू-हिरण्य-पश्वादिस्वरूपः कार्यभूतो भवति,

इत्यर्थाल्लभते। अर्थतोऽपि कामः, स च द्विविधः सामान्यो विशिष्टश्च। तथा चोक्तं कामसूत्रे कौटिल्येनैव—"श्रोत्रत्वगक्षिजिह्वाघ्राणेन्द्रियाणामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः, अयं पञ्चविधोऽपि सामान्यः स्पर्शविशेषे त्वाभिमानिक[25] सुखानुविद्धा फलवत्यर्थप्रतीतिः प्राधान्यात्, इत्ययं विशिष्टः कामः"। कामात् सुखफलोदय इति, एवंविधात् कामाद्यत् सुखं तदेव त्रिवर्गफलं, तस्योदयः सम्भवति। एवं कार्यकारणभावं दर्शयित्वा, अन्यतमस्याप्यत्यासक्तौ दोषं दर्शयति,—आत्मानं हन्तीति, त्रिवर्गस्य मध्ये य इति य एव धर्ममर्थं कामं वा युक्त्या शास्त्रोक्त सेवाकालमाश्रया न निषेवते नानुतिष्ठति, स एव तावितरौ हत्वाऽत्मानमपि हन्ति। तद् यथा—धर्मातिसेवायामर्थः क्षीयते। ततूक्षयात् कामाभावः। अर्थमूलत्वात् कामस्य। अर्थाभावात् शरीरदण्डनाद्धर्मं चिकीर्षुः शरीरं क्षीणं करोति। ततः सन्निपाताद् धर्ममूले शरीरे विनष्टे धर्मोऽपि विनश्यति। एवमर्थोऽप्यत्यासेवितोऽर्थमूलं धर्मं न करोति। कामं च। ततश्चाप्युपचितोऽर्थश्चौरराजाग्निभिरपह्रियते। तथा कामोऽप्यत्यासेवितो धर्मार्थानुष्ठानव्युपरमात् तौ विनाश्यार्थाभावाद्दात्मानं काममपि विनाश्य शुक्रक्षयात् क्षयव्याधिना शरीरमपि नाशयति। यथा कौटिल्यः—"एकोऽप्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति"। इत्ययं च दोषः॥ ५१॥

[25] स्पर्शविशेषेष्वाभिमानिक

नामापि स्त्रीति संह्लादि विकरोत्येव मानसम्।
किं पुनर्दर्शनन्[31] तस्या विलासोल्लासितभ्रुवः॥ ५२।
रहःप्रचारकुशला मृदुगद्गदभाषिणी।
कं न नारी रमयति रक्तं रक्तान्तलोचना॥ ५३।

---

[31] दर्शनात्

52. When the very name of a woman is enough to gladden one's heart (with lust for enjoyment) and confuses his reason, what to speak of her sight with sparkling eyebrows emitting sensuous appeal.

53. Who can suppress his desire for sexual enjoyment with a woman, well versed in amorous arts (64 *kalās*), soft and endearing in speech and of lustful pink eyes ?.

विषयाणामतिमनोहरत्वम्, इन्द्रियाणां च दुर्जयत्वं दर्शयन्नाह—नामापीति। एवं नामस्पर्शविषया मनोहरा येन त्वगिन्द्रियस्पर्शं विनापि स्त्रीनामश्रवणमात्रमपि संह्लादि सम्यगाह्लादजनकं भूत्वा, विकरोत्येवमानसं चित्तं सविकारं करोति कामातुरीकरोतीत्यर्थः। किं पुनर्दर्शनं तस्या इति, तस्याःस्त्रियाः दर्शनं न विकरोति ? विकरोत्येव। किं विशिष्टायास्तस्या, विलासोल्लासितभ्रुवः, विलासेन विभ्रमेणोल्लासिते भ्रुवौ यया, तस्या दर्शनं यं मनोविकारं करोति स पुनराख्यातुमपि न शक्यत इति। पुनः शब्दोऽत्र विस्मये प्रयुक्त इति॥ ५२॥

एतदव्यापकं वाक्यं वीतरागाणामप्यत्र दर्शनात्, इत्याशङ्क्याह—रह इति। रहः प्रचारः पश्चात्मुनि प्रतिपादितचतुःषष्ट्यनुष्ठानोपगूहणचुम्बनदृष्ट्यष्टकादिपरिकल्पितः, तत्र कुशला अतिप्रवीणा, तथा मृदु इत्यकठोरं गद्गदं मन्थरं (सन्मनो) भाषितुं शीलं यस्याः, सा तथा। कमिति, कं नाम शरीरिणं, न रमयति न रमणक्रीडासक्तं करोति, अपि तु सर्वमपि करोत्येव। यस्मादाहारभयमैथुननिद्राऽभिलाषादीनां शरीरेण सहैवोत्पाद्यमानत्वात्। तथा सद्योजाते शरीरेऽसङ्कल्पितस्यापीन्द्रियस्यैवोत्थानं दृश्यते। स्तन्याभिलाषो निद्राऽकाङ्क्षाशब्दादिभ्यो भयं च। एवं शरीरधर्मत्वात् कामस्य कं पुरुषं नारी न रमयति? अपि तु सर्वमपि रमयत्येव, रक्तं कृत्वेति वाक्यशेषः। रक्तान्तलोचनेति, रक्तान्तत्वं लोचनयोर्लक्षणं रम्यता चेति ॥ ५३ ॥

मुनेरपि मनोऽवश्यं सरागं कुरुतेऽङ्गना।
प्रसन्नं कान्तिजननं सन्ध्येव शशिमण्डलम् ॥ ५४ ।
मनः प्रह्लादयन्तीभिर्मदयन्तीभिरप्यलम्[30] ।
महान्तोऽपि हि भिद्यन्ते स्त्रीभिरद्रिरिवाचलाः ॥ ५५ ।

---

[30] मन्दं यान्तीभिं

54. Even the hearts of sages are swayed by desire (for enjoyment) at the sight of beautiful women, whose countenance appears like moon beams in the clear evening.

55. The lust for women enraptures even the great men and gradually they lose control over themselves as a result of their attachment to wo.nen just as continuous drops of water pierce mountain rocks.

एतदेव द्रढयितुमाह—मुनेरिति। मुमुक्षोरपि मुनेर्महर्षेः, मनश्चेतः, सरागं साभिलाषं, जितेन्द्रियत्वादवश्यमविधेयं, कुरुतेऽङ्गना। अथवा, अवश्यं निश्चयेन सरागं कुरुतेऽङ्गना। का किमिव? सन्ध्या शशिमण्डलमिव। प्रसन्नमुनेर्मनोऽरि-षड्वर्गपरित्यागात्, कान्तिजननं सम्यग्ज्ञानोदयात्, शशिमण्डलमपि प्रसन्नं, अभ्राद्यभावात् कान्तिजननं तेजोमयत्वात्। अतः कं न नारी रमयतीति स्थितम् ॥ ५४ ॥

एतदेवाचेतनेष्वपि दर्शयितुमाह—मन इति। सकलप्राणभृतां मनः प्रह्लादयन्तीभिरानन्दहेतुत्वादपां स्त्रीणां च। मन्दं यान्तीभिर्गाम्भीर्यादपां, स्तनजघनभारात् स्त्रीणां, अप्यलमत्यर्थम्। महान्तोऽपि हि गुणैः पुरुषाः, प्रथिम्ना अचलाः, भिद्यन्तेऽन्तः प्रविश्यात्मसात् क्रियन्ते, स्त्रीभिरद्भिरिवाचलाः। एवमेते विषया अतिमनोहराः, इन्द्रियाणि च दुर्जयानीति प्रतिपादितं भवति ॥ ५५ ॥

मृगयाऽक्षास्तथा पानं गर्हितानि महीभुजाम्।
दृष्टास्तेभ्यस्तु[31] विपदः पाण्डुनैषधवृष्णिषु ॥ ५६ ।

---

[31] स्तेभ्योऽपि

56. Excessive indulgence in hunting, gambling (dice play) and drinking (wine) are utterly reprehensible for a ruler (because these passions cause his ruin). Dangers befalling to the king Pāṇḍu (who was addicted to hunting), the Naiṣadha ruler (Nala, who was addicted to gambling), and the Vṛṣṇis (Yādavas, who were addicted to drinking) are standing illustrations.

न केवलं स्त्रीविषयसेवाऽसक्तिर्दुस्त्यजा, सा च विनाशाय भवति, तज्जन्यं मृगयादिव्यसनत्रयमपीति दर्शयन्नाह—मृगयेति। स्त्रीसेवायां बलावहत्वाद् मांसाभिलाषे मृगयाव्यसनं, स्त्रीभिः सहपानगोष्ठ्यां पानव्यसनं, ताभिरेव विनोदार्थमक्षक्रीडाव्यसनम्, इति कामजोऽयं त्रिवर्गः। एतानि च गर्हितानि निषिद्धानि महीभुजां विजिगीषूणां, विजिगीषा-विघ्नविधायकत्वात्। दृष्टास्तेभ्यो व्यसनेभ्यो विपदो विनाशाः' पाण्डुनैषधवृष्णिष्विति। पाण्डुः पाण्डवपिता। नैषधो निषधाधिपतिर्नलः। वृष्णयोः यादवाः, तेषां विपदो दृष्टाः इतिहासत इति वाक्यशेषः। तद् यथा—पाण्डुर्मृगयाव्यसनी मृगचारिणं मुनिं कामार्तं मृग्या संयुज्यमानं मृगभ्रान्त्या जघान, जीवितशेषेण तेन च शप्तः "पाण्डो। यथाऽहं विनष्टस्तथा त्वमपि स्त्रीसम्प्रयोगाद्विपत्स्यसे" इति। स तथैव विपन्न इति। तथा नैषधो नलोऽक्षद्यूतेन पृथिवीं हारयित्वाऽपदं मृत्युसमामवाप। पानेन वृष्णयोऽपि, आपानगोष्ठ्या दुर्वाससः शापाद् वृष्णिक्षयकरायसमुसलरजः समुत्थैर्गुडवेत्रकैः सुरामदवशादन्योऽन्यं हन्युः (जघ्नुः) इति, दृष्टास्तेभ्यो हि विपदः। पाण्डुनैषधवृष्णिष्विति यथासंख्यं योज्यमिति ॥ ५६ ॥

कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा।
षड्वर्गमुत्सृजेदेनमस्मिन्[32] त्यक्ते सुखी नृपः ॥ ५७ ।
दण्डको[33] नृपतिः कामात् क्रोधाच्च जनमेजयः।
लोभादैलस्तु राजर्षिर्वातापिर्हर्षतोऽसुरः ॥ ५८ ।
पौलस्त्यो राक्षसो मानान्मदाद्दम्भोद्भवो नृपः।
प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः ॥ ५९ ।

---

[32] तस्मिंस्त्यक्ते [33] दाण्डक्यो

57. Lust, anger, greed, (depraved) delight (in inflicting torture on others), conceit (*māna*) and arrogance (*mada*) are the six passions (*ariṣaḍvarga*), which should be renounced (by all means), and then the king may expect to enjoy happiness.

58-59. King Dāṇḍakya for his indulgence in sensual pleasures, king Janamejaya for excessive anger, Rājarṣi Aila for his greed (for money), the demon Vātāpi for his devilish delight, the Rākṣasa king Paulasta (Rāvaṇa) for his conceit and the demon king Dambhodbhava for his arrogance (and contempt for others, however respectable) fell victims to the six passions which are the veritable enemies of man (*śatru ṣaḍvarga*).

यथा कामोऽतिवृद्धो विनाशहेतुत्वादरिः, एवं क्रोधादयोपीत्यरिषड्वर्गमभिधातुमाह—काम इति। कामस्तन्त्रोक्त लक्षणः[27] स्पर्शविशेषविषयेष्टातिमानिक[28]सुखानुविद्धा फलवत्यर्थप्रतीतिरिति। क्रोधस्तु, अविमृश्यकारितया प्राणिषु द्रोहबुद्धिः। लोभो वित्तेष्वतिलोलुपता। हर्षः कारणं विना प्राणिहिंसाजनितः परितोषः। मानो माननीयेष्ववमानबुद्धिः। मदो बलाबलेपजनित उत्सेकः। इत्ययं षड्वर्गः। एनं षड्वर्गमुत्सृजेत्। अस्मिंस्त्यक्ते सुखी नृपस्तज्जनितापायाभावादिति ॥ ५७ ॥

अरिषड्वर्गापरित्यागे दोषं दर्शयन्नाह—दाण्डक्य इति। दण्डक विषयाधिपतिर्बृहदश्वाभिधानो मृगयां गतो भृगोर्महर्षेः कन्यामकामां धर्षयन् भृगुशापात् पांसुवृष्टिभिः सबन्धुराष्ट्रो विननाश। क्रोधादिति, जनमेजयो नाम राजा अश्वमेधे कर्मणि पशुनरवक्तृत्तां पत्नीं दृष्ट्वा, ऋत्विग्भिरेव कृतमिति, तेषु विक्रान्तः, तैः शापेनाभिहत इति। लोभादिति। ऐलः पुरूरवा राजर्षिश्चातुर्वर्ण्यं सर्वस्वापहरणैरतिपीडयन् प्रजाभिरेकैकलोष्टकविधिनाभिहतः। वातापिरिति, वातापील्वलसंज्ञकौ महासुरौ कामरूपिणौ कृतकृतकवेषौ महर्षीनामन्त्र्य, एवं कृतपशुरूपं घातयित्वा तन्मांसैर्महर्षीन् भोजयति[28a] चैकः, भुक्तोत्थितेषु[29] च तेषु 'एहि एहि इल्वल।' इति ब्रूते, मृतसञ्जीवनविद्यया च जीवित इल्वलो विदार्य महर्षीनामुदरं विनिःसृत्य भ्रातुर्गले लगति। ततस्तौ हृष्टौ भवतः। एवमुपकृत्यागतेनागस्त्येन,[30] तौ निहताविति ॥ ५८ ॥

पौलस्त्य इति। पौलस्त्यो रावणो राक्षसो मानान्माननीयस्यापि राघवस्य, अनिच्छन्तीमपि सीतामसमर्पयन् विननाश। मदादिति, दम्भोद्भवो नाम महासुरोऽनेकशो विजितत्रिभुवनः, नास्ति प्रतिमल्लो मत्समः सुराणां मध्ये इति पौरुषमदेन मत्तो नारदमभ्यर्थितवान् "दर्शय मे प्रतिमल्लम्" इति, ततो नारदप्रदर्शितेन समाधिस्थितेनैव नरमुनिना, इषीकास्त्रेण स्वबन्धुराष्ट्रो दग्धो दम्भोद्भव इति। प्रयाता निधनं ह्येते दाण्डक्यादयः शत्रुषड्वर्गमाश्रिताः शत्रुषड्वर्ग एवासक्ताः। तस्मात्श्रेयोऽर्थिना शत्रुषड्वर्गत्यागेनेन्द्रियजयः कर्तव्य इति ॥ ५९ ॥

[27] कामसूत्रे कृतलक्षणः [28] विषयेत्वाभिमानिक [28a] तर्पयति
[29] भुक्त्वोत्थितेषु [30] एवमुद्रवकारिणौ तावागतेनागस्त्येन ; तदुपश्रुत्यागतेनागस्त्येन

शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः।
अम्बरीशो महाभागो[34] बुभुजाते चिरं महीम् ॥ ६० ।

इतीन्द्रियजयो नाम प्रथमं प्रकरणम्

---

[34] अम्बरीषश्च नाभागो

60. Successfully subduing the six inimical passions, Jāmadagnya (Paraśurāma) became the master of his senses (*jitendriya*), and king Ambarīṣa of matchless parts or disposition ruled over the earth for a long time.

शत्रुषड्वर्गपरित्यागे गुणं दर्शयन्नाह—शत्रुषड्वर्गमिति। शत्रुषड्वर्गं कामादिकम्, उत्सृज्य परित्यज्य, जामदग्न्यः परशुरामो जितेन्द्रियः सन्, अन्यश्च नाभागो नभागस्य राज्ञोऽपत्यं, अम्बरीषः बुभुजाते भुक्तवन्तौ, चिरं बहुकालम्, महीं पृथिवीम् ॥ ६० ॥

इतीन्द्रियजय प्रकरणम्।

२। विद्यावृद्धसंयोग प्रकरणम्।

वर्द्धयन्निह धर्मार्थौ सेवितौ सद्भिरादरात्।
निगृहीतेन्द्रियः साधु[35] कुर्वीत गुरुसेवनम् ॥ ६१ । *

---

[35] तेन्द्रियग्रामः

Prakarana : 2 Vidyāvṛddhasamyoga
(Association with the learned)

61. Respectful attitude to the wise produces increased knowledge of *Dharma* (Śāstras) and *Artha* (wealth) in this very world. Hence a man of righteous conduct (*sādhu*), fully self-restrained (*jitendriya*), is always devoted to his preceptor.

इन्द्रियजयस्य कारणं विद्यावृद्धसंयोगमभिधातुमाह—वर्द्धयन् इति। पुरुषेण पुरुषार्थद्वयोपार्जनाय प्रयतितव्यमिति, सदाचारप्राधान्यात् पुरुषार्थद्वयमुच्यते, अन्यथा चतुष्टयं धर्मः, अर्थः, कामः मोक्ष इति। धर्मपरिणामो मोक्ष इति मोक्षोधर्मः, मोक्षो धर्म्माच्च भवति, अर्थसाध्यत्वाच्च कामस्य कामोऽप्यर्थः, अतो धर्मार्थाविव प्रधानभूतौ, वर्द्धयन्, अर्थादुपार्जनं कृत्वा वृद्धिं नयन्, नानुपार्जितस्य वृद्धिरस्ति। तौ चोपादेयत्वात् सेवितौ सद्भिरादरात्। अतस्तौ वर्धयन् गुरुसेवनं विद्यावृद्धाराधनं कुर्वीत। कथमिति? निगृहीतेन्द्रियः सुतरां दण्डितेन्द्रियः 'ब्रह्मचर्यमेव तु आविद्याग्रहणात्' इति वचनात्। साधु यथा भवति प्रत्युत्थानाभिवादनादिप्रश्रयेण। "विद्यानां तु यथास्वमाचार्यप्रामाण्याद्विनयो नियमश्च" इति वचनादिति ॥ ६१ ॥

* The verse appears in the *ṭīkā* as *kroḍa*.

शास्त्राय गुरुसंयोगः शास्त्रं विनयवृद्धये।
विद्याविनीतो नृपतिर्न कृच्छ्रेष्ववसीदति ॥ ६२ ।

---

62. Association with the preceptor is essential for knowledge of the Śāstra, which leads, to the development of discipline. A king disciplined through knowledge of sciences (*vidyāvinīta*) never feels depressed in the face of troubles.

किमर्थं गुरुसेवनं कुर्वीत? इत्याह—शास्त्रायेति। शास्त्राय शास्त्रप्राप्त्यर्थम्, गुरुसंयोगो गुरुसेवनं कार्यम्। शास्त्रमिति। शास्त्रमान्वीक्षिक्यादिविद्याचतुष्टयं, शासनात् त्राणहेतुत्वात् शास्त्रं। किमर्थं? विनयवृद्धये इन्द्रियजयवृद्ध्यर्थं भवति। वृद्धिर्हि सतोऽर्थस्य नासतः, यदि स्वाभाविकं विनयबीजमस्ति, तदा शास्त्रं तस्य विनयवृद्धये भवति॥ तच्च जन्मान्तराभ्यासवासना-

यातमेवोपबृंहितमुपशान्तत्वम्। दृश्यन्ते च स्वभावतः एवोपशान्ता मेधाविनश्च। तथा चोक्तं कौटिल्याचार्येण "कृतकः स्वाभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्" (कौ. अर्थ. १।५।३-४) इति। एवं च शास्त्रं स्वाभाविक विनयस्य वृद्धयर्थं भवति। स एव शास्त्रेणोपबृंहितः कृतक इति, व्यपदिश्यते। विद्याविनीत इति, विद्योपबृंहितेन्द्रियजयः, कृतकविनयसम्पन्नौ नृपतौ राजा न कृच्छ्रेष्वापजनित क्लेशेषु, अवसीदति विषण्णो भवति। विषादात्म प्राणोपाय इति ॥ ६२ ॥

वृद्धोपसेवी नृपतिः सताम्भवति सम्मतः।
प्रेर्यमाणोऽप्यसद्वृत्तैर्नाकार्येषु प्रवर्तते ॥ ६३ ।

---

63. The king, who is devoted to the wise, is held in high esteem by the honest people. He never yields to inducements of dishonest men in committing wrongful acts.

उपकारं च वृद्धसंयोगे दर्शयन्नाह—वृद्धे ति। वृद्धोपसेवी विद्यावृद्धसेवाशीलः, नृपतिः सतां सत्पुरुषाणां, सम्मतः सेव्यो भवति। तथा प्रेर्यमाणोऽप्यसद्वृत्तैर्दास-हस्तिपकादिभिरकार्येषु परदार-दूषणादिषु न प्रवर्तते। सततं वृद्धैरुपासितत्वात् ॥ ६३ ॥

आदधानः[30] प्रतिदिनं कलाः सम्यङ् महीपतिः।
शुक्लपक्षे प्रतिचरन् शशाङ्क इव वर्द्धते ॥ ६४ ।

---

[30] आददानः

64. The king, taking proper lessons daily (regularly) in the different arts (*Kalā*, 64 in number) attains increased prosperity, just as the moon brightens up by acquiring digits (*kalā*) every day during the light fortnight (*Śuklapakṣa*).

विद्याग्रहणोत्तरकालमप्यवशिष्टविद्यांशा ग्राह्या एवेति दर्शयन्नाह—आदधान इति। विजिगीषु-वृत्तस्थोऽपि प्रतिदिनमाददानो गृह्णन् कलाश्चतुःषष्ठिरूपाः शस्त्रास्त्रगीतोप ··· दयः। सम्यगिति, तत्त्वतः, महीपति राजा। शुक्लपक्षे प्रविचरन् शशाङ्क इव वर्धते सकलकलापरिपूर्णो भपतीत्यर्थः ॥ ६४ ॥

जितेन्द्रियस्य नृपतेर्नीति मार्गानुसारिणः।
भवन्ति ज्वलिता लक्ष्म्यः कीर्तयश्च नमस्पृशः ॥ ६५ ।

---

65. A well disciplined (self restrained) ruler following the prescriptions of the science of polity shines resplendently by achieving his desired goal (predominance in the inter-statal circle or *Maṇḍala*); what is more, his fame or glory (*kīrti*) extends widely so as to reach the horizon (*nabhaspṛśah*) or the ends of the earth (*diganta*).

इन्द्रियजयलक्षण[31] विनयस्य च फलं दर्शयन्नाह—जितेन्द्रियस्येति। जितेन्द्रियस्य विनयसम्पन्नस्य,

[31] कृतकेन्द्रियजयलक्षण

नृपतेर्विजिगीषोः, नीतिमार्गानुसारिणः, नीतिरिदमेव शास्त्रं तन्मार्गानुसारिणो नयसम्पन्नस्य, भवन्ति ज्वलिता भास्वराः, लक्ष्म्यो विभूतयः। कीर्तयश्च यशांसि च, नभःस्पृशो दिगन्तव्यापिन्यः। श्रीणां बहुवचनं विभवश्रीः, वीरश्रीः, रूपश्रीः, इत्यादिव्यवहारदर्शनात्। कीर्तीनामपि कारणबहुत्वात्, शौर्य त्याग कवित्वादिकारणानामानन्त्यात्, एवं कीर्तयोऽपि बह्व्य इति ॥ ६५ ॥

> इति स्म राजा विनयी[37] नयान्वितो
> निषेवमाणो नरदेवसेवितम्।
> पदं समाक्रामति भास्वरं श्रियः
> शिरो महारत्नगिरेरिवोन्नतम् ॥ ६६ ।

[37] विनयं

66. Thus a disciplined king, always abiding by the law of polity, soon attains the illustrious position of an overlord, attended by other rulers (*naradevasevitam padam*), resembling in prosperity the towering peak of the *Mahāratnagiri* (the Sumeru parvata).

इन्द्रियजयवृद्धसंयोगादित्युपसंहरन्नाह[32]—इतीति। इति उक्तप्रकारेण, स्म स्फुटं, राजा प्रजारञ्जनात्, विनयं इन्द्रियजयं, नयान्वितो वृद्धसंयोगादवाप्तनीत्यन्वितः, निषेवमाणोऽनुतिष्ठन्, नरदेव-सेवितं षोडशमहाराजाध्यासितं, श्रियो राज्यलक्ष्म्याः पदं महाचक्रवर्तिस्थानं, समाक्रामत्यध्यास्ते। भास्वरं दीप्ततरं, शिरो महारत्नगिरेः सुमेरोः शिखरमिवेन्द्रत्वमित्यर्थः (उन्नतमकृतपुण्यैरप्राप्यं प्राप्नोतीत्यर्थः) ॥ ६६ ॥

[32] संयोगानुपसंहरन्नाह, संयोगावुपसंहरन्नाह।

> इयं हि लोकव्यतिरेकवर्तिनी
> स्वभावतः पार्थिवता समुन्नता[38]।
> बलात् तदेनां विनये[39] नियोजयेन्नयस्य
> सिद्धौ विनयः पुरःसरः ॥ ६७ ।

[38] समुद्धता [39] विनयेन योजयेन्

67. By nature the ways of sovereignty is different from that of the common people. A king is generally of haughty disposition; but he should be compelled to conform to disciplined conduct (by persuasion or even by force), as discipline is the condition precedent for learning the laws of polity.

विनयो राजकुमारे दुराधेय इति दर्शयन्नाह—इयमिति। इयं पार्थिवता राजत्वं हि। लोक-

व्यतिरेकवर्तिनी लोकोऽन्यथा वर्तते, अन्यथा पार्थिवः। यतः स्वभावतः एव समुन्नतां अप्रतिहता[32]। बलादित्याक्रम्य, तत् तस्मात् गुरुरेनां पार्थिवतां विनये नियोजयेति[33] यतो नयस्य शास्त्रानुष्ठानस्य, विनय इन्द्रियजयः, पुरस्सरः साधक इत्यर्थः ॥ ६७ ॥

[32] समुद्धता विनयाभावान्नम्रत्वरहिता [33] विनयेन योजयेत्

परां विनीतः समुपैति सेव्यतां
महीपतीनां विनयो विभूषणम्[40]।
प्रवृत्तदानो मृदुसञ्चरत्करः
करीव भद्रो विनयेन शोभते ॥ ६८ ।

[40] विनये हि भूषणम्

68. Self restraint is the real ornament of the king and for that he receives spontaneous service from all. Just as a trained elephant voluntarily shedding ichor and gracefully moving its trunk (*mṛdusañcaratkaraḥ*), is considered gentle and well behaved, so also is the disciplined king, realising usual taxes only in easy instalments from the subjects.

बलादपि यस्माद् विनये नियोजयेत्[34] तत्र गुणं दर्शयन्नाह—परामिति। विनीतो राजा परामुत्कृष्टां सेव्यतामुपैति, बहुभिः सत्पुरुषैः सेवित एव राजा भवति, अन्यच्च, महीपतीनां हि निश्चितं विनयो भूषणं दुर्लभत्वाद्विनय एवालङ्कारः। करीव भद्रो राजा विनयेन शोभते, यथा हस्तिपकाहितविनयेन भद्रः करी शोभते, तथा विद्यावृद्धाहितविनयेन राजा। प्रवृत्तदानः प्रवृत्तत्यागः, इतरः प्रवृत्तमदः, मृदुसञ्चरत्करः मन्थरत्वान्मन्दसञ्चरद्धस्तः करी, राजा मृदुसुकुमारोपक्रमेण कोशसंग्रहं प्रति सञ्चरन् प्रविशन् करः प्रजादेयोऽर्थो यास्यति[35] ॥ ६८ ॥

[34] बलादपि कस्माद् विनयेन योजयेत? [35] यस्येति

गुरुस्तु[41] विद्याधिगमाय सेव्यते
श्रुता च विद्या मतये महात्मनाम्।
श्रुतानुबन्धीनि[42] मतानि वेधसामसंशयं
साधु भवन्ति भूतये[43] ॥ ६९ ।

[41] गुरुर्हि [42] श्रुतानुवर्त्तीनि [43] वृद्धये

69. The preceptor is to be respected for imparting *vidyā*, science of polity; for, learning sharpens the intellect, and the intelligent application of the prescribed maxims leads invariably to prosperity.

किमर्थं विद्यावृद्धसंयोगः क्रियत इति दर्शयन्नाह—गुरुरिति। गुरुर्विद्यावृद्धः, विद्याधिगमायाभिहित विद्यापरिणतये सेव्यते। सा च श्रुता विद्या मतये प्रज्ञायै भवति। "श्रुताद् हि प्रज्ञा उपजायते"

इति वचनात्। महात्मनां महाबुद्धीनां वेधसां शास्त्रकाराणां मतानि दर्शितानि, श्रुतानुवर्तीनि श्रुतमनुवर्तन्ते तानि चानुष्ठीयमानानि भूतये श्रिये, साधु सम्यक्, असंशयं संशयं विना भवन्तीति ॥ ६९ ॥

सुनिपुणमुपसेव्य सद्गुरुं
शुचिरनुवृत्तिपरो विभूतये।
भवति हि विनयोपबृंहितो[44]
नृपतिपदाय[45] शमाय च क्षमः ॥ ७० ।

[44] संहितो [45] फलाय

70. A skilful and learned preceptor of pure habit should be respectfully served by the king for the purpose of acquiring material prosperity. Thereby a disciplined king becomes worthy for his position (in the inter-statal circle) and well able to maintain equilibrium.

भूयोऽपि वृद्धसंयोगजनितविनयस्य प्रयोजनं दर्शयन्नाह—सुनिपुणमिति। शास्त्रोक्तविनयनियमादिना, उपसेव्य सम्यगाराध्य, सद्गुरुमिति वक्तृत्वयुक्तं शुचिरिति बाह्याभ्यन्तरशौचयुक्तः, अनुवृत्तिपरः शुश्रूषातत्परः, विभूतये श्रिये। गुरुमुपगम्य विनयोपबृंहितः स्वाभाविकविनययुक्तः, नृपतिपदाय चक्रवर्तिस्थानाय, क्षमः समर्थस्तथा शमाय, शम उपशम इन्द्रियाणामिति भावः। स च शमो गुरुसेवाजात शास्त्रनिश्चयजनितः इन्द्रियजयः, तत्प्राप्तये च भवति ॥ ७० ॥

अविनयरतमादरादृते वशमवशं च[46]
नयन्ति विद्विषः।
श्रुतविनयविधिं[47] समाश्रितस्तनुरपि
नैति पराभवं क्वचित् ॥ ७१ ।

इति विद्यावृद्धसंयोगो नाम द्वितीयं प्रकरणम्।

इति कामन्दकीये नीतिसारे इन्द्रियजय-विद्यावृद्धसंयोगौ
नाम प्रथमः सर्गः ॥ १ ॥

[46] हि [47] निधिं

71. A powerful ruler, apparently invincible, may be easily subjugated by his enemies for lack of self restraint. But a weak ruler practising self restraint as prescribed in the Śāstras, never suffers defeat.

इन्द्रियजयविद्यावृद्धसंयोगयोरननुष्ठाने दोषम्, अनुष्ठाने च गुणं दर्शयन्नाह—अविनयरतमिति।

विनय इन्द्रियजयः शास्त्रनिश्चयश्च इष्यते, तस्य अन्यथात्वमाविनयस्तद्रतं व्यसनासक्तं, नृपमाद्-राद्रुतेऽवश्यमसाध्यमपि वशं साध्यत्वं नयन्ति विद्विषो रिपवः। श्रुतविनयविधिं समाश्रितो विनीतः, तनुरपि कृशोऽपि न याति पराभवं क्वचिद् विनययुक्तत्वादिति ॥ ७१ ॥

इति कामन्दकीय-नीतिसार-टीकायां उपाध्यायनिरपेक्षानुसारिण्यां प्रथमः सर्गः ॥

द्वितीयः सर्गः

३। विद्याविभाग प्रकरणम्

आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः।
तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद् विनयान्वितः॥ १।

Sarga—2

Prakaraṇa 3. Vidyāvibhāga (Vidyāsamuddeśa)
(Branches of learning).

1. *Ānvīkṣikī* (Science of reasoning), *Trayī* (the three Vedas) *Vārtā* (agriculture, cattle rearing and trade) and *Daṇḍanīti* (laws of government) are the essential sciences to be learnt from those well versed in theories and practical applications of these by a disciplined ruler, and he should deliberate on them.

विनयनययोरनुष्ठानं चक्रवर्तिपदप्राप्तये भवतीति मन्यमानेन नीतिसारकृतेन्द्रियजयप्रकरणमादावभिहितम्, "विनयोहीन्द्रियजयः" इति। नयो दण्डनीति-रुपलक्षण-परत्वाद् विद्याचतुष्टयमपि। तत् कुतो भवतीति, तदनन्तरं विद्यावृद्धसंयोग उक्तः। इदानीं क्रमायातो विद्यासमुद्देशः प्रतिपाद्यत इति प्रकरण सम्बन्धः। उक्तं चानुष्ठानपूर्वकं विद्यानामुद्देशमभिधातुमाह—आन्वीक्षिकीमिति। आन्वीक्षिक्याद्या विद्याश्चतस्रोऽपि वक्ष्यमाणलक्षणाः, प्रत्येकं पार्थिवो विजिगीषुः, ग्रहणादुत्तरकालं च चिन्तयेत् पर्यालोचयेत्। कैः सहेत्याह तद्विद्यैः, ता एव विद्या निर्मला येषां, तैः। तत्क्रियोपेतैस्तदनुष्ठानयुक्तैः। वक्तृत्वप्रयोक्तृत्वयुक्तैः, इत्यर्थः। विनयान्वित इतीन्द्रियजययुक्तः॥ १॥

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम्[1]॥ २।

---

[1] लोकसंस्थितिहेतवः

2. Ānvīkṣikī, Trayī, Vārtā and Daṇḍanīti are the four traditional divisions of knowledge essential for the preservation and development of the State or Society (*loka saṁsthiti*).

आदराद् विद्याचतुष्टये चिन्तने प्रयोजनमाह—आन्वीक्षिकीति। आन्वीक्षिक्याद्याश्चतस्रो विद्याः प्रत्येकमविनाशिन्य एताः स्थित्यर्थं प्रजानां स्रष्टाः सदैवानुच्छेद्याः कृताः। अतः शाश्वत्यो विद्याश्चतस्र एवैताः, नान्याः काश्चन लोकस्थितिहेतवः। तद् यथा—आन्वीक्षिकी लोकस्थितिहेतुरिदमेव वक्ष्यति—"ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति" इति। हर्षशोकौ हि नाशहेतू, तदभावाल्लोकस्थितिरिति।

तथा त्रय्यपि लोकस्थितिहेतुः—"उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधेः" इति वचनात्। तथा वार्ताऽपि लोकस्थितिहेतुः—"सम्पन्नो वार्तया साधुर्नावृत्तेर्भयमृच्छति" इति वचनात्। सम्पन्नो वार्तया कृषिपाशुपाल्यवाणिज्यस्वरूपया सर्वधान्यहिरण्यरत्नवस्त्रवाहनादि सम्पादनात्ततश्च लोकसंस्थितिरिति। दण्डनीतिस्तु सुतरामेव लोकस्थितिहेतुः। वक्ष्यति च "तयात्मानं च शेषाश्च विद्याः पायान्महीपतिः" ॥ इति। अतश्चिन्तयेद् विनयान्वित इति ॥ २ ॥

त्रयी वार्ता दण्डनीतिरिति[2] विद्या हि मानवाः।
त्रय्या एव विभागोऽयं सेय[3]मान्वीक्षिकी मता ॥ ३ ।

---

[2] नीतिस्तिस्रो [3] येय

3. According to the Mānavas (the School of Manu) Trayī, Vārtā and Daṇḍanīti are the three branches of knowledge, Ānvīkṣikī being a special branch of the Trayī.

विद्यासङ्ख्याविषये विप्रतिपत्तिं दर्शयन्नाह—त्रयीति। एता एव त्रय्यादयस्तिस्रो विद्याः, मानवा मनुशिष्या मन्यन्ते। कुत इत्याह—हि यस्मात् त्रय्या एव विशेषोऽयं, येयमान्वीक्षिकी सा त्रय्या एव विशेषः, इति मता। वक्ष्यति च—"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः" इति न्यायविस्तरो न्यायदर्शनवैशेषिके तत्पूर्वपक्षत्वेन लोकायतं चेति विस्तरोऽयम्। एवं स्वरूपाऽन्वीक्षिकी या सा त्रय्या एव विशेषः, या तु त्रयी विरुद्धार्हतबुद्धादिप्रतिषिद्धा साऽन्वीक्षिकी एव न भवति, आत्मविज्ञानाभावादिति मानवा मन्यन्ते ॥ ३ ॥

वार्ता च दण्डनीतिश्च द्वे विद्ये इत्यवस्थिते[4]।
लोकस्यार्थप्रधानत्वाच्छिष्याः सुरपुरोधसः ॥ ४ ।

---

[4] इत्यवस्थिताः

4. The disciples of the celestial priest (the School of Bṛhaspati) consider Vārtā and Daṇḍanīti as the two branches of learning for their importance in the matter of acquisition of material wealth.

बार्हस्पत्यास्तु विद्याद्वयमेव मन्यन्त इति दर्शयन्नाह—वार्तेति। वार्ता च दण्डनीतिश्चेति वक्ष्यमाणलक्षणे द्वे एव विद्ये इत्यवस्थिते[1]। कुत इत्याह—लोकस्यार्थ-प्रधानत्वादिति। चातुर्वर्ण्यस्य लोकस्यार्थो भूम्यादिलक्षणः प्रधानो वृत्तिहेतुत्वात्। स चार्थो वार्तायां लभ्यते, दण्डनीत्या पाल्यत इति भूम्यादेर्लाभपालनयोरिष्टत्वात्। या आन्वीक्षिकी सा त्रयीविशेषः। सापि त्रयी संवरणमात्र प्रयोजना। "धर्मरुचिरुपांशुदण्डं प्रयुञ्जीत" इति वचनात्। तेषां मते धर्माधर्मौ न स्तः, परलोकाभावात्। तत्र त्रयी निष्प्रयोजना, केवलं यदा उपांशुदण्डं प्रयोक्तुमिच्छेत् तदा त्रयीं संवरणार्थं प्रयुञ्जीत, तदा त्रय्यनुष्ठानसंवृतः परेषामशङ्कनीयो भवतीति। एतदेव प्रयोजनं नान्यदिति, न पृथक् विद्यात्वेन त्रयी गण्यत इति भावः। इत्येवं सुरपुरोधसः शिष्या अन्तेवासिनो मन्यन्ते ॥ ४ ॥

[1] इत्यवस्थिताः कृतनिश्चयाः।

एकैव दण्डनीतिस्तु विद्येत्यौशनसी स्थितिः[5] ।
तस्यान्तु[6] सर्वाविद्यानामारम्भाः समुदाहृताः[7] ॥ ५ ।

[5] विद्येत्यौशनसाः स्थिताः [6] हि [7] सम्प्रतिष्ठिताः

5. The school of Uśanas (Auśanasas) declare that Daṇḍanīti is the only one branch of learning and all other branches originate from and are imbedded in it.

शुक्रशिष्या एकामेव विद्यां मन्यन्त इति दर्शयन्नाह—एकेति । एकैव नान्या विद्या, दण्डनीतिरिदमेव शास्त्रं विद्येत्यौशनसैः शुक्रशिष्यैर्मता, यस्मात् तस्यामेव दण्डनीत्यां सर्वविद्यानामारम्भाः सम्प्रतिष्ठिताः । दण्डनीतेरभावान् मात्स्यन्याये च सर्वाविद्यारम्भा एव न सम्भवन्ति । अथवा, आरम्भशब्देण समुद्देशाः प्रतिष्ठिताः । तद्यथा—"आन्वीक्षिक्यात्मविद्या स्यात्" इति । "ऋग्यजुः सामनामानस्त्रयो वेदास्त्रयीस्मृता" इति । "पाशुपाल्यं कृषिः पण्यम् वार्ता" इति । "दमो दण्ड इति प्रोक्तत्वाद्दण्डो[2]महीपतिः । तस्य नीतिर्दण्डनीतिः" । इत्येवं च दण्डनीत्यामेव समुद्दिष्टत्वात् दण्डनीत्यवयवरूपेण शेषा विद्या इति भावः । तथा चोक्तम्—"नीतिसागरनिष्क्रान्ताः कुप्रज्ञा[3]मारुतेरिताः । पृथक्त्वेनेव दृश्यन्तो नानाशास्त्रमहोर्मयः" । इति ॥ ५ ॥

[2] प्रोक्तस्तात्स्थ्याद्दण्डो
[3] कुप्रज्ञा, 'सु' (आदर्शेष्वदृष्टमपि गौरवान्मतं सूचितम् ।)

विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्ध्यर्थं यासु लोको व्यवस्थितः ॥ ६ ।

6. But our *Guru* (preceptor, Viṣṇugupta) is of opinion that all the four *Vidyās* or branches of learning are essential for the purpose of achievement of the different objects in the Society.

पूर्वपक्षमभिधाय सिद्धान्तमभिधातुमाह—विद्या इति । नोऽस्माकं, गुरोः कौटिल्यस्य दर्शनमेता एव चतस्रो विद्या न न्यूना नाधिका वा । यतः पृथक् पृथक् प्रकृष्टा सिद्धिस्तत्तदर्थेषु । आन्वीक्षिक्याऽऽत्मविज्ञानस्य या सिद्धिः सा नेतरासु, त्रैय्यां धर्माधर्मज्ञानसिद्धिर्नेतरासु, वार्तायामप्यर्थानर्थसिद्धिः, दण्डणीत्यां नयानयसिद्धिः, इत्येवं पृथग् भिन्नार्थानां सिद्ध्यर्थम् । यासु लोको व्यवस्थित इति, ताः कथं परस्परस्यान्तर्भावं गच्छन्ति ? इति ॥ ६ ॥

आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ[8] ।
अर्थानर्थौ तु वार्तायां दण्डनीतौ नयानयौ[9] ॥ ७ ।

[8] स्मृतौ [9] दण्डनीत्यां नयेतरौ

7. Ānvīkṣiki instructs on the development of mental faculties (*ātmavijñāna*), the Trayī on morality and immorality (*dharmādharmau*), Vārtā on acquisition of wealth and loss of wealth (*arthānarthau*) and Daṇḍanīti on administration of justice and otherwise, of injustice (*nayānayau, nayetarau*).

विद्यानां स्वरूपभेदं दर्शयन्नाह—आन्वीक्षिकीति। प्रत्यक्षपरोक्षाभ्यामीक्षितस्यार्थस्यानु पश्चादीक्षणमन्वीक्षा। सा प्रयोजनं यस्याः सा आन्वीक्षिकी, अनुमानविद्या न्यायदर्शनवैशेषिकादिका। सा चात्मविज्ञानम्। आत्मानया विशेषेण ज्ञायत इति। आत्मविज्ञानाच्चोभयलोकसिद्धौ धर्माधर्मौ त्रयीस्थितौ इति, ततस्तौ ज्ञायेते। तथाऽर्थानर्थौ तु वार्तायां, दण्डणीत्यां नयानयौ वक्ष्यमाणलक्षणौ ज्ञायेते इत्यर्थः ॥ ७ ॥

आन्वीक्षिकी त्रयी वार्ता सती विद्या[10] प्रचक्ष्यते।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विभ्रमे[11] ॥ ८ ।

---

[10] वार्ताः सतीर्विद्याः [11] विप्लवे

8. Though Ānvīkṣikī, Trayī and Vārtā are known as the most beneficial branches of learning, still those become useless in the absence of Daṇḍanīti (i.e., in the case of non-observance of the rules of polity).

दण्डणीतेर्माहात्म्यं दर्शयन्नाह—आन्वीक्षिकीति। आन्वीक्षिकी त्रयीवार्तास्तिस्रोपि विद्याः सत्यः सद्विद्याः धर्मार्थसमधिकाः[4] प्रचक्षते। हि यस्मात् सत्योऽपि नहि सत्यः, अविद्यमाना भवन्ति ता दण्डनीतेस्तु विभ्रमे नीतिशास्त्रस्य विनाशे सति, मात्स्यन्यायसम्भवादितिभावः ॥ ८ ॥

[4] सतीः सद्विद्याः धर्मार्थसाधिकाः, धर्मार्थसंसाधिका

दण्डनीतिर्यदा सम्यङ्नेतारमधितिष्ठति।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥ ९ ।

---

9. When a ruler acquires thorough mastery over Daṇḍanīti (i.e., when perfect law and order is established by the sound application of the rules of polity), those learned in Ānvīkṣikī, Trayī and Vārtā can devote themselves to the pursuit of their respective branches of study in peace.

एतदेव दर्शयन्नाह—दण्डनीतिरिति। दण्डनीतिर्यदा सम्यङ्नेतारं यथोक्तलक्षणं नायकं विजिगीषुमधितिष्ठति, विजिगीषुणा यदा सम्यग् दण्डनीतिरनुष्ठीयत इत्यर्थः। तदा विद्याविदः शेषा आन्वीक्षिकी-त्रयी-वार्ताविदः स्वां स्वां विद्यामुपासते,[5] उपद्रवाभावादभ्यस्यन्ति ॥ ९ ॥

[5] सम्यगुपासते

वर्णाः सर्वाश्रमाश्चैव[12] विद्यास्वासु प्रतिष्ठिताः ।
ईक्षणाद्धु[13] रक्षणात् तासां तद्धर्मस्यांशभाङ्नृपः ॥ १० ।

[12] वर्णाश्चैवाश्रमाश्चैव [13] रक्षेत् ता

10. *Varṇas* (the four caste divisions) and *Āśramas* (the four stages of life) are established and supported by these branches of learning. So the king, by providing support to these branches of knowledge and to their followers, becomes entitled to a share (one-sixth share) of their earnings (religious merit and material wealth. *tad-dharmasyāṁśa-bhāk*).

विद्यारक्षणाल्लाभं दर्शयन्नाह—वर्णा इति। वर्णा ब्राह्मण-क्षत्रियवैश्यशूद्राः। सर्वाश्रमा ब्रह्मचारिगृहस्थवानप्रस्थयतयश्च। इत्यनेन प्रकारेण, आसु विद्यासु, आन्वीक्षिकी-त्रयीवार्ता-दण्डनीतिषु प्रतिष्ठिताः। यथासम्भवं प्रतिष्ठां गताः। तद्यथा—त्रय्यां ब्राह्मणाः, दण्डनीत्यां राजानः, वार्तायां वैश्याः शूद्राश्च। आन्वीक्षिक्यां ब्रह्मचर्यादयः इति। एवं च तासामवेक्षणात्[6] रक्षणात् च तद्धर्मस्य वर्णाश्रमोपार्जितस्य, अंशभाक्, षष्ठांशभाग् नृपो भवतीति ॥ १० ॥

[6] एवं च रक्षेत् ता विद्याः, तासां रक्षणात्

आन्वीक्षिक्यात्मविद्या स्यादीक्षणात्[14] सुखदुःखयोः ।
ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति ॥ ११ ।

[14] स्याद्वीक्षणात्

11. Ānvīkṣikī is that branch of knowledge which develops mental faculties (*ātmavidyā*) that looks through weal and woe (i.e., the causes, nature and ultimate results of apparent happiness and grief). Realising the real nature of them, a ruler renounces both joy and remorse (i.e., he maintains composure, not being elated with joy or depressed with sorrow).

विद्याजनितानि उपकारान्तराणि दर्शयन्नाह—आन्वीक्षिकीति। आन्वीक्षिकी उक्तलक्षणाऽऽत्मविद्या स्यादात्माऽनया ज्ञायत इति, स चात्मलिङ्गैः। उक्तं च "धर्माधर्मौ सुखं दुःखमित्याद्यात्मलिङ्गमुदाहृतम्" इति। एभिर्लिङ्गैरात्मा ज्ञायते। ईक्षणात् निरीक्षणात् सुखदुःखयोः कार्यकारणभावेन, सुखस्य दुःखस्य च किं कारणम् इति। ईक्षमानस्तयाऽन्वीक्षिक्या तत्त्वं परमार्थं, हर्षशोकौ व्युदस्यति परित्यजति। तद् यथा—धर्मः कारणं, सुखं कार्यं, अधर्मः कारणं, दुःखं कार्यम्। उभयमप्युपभोगात् क्षयं याति, नान्यथेति। एमनुमानादिप्रमाणैस्तत्त्वमीक्षमाणो विजिगीषुर्हर्षशोकौ व्युदस्यति, सुखे सम्पन्ने सत्युपभोगात् क्षीणे धर्मे भूयोऽपि दुःखं भवतीति भावयन् हर्षं त्यजति, तथैव दुःखेऽप्युपभुक्ते सुखं भवतीति शोकं परित्यजति। एवं चातिहर्षादतिशोकाच्च प्राणात्ययो रक्षितो भवति। इत्यान्वीक्षिकीजनितोऽयमुपकारः ॥ ११ ॥

ऋग्यजुः सामनामानस्त्रयो वेदास्त्रयी मता[14a] ।
उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधि ॥ १२ ।

[14a] स्मृता

12. The *Rk, Yajuh* and *Sāman* are the three Vedas, collectively known as *Trayī*. He who is well grounded in the three Vedas secures merit in this world and the next.

त्रय्याः स्वरूपमुपकारादिकं चाभिधातुमाह—ऋगिति । ऋग्-यजुः-सामेत्येवनामानस्त्रयो वेदास्त्रयी स्मृता मता । उभौ लोकौ इहलोकपरलोकाववाप्नोति, त्रय्यां त्रयीप्रतिपादितधर्मे तिष्ठन् यथाविधि विध्यनतिक्रमेण ॥ १२ ॥

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणञ्च त्रयीदं सर्वमुच्यते ॥ १३ ।

* [शिक्षा व्याकरणं कल्पो ज्योतिषामयनं तथा ।
छन्दः सह निरुक्तेण वेदाङ्गानि वदन्ति षट् ॥]

* This *śloka* appears as supplement to V. 13 in the Trivandrum edition.

13. *Vedāṅgas* for each of the four Vedas (including the Atharvaveda) are four in number,—*Mīmāṁsā* (one of the six branches of Philosophy, *Ṣaḍdarśana*), *Nyāya* (logic, another branch of Philosophy), *Dharmaśāstra* (legal codes) and *Purāṇas* (ancient compilations of semi-historical accounts). They are all related and collectively known as *Trayī*. But it is generally held that Vedāṅgas have six sections,—viz., *Śikṣā, Vyākaraṇa, Kalpa, Jyotiṣa, Chandah* and *Nirukta*.

न केवलं वेदत्रयं त्रयीति, अपरमपि त्रयीस्वरूपं दर्शयन्नाह—अङ्गानीति । अङ्गानि शिक्षा, कल्पः, व्याकरणं, निरुक्तम्, छन्दो विचितिः, ज्योतिषं चेति षडपि वेदाङ्गाणि । वेदा अथर्ववेदेन सह चत्वारः । मीमांसा वेदप्रतिबद्धमित्यपि प्रमाणशास्त्रम् । न्यायविस्तर इति न्यायदर्शनवैशेषिकादि । धर्मशास्त्रं मन्वाद्यष्टादशविधम् । पुराणमिति तदप्यष्टादशविधमेव, भारतरामायणादीनामपि पुराणेऽन्तर्भावो द्रष्टव्यः कथास्वरूपत्वात् । इदमेतत् सर्वं चतुर्दशविद्यास्थानरूपा त्रयीत्युच्यते, एतत् त्रय्याः स्वरूपमिति ॥ १३ ॥

पाशुपाल्यं कृषिः पण्यं वार्ता वार्तानुजीविनाम्[15] ।
सम्पन्नो वार्तया साधुर्न्न[16]वृत्तेर्भयमृच्छति ॥ १४ ।

[15] वार्ता तु जीवनम् ; पण्यमिहवार्ताऽभिधीयते । [16] साधु नाप्नुते

14. Cattle rearing, agriculture and trade constitute the *Vārtāśāstra* providing means of occupation or sustenance to the people (i.e., *vārtā* is the sustainer of life). The people, well off (as a result of their success in gainful occupations, *vārtayā*), are never afraid of loss of occupations (during natural calamities).

वार्तायाः स्वरूपोपकारादिकमभिधातुमाह—पाशुपाल्यमिति। पशवो हस्त्यश्वगोमहिषादयः। तान् पालयन्तीति पशुपालाः, हस्तिशिक्षाशालिहोत्रादिविदः। तेषां शास्त्रमनुष्ठानं च पाशुपाल्यम्। कृषिरिति, कर्षणं तत्प्रदिपादकं पराशरादि प्रोक्त' शास्त्रमनुष्ठानं च। पण्यमिति, पणं व्यवहारं क्रयविक्रयलक्षणमर्हतीति पण्यं, पण्य शब्देन वाणिज्यमुच्यते। एतत्त्रितयमपि वार्ता जगद्वृत्तिहेतुत्वादिह जगति वर्तनात् 'वार्ता' इत्यभिधीयते। तया सम्पन्नो वार्तया विजिगीषुः साधु यथा भवति तथा, अवृत्तेरवर्तनाद्भयं न ऋच्छति न प्राप्नोति ॥ १४ ॥

दमो दण्ड इति ख्यात[17]स्तात्स्थ्याद्दण्डो महीपतिः।
तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते[18] ॥ १५ ।

---

[17] प्रोक्त [18] नयनं नीति

15. Danda stands for suppression (of anti social elements by inflicting necessary punishments, *damo danda*). (As administration of justice is a function of the king), he is often identified with Daṇḍa. Hence the science dealing with Danda is called *Daṇḍanīti*, the term '*nīti*' is derived from '*nayana*' (leading or administering)

दण्डनीतेः स्वरूपमुपकारं च दर्शयन्नाह—दम इति। दमो वधपरिक्लेशार्थहरणादिना दमनक्रिया, दण्ड इति प्रोक्तोऽभिधीयते। तात्स्थ्यात् प्रयोक्तरि, तिष्ठतीत्युपचाराद् महीपतिर्दण्डः। तस्य नीतिरिदमेव शास्त्रं दण्डनीत्यभिधाना विद्या। नयनं दण्ड्यं प्रति दण्डस्य प्रणयनं नीतिरिहोच्यते ॥ १५ ॥

तयाऽऽत्मानं च शेषाश्च विद्याः पायान्महीपतिः।
विद्या लोकोपकारिण्यस्तत् पाता हि महीपतिः ॥ १६ ।
विद्याद् यदाभिर्निपुणश्च[19]तुर्वर्गमुदारधीः।
विद्यात् तदासां विद्यात्वं विविज्ञाने निरुच्यते[20] ॥ १७ ।

---

[19] विद्याभिराभिर्निपुणं [20] विद ज्ञाने निगद्यते

16. A king protects himself and the state by just and proper application of that knowledge (of *Daṇḍanīti*). The other branches of learning, though beneficial to the people, stand protected by the ruler.

17. Well versed in the *vidyās* (the four branches of learning) and

realising the merits of *caturvarga* (Dharma, Artha, Kāma and Mokṣa) by his sharp intellect, a king is considered proficient in learning. The root *vid* implies to know.

दण्डनीतेः फलं दर्शयन्नाह—तयेति। तया दण्डनीत्या महीपतिरात्मानं शेषाभ्यान्वीक्षिक्या-द्यास्तिस्रोऽपि विद्याः पायाद्रक्षेत्। यतो विद्या लोकोपकारिण्यस्तत्पाता तत्संरक्षको मही-पतिरिति ॥ १६ ॥

विद्यानां स्वरूपोपकारादिभिर्भेदं दर्शयित्वा, अभिधानतोऽपि दर्शयितुमाह—विद्यादिति। विद्याद् विचारयेद् यदाभिर्विद्याभिः, निपुणं यथासम्भवं, चतुर्वर्गं धर्मार्थकाममोक्षान्, उदारधीरुत्कृष्ट-बुद्धिः, तदासां विद्यानां मध्य आन्वीक्षिक्या विद्यात्वं, यस्मात् 'विद्-विचारणे' धातोरिदं रूपं, तथा चतुर्वर्गं यज्जानीयात् तत् त्रय्या विद्यात्वं 'विद्-ज्ञाने' इति धातोरिदं रूपं, तथा चतुर्वर्गं यल्लभते तद् वार्ताया विद्यात्वं, 'विद्-लाभे' इति धातोरिदं रूपं, इत्याभिधानान्यपि यासां पृथग्धातुभ्यो व्युत्पादितानि, ताः कथमन्तर्भावं नीयन्त इत्यभिप्रायः ॥ १७ ॥

इति विद्याविभाग (समुद्देश) प्रकरणम्।

४। वर्णाश्रमव्यवस्थापन प्रकरणम्

इज्याध्ययनदानानि यथाशास्त्रं सनातनः।
ब्राह्मणक्षत्रियविशां सामान्यो धर्म उच्यते ॥ १८ ॥

Prakaraṇa 4. Varṇāśramavyavasthāpana
(The social order of *varṇas* and *āśramas*).

18. Performances of sacrifice, study (of the Vedas) and offering of gifts (*dāna, dakṣiṇā*) as prescribed in the traditional *śāstras* are the customary duties (*sāmānya dharma*) of the Brāhmaṇas, Kṣatriyas and the Viśās (Vaiśyas).

वर्णाश्रमधर्मं स्वधर्मच्युतानां दण्डप्रणयनार्थमभिधातुमाह—इज्येति। स्वयं यजनम्, अध्ययनं स्वशाखायाः पठनं, दानं धर्माभिसंधिना पात्रेभ्यो धनोत्सर्गः, एतत् त्रितयं ब्राह्मणक्षत्रियविशां वर्णत्रय-स्यापि सामान्यो धर्म उच्यते ॥ १८ ॥

याजनाध्यापने शुद्धे विशुद्धाच्च[21] प्रतिग्रहः।
वृत्तित्रयमिदं प्राहुर्मुनयो[21a] ज्येष्ठवर्णिनः ॥ १९ ॥

---

[21] विशुद्धश्च [21a] प्रोक्तं मुनिभिः

19. Supervision of sacrifices (on others behalf, *yājana*), teaching and acceptance of gifts from the pious are the holy functions of the superior caste (the Brāhmaṇas), as described by the sages.

असामान्यं ब्राह्मणधर्ममाह—याजनेति। अर्थार्थं याजनमध्यापनं च शुद्धे जातिवृत्तादिभिर्विशुद्धस्य। विशुद्धाच्च प्रतिग्रहः। एतत् त्रितयं ज्येष्ठवर्णिनो ब्राह्मणस्य वृत्तित्रयं मुनयो मन्वादयः प्राहुरुक्तवन्त इति ॥ १९ ॥

शस्त्रेण जीवनं[22] राज्ञो भूतानां चाभिरक्षणम्।
पाशुपाल्यं कृषिः पण्यं वैश्यस्याजीवनं स्मृतम् ॥ २० ।

[22] शस्त्रेण।जीवनं

20. Use of arms and protection of all beings (in his dominion) are the occupations of the king (or the Kṣatriyas), and cattle rearing, agriculture and trade are the means of subsistence of the Vaiśyas.

असामान्य क्षत्रियवैश्यवृत्तिमाह—शस्त्रेणेति। राज्ञः क्षत्रियस्य शस्त्रेण कण्टकान् निहत्य, सेवया वाऽजीवनं वृत्तिः, भूतानां प्राणिनां चाभिरक्षणमर्थार्थं धर्मार्थं वा। पाशुपाल्यं कृषिः पण्यं त्रितयमपि वैश्यस्याजीवनं स्मृतं स्मृतिकारैरिति शेषः ॥ २० ॥

शूद्रस्य धर्मः शुश्रूषा[23] द्विजानामनुपूर्वशः।
शुद्धा च वृत्तिस्तस्यैव[23a] कारुचारणकर्म च ॥ २१ ।

[23] वर्णानाम् [23a] वृत्तिस्तत्सेवा

21. The duty of the Śūdra is to render service to the twice-born castes (*dvijānām*) according to the order of priority (the Brāhmaṇa, Kṣatriya and Vaiśya). Arts and crafts (*kārukarma*) and fine arts, (*cāraṇa* or *cārukarma*, minstrelsy, dance, dramas etc.) are also considered pure (accepted by the Śāstras) occupations for them.

शूद्रस्येति। शूद्रस्य द्विजानां ब्राह्मणक्षत्रियवैश्यानां शुश्रुषा त्राणवन्दनादिभिरभ्यर्चनं धर्मः। "त्रयोवर्णा द्विजातयः" इति, अनुपूर्वशो ब्राह्मणादीनां क्रमेण। शुद्धा च वृत्तिस्तत्सेवा ब्राह्मणादीनां सेवया वृत्तिर्जीविका सा शुद्धा। कारुचारणकर्म च, कारवो बधक्यादयः, चारणा रङ्गोपजीविनः. तत कर्म च वृत्यर्थं विधेयमिति ॥ २१ ॥

गुरौ वासोऽग्निशुश्रूषा स्वाध्यायो व्रतधारणम्[24]।
त्रिकालस्नायिता भैक्ष्यं गुरौ प्राणान्तिकी स्थितिः ॥ २२ ।
तदभावे गुरुसुते तथा सब्रह्मचारिणि।
कामतो वाऽश्रमान्यत्वं स्वधर्मो ब्रह्मचारिणः ॥ २३ ।

समेखली जटी दण्डी मुण्डी[25] चागुरुसंश्रयः ।
आ विद्याग्रहणाद् गच्छेत् कामतो वाऽश्रमान्तरम् ॥ २४ ।

[24] व्रतचारणम् ; व्रतचारिता

[25] समेथलो जटी मुण्डो दण्डी वा ; समेखलोऽजिनो दण्डी मुण्डो वा ; समेखलो व्रती दण्डी

22-24. Duties of a *brahmacārin* (student) include living in the family of his *guru* (preceptor), worship of the sacred fire (sacrifice), study of the Vedas (*svādhyāya*) ablutions for three times (*trisandhyā-morning*, noontime and evening) and begging for alms. A *naiṣṭhika brahmacārī* (a lifelong student) may live with the preceptor till death. In the absence of the *guru*, he may live with his (the guru's) son or with fellow brahmacāris, or if he so likes, take to the other mode of life (i.e., become a house holder, *gṛhastha*). A student, while living with the guru for study, should put on a *mekhalā* (scarf, which varies according to caste), wear matted hair or be shaven-headed and carry a staff (*daṇḍa*) in his hand. Only on completion of study he may choose to take up the next stage of life (that of a house-holder).

आश्रमाणां धर्ममभिधातुं तावद् ब्रह्मचारिधर्मं श्लोकद्वयमाह—गुराविति । ब्रह्मचारिणो गुरावुपाध्याये वासस्तत्समीपे एव वसनम् । अग्निशुश्रूषा वैश्वानराराधनम् । स्वाध्यायः स्वशाखाध्ययनम् । व्रतधारणं तदुपदिष्टानां व्रतानामनुष्ठानं, त्रिकालस्नायिता सन्ध्यात्रयेऽपि स्नानं, भैक्ष्यं भिक्षासमूह एकभिक्षानिषेधार्थः । गुरौ प्राणान्तिकी स्थितिः, नैष्ठिकस्य मुमुक्षोरयं नियमः प्राणान्तं यावद् गुरावेव स्थितिरिति ॥ २२ ॥

तदभाव इति । तदभावे गुरोरभावे गुरुसुते तथैव प्राणान्तिकी स्थितिः, तथा सब्रह्मचारिणि समानशाखाध्यायिनि प्राणान्तिकी स्थितिरिति वर्तते । कामतो वाऽश्रमान्यत्वं, यदि न नैष्ठिक उपकुर्वाण एव तदा विद्याग्रहणानन्तरमाश्रमान्यत्वं, ब्रह्मचर्यं त्यक्त्वा गृहस्थः स्यादित्ययं स्वधर्मो ब्रह्मचारिणः ॥ २३ ॥

भूयोऽपि ब्रह्मचारिधर्मविशेषमाह—स इति । स उपकुर्वाणो ब्रह्मचारी मेखली मुञ्जमेखला यस्यास्ति, जटी मुण्डी वा दण्डी पलाश (आदि) दण्डधारणात, तथैव गुरुसंश्रयः, आविद्याग्रहणात् अनन्तरोक्तं च व्रतादिकं विद्याग्रहणं यावत् कुर्यात् । तथेच्छा चेद् गृहस्थः स्यादन्यथा नैष्ठिकः स्यादित्यर्थः ॥ २४ ॥

अग्निहोत्रोपचरणं जीवनं च स्वकर्मभिः ।
धर्मोऽयं गृहिणां काले[26] पर्ववर्जं रतिक्रिया ॥ २५ ।
देवपित्रतिथीनाञ्च[27] पूजा दीनानुकम्पनम् ।
श्रुतिस्मृत्यर्थसंस्थानं धर्मोऽयं गृहमेधिनः ॥ २६ ।

[26] धर्मदारेषु कुल्येषु ; कल्येषु ; कालेषु [27] तिथिभ्यश्च

25-26. Duties of householders include performance of *Agnihotra* sacrifice with due ceremonies, following respective occupations as prescribeed for different castes, cohabiting with legally married wife in proper time avoiding holy days (*parvavarjam*), worship of gods (family deities), ancestors and guests, charity or acts of sympathy with the poor. Such a householder is a *gṛhamedhin* or performer of sacrifices prescribed for the *gṛhastha*.

गृहस्थधर्ममभिधातुमाह—अग्निहोत्रेति। गृहस्थोऽत्र चतुर्विधः ब्राह्मणादिः। अग्निहोत्रोपचरणं यथासम्भवं ब्राह्मणक्षत्रियविशामेव द्रष्टव्यम्। जीवनं च स्वकर्मभिः, ब्राह्मणस्य प्रतिग्रहेण, क्षत्रियस्य शस्त्रेण, वैश्यस्य कृषिपाशुपाल्यवाणिज्यादिभिः, शूद्रस्य कार्वादिकर्मभिरिति। अयं च नियमो धर्म्यः। धर्मदारेषु कल्येषु व्याधिरहितेषु, पर्ववर्जं पौर्णमास्यादि पुण्यतिथिवर्जं, रतिक्रिया धर्मार्थं दाररक्षणार्थं चेति ॥ २५ ॥

देवेति। तथा देवपित्रतिथिभ्यः पूजा इति प्रतीतम्। दीनानुकम्पनं बालवृद्धव्याधितादीनां शक्त्याऽनुकम्पनं दानमानादिना। श्रुतिर्वेदः, स्मृतिर्मन्वादिशास्त्राणि, तेषामर्थः, तत्र संस्थानमवस्थितिः, तदुक्तानुष्ठानतत्परेण भवितव्यमित्यर्थः। अयं च धर्मश्चतुर्विधस्यापि गृहमेधिनः गृहेऽवस्थातुं मेधा बुद्धिर्यस्य सः, तस्यायं धर्मः ॥ २६ ॥

जडत्वमग्निहोतृत्वं[28] भूशय्याजिनधारणम्।
वनवासः[29] पयोमूलनीवारफलवृत्तिता ॥ २७ ॥
प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं व्रतचारिता।
देवातिथीनां[29a] पूजा च धर्मोऽयं वनवासिनः ॥ २८ ॥

---

[28] जटित्वमग्निहोत्रित्वं [29] वने वासः [29a] देवतातिथिषु

27-28. Duties of one retired to forest (in the third or *Vānaprastha* stage of life) include keeping matted hair, performance of *Agnihotra* sacrifice, sleeping on bare earth, wearing of deer skin, living in the (seclusion of) forest, taking water, edible roots and wild rice, non-acceptance of gifts (alms), taking baths (ablutions) thrice a day, observance of necessary rites (vows) and worshipping of gods and guests.

वाणप्रस्थधर्ममभिधातुमाह—जटित्वमिति (जडत्वमिति)। जटित्वं जटाधारणम्, अग्निहोत्रित्वमग्निहोत्रपरिग्रहः, भूशय्या भूमौ शयनम्, अजिनधारणं कृष्णाजिन धारणं, वने निर्जने वासः, पयः पानीयं, मूलानि भक्ष्यवृक्षवल्लीनां, नीवाराः स्वयं जाताः सरस्सु व्रीह्याकाराः। फलान्युदुम्बरजम्बादीनाम्, एभिर्वृत्तिर्न कृष्टपच्यैरित्यर्थः ॥ २७ ॥

वनवासिधर्ममाह—प्रतिग्रहेति। प्रतिग्रहस्य हिरण्यादेर्दीयमानस्य ग्रहण निवृत्तिः, त्रिःस्नानं सन्ध्यात्रयेऽपि, ब्रह्मचारिता सन्निहितदारेणापि ब्रह्मचर्यमेवकर्तव्यम् उत्तरार्धं प्रतीतम् ॥ २८ ॥

सर्वारम्भ परित्यागो भैक्षाश्यं वृक्षमूलता[30] ।
निष्प्रतिग्रहताऽद्रोहः समता सर्वजन्तुषु ॥ २६ ।
प्रियाप्रिय[31] परिष्वङ्ग सुखदुःखाविकारिता ।
सबाह्याभ्यन्तरं शौचं वाङ्मनो[32]व्रतचारिता[32a] ॥ ३० ।
सर्वेन्द्रियसमाहारो धारणा ध्याननित्यता[33] ।
भाववसंशुद्धिरित्येष परिव्राड् धर्म उच्यते ॥ ३१ ।

[30] मूलिता [31] प्रियाप्रियाप [32] वागूयमो [32a] ब्रह्मचारिता [33] ध्यानयुक्तता

29-31. Duties of the wandering ascetic or recluse (on renunciation from the worldly mode of life in the final stage, i.e., *Sanyāsa*) include abstinence from all kinds of work, living on begging (alms), dwelling under trees (in the forest), non-acceptance of gifts, harbouring no feeling of malice or ill will, rather maintaining an attitude of impartiality or detachment for all beings, avoidance of both friendly and unfriendly companies, indifference to happiness and grief, purity of internal and external actions, frugality in speech, attachment to vows or necessary rites, exertion of full control over the sense organs and meditation with absolute concentration for the realisation of the pure knowledge (the ultimate reality).

परिव्राजकधर्मं श्लोकत्रयेऽभिधातुमाह—सर्वारम्भेति । सर्वे धर्मादि-पुरुषार्थसाधनार्था आरम्भास्तेषां परित्यागः पुष्पसमित्कुशादीनामप्यग्रहात्, भैक्ष्यं भिक्षासमूहस्तदाशित्वं, वृक्षमूलता वृक्षमूलं निवासार्थं विहितं यस्य, तस्य भावः, निष्परिग्रहता पुस्तकादेर्वस्त्रास्तरणादेरपि[7] परिग्रहो नास्तीति, अद्रोहो भूतहिंसाऽभावः, समता सर्वजन्तुषु समबुद्धिः सर्वप्राणिषूपकार्यपकारिष्वपि ॥ २६ ॥

प्रियेति । प्रियाप्रियापरिष्वङ्गः प्रियं चाप्रियं च तयोरपरिष्वङ्गः, नासक्तिः । सुखदुःखाविकारिता सुखे दुःखे च विकारो हर्षशोककृतो नास्तीति । सबाह्याभ्यन्तरं शौचं बाह्यं मृज्जलादिभिः, आन्तरं सकलसत्त्वानुग्रहबुद्ध्या । वागूयमो मौनव्रतम् । ब्रह्मचारिता विशेषात् ब्रह्मचर्यम् ॥ ३० ॥

सर्वेति । सर्वेन्द्रियसमाहारः सकलेन्द्रियानां स्व स्व विषयं प्रति धावतां समाहरणमात्मन्येव योजनम्, अयं च योगशास्त्रे प्रत्याहार इति स्मृतः । धारणेति, तस्याश्च लक्षणम्—"प्रदेशे धार्यते वायुर्मनो वाऽपि सुसंयतम् । संधारक प्रयत्नेन धारणा साऽभिधीयते ॥" इति ।

ध्यानमिति, "ध्यै चिन्तायां" चिन्तनं ध्यानं तच्च द्विविधम्, काम्यफलार्थं मोक्षफलार्थं च, तत्र काम्यफलार्थं यथा—"आत्मेन्द्रियगणं गत्वा साध्येन्द्रियगणं विशेत् । ऐक्यं गत्वा समागच्छेदिति ध्यायन् पुनः पुनः ॥ करोति पुरुषं नारी वश्यं ध्यानप्रयोगतः ।" इत्यादिकम् । मोक्षार्थं यथा—

"परमात्ममयं विश्वं तत्रात्मानं लयं नयेत् । ततश्च तन्मयोभूत्वा न किञ्चिदपि चिन्तयेत् ॥ चिन्तास्पदं निजं चित्तं तत्रैव विलयं नयेत् ।" इत्यादिकम् । एवंविध धारणाध्याननित्यता[8] तदभ्यास तत्परता । भावसंशुद्धिरिति प्राणिष्वद्रोऽबुद्धिः, एष परिव्राड् धर्म उच्यते ॥ ३१ ॥

[7] वस्त्रावरणादेवपि [8] एवंविधं धारणास्तु नित्यता

अहिंसा सुनृता वाणी सत्यं शौचं दया क्षमा ।
वर्णिनां लिङ्गिनाञ्चैव सामान्यो धर्म उच्यते ॥ ३२ ।
स्वर्गानन्ताय धर्मोऽयं सर्वेषां वर्णिलिङ्गिनाम् ।
[33a]तस्याभावे तु लोकोऽयं सङ्करान्नाशमाप्नुयात् ॥ ३३ ।

[33a] अस्याभावे

32. *Ahiṁsā* (non-injury to beings), excellence of speech, truthfulness, purity (external and internal), mercy and forgiveness are the common duties of man of all castes.

33. Observance of these duties by men of different castes ensures for them eternal bliss in the next world (*svargānanantāya*). Otherwise (for non-observance) the society becomes afflicted with (the confusion or) mixture of castes (*saṁkara*) leading to ruination.

वर्णाश्रमाणामसाधारणं धर्ममभिधाय साधारणमभिधातुमाह—अहिंसेति । वर्णिभिराश्रमिभिश्च परप्राणदारद्रव्यादीनामहिंसा कर्तव्येति शेषः । सुनृतावाणी "प्रियं तथ्यं च पथ्यं च सुनृतम्" इत्येवम्भूता सर्वेषु वाणी वक्तव्येति भावः । सत्यमित्यमृषावादः । शौचमिति बाह्याभ्यन्तरशौचं श्रुतिस्मृतिविहितम् । दया दीनानुकम्पनम् । क्षमा शान्तिः । वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यत इति प्रसिद्धमिति ॥ ३२ ॥

स्वधर्मानुष्ठाने फलमभिधातुमाह—स्वर्गेति । स्वर्गश्च, आनन्त्यं च स्वर्गानन्त्यम् । आनन्त्यं मोक्षस्तस्मै भवतीति शेषः । धर्मोऽयमनन्तरोक्तः सर्वेषां वर्णिलिङ्गिनां भवतीति । अस्य धर्मस्याभावे विनाशेऽननुष्ठानाद् विपरीतानुष्ठानाद् वा लोकोऽयं चतुर्वर्णाश्रमलक्षणः सङ्कराद् वर्णसङ्कीर्णताया धर्मसङ्कराच्च नाशमाप्नुयात्, दुरनुष्ठानजनितदैवपीडनादित्यर्थः ॥ ३३ ॥

सर्वस्यास्य यथान्यायं भूपतिः सम्प्रवर्तकः ।
तस्याभावे[34] धर्मनाशस्तदभावे जगच्च्युतिः ॥ ३४ ।
वर्णाश्रमाचारयुक्तो[34a] वर्णाश्रमविभागवित् ।
पाता[34b] वर्णाश्रमानाञ्च पार्थिवः सर्व[34c]लोकभाक् ॥ ३५ ।

---

[34] सर्वनाश [34a] युतो [34b] त्राता [34c] स्वर्ग

34. It is the king who (by the application of his *daṇḍaśakti* or coercive power) leads the people to the practice of these rules in the proper manner; in the absence of whom (the king) *Dharma* declines (the set pattern of society is disrupted), ultimately causing destruction of the world or social order.

35. Well versed in the rites and ceremonies of the different *varṇas* and *āśramas* (the four castes and the four stages of life), the ruler,

who protects and supports them, becomes entitled to the celestial domain (*Svargaloka*).

धर्मप्रवर्तकदण्डधराभावे दोषं दर्शयन्नाह—सर्वस्यास्येति। सर्वस्यास्य धर्मस्य, यथान्यायं स्मार्तन्यायं स्मार्तन्यायानतिक्रमेण भूपतिर्विजिगीषुः यथार्हं, सम्प्रवर्तकः सम्यक् प्रवर्त्तयिता दण्ड-धारिणा। तस्याभावे धर्मनाश इति भूपतेरभावे यजनादिधर्मनाशः। धर्मपाशे तस्यभूपते जगच्च्युतिः जगतो विनाशः स्यादिति भावः। तथा हि "लोकधारणाद् धर्मः" इति निरुप्यते ॥ ६४ ॥

वर्णाश्रमधर्मप्रभावमेवाभिधातुमाह—वर्णाश्रमेति। वर्णाश्रमाचारयुक्तः सदाचारतत्परः, वर्णाश्रम-विभागवित, कस्य का प्रतिपत्तिः ? इति जानाति। पाता रक्षिता वर्णाश्रमाणां पार्थिवः, शक्रलोकः स्वर्गः, तद्भाग् भवतीति ॥ ३५ ॥

इति वर्णाश्रमव्यवस्थापन प्रकरणम्।

५। दण्डमाहात्म्यप्रकरणम्

इति यस्मादुभौ लोकौ धारयित्वात्मतो[35] नृपः।
प्रजानां च ततः सम्यग् दण्डं दण्डीव धारयेत् ॥ ३६ ।

---

[35] धारयत्यात्मवान्; धारयत्मनोनृपः

Prakaraṇa : 5. Daṇḍamāhātmya
(The merits of Daṇḍa)

36. Thus (ensuring the social order by supporting the *varṇas* and *āśramas*) securing benefits for both the present existence and the next for himself and for his subjects, the self possessed king holds the *daṇḍa* or exercises his coercive power as impartially as the Lord of Death (*Daṇḍī, Yama*).

दण्डमाहात्म्यमभिधातुमाह—इतीति। इत्युक्तप्रकारेण, यस्माद् येन कारणेण, उभौ लोका विहलोकपरलोकौ धारयति, आत्मसात् करोति। आत्मवान् अभिहितात्मसम्पद्गुणसम्पन्नो जितेन्द्रियः, नृपो राजा, न केवलमात्मनः, प्रजानां चोभौ लोकौ धारयति दण्डप्रणयनादिति भावः। ततो (तस्माद्) दण्डं दण्डीव यम इव रागद्वेषरहितो धारयेत् ॥ ३६ ॥

उद्वेजयति तीक्ष्णेन मृदुना परिभूयते।
दण्डेन नृपतिस्तस्माद् युक्तदण्डः प्रशस्यते ॥ ३७ ।
त्रिवर्गं वर्द्धयत्याशु राज्ञो दण्डो यथाविधि।
प्रणीतो[36] धाऽसमञ्जस्याद् वनस्थानपि कोपयेत् ॥ ३८ ।

---

[36] प्रणीतोऽथा

37. Excessively rigorous punishments make the king repulsive to the people, whereas mild punishments make him contemptible. The best course is to award only just punishments (*yuktadaṇḍa,* proportionate to the gravity of offences).

38. Punishment awarded in conformity with law soon increases the merits of *Trivarga* (Dharma, Artha and Kāma) for the king. On the other hand punishment wrongfully awarded excites anger even among the forest-dwellers (hermits and ascetics).

दण्डधारण प्रकारमभिधातुमाह—उद्वेजयतीति। तीक्ष्णोन्यायाद्दण्डादधिकेन उद्वेजयति प्रजा इति शेषः। मृदुना न्यूनेन परिभूयते, न भवत्यस्य दण्डे पीडेति, दण्डाद्भयं नास्तीति परिभूयते। दण्डेण न्यूनाधिकेन द्वेषः परिभवो वा भवतीति यस्मात् तस्मान्नृपती राजा युक्तदण्डः प्रशस्यते सुविज्ञात प्रणयणादिति॥ ३७॥

तदेव द्रढयितुमाह—त्रिवर्गमिति। त्रिवर्गं धर्मार्थकामान्, वर्धयति वृद्धिं नयति, आशु शीघ्रं, राज्ञो दण्डो यथाविधि सुविज्ञात प्रणीतत्वात्। दुःप्रणीतो हि दण्ड्येषु दुःपातितो हि, यस्माद्वनस्थानपि लोकव्यवहारबाह्यानपि कोपयेत्। उक्तं च गुरुणा— "सुविज्ञात प्रणीतोहि दण्डः प्रजा धर्मार्थ-कामैर्योजयति। दुःप्रणीतोहि कामक्रोधाभ्यामज्ञानाद्वा वानप्रस्थ परिव्राजकानपि कोपयति, किं पुनः गृहस्थान्?" (कौ. अर्थ १।४।११-१२)। असमञ्जस्यात्—रागद्वेषाभ्यां समञ्जसभावो माध्यस्थं तदभावो, समञ्जस्यं तस्मादास्तामेवं तस्मात्॥ ३८॥

लोकशास्त्रानुगो नेयो दण्डो नोद्वेजनः[37] श्रिये।
उद्वेजनादधर्मस्तु[38] तस्माद् भ्रंशो[39] महीपतेः॥ ३९।

[37] दण्डोऽनुद्वेजनः [38] स्यात् [39] ध्वंसो

39. Punishments should be just, in conformity with the Śāstras (legal texts) and conducive to the people (respecting their customs and traditions). When the mode of punishment does not infuriate the people, it brings about prosperity, otherwise due to excitement of the people the course of *dharma* is disrupted (*adharma* flourishes) ultimately causing ruin of the ruler.

लोकशास्त्राविरोधेन दण्डः कार्य इति दर्शयन्नाह—लोकेति। लोको वर्णाश्रमादि जनपदः, शास्त्रं श्रुतिस्मृत्यादि, तदनुगतस्तदनुरूपः, दण्डो नेयः, दण्ड्यं प्रति विधेयः, शास्त्रानुगोऽपि यदि लोकानुगो न भवति, यदि लोकानुगोऽपि शास्त्रानुगो न भवति, स उद्वेजनो यथा—लाटविषये सकृद्ग्रहणे दण्डाभावः, यथा वा आभीरविषये ज्येष्ठभ्रातृभार्या ग्रहणादिः, इत्येवं लोकशास्त्राविरोधेन दण्डः क्रियमाणो नोद्वेजनः, स च विजिगीषोः श्रिये भवति। उद्वेजनाल्लोकोद्वेगकरणात्, अधर्मस्तु देशादिधर्मनिषेधाद् भवतीति शेषः। तस्माद् भ्रंशो विनाशः, महीपतेर्भवतीति शेषः॥ ३९॥

परस्परामिषतया जगतो भिन्नवर्त्मनः ।
दण्डाभावे परिध्वंसी मात्स्यो न्यायः प्रवर्तते ॥ ४० ।
जगदेतन्निरालम्बं[40] कामलोभादिभिर्बलात् ।
निमज्ज्यमानं निरये राज्ञा दण्डेन धार्य्यते[40a] ॥ ४१ ।

[40] निराक्रन्दं [40a] राज्ञो दण्डेन साध्यते

40. In the world (society) people move about in different directions trying to push own interests by devouring (usurping) others, as if out of greed for their flesh (*āmiṣatayā*). In the absence of *daṇḍa* (unless controlled and subdued by the king, *daṇḍadhara*) *mātsyanyāya* (the law of fishes, the big fish swallows the smaller fry) prevails and the whole social order perishes.

41. The society, helpless due to predominance of passions like lust, greed etc, susceptible to be plunged in the depth of hell, is held in proper order by the right application of *daṇḍa* (coercive power) by the king.

महीपतेर्जगतश्च ध्वंसकारणमभिधातुमाह—परस्परेति । परस्परमन्योऽन्यम्, आमिषतया भक्ष्यभक्षकत्वेन स्थितस्य, जगतो विश्वस्य, भिन्नवर्त्मनो वर्णादीनां भिन्नमार्गत्वे दण्ड्यत्वात् । दण्डाभावे दमनक्रियाभावे, परिध्वंसी विनाशशीलः, मात्स्यो न्यायः प्रवर्तत इति ॥ ४० ॥

एतदेव द्रढयितुमाह—जगदिति । एतच्चतुर्वर्णाश्रमादिस्वरूपं जगत्, निरालम्बं भुत्वा आधाररहितं, कामलोभादिभिः कामक्रोधलोभमदमानहर्षादिभिः, बलाद् बलेन, निमज्ज्यमानं विक्षिप्यमाणं, निरये रोरवादि नरके, राज्ञा विजिगीषुणा, दण्डेन बन्धादिना धार्यते यथा कश्चिदगाधपङ्के पतन् दण्डवता दण्डेन वंशादियष्ट्या धार्य्यत इति ॥ ४१ ॥

इदं प्रकृत्या विषयैर्वशीकृतं परस्परं
स्त्रीधनलोलुपं जगत् ।
सनातने वर्त्मनि साधु सेविते प्रतिष्ठते
दण्डभयोपपीडितम्[41] ॥ ४२ ।

[41] भयातिपीडितम् ; भयादिपीडितम्

42. Thus the world (society), by nature dominated by the lust for material pleasures including passionate desires for women and wealth, can be made to follow the traditional ways indicated by the pious (in the śāstras) out of fear for the infliction of *daṇḍa*.

उपसंहरन्नाह—इदमिति । इदं जगदुक्तलक्षणं, प्रकृत्या स्वभावेनैव, विषयैः स्पर्शादिभिः, वशीकृतं निघ्नीकृतं, आहारभयमैथुननिद्रादीनां शरीरेणैव सहोत्पद्यमानत्वात्, अतएव परस्पर-स्त्रीधन-

लौल्यं लम्पटं जगत्। सनातने पुण्ये स्वर्गानन्त्यगामिनि, वर्त्मणि मार्गे, साधुसेविते मुमुक्षुभिरध्यासिते, प्रतिष्ठते प्रस्थानं करोति दण्डभयेनैव नान्येनोपपीडितमिति ॥ ४२ ॥

[9] शरीरेष्वेव

नियतविषयवर्ती प्रायशो दण्डयोगात्

जगति परवशेऽस्मिन् दुर्लभः साधुवृत्तः।

कृशमथ विकलं वा व्याधितं वाऽधनं वा[41a]

पतिमिव कुलनारी दण्डनीत्याऽभ्युपैति[41b] ॥ ४३ ।

[41a] वाधनं वा पतिमपि [41b] दण्डभीत्या

43. In the society of ours men always run after material pleasures and are dominated by them unless restrained by *daṇḍa*. A righteous person is indeed rare. Just as a lady of high family (*kulanārī*) serves her husband even if he is weak and lean or deformed, diseased or poor, only out of fear of *daṇḍa* (social sanctions).

एतदेव द्रढयितुमाह—नियतेति। नियतः शास्त्रनियमितः, विषयोनुष्ठानमार्गः, तद्वर्ती तत्र वर्तनशीलः, प्रायशो बाहुल्येन, दण्डयोगादेव भवतीति शेषः। जगति संसारे, परवशे कामाद्यरिषड्वर्ग-वशे, अस्मिन् दुर्लभो दण्डं विना साधुवृत्तः शास्त्रोक्तानुष्ठानरतः। तदेवोत्तरार्धेन दर्शयन्नाह—कृशमिति स्वभावक्षीणधातुं विकलं वा सुरतसुखप्राप्तिकलारहितं, व्याधितं वा क्षयादिव्याधियुक्तं, अधनं वा दरिद्रं, इत्येतेष्वपि विरागकारणेषु सत्स्वपि, पतिं परिणीतं भर्तारमपि परगृहदास्यपि भूत्वा पत्युपाधेय (या) तिक्रमार्हाऽपि कुलनारी कुलस्त्री दण्डभीत्याऽभ्युपैति पतित्वेनाङ्गीकरोति। दण्डश्च तस्याः शास्त्रोक्तः तथा च कौटिल्यः "भर्तारं द्विषती स्त्री सप्तार्तवान्यम[10]दण्डमाना तदानीमेव स्थाप्याभरणं निधाय भर्तारं अन्यया सह शयानम् अनुशयीत" (कौ. अर्थ. ३।३।१२)। इत्येवंविधस्य निष्कारणाप्यधिको दण्डो नास्तीति ॥ ४३ ॥

[10] भर्तारं द्वेष्टि या नारी सुप्तासवान्य

इति परिगणितार्थः प्राप्तमार्गानुसारी[42]

नियमयति यतात्मा[43] यः प्रजा दण्डनीत्या।

अपुनरपगमाय प्राप्तमार्गप्रचारा

सरित इव समुद्रं सम्पदस्तं विशन्ति ॥ ४४ ।

इति दण्डमाहात्म्य प्रकरणम्।

इति कामन्दकीये नीतिसारे विद्याविभागो वर्णाश्रमव्यवस्थापनदण्डमाहात्म्यञ्च नाम द्वितीयः सर्गः ॥ २ ॥

[42] शास्त्रमार्गानुसारी [43] जितात्मा

44. Thus a king, who is conversant with the results of right and wrong actions and who follows the course of action indicated in the holy texts, can regulate the lives of his subjects by the application of *Daṇḍanīti* and acquire wealth from all sources in the same way as rivers flow into the sea with all their water resources.

दण्डप्रणयने विजिगीषोः प्रयोजनमभिधातुमाह—इतीति। इत्येवमुक्तन्यायेन परिगणिता निर्णीता अर्था दण्डस्य गुणदोषाः, तदनुरूपाश्च वधादयो दण्डा येन स तथा, अतएव शास्त्रमार्गानुसारी नियमयति, एवं वर्तितव्यमिति नियमं करोति, यतात्मा जितेन्द्रियः, यो राजा प्रजा दण्डनीत्या। प्राप्तः सन्मार्गेषु प्रचारो याभिस्ताः समुद्रमिवापुनरपगमायापुनर्निवृत्तये सम्पदो लक्ष्म्यस्तं विशन्ति, सरित इव, यथा सरितां समुद्रे प्रतिष्ठानापगमो नास्तीति, तथा सम्पदामपि यथोक्तगुणं विजिगीषुं प्राप्तानामिति[11] ॥ ४४ ॥ इति दण्डमाहात्म्यप्रकरणम्।

इति कामन्दकीयनीतिसारटीकायां उपाध्यायनिरपेक्षानुसारिण्यां द्वितीयः सर्गः ॥

[11] विजिगीषुं प्राप्तानामपि

तृतीय सर्गः

६। आचारव्यवस्थापन प्रकरणम्

दण्डं दण्डीव भूतेषु धारयन् धरणीपतिः[1] ।
प्रजाः समनुगृह्णीयात् प्रजापतिरिव स्वयम् ॥ १ ॥

[1] धरणीसमः

Sarga—3

Prakaraṇa 6. Ācāravyavasthāpana

(Rules of conduct)

1. The king shall use his *daṇḍa* (award punishment) as firmly as *Daṇḍī* (or the Lord of Death) but blended with impartiality of the nature of the Earth (*dharaṇīsamaḥ*) and compassion as is shown by the Lord *Prajāpati*, the creator, to his own created beings (*prajā*).

दण्डमाहात्म्यप्रदर्शनाद्दण्डस्य तैक्ष्ण्यप्राप्तिर्मा भवत्विति सदाचारस्थापनमभिधातुमनन्तरसर्गेण सम्बन्धं दर्शयन्नाह—दण्डमिति। दण्डं यथोक्तलक्षणं, दण्डीव धर्मराज इव, भूतेषु वर्णाश्रमेषु, धारयन् तुल्या धृतमिव न्यूनाधिकत्वाभावात्, धरणीसमः क्षान्त्या, प्रजा वर्णाश्रमस्वरूपाः, समनुगृह्णीयाद् त्रिनयापादनेन, प्रजापतिरिव स्रष्टेव। तथा चोक्तम्—प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणेत्यादिना। प्रजापतिः कारुणिकः सृष्टेरनन्तरं स्थितिमकल्पयदिति। तद्वत् विजिगीषुरपि स्वयं प्रजाः समनुगृह्णीयादिति ॥ १ ॥

वाक् सुनृता दया दानं दीनोपगतरक्षणम् ।
इति सङ्गः सतां साधु[2] ह्येतत् सत्पुरुषव्रतम् ॥ २ ॥

[2] साधुहितं

2. Truthful speech, kindness, charity (in deserving cases), protection to the poor and to those seeking refuge and keeping company with honest persons are the beneficial practices (*vrata*) of a man of good conduct.

सत्पुरुषव्रतं दर्शयन्नाह—वागिति। वाक् वाणी, सुनृता प्रिया सत्या च, "प्रियं सत्यं च सुनृतम्" इति वचनात्। दयाऽनुकम्पा, दानं प्रकृतत्वादापन्नत्राणार्थं, दीना अनुप्राह्याः, परैः पीड्यमाना ये उपगताः शरणमागताः, तद्रक्षणमिति तथा सङ्गः, सतां सद्व्रतानां च सम्बन्धः, तदेतत् साधु शुभतरं, सत्पुरुषव्रतम्। एतच्चोभयलोकसंसाधकत्वाद् हितमिति ॥ २ ॥

आविष्ट इव दुःखेन तद्गतेन[3] गरीयसा ।
समन्वितः करुणया परया दीनमुद्धरेत् ॥ ३ ।

---

[3] तद्गतेम

3. One should express heartfelt sympathy with the grief-stricken and out of mercy relieve him of his grief.

यथा दण्ड्येषु दण्डो धार्यत इत्येवमनुग्राह्येष्वनुग्रहो विधेय इति दर्शयन्नाह—आविष्ट इति । प्रजासु ये दुःखिता व्याधिक्षुधादिभिः, तद्गतेन गरीयमा दुःखेनाविष्ट इव जातावेग इव, तद्दुःखमात्मन एवेति मन्यमानः, करुणया परया समन्वितः, दीनमुद्धरेज्जीमूतवाहन इवेति ॥ ३ ॥

न[4] तेभ्योऽभ्यधिकाः सन्तः सन्ति सत्पुरुषव्रतैः[4a] ।
दुःखपङ्कार्णवे मग्नं दीनमभ्युद्धरन्ति ये ॥ ४ ।

---

[4] न हि [4a] व्रताः

4. There can be no better man of good conduct than he who saves the man out of the miry pool of grief.

एतदेव द्रढयितुमाह—नेति । तेभ्योऽभ्यधिका न सन्त्यन्ये, दुःखपङ्कार्णवे मग्नं दीनमुद्धरन्ति ये त एव सन्तस्त एव सत्पुरुषव्रता इति ॥ ४ ॥

दयामास्थाय परमां धर्मादविचलन् नृपः ।
पीड़ितानामनाथानां कुर्यादश्रुप्रमार्जनम् ॥ ५ ।

---

5. Inspite of sincere feelings of kindness a king should not flinch from the path of his *dharma* (i.e., protection of his royal interest). Otherwise he should take steps in wiping out the tears of the afflicted and the helpless.

भूयोऽपि दीनोद्धरणप्रकारमाह—दयामिति । दयामनुकम्पाम्, आस्थायाङ्गीकृत्य, परमां निर्व्याजां धर्मादविचलन्निति क्षत्रधर्मात् । यद्यपि परमदययाऽधिष्ठितस्तथापि शत्रुविषये दाहलोपादौ कर्तव्ये यदि दयया तन्न करोति तदा विजिगीषु—धर्माच्चलितो भवति । एवं च दयालुता विषयविभागेन कर्तव्येति भावः । पीडितानां चौरादिभिः, अनाथानां त्राणसमर्थ नाथरहितानां, कुर्यादश्रुप्रमार्जनं पीडापनयनादश्रूणि प्रमार्जितानि भवन्ति । वर्णाश्रमसाधारणोऽपि पुनरुच्यते, आदरप्रदर्शनार्थम् ॥ ५ ॥

आनृशंस्यं परो धर्मः सर्वप्राणभृतां यतः ।
तस्मात् राजाऽनृशंस्येन पालयेत् कृपणं जनम् ॥ ६ ।

---

6. That non-malignancy (*ānṛśaṁsya*, absence of feelings of cruelty or in other words, compassion) is the best policy, is the unanimous opinion of all sensible beings. A ruler should therefore look after the poor subjects (*kṛpaṇaṁ janaṁ*) imbued with mercifulness.

आनृशंस्यमिति। नॄन् शंसतीति, 'शसु हिंसायाम्' इति पाठात्। नृशंसो हिंस्रः। तद्विपरीतोऽनृशंसः, तस्य भाव आनृशंस्यं दयालुत्वमेव पर उत्कृष्टो धर्मः। सर्वप्राणभृतां मतोऽनुमतः यत एवं तस्माद् राजाऽनृशंस्येन पालयेत् कृपणं दीनं, न तु शत्रुमित्यर्थः ॥ ६ ॥

न हि स्वसुखमन्विच्छन् पीड़येत् कृपणं नृपः।
कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ॥ ७ ।

---

7. Even out of consideration of his own happiness a king should not persecute the poor. Because the poor (being helpless), when persecuted, bring ruin upon the king himself (by constant curses).

कृपणपीडने दोषं दर्शयन्नाह—न हीति। यथा कश्चिद् व्याध्याद्युपशमेन सुखमन्विच्छन् मनुष्य उपहारं देवताभ्यः प्रयच्छति, एवं प्रकारैरन्यैरपि कारणैः कृपणं जनं, हि स्फुटं, न पीडयेत्। हि यस्मात् कारणात् कृपणः पीड्यमानो जनः, मन्युना पीडाजनिताऽक्रोश शोकरुदितेन, हन्ति विनाशयति पार्थिवं नृपम् ॥ ७ ॥

को हि नाम कुले जातः सुखलेशेन लोभितः[5]।
अल्पसाराणि भूतानि पीड़येदविचारयन् ॥ ८ ।

---

[5] सुखलेशोपलोभितः

8. Which man of noble birth out of lust for his own happiness would like to persecute unjustly a poor man of little means ?

एतदेव दर्शयन्नाह—को हीति। को नाम, हि स्फुटं, कुले विशुद्धे जातः, सुखलेशोपलोभितोऽल्पसाराणि दुर्बलानि, भूतानि प्राणिनः, पीडयेत् क्लेशं प्रापयेत्, अविचारयन् दोष विचारमकृत्वैव। यस्तु पीडयेत् स कुलीनो न भवतीति भावः ॥ ८ ॥

आधिव्याधिपरीताय अद्य श्वो वा विनाशिने।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ ९ ।

---

9. Knowing fully well that the human body is always susceptible to mental and physical sufferings and to ultimate (inevitable) decay (death) either today or tomorrow (sooner or later), who would for the sake of it like to commit sinful acts ?

एतदेव द्रढयितुमाह—आधीति। आधयो मनःपीडाः, व्याधयो ज्वरादयः, तैः परीताय,

आसमन्ताद् व्यासाय। एवं चाद्य स्वो वा विनाशिने विनश्वराय, कोहि नाम विवेकी शरीराय शरीर-सुखसम्पादनार्थं, धर्मपितमधर्मिष्ठं, समाचरेदविवेकिवदाचरेदिति ॥ ९ ॥

[6]आहार्यैर्नीयमानं हि क्षणं दुःखेन हृद्यताम्।
छायामात्रकमेवेदं पश्येदुदकबिन्दुवत् ॥ १० ।

[6] ज्ञानार्थे

10. The frail human body, though embellished with much efforts (with various objects) for a while only, is after all as temporary as a shadow and vanishes like a bubble of water.

भूयोऽप्यकार्यनिषेधाय वैराग्यभावनामुपदिशन्नाह—आहार्यैरिति। आहार्यैरसहजैः, सुगन्धा-लेपनवस्त्रालङ्कारादिभिः स्वभावादहृद्यं पूतिगन्धासुखस्वेदाद्युपेतं क्षणं दुःखेन हृद्यतां मनोहरतां नीयमानं, हि स्फुटं, छायामात्रकमिव शंक्वादिच्छायामात्रावस्थितिर्न चिरस्थायीत्यर्थः। इदं जगदुदकबिन्दुवत्प-श्येत् क्षणादेवादर्शनं यातीति ॥ १० ॥

महावाताहतभ्रान्ति[7]मेघमालातिपेलवैः।
कथं नाम महात्मानो ह्रियन्ते विषयारिभिः ॥ ११ ।

[7] वाताहतिभ्रान्त

11. Will ever a prudent person like to be dominated by lust for material pleasures (of damaging potentialities, *viṣayāri*) which slip away as clouds driven by a strong wind ?

विषयाणामपि निःसारतां दर्शयितुमाह—महावातेति। महावाताहत्या भ्रान्ताया मेघमालायाः खण्डशः कृतांशास्तद्वदतिपेलवैर्निःसारैः शाल्मलीवृक्षवदित्यर्थः। कथं नामेत्याश्चर्यं। महात्मानो विवेकिनोऽपि ह्रियन्ते वशीक्रियन्ते विषयारिभिः स्पर्शादिविषयशत्रुभिः। विषयाः एवारयः, अहित-कारकत्वाच्छत्रव इति ॥ ११ ॥

जलान्तश्चन्द्रचपलं जीवनं[8] खलु देहिनाम्।
तथाविधमिति ज्ञात्वा शश्वत् कल्याणमाचरेत् ॥ १२ ।

[8] जीवितं

12. Realising the inconstancy of life like the reflection of the moon on the surface of water (which is never steady), a man should always work for all round welfare according to the eternal rules of conduct.

भूयोऽप्यनित्यतां दर्शयन्नाह—जलेति। जलान्तश्चन्द्रश्चन्द्रप्रतिबिम्बं, तद्वच्चपलमस्थिरं, देहिनां

प्राणिनां, खलु निश्चयेन, जीवितं तत् तथाविधमिति सम्यग् ज्ञात्वा, शश्वदनवरतं कल्याणमिति तद्धेतुत्वाद्धर्ममाचरेदिति ॥ १२ ॥

जगन्मृगतृषा तुल्यं वीक्ष्येदं क्षणभङ्गुरम् ।
स्वजनैः सङ्गतः* कुर्याद् धर्माय च सुखाय च ॥ १३ ॥

* सुजनैः सङ्गतिं, सङ्गतं कार्यं

13. Realising the transitoriness of life like that of the illusory mirage (*mṛgatṛṣā*), a man should keep company of the pious for the purpose of gaining spiritual and material benefits (*dharmāya ca sukhāya ca*).

एतदेव द्रढयितुमाह—जगदिति । जगद् विश्वमिदं दृश्यमानलक्षणं मृगतृषा मृगमरीचिकया तुल्यं समानं, वीक्ष्य ज्ञात्वा (दृष्ट्वा), क्षणभङ्गुरमाशुविनाशि, तत्र सुजनैः सत्पुरुषैः । विद्यावृद्धैरित्यर्थः । सङ्गतं कुर्यात् सदा । सङ्गतं धर्माय च धर्मार्थं, सुखाय च सुखार्थं, सुजनसङ्गतेन विनीतो भवति, विनीतस्य सुखं व्यसनाभावादिति ॥ १३ ॥

सेव्यमानस्तु स्वजनै[10]र्महानतिविराजते ।
सुधातल[11] इव श्रीमान् प्रासादश्चन्द्ररश्मिभिः ॥ १४ ।

[10] सुजनै [11] सुधालिप्त

14. Company of the pious enhances the glory of a person just as a magnificently white-painted palace dazzles in moon beams.

सुजनसङ्गतस्य फलं दर्शयन्नाह—सेव्यमान इति । सुजनैरुक्तलक्षणैः सेव्यमानो महान् विजिगीषुरतिविराजतेऽत्यर्थं विराजते । यथा सुधालिप्तः सुधाधवलो महान् प्रासादश्चन्द्ररश्मिभिः । सदाचारत्वाच्छुद्ध एव राजत इति ॥ १४ ॥

हिमांशुमाली न तथा न चोत्फुल्लोत्पल[12]सरः ।
आनन्दयति चेतांसि यथा सज्जनचेष्टितम् ॥ १५ ।

[12] चोतफुल्लकमलं

15. Neither the cool rays of the moon nor the lake of fully blossomed lotuses gives so much pleasure to our minds as the deeds of men of good conduct.

तदेव समर्थयन्नाह—हिमांशुमालीति । हिमांशुमाली शारदिन्दुर्न तथा, न चोत्फुल्लाम्बुजं सर आनन्दयति चेतांसि यथा सज्जनचेष्टितं सदाचाररूपमिति ॥ १५ ॥

ग्रीष्म[13]सूर्यांशुसन्तप्तमुद्वेजनमनाश्रयम् ।
मरुस्थलमिवोदग्रं त्यजेद् दुर्जनसङ्गतम् ॥ १६ ।

[13] ग्रीष्मे

16. So the company of the unrighteous, painful like the scorching summer sun and dreadful like the shelterless arid desert, should always be shunned.

यथा सुजनैः सङ्गतं कुर्यादेवं दुर्जनैः सङ्गतं त्यजेद्दोषदर्शनादिति दर्शयन्नाह—ग्रीष्म इति । ग्रीष्मे सूर्यांशवोऽतितीव्रा भवन्ति तैः सम्यक् तप्तमत एवोद्वेजनमनाश्रयं मरुस्थलं वीरुल्लताद्यभावात् । दुर्जन-सङ्गतेष्वाश्रयो नास्तीति स्थितेरभावात् । तदिवोदग्रमुच्चं तदतीवोष्मग्राहि भवतीति त्यजेद् दुर्जनैः सङ्गतं सम्बन्धं, कौटिल्येनाप्युक्तम् "अनार्यजनसंसर्गं त्यजेत्" इति ॥ १६ ॥

[14]सतः शीलोपसम्पन्नानकस्माद्देव दुर्जनः ।
अन्तः प्रविश्य[15]दहति शुष्कवृक्षानिवानलः[15a] ॥ १७ ।

[14] श्रुतशीलोपसम्पन्नमकस्मादेव [15] अनुप्रविश्य

[15a] वृक्षमिवानलः

17. Even a man of learning and good conduct, by cultivating intimate friendship with a wicked man suddenly perishes as a withered tree is burnt down by the impact of fire.

दुर्जनस्वरूपमभिधातुमाह—श्रुतेति । श्रुतमान्वीक्षिक्यादिशास्त्रं, शीलं सुस्वभावता, तत्सम्पन्नान् सुजनानकस्मादेव कारणं विनापि, अन्तः प्रविश्य विश्वास प्रदर्शनादात्मभावं गत्वा हृदयं प्रविश्य दहति दाहं करोतीत्यर्थः, शुष्कं वृक्षमिवानल इति ॥ १७ ॥

निःश्वासोद्गीर्णहुतभुग्धूमधूम्रीकृताननैः ।
वरमाशीविषैः सङ्ग[16] कुर्यान्न त्वेव दुर्जनैः ॥ १८ ।

[16] कुर्यात् सङ्गतं नैव

18. Even the company of serpents with mien ashy as a result of its emitting venom with every breath is better than that of the wicked; such a company should never be made.

आशीविषेभ्योऽतिदौष्ट्यं दुर्जनस्य दर्शयन्नाह—निःश्वासेति । निःश्वासेन सहोद्गीर्णैर्हुतभुग् धूमैर्धूम्रीकृतान्याननानि येषां तैर्वरमाशीविषैः सर्पैः सङ्गतं कुर्यात्, नत्वेव दुर्जनैः । सर्पा अप्युपकारिणं नाभिचरन्ति दुर्जनास्तु व्यभिचरन्तीति ॥ १८ ॥

दीयते[16a] स्वच्छहृदयैः पिण्डो येनैव पाणिना ।
मार्जार इव दुर्वृत्तस्तमेव हि विलुम्पति ॥ १९ ।
असाध्यं साधुमन्त्राणां तीव्रं वाग्विषमुत्सृजन्[17] ।
द्विजिह्व[18]वदनं धत्ते दुष्टो दुर्जन पन्नगः ॥ २० ।

[16a] नोयते [17] मुतसृजत् [18] द्विजिह्वं

19-20. Just as a cat scratches with its claws the hands of the unsuspecting person offering it food, so also do the wicked, (ungrateful by nature). A wicked person is possessed of two tongues (or a bifurcated tongue, *dvijihvaṁ*) like the snake (i.e., he is prone to double dealing). The evil effect of his venomous speech (*vāgviṣa*) can hardly be remedied by the best of the *mantras* (prescriptions of medical texts) even.

उपकारिष्वप्यपकारी दुर्जन इति दर्शयन्नाह—दीयत इति । स्वच्छहृदयैरकलुषचित्तैः सुजनैः पिण्डः शुभाहारमयो येनैव पाणिना दीयते मार्जार इव दुर्वृत्तो जनस्तमेव पाणिं दौष्ट्याद् विलुम्पति ॥ १९ ॥

अपरञ्च—असाध्यमिति । दुर्जन एव पन्नगो द्विजिह्वं वदनं धत्ते । अग्र एका जिह्वा पृष्ठतश्चैकेति दुर्जनस्य द्विजिह्वं वदनं, पन्नगस्य द्विजिह्वं वदनमिति प्रतीतम् । वाग्विषमुत्सृजन्निति वागेव तीव्रं विषं, साधुमन्त्राणां गारुडोक्तानां साध्यं पन्नगविषं, वाग्विषं तु साधूनां ये पञ्चाङ्गमन्त्रास्तेषामसाध्यमिति । दौष्ट्यादेवंविधो दुर्जनपन्नगः सुदूरतः परित्याज्य इति भावः ॥ २० ॥

क्रियतेऽभ्यर्हणीयाय स्वजनाय[19] यथाञ्जलिः ।
ततः साधुतरः कार्यो दुर्जनाय हितार्थिना[19a] ॥ २१ ।

[19] सुजनाय [19a] शिवार्थिना

21. Respectable persons should of course be shown due respect with folded hands, but in his own interest it would be more beneficial to do respect to the wicked (so that the latter may desist from doing mischief).

प्रसङ्गादागते दुर्जने विधेयमाह—क्रियत इति । क्रियतेऽभ्यर्हणीयाय पूज्याय, सुजनाय यथाञ्जलिः प्रश्रयदर्शनार्थं ततोऽपि साधुतरः सविशेष प्रश्रययुक्तो दुर्जनाय कार्यः हितार्थिना (शिवार्थिना) पुरुषेणाराधनादुपकारिबुद्धिरप्यस्य भवत्विति ॥ २१ ॥

ह्लादिनीं सर्वसत्त्वानां सम्यग्जनजिहीर्षया[20] ।
भावयन्[20a] परमां मैत्रीं विसृजेल्लौकिकीं गिरम् ॥ २२ ।

[20] जिघृक्षया [20a] भावयेत्

22. In speech one should always use charming words in order to captivate the hearts of all people, and express perfect amity with them through the popular language (of clear import).

आराधनादुपकारबुद्धिरप्यस्य भवतु इति जनानुरागार्थं सद्व्यवहारविशेषमभिधातुमाह—ह्लादिनीमिति। आनन्दकारिकां मधुरामित्यर्थः। तथा च दण्डी—"मधुरं रसवद् वाचि वस्तुनापि रसस्थितिः। येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥" एवम्भूतां सर्वभूतानामानन्दकारिकां वाचं विसृजेद् दद्यादित्यर्थः। सम्यगिति सूनृत्वेन जनजिहीर्षया जनचित्तापहारार्थं परमां मैत्रीं सर्वत्र भावयन् विसृजेल्लौकिकीं गिरं लोकव्यवहारिकीं वाचमिति॥ २२॥

नित्यं मनोपहारिण्या वाचा प्रह्लादयेज्जगत्[21]।
उद्वेजयति[22] भूतानि क्रूरवाग् धनदोऽपि[23] सन्॥ २३।

[21] प्रह्लादयेज्जनम् [22] उद्वेजनीयो भवति
[23] वागर्थदोऽपि

23. Charming words are invariably pleasing to one and all, whereas harsh words even accompanied with gifts of money cause excitement (and ill-feeling).

दुष्टवाक्ये दोषं दर्शयन्नाह—नित्यमिति। नित्यं सदा मनोपहारिण्या चित्ताह्लादकारिण्या वाचा प्रह्लादयेदानन्दयेद्, जगत् भुवनम्। क्रूरवाक् परुषवागुद्वेजनीयो भवति, अर्थदोऽपि धनं प्रयच्छन्नपि॥ २३॥

हृदि विद्ध इवात्यर्थं यया सन्तप्यते जनः।
पीड़ितोऽपि हि मेधावी न तां वाचमुदीरयेत्॥ २४।

24. Even under distressing circumstances a prudent person should not use harsh speech as that hurts the feelings for whom it is intended and makes him feel aggrieved.

क्रूरवाङ् निषेधार्थमाह—हृदीति। हृदिविद्ध इव मर्मोद्घाटनप्राययाऽत्यर्थमतिशयेन यया वाचा सन्तप्यते जनस्तां वाचं पीड़ितोऽपि हि मेधावी बुद्धिमान् नोदीरयेन्न ब्रूयादित्यर्थः॥ २४॥

तीव्रान्युद्वेगकारीणि विसृष्टान्यनयात्मकैः[24]।
कृन्तन्ति देहिनाम् मर्म शस्त्राणीव वचांसि च॥ २५।

[24] विसृष्टान्यशमात्मकैः

25. Acutely exciting and intolerably stinging words pierce the heart as if by sharp weapons, (the Śāstras also confirm this).

क्रूरवाचां स्वरूपमभिधातुमाह—तीव्राणीति। दुःसहान्युद्वेगकारीणि सन्तापजननानि विसृष्टान्युदीरितानि, अशमात्मभिरुपशमरहितैः कृन्तन्ति छिन्दन्ति देहिनां मर्म, शस्त्राणि च तत्तुल्यसमानगुणानि वचांसि चेति॥ २५॥

प्रियमेवाभिधातव्यं नित्यं सत्सु द्विषत्सु च।
शिखीव केकामधुरः प्रियवाक् कस्य न प्रियः ॥ २६ ।

26. (Hence) pleasing words should be spoken both to friends and foes, for who does not enjoy sweet words like the sweet tune of the peacock (*kekā*) ?

प्रियवचसां गुणं दर्शयन्नाह—प्रियमिति। प्रियमेव श्रुतिसुखमेवाभिधातव्यं सत्सु सुहृत्सु नित्यं द्विषत्सु द्विष्टेषु च। केकामधुरः शिखीव मयूर इव केकाभिः कलरवैर्मधुरो रमणीयः। प्रियवाक् मिष्टभाषी जनः कस्य न प्रियः, अपितु सर्वस्यापि प्रिय इत्यर्थः ॥ २६ ॥

अलङ्क्रियन्ते शिखिनः केकया मदरक्तया।
वाचा विपश्चितोऽत्यर्थं माधुर्यगुणयुक्तया ॥ २७ ।

27. *Kekā* (melodious note) uttered in ecstasy decorates (*alaṁkriyante*) or enhances the charm of a peacock ; so also does sweet and agreeable speech to a prudent person.

अलङ्क्रियन्ते इति। शिखिनो मयूराः केकया कलस्वरवत्या मदरक्तया मयूरस्य मदाद् मधुरया। विपश्चितो विवेकिनः, वाचा वाण्या, अत्यर्थमतिशयेन तथैवालङ्क्रियन्ते माधुर्यगुणप्रचुरया। विपश्चितां मधुरा वागेवालङ्कारो भवतीति भावः ॥ २७ ॥

मदरक्तस्य हंसस्य कोकिलस्य शिखण्डिनः।
हरन्ति न तथा वाचो यथा साधु विपश्चिताम्[25] ॥ २८ ।

[25] विपश्चितः

28. Ecstatic and melodious notes (calls) of the swan, the cuckoo and the peacock fade away before the charming words of the intelligent man of culture.

मदेति। मदेन रक्तस्य रागबहुलध्वनेर्हंसस्य तथैव कोकिलस्य शिखण्डिनश्च हरन्ति न वाचः कुजितगिरः। चित्तमिति वाक्यशेषः। तथा तेन प्रकारेण यथा साधु शोभन प्रकारेण विपश्चितः। विवेकिनां सौम्यस्वराः ह्लादयन्ति चित्तम्। एवं च विपश्चिता मधुरवचनेन भवितव्यमित्युपदिष्टं भवति ॥ २८ ॥

गुणानुरागी स्थितिमान् श्रद्दधानो दयान्वितः।
धर्मं धर्माय विसृजेत् प्रियां वाचमुदीरयेत्[25a] ॥ २९*

[25a] वाचमुदीरयन्

*The *śloka* has been repeated as *kroḍa* of V.33 in the B.I. edition.

29. A cultured man, who gives due recognition to talented persons, and keeps to his own prescribed mode of life (*sthitimān* or redeemer of promises), who is respectful while offering gifts and is kind-hearted, may spend money for acquiring religious merits, but to be successful, he should add sweet and pleasing words thereto (i.e., express humility and not haughtiness).

दानक्रममभिधातुमाह—गुणेति। पात्रगुणेष्वनुरागवानित्यनेन गुणवद्भ्य एव धनं विसृजेन्नान्यथा। स्थितिमान् यस्य यावत् प्रतिज्ञातं तदनतिक्रमेण निर्वहणं स्थितिस्तद्युक्तः। श्रद्धानो दानादनन्तं पुण्यमस्तीति श्रद्धान्वितः, दयान्वितो दीनानाथेष्वपि कारुण्यात् प्रवृत्तदानः, धनं धर्माय विसृजेत् प्रियां वाचमुदीरयन्। उक्तं च "उद्वेजनीयो भवति क्रूरवागर्थदोऽपि सन्" इति। दानं प्रियवाक् सहितमेव कर्तव्यमिति भावः ॥ २९ ॥

ये प्रियाणि प्रभाषन्ते[26] प्रयच्छन्ति य सत्कृतिम्।[27]
श्रीमन्तोऽनिन्द्यचरिता[28] देवास्ते नरविग्रहाः ॥ ३० ॥*

---

[26] च भाषन्ते [27] च सत्कृतम् [28] श्रीमन्तोवन्द्यचरणा

*The *śloka* has been repeated as *kroḍa* of V. 34 in the B.I. edition.

30. The cultured man who uses sweet words while offering gifts or rendering hospitality, is respected as a god in human form.

अस्यैवार्थस्य प्रशंसामभिधातुमाह—ये इति। ये श्रीमन्तः प्रियाणि भाषन्ते प्रयच्छति च सत्कृतं सत्कारसहितं ते वन्द्यचरिता नरविग्रहाः पुरुषशरीरा देवा एवेति ॥ ६० ॥

शुचिरास्तिक्य पूतात्मा पूजयेद् देवताः सदा।
देवतावद् गुरुजनमात्मवच्च सुहृज्जनम् ॥ ३१ ॥

---

31. [*Sadācāra* or *Sadvṛtti* (good conduct is made up of qualities like] purity (internal and external), honest belief in or conformism to religion (*āstikya*) and thus of sanctified soul, devotion to gods (personal or family deities), respectfulness for the elders, as the veritable gods, and cordiality with friends and relatives (*suhṛjjanah*), as if they spring from his own self.

गृहस्थाचारमभिधातुमाह—शुचिरिति। बाह्याभ्यन्तरशौचयुक्तो, बाह्यं मृज्जलादिभिः, आभ्यन्तरं सर्वसत्त्वानुग्रहबुद्ध्या। आस्तिक्यपूतात्मा, आस्तिक्यम्—'अस्ति वेदोक्तं समस्तम्' इति मन्यते यः स आस्तिकः। तस्य भाव आस्तिक्यं तेन पूत आत्मा यस्य सः। पूजयेद्देवता इष्टाः, सदा नित्यम्। देवतावद् गुरुजनं मातृपितृगुरूपाध्यायादिकं, आत्मवच्च सुहृज्जनं बन्धुवर्गमात्मसमं कृत्वा पूजयेदिति ॥ ६१ ॥

प्रणिपातेन हि गुरून् सतोऽनूचान चेष्टितैः ।
कुर्वीताभिमुखान् भूत्यै देवान् सुकृतकर्मणा ॥ ३२ ।

---

32. (About application of *Sadvṛttis* it is laid down thus). Teachers and elders should be honoured by salutations with humility (*praṇipātena*, prostrating before them), the wise men by association with them during their discourses, and the gods (deities) by propitiating them with due ceremonies.

[1]उक्तपूजनक्रममभिधातुमाह—प्रणिपातेनेति । गुरूनाचार्यान् प्रणिपातेन प्रणत्या, अभिमुखान् कुर्वीतेति सर्वत्र वर्तते । सतः सत्पुरुषान्, अनुचानचेष्टितैः सप्रश्रयैरनुष्ठानैः । देवान देवताविशेषान, सुकृतकर्मणा पुण्येनानुष्ठानेनाभिमुखान् भूत्यर्थं कुर्यात् । देवाः सुकृत कर्मणाऽभिमुखा भवन्ति न प्रणाममात्रेणेति भावः ॥ ३२ ॥

[1] प्रत्येकमाराधनमभिधातुमाह

स्वभावेन[29] हरेन्मित्रं सद्भावेन हि वान्धवान् ।
स्त्रीभृत्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम्[30] । ३३ ॥

---

[29] सद्भावेन हरेन्मित्रं सम्भ्रमेण

[30] नेतराञ्जनान्

33. Friends and wellwishers (*mitra*) may be won over by noble sentiments, kinsmen by showing due honour, wives and attendants by love and affection and all others by liberality.

स्वभावेनेति । स्वभावेन परमात्मीयभावेन (परमार्थस्नेहेन) हरेदाराधयेत्, मित्रं मित्रतामुपगतम् । सद्भावेन साधुभावेन वान्धवान आत्मवन्धुप्रभृतीन्, हरेत् । स्त्रीभृत्यान् भार्यानुजीविवर्गं प्रेमदानाभ्यां स्नेहेन दानेन च, नप्रेमदानरहितं, न दानं प्रेमवर्जितं स्त्रीभृत्यानाराधयेदिति । दाक्षिण्येन स्निग्धभावेन इतरमुक्तव्यतिरिक्तं जनं हरेदिति ॥ ३३ ॥

अनिन्दापरकृत्येषु[30a] स्वधर्म परिपालनम् ।
कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ॥ ३४ ।

[30a] वृत्तेषु

34. One should be steadfast in his own prescribed mode of life (*svadharma*) without indulging is slanderous criticism of other's actions, be kind to the poor and should speak sweet words in all circumstances.

एतदेव द्रढयितुमाह—अनिन्देति । परकृत्येषु (परवृत्तेषु) भिन्नदर्शनाद्यनुष्ठानेषु, अनिन्दा निन्दा न कार्या । स्वधर्मपरिपालनं शास्त्रोक्तस्य स्वधर्मस्यानुष्ठानम् । कृपणेषु दयालुत्वं दीनानाथादिषु अनुकम्पापरत्वम् । सर्वत्र सर्वस्मिञ्जने मधुरा एव गिरो नियमाद्वाच्या इति शेषः ॥ ६४ ॥

प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ।
गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥ ३५ ।

35. He should further return an act of kindness even at the risk of his life, be faithful to friends, offer due hospitality to guests visiting his home, make charties proportionate to his means and exercise forbearance as far as practicable.

प्राणैरिति । प्राणैरप्युकारित्वं स्वप्राणदानेनाप्युपकारित्वं, मित्रायाव्यभिचारिणे अकपटाय युक्तमिति शेषः । गृहागते जने परिष्वङ्गः सर्वथा स्नेहः कार्यः "सर्वस्याभ्यागतो गुरुः"[2] इति वचनात् । शक्त्या सामर्थ्येन दानम् । सहिष्णुता यदि गृहागतो वाक् पारुष्यादिकमपि करोति तत्रापि सहिष्णुतैव कार्येति शेषः ॥ ३५ ॥

[2] सर्व्वत्राभ्यागतो गुरुः

बन्धुभिर्बन्धु[31]संयोगः स्वजने चरितानि च[31a] ।
तच्चित्तानुविधायित्वमिति वृत्तं महात्मनाम् ॥ ३६ ।

स्वसमृद्धिष्वनुत्सेकः परवृद्धिष्वमत्सरः ।
नान्योपतापि[31b] वचनं मौनव्रतचरिष्णुता ॥ ३६ । (क)*

[31] बन्धुभिर्बद्धसंयोगः

[31a] सुजने चतुरश्रता [31b] परोपतापि

*The *śloka* is not found in the B.I. edition.

36. Maintenance of close friendly relationship with friends and relatives and rendering agreeable services by the fourfold means (*caturasratā*, i.e., *vāṅgmanahkāya karmādibhih*, speech, mind, body and actions), are the noble features of good conduct.

36A. One should avoid boastfulness in one's own prosperity and malice for others', and be tolerant of others' unkind words by adopting silence (i.e., not resorting to quarrels fomenting development of ill feeling).

अपरञ्च । बन्धुभिरिति । सुघटित सम्बन्धः, सुजने सत्पुरुषजने चतुरस्रता वाङ्मनः काय कर्मादिभिस्तदाराधनतत्परता, तच्चित्तानुविधायित्वं सुजनचित्तस्यानु तदनन्तरमेवानुष्ठायित्वमित्येवप्रकारं वृत्तमनुष्ठानं महात्मनां महापुरुषाणामिति ॥ ३६ ॥

स्वेति । स्वसमृद्धिष्वनुत्सेको दर्परहितत्वं, परवृद्धिष्वमत्सरोऽसूयारहितत्वं, परोपतापिवचने मौनव्रताचरणशीलता कार्येति शेषः ॥ ३६ क ॥

सनातने वर्त्मनि साधु तिष्ठता-
मयं हि पन्था गृहमेधिनां मतः ।
अनेन गच्छन्नियतं महात्मना-
मिमम् च लोकं परमं च विन्दति ॥ ३७ ।

37. This is the way of life of an honest householder, (*gṛhamedhin*) and by following (by practising the *sadvṛttis* enumerated above) this noble traditional course, he surely achieves merits in this world and the next.

एतदनुष्ठानफलमभिधातुमाह--सनातने इति । शाश्वते वर्त्मणि मार्गे साधु यथा भवति तथा तिष्ठतामवस्थितिं कुर्वतां, गृहमेधिनां गृहस्थानां, महात्मनां रामयुधिष्ठिरादीनां मतः, उक्तलक्षणः पन्था अनुष्ठानमार्गोऽभिमत उपदिष्टो मन्वादिभिः । अनेन पथा गच्छन्नन्योऽपि नियतं निश्चयेन, इहलोकं परमं च लोकं विन्दति लभत इत्यर्थः ॥ ३७ ॥

इति पथि विनिवेशितात्मनो
रिपुरपि गच्छति साधु मित्रताम् ।
तदवनिपति मत्सराद्दृते[32]
विनयगुणेन जगद् वशीभवेत्[32a] ॥ ३८ ।

[32] तदवनिपतिरस्त मत्सरो [32a] वशं नयेत्

38. A king also by intently adopting this course (of *sadvṛtti*) conquers his enemies (including the inimical sense organs, *ripurapi*, i.e., he becomes a *jitendriya*) and wins permanent friendship of the honest people. Such a ruler by virtue of his disciplined conduct achieves mastery of the world (becomes a *cakravartī* ruler).

सनातन वर्त्मनि तिष्ठतः स्वामिन उपकारान्तरं दर्शयन्नाह—इतीति । इति, एवंप्रकारे साधुसेविते पथि विनिवेशितात्मनो विजिगीषोः, रिपुरपि गच्छति साधु मित्रताम् । तदवनिपतिरस्तमत्सरो विक्षिप्तदोषो विनयगुणेन जितेन्द्रियतया जगद् वशं नयेत् । न ह्येवंविधमन्यद् वश्योपायनमस्ति यथा विनयगुण इति ॥ ३८ ॥

क्व च नरपतिवर्गः सङ्ग्रहः क्व प्रजानां
मधुरवचनयोगाल्लोकमाह्लादयी च ।[33]
मधुरवचनपाशैरानतो लालितः[34] सन्
पदमपि हि न लोकः संस्थितेर्भेदमेति ॥ ३९ ।

इत्याचारव्यवस्थापन प्रकरणम् ।

इति कामन्दकीये नीतिसारे आचारव्यवस्थापनं नाम तृतीयः सर्गः ॥

[33] लोकमभ्याददीत [34] पाशैरायतालानितः

39. Inspite of the apparent difference in status and position between the ruler and his subjects a ruler, whose actions are always blended with sweet words, receives honour and respect from his subjects. Thus captivating the hearts of his people by ties of sweet words (one of the principal *sadvṛttis*), a king never loses an inch of his position in the estimation of his subjects who remain ever loyal to him and does not revolt.

सदाचारस्थापनामध्ये मधुरवचनप्रशंसोक्तापि पुनरुच्यते गर्वमाधुर्ययोरेकत्रावस्थितेर्दुर्घटत्वात्, तथापि गर्वमपहाय वचसां माधुर्यमेव विधेयमिति दर्शयन्नाह—क्वेति। नरपतीनामविणीतराजानां, गर्वोऽहंकारदर्पः क्व ? सङ्ग्रहः प्रजानामर्जनं क्व ? दुर्घटमित्यर्थः। तथापि मधुरवचनयोगाल्लोकमभ्याददीत। लोकादाने सङ्ग्रहे राज्ञो राजत्वम्, अन्यथाऽभिगामिकगुणानां कुलशीलादीनामेकविंशतिसङ्ख्यानामनर्थकत्वं स्यात्। मधुरवचनान्येव पाशस्तेनायतः आलानितः सुबद्धः सन् पदमपि न लोकः संस्थितेर्न्यायमार्गावस्थितेर्भेदं व्यभिचारमेति। न्याय्यदण्डः सामसहायः कार्यसाधको भवतीति भावः ॥ ३९ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां तृतीयः सर्गः ॥

चतुर्थ सर्गः

७। प्रकृतिसम्पत् प्रकरणम्

स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥ १ ।
एकाङ्गेनापि विकलमेतत् साधु न वर्तते ।
तस्य सामग्र्यमन्विच्छन् कुर्वीत सुपरीक्षणम्[1] ॥ २ ।

[1] कुर्वीताशु परीक्षणम्

Sarga—IV

Prakarana : 7. Prakṛtisampat.

(The importance of the State elements).

1-2. The king (*Svāmī*, lord), ministers, territory (the state), fortifications (*durga* or fortified areas), treasury, army (in full complements, *caturaṅga*), and allies (*suhṛt*) constitute the seven component elements or limbs of the State (*saptāṅgaṁ rājyaṁ*).These elements are interrelated and interdependent, so much so that if any of them is out of order the whole system (administrative organisation) breaks down. Hence careful attempts should be directed towards all round development of the elements collectively.

जितेन्द्रियस्य विद्यावृद्धैः संयुक्तस्य वर्णाश्रमाचारस्थापनानन्तरं राज्य प्रकृतीनां सप्तानामपि गुणसमूहकृतां सम्पदं दर्शयितुं प्रकृतीरेव तावदाह—स्वामीति। स्वाम्यमात्यौ उक्तलक्षणौ, राष्ट्रं जनपदः, दुर्गं स्थानीयादि, कोशो रत्नसारादि, बलं चतुरङ्गं, सुहृद् मित्रं, परस्परोपकारीदमिति स्वाम्यमात्यस्योत्पादकत्वेनोपकारी, अमात्योपि स्वामिनो बुद्ध्यादिसाहाय्येन। तौ राष्ट्रस्य रक्षादिनोपकारकौ, राष्ट्रकोशादिसम्पादनेन तयोः, दुर्गं रक्षादिविधानादिना तेषाम्। तेऽपि संस्कारादि सम्पादनेन दुर्गस्य, कोशो वृत्त्युपकरणसम्पादनेन तेषां, वर्धनरक्षणतीर्थप्रतिपादनादिना तेऽपि कोशस्य, बलं चतुरङ्गं, असाध्यसाधनादिनोपकारि पूर्वोक्तानां, तेऽपि भरणादिना बलस्य, मित्रं साहाय्यादिनाऽनन्तरोक्तानां, तेऽपि तथैव च मित्रस्य। इति परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते, ततो न्यूनाङ्गे न राज्यव्यपदेश इति ॥ १ ॥

तदेव समर्थयन्नाह—एकाङ्गेनापीति। एकेनाप्यङ्गेन विकलमेतत् साधु यथा भवति तथा न वर्तते रथवत्। रथो यथा चक्राक्षाश्वसारथियोक्त्रादीनामेकेनापि रहितो न वर्तते तद्वद् राज्यम्। तस्मात् सामग्र्यं सम्पूर्णतामन्विच्छन् कुर्वीताशु शीघ्रं परीक्षणमन्वेषणं कस्य के गुणाः समग्रा असमग्रा वंति परीक्षामपि कुर्वीतेति भावः ॥ २ ॥

[1] तत्वरूपा गणाभावा व परीक्षा

आत्मानमेव प्रथममिच्छेद् गुणसमन्वितम् ।
कुर्वीत गुणसंयुक्तस्ततः[2] शेषपरीक्षणम् ॥ ३ ।

[2] गुणसम्पन्नस्ततः

3. The *swāmin* the first element of state (the king), should himself acquire royal qualities. Then only he will be able to determine the qualities of the other elements and work for their development.

स्वामिनाऽत्मगुणसम्पत्सम्पादनमेव प्रथमं विधेयमिति दर्शयन्नाह—आत्मानमिति । अमात्यादिप्रकृतिभ्यः प्रथमं स्वशरीरमेव गुणसमन्वितं वक्ष्यमाणगुणोपेतमिच्छेत् । वक्ष्यमाणो गुणसमूह आत्मसम्पदुक्ता, आभिगामिकाश्च गुणाः, एते समुदिता एकत्र स्वामिप्रकृतिरितीर्यते । न क्षत्रियकुमारशरीरमात्रमेव । अत इदं घटते, सप्ताङ्गस्य लाभाय यतेतेति । राजान्वयः कुमार आत्मसम्पदुक्तगुणमयी या स्वामिप्रकृतिस्तया सह सप्ताङ्गराज्यस्य लाभाय यतेत यत्नं कुर्वीतेति । गुणसंयुक्त इति, लब्धात्मलाभस्तदनन्तरं शेष परीक्षणमवशिष्ट प्रकृतीनां परीक्षणं निरूपणं कुर्याद् गुणसम्पत्सम्पादनार्थमिति ॥ ३ ॥

In the *tīka* commentary of V. 5 is marked no. 3, hence the renumbering.

साधुभूतलदेवत्वं दुष्करञ्चाकृतात्मभिः[3] ।
आत्मसंस्कारसम्पन्नो राजा भवितुमर्हति ॥ ४ ।

[3] दुर्धार्यमकृतात्मभिः

4. A king, though recognised as God on earth, fails to maintain his state if he himself is devoid of self control. Whereas one possessing the quality of self restraint is considered fit for becoming a king.

एतदेन समर्थयन्नाह—साध्विति । शोभनतरं भूतलदेवत्वं परमैश्वर्यं किन्तु दुर्धार्यं दुर्वहम्, अकृतात्मभिर्गुणैरसंस्कृतात्मभिः ॥ ४ ॥

लोकाधाराः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
तिष्ठन्त्याय इवाधारे विशदात्मनि[3a] संस्कृते ॥ ५ ।

[3a] चिरमात्मनि

5. The receptacle of the prosperity of a king is his people (i.e., Royal prosperity rests on that of the subjects). It is difficult to attain, and more so to sustain, like water procurable with much efforts (*durāpā*, from distant pools) but hardly it is acceptable for drinking unless kept in baked earthen jars (*samskṛte ādhāre*). So also royal prosperity flourishes if the receptacle (the state) rests steadily in the firm hands of a disciplined (*samskṛta*) ruler.

आत्मसम्पदं[3] समर्थयन्नाह—लोकेति। राज्ञां श्रियः, आपः पानीयानीव दुरापाः, ता यथा दुःखेनानुकूल्ये महाह्रदे प्राप्यन्ते, दुष्परिग्रहा दूढतरसेत्वादिभिः परिगृह्यन्ते, तथा श्रियोऽपि दुरापा दुष्परिग्रहाश्च। आप इव संस्कृते आधारे यथा चिरं तिष्ठन्ति तथा विजीगिषोर्गुण संस्कृत आत्मनि श्रियस्तिष्ठन्ति नान्यथेति। आत्मसम्पदादिगुणैरात्मा संस्कार्य इति ॥ ५ ॥

[3] सम्पदो सामग्र्यं दर्शयन् आह

कुलं सत्त्वं वयः शीलं दाक्षिण्यं क्षिप्रकारिता।
अविसंवादिता सत्यं वृद्धसेवा कृतज्ञता ॥ ६ ॥
दैवसम्पन्नता बुद्धिरक्षुद्रपरिवारिता[4]।
शक्यसामन्तता चैव तथा च दृढभक्तता ॥ ७ ॥
दीर्घदर्शित्वमुत्साहः शुचिता स्थूल लक्ष्यता[4a]।
विनीतता धार्मिकता गुणाः साध्वाभिगामिकाः ॥ ८ ॥
गुणैरेतैरुपेतः सन् सुव्यक्तमभिगम्यते।
तथा च कुर्वीत यथा गच्छेल्लोकाभिगम्यताम् ॥ ९ ॥

---

[4] परिवारता [4a] लक्षता

6-9. The qualities of a worthy ruler are the following—Nobility of his lineage, composure (in all circumstances, fair or foul), youthful vigour, good conduct, compassion, promptness (in executing royal business) consistency (in speech and action), truthfulness, rendering due service to the learned (*vṛddhasevā*), gratefulness, faith in divine dispensations, intelligence, association with the large hearted (liberal) men (and not with men of narrow outlook), possession of strong feudatories (*śakyasāmanta*, well able to assist the king in tackling the enemies), deep devotion (to spiritual and material affairs), farsightedness, energy, purity (internal and external), ambition (to effect expansion of territory and augmentation of wealth *sthūlalakṣya*), power of self-restraint and piety. Endowed with these qualities (*sādhvābhigāmikā*) a king enjoys the support of the honest people (they become his ardent followers).

आत्मा संस्क्रियते यैराभिगामिकगुणैस्तानभिधातुमाह—कुलमिति। कुलमुभयकुल विशुद्धिराभिजात्यम्। शीलं सुस्वभावता। वयो यौवनम्। सत्त्वं व्यसनेऽभ्युदये च यदविकारि। (इति सत्त्वमनुगृह्यते)। दाक्षिण्यं सर्वत्र सानुकम्पत्वम्। क्षिप्रकारिताऽदीर्घसूत्रत्वम्। अविसंवादिता वाक्छलेन विरुद्धसंवादरहितत्वं यथा—ते सुवर्णं दास्यामीति षोडशमाषकपरिकल्पित सुवर्णाख्यप्रतिमानमितं सुवर्णं न ददाति, वाक्छलेन सुवर्णजातिमात्रं ददाति तादृशो न यस्तस्य भावः। सत्यममृषावादः। वृद्धसेवा विद्यावृद्धाराधनतत्परता। कृतज्ञता कृतस्य प्रत्युपकारतत्परता[5] ॥ ६ ॥

[5] प्रत्युपकारज्ञातृत्वम्

दैवेति। दैवसम्पन्नता—यद्यदिच्छति तत्तद् सम्पद्यते यस्य स दैवसम्पन्नः, तस्य भावः। बुद्धिरष्टगुणा प्रज्ञा। अक्षुद्र परिवारताऽक्षुद्र परिजनत्वम्। शक्यसामन्तता शक्या वशे कर्तुं सामन्ताः संसक्तमण्डलमर्यादाभूम्यनन्तरा अरयो यस्य तद्भावः। दृढभक्तिता स्थिरानुरागत्वं प्रतिपक्षनिर्व्यूढिरित्यर्थः॥ ७॥

दीर्घेति। दीर्घदर्शित्वं दीर्घं देशेन कालेन च व्यवहितं प्रज्ञाचक्षुषा चारचक्षुषा च द्रष्टुं शीलं यस्य तद्भावः। उत्साहः शौर्यादिगुणसंयुक्तत्वम्। शुचिता परदारादिनिरीहा। स्थूललक्ष्यता दित्सुः स्थूलमेव लक्ष्यं सत्र्याद्यादिभिः करोति न कृशं स्वल्पमित्यर्थः। विनीतता विनयतत्परता। धार्मिकता धार्मिकत्वमेते गुणाः साधु सम्यगामिकाः साध्वाभिगामिकाः संश्रयनीयत्वकारकाः। बहुभिराश्रितो भवतीति भावः॥ ८॥

एतदेव दर्शयितुमाह—गुणैरिति गुणैरेतैरनन्तरोक्तैरुपेतः सन् सुव्यक्तं निश्चयेन परिजनैरभिगम्यते, तथा च कुर्वीत यथा गच्छेल्लोकाभिगम्यताम्। लोकैरभिगतो राजा भवेन्नान्यथेति॥ ९॥

प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम्।
कुर्वीतात्महिताकांक्षी परिवारं महीपतिः॥ १०।

---

10. A ruler, in his own interest (i.e., the welfare of the state), should appoint men of renowned families, of unsullied character, able to attract attention of others, and pure (in thought and action), as his attendants or counsellors (*parivāra*).

आभिगामिकैर्गुणैरभिगतोऽपि परिवार एवं विधः कार्यो नान्यथेति दर्शयन्नाह—प्रख्यातेति। प्रख्यातो वंशः सोमसूर्यादिर्यस्य तम्। अक्रूरमहिंस्रम्। लोकसंग्राहिणं सुजनत्वादपरलोकसंग्रहणशीलम्। शुचिमपुंश्चलम्, अस्तेनं च[4]। एवंभूतं परिवारं कुर्यान्महीपतिरात्महिताकांक्षी। यस्तु विपरीतं करोति स नात्मनो हित इति॥ १०॥

[4] लमस्तेहनच

दुष्टोऽपि[5] भोग्यतामेति परिवारगुणैर्नृपः।
न क्रूर[6] परिवारस्तु व्यालाक्रान्त इव द्रुमः॥ ११।

---

[5] क्रूरोऽपि [6] न दुष्ट

11. A wicked king (i.e., devoid of qualities indicated above) may be resorted to if his counsellors are well qualified: But one with wicked or evil-minded counsellors (*krūra-parivāra*) is always shunned like a sandal tree infested with snakes.

गुणवद्—अगुण-परिवारे गुणं दोषं च दर्शयन्नाह—दुष्ट इति। दुष्टोऽपि नृपो गृध्र इव भोग्यतामाश्रयतामेति, हंससमैः परिवारगुणैः, नृपो न दुष्ट परिवारस्तु गृध्र परिवार इव हंससमोऽपि। व्यालाक्रान्त आशीविषपरिवेष्टितश्चन्दनद्रुम इव भोग्यतां नैति। तस्मात् सुपरिवारः स्यात्॥ ११॥

निरुन्धानाः सतां मार्गं भक्षयन्ति महीपतिम् ।
दुष्टात्मानस्तु सचिवास्तस्मात् सुसचिवो भवेत् ॥ १२ ।

12. Barring access to the honest and wise (i.e., disallowing implementation of wise counsel) the wicked counsellors eat up (exhaust) the vital element, the royal treasury, or in other words, the king himself, *bhakṣayanti mahīpatiṁ*. Hence the ruler should be careful in appointing good (wise) counsellors (*susaciva*).

एतदेव समर्थयन्नाह्—निरुन्धाना इति । सतां सत्पुरुषाणां विजिगीषुमभिगच्छतां मार्गं सेवान्तरद्वारैर्निरुन्धाना आसेवमानाः[5] प्रतिबन्धकत्वेन । भक्षयन्ति[6] महीपतिमिति, उत्पादक-सत्पुरुषशून्यं महीपतेः समुदयं कोशं भक्षयन्ति । समुदयभक्षणान्महीपतिरुपचाराद्भक्षितो भवति । दुष्टात्मानस्तु दुष्टाः सचिवा इति, अविशुद्धकर्मामात्या न योग्यास्तस्मात् सुसचिवो विशुद्धचित्त कर्मामात्यो भवेदिति ॥ १२ ॥

[5] अन्यसेवावसर

[6] महीपतिं भक्षयन्ति कोशनाशात्तन्नाशयति । अतस्सुसचिवस्सन्मार्गवर्ती अनुजीवी भवेत्…

विभूतीः प्राप्य परमाः सतां सम्भोग्यतां व्रजेत्[7] ।
यासु सन्तो न तिष्ठन्ति ता वृथैव विभूतयः ॥ १३ ।
असद्भिरसतामेव भुज्यन्ते धनसम्पदः ।
फलं किम्पाकवृक्षस्य ध्वाङ्क्षा भक्षन्ति नेतरे ॥ १४ ।

[7] सम्भोग्यतामियात्, सम्भोगतां नयेत्

13. After securing material prosperity (*bibhūti*), it should be made available for enjoyment to the honest (law-abiding) people. Because prosperity is useless if the good people cannot participate in it.

14. Wealth and properties in the hands of the wicked bring no benefit to the king or the state, just as fruits of the *kiṁpāka* trees (*mākāla*) are consumed by the crows (*dhvāṅkṣāh* or *kākāh*) only and none else.

सतां[7] मार्गनिरोधे कुसचिवकृते विभूतिवैफल्यं दर्शयन्नाह—विभूतीरिति । विभूतीर्विभवान् प्राप्य परमा उत्कृष्टाः । सतां सत्पुरुषाणां सम्भोग्यतां नयेत् । यासु विभूतिषु सन्तो न तिष्ठन्त्युपभोक्तुं ता वृथैव निष्फला विभूतय इति ॥ १३ ॥

साधुधने साधुसम्भोगं व्यतिरेकमुखेन दर्शयन्नाह—असद्भिरिति । असद्भिरसतामेव भुज्यन्ते धनसम्पदः । फलं हि पापवृक्षस्य किम्पाकवृक्षस्य महाकालवृक्षस्य [माकालफल इति भाषायां प्रसिद्धिः] ध्वाङ्क्षाः काकाः भक्षन्ति नेतरे ॥ १४ ॥

[7] सन्मार्गनिरोधे दोषमाह—सम्भोग्यतां सत्पुरुषाधिष्ठितताम् प्रापयेत् । अन्यथा निष्फला भवन्ति ॥ १३ ।

वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान् वशी ।
नेता दण्डस्य निपुणः कृतशिल्पः[8] सुविग्रहः[8a] ॥ १५ ॥
पराभियोगप्रसहो दृष्ट सर्व[9]प्रतिक्रियः ।
परच्छिद्रानुपेक्षी[10] च सन्धिविग्रहतत्त्ववित् ॥ १६ ॥
गूढमन्त्रप्रचारश्च[11] देशकालविभागवित् ।
आदाता सम्यगर्थानां विनियोक्ता च पात्रवित् ॥ १७ ॥
क्रोधलोभभयद्रोहस्तम्भचापल वर्जितः ।
परोपतापपैशुन्य मात्सर्येर्ष्यानृतातिगः ॥ १८ ॥
वृद्धोपदेशसम्पन्नः शक्तो[12] मधुरदर्शनः ।
गुणानुरागी[12a] स्मितवागात्मसम्पत् प्रकीर्तिता ॥ १९ ॥

---

[8] कृतविद्यः [8a] स्ववग्रहः [9] सर्वदृष्ट

[10] परच्छिद्रान्वेषी, परिच्छिद्रानुपेक्षी [11] प्रचारस्स्यात्

[12] श्लक्ष्णो [12a] मित

15-19. Qualities enumerated below constitute *ātmasampat* (or *Svāmi-sampat,* the personal possessions) of a king :—eloquence and frugality of speech (as necessary for refutation of others' arguments), memory (or power of retention), stately physical form (or domineering personality), strength (mental and physical), self-restraint (power of self-control), power of leadership, skill in the application of *daṇḍa* (coercive measures), perfection in all arts and sciences *kṛtaśilpa, kṛtavidyah*), ability to win over the anti-social elements, steadiness during enemy action, knowledge of ultimate results or possible reactions (of all actions *dṛṣtasarvapratikriya*), promptness in detecting the weak points of enemies, acquaintance with the laws of peace and war (*sandhivigraha tatvavid*), observance of strict secrecy of decisions or counsels as well as actions (*gūḍhamantra-pracāra*), ability to take advantages of place and time, collection of money (taxes) at standard rates (i.e., without imposing irregular levies) and utilisation of it in deserving cases (for the development of the state and its people), restraint of passions like anger, greed, fear, malice, obstinacy, and fickleness and avoidance of oppression (on others), spitefulness, avarice, jealousy and falsehood, respectfulness to counsel of the elders (the learned) agreeableness in speech and appearance, appreciation of merit (of the meritorious) and practice of using measured dialogue.

स्वामिप्रकृतिसम्बन्धिनामाभिगामिकगुणानां स्वरूपं गुणैरुत्कृष्टानामभिगच्छतां कर्मसन्निधानादीनां च प्रसङ्गात् स्वरूपमभिधाय प्रस्तुतामात्मसम्पदमभिधातुमाह—वाग्मीति । वाग्मी प्रशस्तवाक्, प्राशस्त्यं च वाचां ललितमधुरैरल्पैरेवाक्षरैर्बह्वर्थप्रतिपादनम् । प्रगल्भोऽपर्षद्भीरुः, सुरसदस्यपि विगतभयं वक्तीत्यर्थः ।

स्मृतिमान् श्रुतं दृष्टं वा वर्षशतेऽपि पृष्टो न विस्मरति। उदग्र उद्गताग्रः[8] प्रांशुरित्यर्थः। बलवानिति कायबलसम्पन्नो वृकोदरवत्। वशी जितेन्द्रियः, इन्द्रियविषये वशो विद्यतेऽस्येति। नेता दण्डस्य वधपरिक्लेशादिकस्य प्रणेता सुविज्ञात प्रणयनाच्चतुरङ्गबलात्मकदण्डस्य प्रणयनाच्च। निपुणं यथा भवति तथा, कृतशिल्पोऽभ्यस्तकलः, स्ववग्रहः सुखेनैवानीति प्रवृत्तोऽवगृह्यते[9] निषिद्ध्यत इति ॥ १५ ॥

किञ्च पराभियोगेति। पराभियोगप्रसहः परैः शत्रुभिः कृतमभियोगं विग्रहं सहते साध्वसादेवोपनतो न भवति, शत्रुकृतविग्रह सहिष्णुः। सर्वदृष्ट प्रतिक्रिय इति सर्वापायेषु दृष्टाः[10] प्रतिक्रियाः प्रतीकारा येन स तथा। परच्छिद्रान्ववेक्षी शत्रुच्छिद्रान्वेषणशीलः[11]। सन्धिविग्रहतत्त्ववित् इति षाड्गुण्य प्रयोगवित्,[12] सन्धिविग्रहोपादानात् षडपि गुणा गृहीता भवन्ति ॥ १६ ॥

अपरञ्च गूढेति। गूढमन्त्रप्रचारः गूढोऽतिगुप्तो मन्त्रः पञ्चाङ्गः कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपात प्रतीकारः, कार्यसिद्धिश्चेत्येवं लक्षणो यस्य। तथा गूढ प्रचारोऽन्यैरविदित-संचारः परेषामसाध्यः स्यात्। देशकाल-विभागविद् इति, देशः कोऽस्माकं युद्धाध्यवसेनास्थानादेरनुकूलः कालश्च, शत्रोः प्रतिकूलः, इति विभागं जानाति यः सः। आदाता सम्यगर्थानां प्रजादिभ्यः शास्त्रोक्तन्यायेन, तथा विनियोक्ता च सद्व्ययकरणेन। पात्रविद् इति, अर्थविनियोगे पुरुषार्थत्रयाभिसन्धिना। पात्राणि त्रिविधानि—धर्माभिसन्धिना ब्राह्मणतपस्विक्षपणकादयश्च, अर्थाभिसन्धिना मन्त्रिपुरोहितादयोऽर्थोत्पादकाः, कामाभिसन्धिना मनोरमाः स्त्रिय इत्येवं गुणवत्तया पात्राणि वेत्तीति ॥ १७ ॥

अपरञ्च क्रोधेति। क्रोधादि प्रतीतम्। परोपतापपैशुन्यमात्सर्येर्ष्यानृतानि प्रतीतानि। नात्यतिगच्छतीति परोपतापादिभिर्वियुक्त इत्यर्थः ॥ १८ ॥

किञ्च। वृद्धोपदेशेति। अनवरतं वृद्धोपदेशैः सम्पन्नो वृद्धोपदेशजनितसम्पत्तियुक्तः। शक्त इति, उत्साहशक्तिभिः समर्थ इत्यर्थः। मधुरदर्शनो रमनीयाकृतित्वात्। गुणानुरागी गुणवत्सु कृतानुरागः। स्मितवागीषद्धसितोपलक्षितवाक्, एवंपर्याय पञ्चविंशतिगुण परिकल्पिताऽत्मसम्पत्तिः, तथा सम्पद्यते विजिगीषोरात्मेति, आत्मसम्पत् प्रकर्षेण कीर्तिता पूर्वाचार्यैरिति ॥ १९ ॥

[8] मानविस्मरणशीलः। उदग्रः

[9] तेऽवबध्यत इति। [10] प्रतीकारद्रष्टा।

[11] शत्रुच्छिद्रद्रष्टा। [12] सन्धिविग्रहयोस्तत्त्वं षाड्गुण्यं, तद्वित्।

इत्यादिगुणसम्पन्ने लोकयात्राविदि स्थिरे।
निश्रृंतः पितरीवास्ते यत्र लोकः स पार्थिवः ॥ २० ॥

---

20. Adorned with these qualities (of head and heart) and well aware of the nature of men and matters (*lokayātrāvid*) he who remedies all troubles of his subjects and governs them as a father unto them (*pitarīvāste*), is worthy of being a *pārthiva* or ruler of earth (the dominion).

आत्मसम्पदो माहात्म्यं दर्शयन्नाह—इत्यादिगुणेति। इत्यादिगुणसम्पन्ने। लोकयात्रा

लौकिको व्यवहारस्तं वेत्तीति स तस्मिन् लोकयात्राविदि। स्थिरेऽचपले। निर्वृतो निर्वाणः सकलोपतापविच्छेदात्। पितरीव जनक इव। आस्ते स्थितिं करोति। पुत्र इव लोको जनपदो यत्र स पार्थिवः, नान्य इति ॥ २० ॥

आत्मसम्पद्गुणैः सम्यक् संयुक्तं युक्तकारिणम्।
महेन्द्रमिव राजानं प्राप्य लोकोऽभिवर्द्धते[12] ॥ २१ ।

[12] लोको विवर्द्धते

21. The king, who always applies his accomplishments (*ātmasampadguṇa*) in just and proper manner, gains, like *Mahendra* (the lord of the gods in heaven), prosperity in increasing proportions.

अमुमेवार्थं द्रढयन्नाह—आत्मसम्पदिति। युक्तकारिणं विमृश्यकारिणं प्राप्य लोको जनपदो विशेषेण वर्धत इति ॥ २१ ॥

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ २२ ।

22. Desire for learning (or spirit of inquiry *śuśrūṣā*), listening to discourses, perception and retention in memory as well as deliberation of different theories by logical process (*ūhah-apohah*) and realisation of their inner import (*tatvajñāna*), are intellectual faculties.

आभिगामिकगुणमध्ये पठिताया बुद्धेरुत्साहस्य च प्रत्येकं गुणान्तरमभिधातुं बुद्धेरष्टौ गुणानाह—शुश्रूषेति। शुश्रूषा[13] जन्मान्तरवासनया विद्यासु गुरोः श्रोतुमिच्छा। तदनन्तरं श्रवणं चतुर्वर्गस्य करोति। श्रुतस्य ग्रहणं श्रुतक्रमेणैव व्याख्यातस्यादानम्। धारणमवधारणं मनसि। विज्ञानमिति विविधं ज्ञानं सदसद् रूपम्। ऊहो वितर्कः, किमिदमेवंविधम्, अन्यथा वा, इति सन्देहः। विचार्य असतः श्रुतस्य परित्यागोऽपोहः। तत्त्वज्ञानं च तत्त्वाभिनिवेश इति, तत्त्वं परमार्थस्तत्राभिनिवेशश्चित्तस्यावेशनम्। एवमेतेऽष्टावपि गुणा धियः। यथा च कौटिल्यः—"शुश्रूषा श्रवणग्रहणधारणविज्ञानोहाऽपोहतत्त्वाभिनिवेशाः प्रज्ञा—गुणाः" (कौ अर्थ ६-१-४)। इति ॥ २२ ॥

[13] विद्यागुरोः श्रवणं, गुरूक्तस्य ग्रहणं, धारणं गृहीतस्य, ऊहः सुतर्कः, अपोहः विप्रतिपत्तियुक्तानामर्थानां निर्णयः, विज्ञानं विविधं ज्ञानं, एते शास्त्रार्थं समधिगच्छन्ति।

दाक्ष्यं शैघ्र्यं तथामर्षः शौर्यं चोत्साहलक्षणम्।
गुणैरेतैरुपेतः सन् राजा भवितुमर्हति ॥ २३ ।

23. Energy (*utsāhaśakti*) is composed of skilfulness, promptness, sustained animosity and valour (courage). A king becomes worthy of his position only by the possession of these qualities.

उत्साहगुणानभिधातुमाह—दाक्ष्यमिति। दाक्ष्यं कौशलम्। शैघ्र्यं क्षिप्रकारिता। अमर्षोऽप-

कारिणां[14] कथमप्यविस्मरणम्। शौर्यमभीरुत्वम्। एतदुत्साहलक्षणमित्यनेनोत्साहो लक्ष्यत इति। गुणैराभिगामिकैरात्मसम्पदुक्तैरनन्तरोक्तबुद्ध्युत्साहगुणैरुपेतोऽन्वितो राजा भवितुमर्हति महाराजत्वयुक्तो भवतीत्यर्थः ॥ २३ ॥

[14] अपकारानां

त्यागः सत्यं च शौर्यं च त्रय एते महागुणाः।
प्राप्नोति हि गुणान् सर्वानेतैर्युक्तो नराधिप[14] ॥ २४ ।

[14] महीपतिः

24. Kindness (in offering necessary substances to one seeking asylum), firm adherence to truth and valour are the three great royal qualities (*mahāguṇāh*), that make the king worthy.

एतेषां मध्ये गुणत्रयस्य प्राधान्यं दर्शयन्नाह—त्याग इति। स्थूललक्ष्यतालक्षणस्त्यागः (वदान्यता-लक्षणः वा) सत्यं शौर्यं च यथोक्तम्। एते त्रयो महागुणाः, महागुणफलसम्पादकत्वात्। एभिस्त्रिभिरेव गुणैर्युक्तः सर्वान् गुणान् प्राप्नोति। यत् सर्वैर्गुणैः कर्तव्यं तद् गुणत्रयमेव सम्पादयतीत्यर्थः। तथा च "त्यागेन विक्रमादित्यस्तथा शौर्येण शूद्रकः। सत्याद्युधिष्ठिरो राज्यं श्रूयते प्राप्तवानिति"[15] ॥ २४ ॥

[15] त्यागेन विक्रमादित्यः शौर्येण शूद्रकः फलम्। सत्येन युधिष्ठिरो राज्यं प्राप्तवानिति श्रुयते।

कुलीनाः शुचयः शूराः श्रुतवन्तोऽनुरागिणः।
दण्डनीति[14a] प्रयोक्तारः सचिवाः स्युर्महीपतेः ॥ २५ ।

[14a] दण्डनीतेः

25. *Sacivas* or ministers of the king should be of noble lineage, of unblemished conduct, bold, learned, loyal and experts in application of the principles of political science.

स्वामिगुणसम्पदमभिधाय, अमात्यगुणसम्पदमभिधातुं तावत्कर्मामात्य मन्त्रिपर्षदमात्यादीनां यथासम्भवं गुणानाह—कुलीना इति। कुलीनाः शुद्धोभयकुलसमुत्पन्नाः। शुचय इति स्वभावेन शौच-पराः। शूरा अभीरवः। श्रुतवन्तः, आन्वीक्षिक्यादि श्रुतं विद्यते येषां ते इति ज्ञातारः, अनुरागिणः स्वामिन्यनुरागवन्तः। दण्डनीतेः प्रयोक्तारः, अस्यैव नीतिशास्त्रस्य प्रयोक्तारः। सचिवाः सह चिन्वन्ति स्वामिना सहार्थानित्यमात्याः। स्युर्भवेयुः। महीपतेर्विजिगीषोः। कौटिल्येनैतदुक्तम्—"अभिजनप्रज्ञाशौच शौर्यानुराग-युक्तान् अमात्यान् कुर्वीत" (कौ अर्थ १-८-२६) इति ॥ २५ ॥

उपधाः[15] शोधिताः सम्यग्गाहमानाः फलोदयम्।
तस्य[16] सर्वं परीक्षेरन् सानुरागाः कृताकृतम् ॥ २६ ।

[15] उपधाशोधिताः सम्यगीऽमानाः

[16] तेऽस्य सर्वं

26. Such ministers whose loyalty is proved by relevant *upadhās* (tests) would be employed in examining carefully the results of all omissions and commissions of the king.

अमात्यादीनां शुचीनामप्युपधाशोधनं सूचयन्नाह—उपधेति। उपधाशोधिता इति। चतस्र उपधाः—धर्मोपधा, अर्थोपधा, कामोपधा, भयोपधा चेति। तद्यथा—अधार्मिकोऽयं राजा साध्वेनं हत्वाऽन्यमुपपादयाम इति प्रत्याख्याने शुचिरिति धर्मोपधा। लुब्धोऽयं न ददाति, अतो वधनीय इति प्रत्याख्याने शुचिरित्यर्थोपधा। राजमहिषी त्वां कामयते कृतसमागमोपायेति प्रत्याख्याने शुचिरिति कामोपधा। एकोऽमात्यः सर्वानावाहयेत् तेनोद्वेगेन किल राजा तानवरुन्ध्यात् कापटिकश्छात्रः[16] पूर्व्वावरुद्धस्तेषामेकैकमात्यं भयदर्शनेन राजवधार्थमुपनयेत् तत्प्रत्याख्याने शुचिरिति भयोपधा। तत्र कौटिल्यमतम्—"न त्वेव कुर्यादात्मानं देवीं वा लक्ष्यमीश्वरः। शौचहेतोरमात्यानामेतत्कौटिल्य दर्शनम् ॥" (१।१०।१७)

इत्येवमुपधाशोधिताः सम्यग् गाहमानाः फलोदयमस्येति स्वामिनः, सर्वं तन्त्रावापगतं[18] कार्यं परीक्षेरन् निरूपयेयुः। सानुरागाः कृतदानत्वादनुरागयुक्ताः। कृताकृतं किं कृतं किं वा न कृतमिति ॥ २६ ॥

[16] कापटिकश्चात्र। [17] तन्त्रोपगतं।

उपेत्य धीयते यस्मादुपधेति ततः स्मृता।
उपाया[17] उपधा ह्येयास्तयाऽमात्यान् परीक्षयेत् ॥ २७ ॥
स्वदेशजो जानपदः कुलशीलबलान्वितः।
वाग्मी प्रगल्भश्चक्षुष्मानुत्साही प्रतिपत्तिमान ॥ २८ ॥
स्तम्भचापलहीनश्च मैत्रः क्लेशसहः शुचिः।
सत्यसत्त्वधृतिस्थैर्य[17a] प्रभावारोग्य संयुतः ॥ २९ ॥
कृतशिल्पश्च दक्षश्च प्रज्ञावान् धारणान्वितः।
दृढभक्तिरकर्त्ता च वैराणां सचिवो भवेत् ॥ ३० ॥

[17] उपाय [17a] प्रतिभारोग्य

27. *Upadhā* is a means to get people (passing through it) nearer to the king (*upa+etya*) or join his service, hence it is so named. Thus *upadhās* are tests for examining the integrity of ministers.

28-30. The following qualities would make a good (worthy) minister (*saciva* or *mantri*). Agreeable personality (capable of preventing the anti-social elements and of winning them over), native of the soil (not of foreign extraction), high-born and of good conduct, possessing a strong physique, eloquent but frugal in speech (according to circumstances), far-sighted and influential (in society due to his integrity of character), devoid of both obstinacy and fickleness,

of amicable disposition (to all), painstaking and honest (in thought and action), *śuciśuddha* by means of *upadhā* tests, truthful, firm or steadfast (in all circumstances, fair or foul), patient and domineering, healthy (free from disease), well-versed in arts and crafts and skilful (in their practical application), possessing intellect and power of comprehension, devotedly loyal (to the master) and capable of counteracting hostilities of enemies.

उपधाशब्दनिर्वचनमभिधातुमाह[18]—उपेत्येति। उप समीपम्, एत्य धीयते ढौक्यते यस्मादुपधेति ततः स्मृता। उपायः, उपजाप प्रयोग उपधा ज्ञेया तयाऽमात्यान परीक्षयेत् ॥ २७ ॥

सामान्यत अमात्यानां गुणसम्पदमभिधाय मन्त्रिसम्पदमभिधातुमाह—स्वग्रह इति। उन्मार्गप्रवृत्तममात्यं येऽवगृह्णन्ति प्रभविष्णुतया विधृत्य निवारयन्ति बन्धु प्रभृतयस्तेऽवग्रहाः। शोभनतरा अवग्रहाः यस्यासौ स्ववग्रहः शोभनतरश्रृङ्खलक इत्यर्थः। स तद्भयात् नाकर्तव्ये प्रवर्तते। जानपद इति विजिगीषु-जनपदभवः, स्वजन्मभूमिवात्सल्यात् तद्विरुद्धं न समाचरति। कुल्माभिजात्यम्। शीलं सुस्वभावता ॥ बलं च कायबलं तेनान्वितः। वाग्मी प्रशस्तवाक्, प्राशस्त्यं च वाचां स्वल्पैरक्षरैरतिमनोहरैरनल्पार्थ प्रतिपादनम्। प्रगल्भोऽपरिषद्भीरुः। चक्षुष्मान् शास्त्रमेव चक्षुस्तद् युक्तः। उत्साही गुणत्रययुक्तेन उत्साहेनान्वितः। तथा च कौटिल्यः—"शौर्यममर्षोशीघ्रता दाक्ष्यं चोत्साह गुणाः" (कौ अर्थ ६।१।५) इति। प्रतिपत्तिरुत्पन्नप्रतिमा तथा युक्तः ॥ २८ ॥

अपरश्च स्तम्भेति। स्तम्भः स्तब्धता चापल्यमप्रतिष्ठितत्वं, ताभ्यां हीनः। मैत्रो मित्रहितः [मित्रावांहितः वा] स बहुमित्रो भवतीति। क्लेशसहः क्षुत्पिपासादिक्लेशान् सहत इति। शुचिश्चतुरुपधाशुद्धः, सत्त्वं व्यसनेऽभ्युदये यदविकारि, सत्यममृषावादः, धृतिरविषादित्वं, स्थैर्यं स्थितेरविचलत्वम्, प्रभावः प्रभुता, आरोग्यं नीरोगता, तैः संयुतः ॥ २९ ॥

किञ्च। कृतशिल्पश्चेति। कृतशिल्पोऽभ्यस्त सकलकलाकलापः, दक्षः शीघ्रकारी, प्रज्ञावानष्ट गुणबुद्धियुक्त, धारणमविस्मरणं तदन्वितः, दृढभक्तिरचलानुरागः, अकर्ता वैराणामिति स्वामिकृतवैराणामपि प्रशमयिता सचिवो मन्त्री भवेत् ॥ ३० ॥

[18] उपधाशब्दस्य निरुक्तिमभिधातुमाह—

स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चय।
दृढता मन्त्रगुप्तिश्च मन्त्रिसम्पत् प्रकीर्तिता ॥ ३१ ।

---

31. Of the qualities constituting *mantri sampat* (as enumerated above), three are essential, viz., memory for the purpose of taking prompt and quick decisions in the context of past events, power of deliberation for correct judgment, and firmness (devotion) for maintaining secrecy of policy decisions.

तथाऽन्यानपि मन्त्रिगुणानाह—स्मृतिरिति। स्मृतिर्धारणा, धारणान्वित इत्युक्तोऽपि गुणः पुनरुच्यते, आदरप्रदर्शनार्थम्। तत्परतार्थेषु अर्थेषु रसादिषु अतितात्पर्यम्। वितर्को बुद्धिगुणमध्ये

पठितोऽपीह पुनरुच्यते, आदरार्थम्। ज्ञानं यथार्थरूपं, तन्निश्चयः। दृढता दृढमतिता, दृढभक्तित्वेन प्रतिपादिताऽपि पुनरुच्यते, आदरार्थम्। मन्त्रगुप्तिः पञ्चाङ्गमन्त्र गोपनम्, इति मन्त्रिसम्पत् प्रकीर्तिता, एभिर्मन्त्री[19] सम्पद्यत इति ॥ ३१ ॥

[19] एभिर्मन्त्रैः

त्रय्यां च दण्डनीत्यां च कुशलोऽस्य[18] पुरोहितः।
अथर्वाविहितं कर्म[19] कुर्याच्छान्तिक पौष्टिकम्॥ ३२।

---

[18] कुशलः स्यात्

[19] नित्यं ; कुर्यात् नित्यशान्तिक पौष्टिकम्

32. The Royal Priest should be well versed in *Trayi* (the Vedas) and *Dandanīti* (Science of polity). He should always be engaged in the performance of *śāntika* and *pauṣṭika* ceremonies (expiatory and benedictory rites) as prescribed in the Atharvaveda.

अमात्यविशेषमेवाधिकतरगुणं पुरोहितमभिधातुमाह—त्रय्यामिति। मन्त्रिसम्पदुक्तगुणानामुपरि त्रय्यामुक्तलक्षणायां दण्डनीत्यां चास्यामेव कुशलः प्रवीणः पुरोहितः स्यात्। अथर्वोक्तेन शान्तिक पौष्टिकं कुर्यात्। तथा च कौटिल्यः—"पुरोहितम् उदितोदितकुलशीलं साङ्गवेदे दैवे निमित्ते दण्डनीत्यां च अभिविनीतमापदां दैवमानुषीणाम् आथर्वभिः उपायैः प्रतिकर्तारं प्रकुर्वीत (कौ. अर्थ. १-९-९ इत्यादि ॥ ३२ ॥

तादृक् सांवत्सरोऽप्यस्य ज्योतिःशास्त्रार्थचिन्तकः।
प्रश्नाभिधानकुशलो होरागणिततत्त्ववित्॥ ३३।

---

33. The Royal Astrologer should be an expert in making annual forecasts (of coming events as well as of seasonal changes, rainfall etc.), well-versed in the science of Astrology (theoretical and applied, i.e., one who can judge occult influences of stars and planets on human affairs), prompt and accurate in solving problems (referred to him) and proficient in the computation and interpretation of zodiacal signs, *horāśāstra* (Astronomy).

प्रसङ्गात् गणकगुणमभिधातुमाह-तादृगिति। स्पष्टम्॥ ३३ ॥

साधु तेषाम्[20] अमात्यानां तद्विधेभ्यस्तु बुद्धिमान्।
चक्षुष्मत्तां[21] शिल्पं च परीक्षेत गुणद्वयम्॥ ३४।

---

[20] साधुतेषाम् [21] चक्षुष्मत्तां च

34. An intelligent monarch would test the merits of the *amātyas* (both *Dhīsacivas* or counsellors and *Karmasacivas* or executive officers), with the assistance of experts in respective fields, so also about the two

aspects of efficiency (theoretical and practical) viz., extent of knowledge or vision (*cakṣuṣmattā*) and acquaintance with practical methods in different arts and crafts (*śilpa kalā*).

अमात्यगुणपरीक्षामभिधातुमाह—साधु इति। तेषामित्यनन्तरोक्तानां, सर्वेषाम कर्मामात्यबुद्धग्र-मात्यादीनां, साधु यथा भवति तथा। तद्विद्येभ्य इति। सा एव विद्या परीक्षितुमारब्धा येषां ते तद्विद्याः, तैः सह स्वामी बुद्धिमानष्टगुण बुद्धियुक्तः। चक्षुष्मत्तां शास्त्रदर्शित्वं, शिल्पं चित्रादिकर्म, कौशलं कलायुक्तमिति द्वयं परीक्षेत ॥ ३४ ॥

स्वजनेभ्यो विजानीयात् फलस्थानानवग्रहम्[22] ।
परिकर्म स्वदाक्ष्यं[23] च विज्ञानं धारयिष्णुताम् ॥ ३५ ।
गुणद्वयं[24] परीक्षेत प्रागल्भ्यं प्रतिभान् तथा ।
कथायोगेन[25] बुध्येत वाग्मित्वं सत्यवादिताम् ॥ ३६ ।

[22] कुलं स्थानमवग्रहम् [23] परिकर्मसु दाक्ष्यं च
[24] गुणत्रयं [25] कथायोगेषु

35. From their kinsmen (relatives should be obtained information about their family, place of origin (i.e., whether foreigner or not), and of the nature of their social standing. But about their (three-fold) qualities of skilfulness, special knowledge (or attainments) and power of comprehension, the king should assess their actual performance.

36. To ascertain their power of expression, and intellect (the two important qualities), as also eloquence and truthfulness, the king should hold discussions with them.

स्वजनेभ्य इति। परीक्ष्य गोत्रजेभ्यो जाणीयात, कुलमाभिजात्यम, आसन्नतरेभ्यः स्थानं जन्म-जनपदं वा। नियामकं च बन्धुवर्गमेतद् गुणत्रयं तथा परिकर्मसु दुर्गादिकरेषु दाक्ष्यं कौशल्यं, विज्ञानं विविधं ज्ञानं, धारायिष्णुतामवधारणशीलताम् ॥ ३५ ॥

गुणत्रयमिति। एतच्च गुणत्रयं परीक्षेत, इति पूर्वेण सम्बन्धः। कथायोगेषु स्वामिना पृष्टेषु। प्रागल्भ्यं परिषदभीरुता। प्रतिभा उत्पन्नमतिता। वाग्मित्वं वचनकौशलं सत्यवादिता च। एतद् गुणचतुष्टयं कथायां जानीयात् ॥ ३६ ॥

उत्साहं च प्रभावं च तथा क्लेशसहिष्णुताम् ।
धृतिं चैवानुरागं च स्थैर्यं वा यदि[26] लक्षयेत् ॥ ३७ ।

[26] चापदि लक्षयेत्

37. Their energy, influence and endurance (in difficult situations), as well as their memory (retentive faculties) loyalty and steadiness (power of composure) can only be tested in times of trouble.

उत्साहमिति। उत्साहं शौर्यादिगुणयुक्तत्वम। प्रभावं··· । क्लेशसहिष्णुतां पीडासहत्वम्। धृतिमविषण्णत्वम्। अनुरागं स्वामिक्लेशक्लिष्टस्याप्यविरक्तत्वम्। स्थैर्यमभङ्गुरत्वम्। इत्येतदपि सङ्ग्रामाभ्युदुर्भिक्षकोशक्षयादिकार्याल्लक्षयेत, जानीयादिति ॥ ३७ ॥

भक्तिं मैत्रीं च शौचं च जानीयाद् व्यवहारतः।
संवासिभ्यो बलं सत्त्वमारोग्यं शीलमेव च ॥ ३८ ।

---

38. The measure of their devotion (to the lord) friendliness and purity (honesty) can be ascertained from their behaviour; and their physical strength, firmness of attitude, health condition and conduct by close association with them.

भक्तिमिति। भक्तिं स्वामिनि। मैत्रीं बहुमित्रतां, व्यवहारे कश्चिदपि शत्रुर्न भवतीति। शौचमर्थधर्मादिविषयमेतज्जानीयात, व्यवहारतः। संवासिभ्य इति सम्यक् समं वासो यैस्तेभ्यः। बलं कायबलम्। सत्त्वं सुसन्धता।[20] आरोग्यं शीलमेवं जानीयात् ॥ ३८ ॥

[20] मुसङ्गता ; सुसन्धिता ; सत्त्वं सत्त्ववृत्तिता।

अस्तब्धतामचापल्यं वैराणाम् चापि[27] कर्त्ताम्।
प्रत्यक्षतो विजानीयाद् भद्रतां क्षुद्रतामपि ॥ ३९ ।

---

[27] चाप्यकर्तृताम्

39. Their obstinacy or fickleness and their power of counteracting enemy designs (or forces) as well as their gentlemanliness (liberality of outlook) or narrowness should be known from direct knowledge (*pratyakṣa* or knowledge derived first hand).

अस्तब्धतामिति। अस्तब्धतामचापल्यं वैराणां चाप्यकर्तृताम्[21] इति प्रतीतम्। स्वजनेभ्यो विजानीयादिति परोक्षस्य परोपदिष्टत्वात् प्रत्यक्षतो विजानीयाद् भद्रतामित्यादि ॥ ३६ ॥

[21] ताश्चैतत् संवासिभ्यो जानीयात्। भद्रतामित्यादिप्रत्यक्षम् ॥

कर्मानुमेयाः सर्वत्र परोक्षगुणवृत्तयः।
तस्मात्परोक्षवृत्तीनां फलैः कर्म विभावयेत्[28] ॥ ४० ।

---

[28] कर्मोपलक्षयेत्

40. Ministers may possess additional (secondary) qualities, not directly observed but reported by others (*parokṣa*). The merit of such reported qualities may be determined on the basis of results achieved.

एवं प्रमाणद्वयेन परीक्षामुक्त्वा, अनुमानेनाप्यभिधातुमाह—कर्मानुमेया इति। परोक्षगुणवृत्तय इति। परोक्षा अप्रत्यक्षाः, गुणस्य रामणीयकत्वादिकस्य वृत्तयः। येनैव केयूराद्याभरणं कृतं सोऽन्यदपि

रमणीयं करोतीत्यनुमीयत इति कर्मानुमेयाः परोक्षगुणवृत्तयः। यत एवं तस्मात्परोक्षवृत्तीनां कर्मणां फलैर्निष्पत्तिलक्षणैरनिष्पन्नं कर्म (उपलक्षयेत्)। विभावयेत, अनुमिन्वीत। तथा च कौटिल्यः— "प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिस्तत्र स्वयं दृष्टं प्रत्यक्षं, परोपदिष्टं परोक्षं, कर्मणा कृतेनाकृतावेक्षणमनुमेयम्" (कौ. अर्थ १।९।४—७) इति प्रमाणाश्रयेण सर्वं परीक्ष्यमिति भावः ॥ ४० ॥

सज्जमानमकार्येषु निरुन्ध्युर्मन्त्रिणो नृपम्।
गुरूणामिव[29] चैतेषां शृणुयाद्वचनं नृपः[29a] ॥ ४१ ।

[29] गुरूणामपि [29a] शृणुयान्नृपतिर्वचः

41. A king should listen to the advice of such ministers, who prevent him from taking wrong actions (out of passions), as he would do to his preceptors (*gurūṇāmiva*).

मन्त्रिणां स्वामिनश्च विधेयमाह—सज्जमानमिति। अकार्येषु शास्त्रनिषिद्धत्वाद्व्यसनादिषु सज्जमानमासक्तिं गच्छन्तं, निरुन्ध्युः प्रतिषेधेयुः, आत्मन्य मन्त्रिणो नृपमिति मन्त्रिणां कर्म गुरूणामिव, इहलोक-परलोकदायी जनकाचार्यादीनामिवैतेषां मन्त्रिणां शृणुयात, श्रवणमत्रानुष्ठानपर्यन्तं ग्राह्यम्। पृथिवीपतिः स्वामी ॥ ४१ ॥

नरेश्वरे जगत् सर्वं निमीलति निमीलति।
सूर्योदये यथाऽम्भोजं[30] तत्प्रबोधे प्रबुध्यते ॥ ४२ ।

तं[31] बोधयेज्जगन्नाथं स[31a] बुध्येत यथा तथा।
धीसत्त्वोद्योगसम्पन्नैस्तत् कर्मसु समाहितै[31b] ॥ ४३ ।

नृपस्य ते हि सुहृदस्त एव गुरवो मताः।
य एनमुत्पथगतं वारयन्त्यनिवारिताः ॥ ४४ ।

[30] इवाम्भोजं [31] तद् [31a] संबुध्येत
[31b] स्तत्कार्यं तदुपाश्रितैः ; नैः कार्य तत्तत्समाश्रितैः ॥

42. Because with the acts of commission and omission of a king (unrestrained by ministers), the prosperity of his dominion collapses like the setting of the sun (enveloping the world with darkness). Again just as the lotus blossoms in all its glory at sunrise, so also the prosperity of the state and its people flourishes with the awakening of senses of the king by the chastening effect of the advice of the ministers.

43. It is for the ministers endowed with intellect, firm devotion and energy (*dhīsattvodyoga*) to explain and make the king understand the proper course of action (i.e., guide him and restrain him from straying from the right path).

44. Such ministers, who unfailingly guard the king from going astray (acting unrestrainedly), are considered as the best of friends, nay teachers of the king.

जगतो विनाशाभ्युदययोर्नरेश्वरविनाशाभ्युदयौ हेतु भवत इति दर्शयन्नाह—नरेश्वर इति। नरेश्वरे विजिगीषौ, निमीलति विनश्यति जगत् सर्वं मात्स्यन्यायात् क्षयं याति। सूर्योदयेऽम्भोजमिव तत्प्रबोधे नरेश्वरस्याभ्युदये प्रबुध्यते[३१] जागर्ति, जगदित्यर्थः ॥ ४२ ॥

तद्बोधयेदिति। तस्माद् बोधयेत् व्युत्पादयेदमात्यादिर्जगन्नाथं भुवनेश्वरम्। स स्वामी बुद्ध्येत, यथा येन प्रकारेण, पञ्चतन्त्र-कथादिभिरपि बोधयेत्। धीसत्त्वोद्योगसम्पन्नैः पुरुषैस्तत् तत्कार्यं तन्त्रगतमावापगतं वा। तदाश्रितैर्विशेषतः सेवकैः करणभूतैः ॥ ४३ ॥

मन्त्रिणां जगन्नाथबोधकानां प्रशंसामभिधातुमाह—नृपस्येति। नृपस्य जगन्नाथस्य, ते हि यस्माद् मन्त्र्यादयः सुहृदो बान्धवाः, त एव गुरवोऽभ्यर्हिततरा आचार्या मताः शास्त्रकारमताः, एनं नृपं य उत्पथगतं शास्त्रनिषिद्धमार्गप्रवृत्तं वारयन्ति, अनिवारिताः केनाप्यनिषिद्धाः ॥ ४४ ॥

[३१] प्रबुध्यति विस्तारं याति।

सज्जमानमकार्येषु सुहृदो वारयन्ति ये।
सत्यं ते नैव[32] सुहृदो गुरवो गुरवो हि ते ॥ ४५ ॥

---

[३२] सत्यं न ते हि

45. Friends or advisers who dissuade the king from taking unjustifiable actions are not mere friends, they may be ranked as the greatest of his teachers.

एतदेव द्रढयितुमाह—सज्जमानमिति। अकार्येषु निषिद्धाचरणादिषु सज्जमानमकार्येष्वासक्तिं यान्तमनाचारेषु, सुहृदोऽनुरक्तहृदयाः शुद्धहृदया वा बान्धवाः, वारयन्ति ये ते सत्यं सुहृदो न भवन्ति। गुरव आचार्याः। किं सामान्या गुरव इति? न, गुरवो महान्त इति ॥ ४५ ॥

कृतविद्योऽपि बलिना व्यक्तं रागेण रज्यते।
रागानुरक्तचित्तस्तु[33] किं न कुर्यादसाम्प्रतम् ॥ ४६ ॥

---

[३३] रागोपरक्तचित्तः सन्

46. However accomplished and strong, if one (the king) is under the influence of any of the passions, what wrong can he not commit out of his attachment to passions?

उत्तमो विनययुक्तः कथमकार्येषु सक्तो भवति? इत्याशङ्क्याह—कृतविद्य इति। कृतविद्योऽपि बलिनाऽतिबलवता, व्यक्तं स्पष्टतरं, रागेण विषयानुरागेण, रज्यते तन्मयो भवति। रागोपरक्तचित्तः सन् किं नाम न कुर्यात्? अपि तु सर्वमेव कुर्यात्। असाम्प्रतमित्ययुक्तं शास्त्रनिषिद्धमिति ॥ ४६ ॥

पश्यन्नपि भवत्यन्धः सम्राड्रागोवृतस्तुसन्[34] ।
सुहृद्वैद्याश्चिकित्सन्ति निर्मलैर्विनयाञ्जनैः ॥ ४७ ।

[34] पुमान् रागावृतेक्षणः

47. He is blind (to the real situation) inspite of possessing eyes. His vision is coloured (*rāgāvṛta*) by his passions (as in the case of one afflicted with jaundice), and he needs the treatment of his able advisers who apply the collyrium of purifying lessons of discipline (*vinayāñjana*).

रागसामर्थ्यं सहायसामर्थ्यं च दर्शयन्नाह—पश्यन्नपीति । पुमान् पश्यन्नपि लोचनाभ्यां सूर्याद्यवलोके[33] सति यद्यपि यथापि भवत्यन्धः । लोकद्वयाविरुद्धकार्याणामदर्शनात् तदिदमान्ध्यं नीलीसंज्ञकान्ध्यसमानम् । रागावृतेक्षणो रागोपरक्तनयनः । सुहृदः सचिवा एव वैद्याश्चिकित्सन्त्या-न्ध्यमपनयन्ति । निर्मलैरभिहारिभिर्विनयाञ्जनैरिन्द्रियजयोपदेशाञ्जनैरिति ॥ ४७ ॥

[33] लोकयन्नपि

रागमानमदान्धस्य स्खलतः शत्रुसङ्कटे[35] ।
हस्तावलम्बो भवति सुहृत्सचिव चेष्टितम् ॥ ४८ ।

[35] पृथिवीपतेः

48. A ruler loses his monarchy due to his blindness caused by excessive attachment to passions of anger, arrogance and conceit. He may however maintain his hold only (as if by his hands) due to the efforts of his advisers and ministers.

तदेव दर्शयन्नाह—रागेति । रागमानमदैरन्धस्य, रागो विषयेष्वनुरक्तता । मान आत्म-सम्भावना । मदो यौवनवसुशौर्यादिकृतः । तैरन्धस्य कार्यमपश्यतः स्खलतः शत्रुकृतापदि पततो हस्तावलम्बो भवति । स्खलन्तो यथा हस्तावलम्बेन धार्यन्ते तद्वत् सुहृत्सचिवचेष्टितं मन्त्रिचेष्टितम्, तेन स्वामी स्खलन् धार्यत इति ॥ ४८ ॥

मदोद्धतस्य[36] नृपतेः सङ्कीर्णस्येव दन्तिनः ।
गच्छन्त्यन्यायवृत्तस्य नेतारः खलु वाच्यताम् ॥ ४९ ।

[36] मदोद्वृत्तस्य

49. If they (ministers and advisers) do not restrain the king from committing wrongs under the influence of passions like the rogue tuskers, they themselves become objects of censure.

ये तु स्वामिनः स्खलितान्युपेक्षन्ते तेषां दोषान् दर्शयन्नाह—मदोद्धतस्येति । मदेनोद्धतस्योन्मार्ग-प्रवृत्तस्य, नृपतेर्विजिगीषोः । सङ्कीर्णस्येव दन्तिनः । न भद्रस्य, भद्रः स्वभावत एव विनीतो भवति । गच्छन्त्यन्यायप्रवृत्तस्य शास्त्रोक्तवृत्तरहितस्य । नेतारो मन्त्र्यादयो ये नैव निवारयन्ति ते । वाच्यतां

निन्यताम्। खलु निश्चयेन गच्छन्ति। स्वामी स्खलन् रक्ष्य इत्यपि[24] मन्त्रिगुणो द्रष्टव्यः। एवंच मन्त्रिगुणसम्पत् सम्पूर्णा भवतीति भावः ॥ ४६ ॥

[24] अयमपि

भूगुणैर्वर्द्धते राष्ट्रं तद्वृद्धिर्नृपवृद्धये।
तस्माद् गुणवतीं भूमिं भूत्यै भूपस्तु[27] कारयेत् ॥ ५० ॥

[27] नृपतिराक्सेत्; भूपतिराविशेत्।

50. The quality of the land (fertility and soil resources) is the root of prosperity of the kingdom and with the progressive prosperity of the kingdom flourishes the strength of the king himself. Hence the king should take necessary steps to develop resources of fertile lands.

स्वामिप्रकृतेरमात्यप्रकृतेश्च गुणसम्पदमभिधाय राष्ट्रप्रकृतिरभिधेया। राष्ट्रं च द्विधाऽवस्थितं भूमिर्जनपदश्च। तत्र भूमेरेव तावद् गुणसम्पन्नायाः सामर्थ्यं दर्शयन्नाह—भूगुणैरिति। भूगुणैर्वक्ष्यमानलक्षणैर्वर्धते राष्ट्रं जनपदः। तद् वृद्धिर्नृपवृद्धये, राष्ट्रवृद्ध्या कोशवृद्धिः, तयैव तस्य दण्डस्य वृद्धिः, तया मण्डलान्तरग्रहणान्नृपस्य वृद्धिरिति। तस्माद् गुणवतीं भूमिं भूत्यै भूपतिराविशेदिति प्रतीतम् ॥ ५० ॥

[24] अयमपि

शस्याकरवती पण्यखनिद्रव्य समन्विता।
गोहिता भूरिसलिला पुण्यैर्जनपदैर्वृता[38] ॥ ५१ ॥
रम्या सकुञ्जरवना वारिस्थल पथान्विता[39]।
अदेवमातृका चेति शस्यते भूर्विभूतये[39a] ॥ ५२ ॥

[38] र्यता [39] यथान्विता [39a] भूरिभूतये

51-52. Land resources (*bhūsampad* or *janapadasampad*) may be enumerated as follows,—fertile (yielding abundant crops), productive of different types of commodities, rich with mines and mineral resources, suitable for cattle rearing, copiously watered or with abundant water resources, inhabited by righteous people, resplendent with charms of nature, abounding with elephant forests, possessing adequate communication links by water routes and land routes (conducive to trade), and not dependent on rains (*adevamātṛkā*) for cultivation (due to prevalance of irrigation system).

भूमिगुणानेवाभिधातुमाह—शस्याकरवतीति। शस्यानि अष्टादशापि धान्यानि पूर्वमध्यावरबीजवापानि। आकराः, सुवर्णाद्युत्पत्तिस्थानानि। पण्यानि कुङ्कुमागुरुजीरकादीनि। खनयः, वज्रमणिमुक्ताद्युत्पत्तिस्थानानि। द्रव्याणि शाकातिनिशादिदुर्गाद्युपयोगिसारवृक्ष वनानि तैरन्विता। गोहिता गवां क्षीरवृद्धि विधायिनी। भूरिसलिला प्रचुर जला। पुण्यैर्धार्मिकैर्जनपदैः वर्णाश्रमिभिर्युता ॥ ५१ ॥

किञ्च, रम्येति। रम्या रमणीया। सकुञ्जरवना हस्तिवनोपेता। वारिस्थलपथाभ्यां युक्ता, जलमार्गस्थलमार्गाभ्यां युक्ता। अदेवमातृका, देवः पर्जन्य एव मातृका यस्याः सा देवमातृका पर्जन्य सस्येत्यर्थः, तद्विपरीता अदेवमातृका। भूरिसलिलत्वेन सरित्सरः सहस्रसङ्कुलत्वेनापर्जन्यसस्या इत्यर्थः। एवं प्रकारा शस्यते भूविभूतये भवतीत्यर्थः ॥ ५२ ॥

सशर्करा[40] सपाषाणा साटवी नित्यतस्करा।
रूक्षा सकण्टकवना सव्याला चाति भूरभूः ॥ ५३ ।

[40] सशर्करोषगा ; सर्करोषरपाषाणा

53. A land becomes unworthy (for possession or uneconomic) if it is of rugged soil, strewn with gravels and stones, excessively forested and full of thorny shrubs, arid and sandy, infested with thieves, wild animals and reptiles.

भूदोषानभिधातुमाह—शर्करेति। शर्कराः प्रस्तरशकलानि। ऊषरः क्षारमृत्तिका यत्र बीजादि न प्ररोहति। पाषाणाः शिलासमूहाः, तैः सह वर्तत इति। अटवी तात्स्थ्यादाटविकाः, तैर्युता[25]। नित्यतस्करा (चौरा) प्रतिरोधकादिभिर्विरहिता। रूक्षा स्निग्धत्वरहिता। सकण्टकवना कण्टकवनान्विता। सव्याला व्याघ्रसिंहसर्पवती। भूः, अभूः सा भूरेव न भवति बहुदोषत्वात् ॥ ५६ ॥

[25] साटवीगर्तयुक्ता

स्वाजीव्यो[41] भूगुणैर्युक्तः सारूपः[42] पर्वताश्रयः।
शूद्रकारुवणिक्प्रायो महारम्भकृषीवलः ॥ ५४ ।
सानुरागो रिपुद्वेषी पीडाकरसहः पृथुः।
नानादेश्यैः समाकीर्णो धार्मिकः पशुमान् धनी ॥ ५५ ।
ईदृग् जनपदः शस्तोऽमूर्ख[43]व्यसनिनायकः।
तं वर्द्धयेत् प्रयत्नेन तस्मात् सर्वं प्रवर्द्धते[44] ॥ ५६ ।

[41] स्वाजीवो [42] सानुपः [43] शस्तो मूर्खं [44] प्रवर्तते

54-56. A land is considered to be the best which provides occupations to the inhabitants (of different professions and trades), rich with resources (agricultural and mineral resources) ; adequately watered (by natural perennial rivers and lakes) ; situated at the base of a hill (providing fodder for cattle and wood for fuel) ; inhabited by the *śūdras* (agricultural and industrial labour) artisans and craftsmen, and traders (engaged in their respective vocations) ; where extensive agricultural operations are undertaken (by the cultivators) ; where inhabitants are loyal, wrathful to enemies or free from vices (*ripudveṣī*) ; and who ungrudgingly bear the burden of taxation even when excess levies are imposed ; which is

visited by foreigners (from different other kingdoms for trade or other purposes); where people are pious (who follow their respective modes of life as prescribed in the Dharmaśāstra); who possess enough livestock and wealth, and where popular leaders (*nāyakaḥ*) are not foolish and sensuous or addicted to sensual pleasures. Such a land should be developed at all costs (with all possible efforts), as it becomes the root of all prosperity.

जनपदगुणानभिधातुमाह—स्वाजीव्य इति। स्वाजीव्यः सुखमाजीव्यते श्रेण्यादिभिः,[26] अविरहितत्वात्। भूगुणैरनन्तरोक्तैर्युक्त इति। भूमिर्भूमिनिविष्टोजनपदश्च राष्ट्रशब्देनात्र गृह्यते। सानूपः [सास्यः इति मूलग्रन्थे] सजलभूमियुतः इक्षुशाल्यादि (नानाशस्य) प्रभवत्वात्। पर्वताश्रय इति तृणकाष्ठादि सौकर्य सम्पादनात्। शूद्रकारुवणिक्प्राय इति। विधेयत्वाद् यथेष्टभोग्यो भवति। महारम्भः, महान्तः कृष्याद्यारम्भाः कृषीवलानां कर्षकानां यत्र स तथा ॥ ५४ ॥

सानुराग इति। सानुरागः स्वामिनि। रिपुद्वेषी स्वामिशत्रौ द्वेषवान्। पीडाकरसह इति स्वचक्रकृतां पीडामल्पकोशत्वादधिकमपि करमाततं सहत इति। पृथुर्विस्तीर्णः। नानादेश्यैः समाकीर्णः सकलदेशजनैर्वाणिज्या (या) यातैराकीर्णः पण्य प्राचुर्यकरत्वात्। धार्मिक इति धर्मस्य षष्ठांशादानेनोपकरोतीति। पशुमान् क्षीरघृतादिभिरुपकरोतीति। धनी धनित्वात्[27] दन्डकरादिभिर्न पीड्यत इति ॥ ५५ ॥

अपरञ्च, ईदृगिति। अभिहितस्वरूपः। जनपदो राष्ट्रम्। शस्तः सद्भिः कृताशंसः। मूर्खा बुद्धिरहिताः। व्यसनिनो विषयासक्ताः। नायकाः प्रजासु मुख्या यस्य। सोऽतिसन्धानपरो न भवति, अतिसन्धातुं न शक्यते। तं तादृग्भूतं जनपदं वर्धयेद् वृद्धिं नयेत् प्रयत्नेन। तस्माजनपदात्, सर्वं सर्वाङ्गमपि राज्यम्, वर्धते वृद्धिं यातीति ॥ ५६ ॥

[26] दिभिर्हितत्वात्; दिहितत्वात्; अरहितत्वात्

[27] धनसम्पन्नजनवान्

पृथुसीम महाखातमुच्चप्राकारगोपुरम्।
समावशेत्[45] पुरं शैलसरिन्न[46] वनाश्रयम् ॥ ५७।

[45] समावसेत् [46] सरिन्मरु

57. Forts or fortified townships, which may be of four kinds according to location) viz., hill fort (built on a hill), watery fort (built on an island in the midst of a river or surrounded by low lands), desert fort, and forest fort, should be constructed (for the security of the kingdom). Each of them must be of-extensive area surrounded by a deep moat or ditch (*mahākhātam*) and well protected by high ramparts fitted with strong gateways (*uccaprākāragopuram*). These constitute the *durgasampad*).

राष्ट्रप्रकृतेगु णसम्पदमभिधाय दुर्गप्रकृतिमभिधातुमाह—पृथुसीमेति। पृथुसीम विस्तीर्ण मुख-भूमिः[28]। महाखातमिति महान्ति खातानि परिखाः। तथा च कौटिल्यः—"महा परिखास्तिस्रो दण्डान्तराः कारयेत् चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः" इति॥ (कौ. अर्थ. २।३।४)। उच्चप्राकारगोपुरमिति, प्राकारः, वप्रस्योपलक्षणार्थः[29] तथा च गुरुः—"वप्रस्योपरि प्राकारं विष्कम्भ-द्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्ध्वमोजं युग्मं वा आचतुर्विंशतिहस्तात्" (कौ. अर्थ. २।३।७) इत्यादि। एवं विधीच्चप्राकारो गोपुरं च प्रतोलीद्वारं यस्य तत् समावसेत् राजा। समुदायस्थानं स्थानीयम्[30]। शैलसरिन्मरुवनाश्रयमिति, पर्वतोदकधन्ववनदुर्गाणामन्यतमदुर्गाणामन्यतमदुर्गाश्रयम्॥ ५७॥

[28] बाहिरिकाभूमिः [29] उच्चवप्रोपलक्षणार्थम् [30] स्थानीयं समुदयस्थानम्।

जलवद्धान्यधनवद् दुर्गं कालसहं महत्।
दुर्गहीनो नरपतिर्वाताभ्रावयवैः समः॥ ५८।

58. A fort with sufficient provision for water and stocks of grain (foodstuff) would be able to withstand a seige or other enemy actions. Such a fort is considered really great (*mahat*, impregnable). A king without a fort is as helpless as clouds driven by a storm.

जलवदिति प्रचुरजलम्। धान्यधनवदिति। धान्यान्यष्टादशापि, धनं सुवर्णादिरत्न तत् सम्पन्नम्। दुर्गं कालसहं निचयसम्पन्नत्वात्। विस्तीर्णत्वान्महत्। दुर्गहीनो नरपतिर्वाताभ्रावयवैः समोऽलब्धावस्थितिर्भवतीत्यर्थः॥ ५८॥

औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा।
प्रशस्तं शास्त्र[47]मतिभिर्दुर्गं दुर्गोपचिन्तकैः॥ ५९।

[47] शस्तं प्रशस्तम्

59. Thus the five types forts viz., *audaka* (protected by flowing water), *pārvata* (hill fort), *vārkṣaṁ* (forest forts), *airiṇa* (fort in an arid waterless area) and *dhānvana* (fort in a sandy desert area) are considered worthy (for purposes of security of the kingdom) by the wise men conversant with the science of fort constructions.

शैलसरिन्मरुवनदुर्गाश्रयमित्युक्तं तदेव व्याख्यातुमाह—औदकमिति। औदकं वा दुर्गं प्रचुर जलसम्पन्नम्, कौटिल्येन द्विधोक्तम्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धम्। पार्वतं प्रास्तरं गुहा वेति, एतदपि द्विधैवोक्तम्। वार्क्षं वृक्षैर्दुर्गं वृक्षबहुलत्वात् अतिगहनं, तदपि खञ्जनोदकं स्तम्बगहनं वेति द्विधैवोक्तम्। ऐरिणमिति, इरिणे निर्जले देशे भवमैरिणम्। निस्तृणस्तम्बजलो देशे धन्वा तत्र भवं धान्वनमिति। अत्र नानयोर्द्वयो साम्यम्। एवं गुरोर्मतेनाष्ट दुर्गाणि। एतन्मते पञ्चैव प्रशस्तानि। प्रशस्तमनुशिष्टं शास्त्रमतिभिर्दुर्गं दुर्गोपचिन्तकैराचार्यैरिति॥ ५९॥

जलान्नायुधयन्त्राढ्य[48] धीरयोधैरधिष्ठितम् ।
गुप्तिप्रधानमाचार्या दुर्गं समनुमेनिरे ॥ ६० ।

[48] शस्त्राढ्यं

60. In the opinion of the *ācāryas* (teachers of polity) a fort worth the name should have sufficient arrangement for water and provisions as well as abundant stocks of weapons and other implements for war, strong garrisons of heroic soldiers and adequate secret shelters (for the safety of the king and his entourage during enemy operations).

दुर्गगुणानभिधातुमाह—जलेति । जलं प्रचुरतममन्नं च । आयुधानि च धनुरादीनि । यन्त्राणि सर्वतोभद्रजामदग्न्यादीनि तैराढ्यं सम्पन्नम् । धीरयोधैः शौर्यशिल्पसम्पन्नैः, [धैर्यशालियोद्धृपुरुषैः] । सुष्ठ्वधिष्ठितं कृतरक्षम् । गुप्ति प्रधानं रक्षाप्रधानं, रक्षा च प्रधाना दुर्गस्य । आचार्याः शुक्र-सुरगुरुप्रभृतयः, समनुमेनिरे सम्यगनुमतिं दुर्गविषये कृतवन्तः ॥ ६० ॥

सापसाराणि दुर्गाणि भुवः सारूप[49]जाङ्गलाः ।
निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छताम् ॥ ६१ ।

[49] सानूप

61. A king desirous of prosperity should select for his residence such a fort as providing adequate secret outlets for removal of the royal entourage (in times of emergency) to shelters and having suitable water and land resources.

सापसाराणीति । तथा सापसाराणीति निरुद्धे दुर्गे यत्र पुत्र कलत्राद्यपसार्यते । तादृशानि दुर्गाणि, तथा सारूप (सानूप) जाङ्गला भुवः, जलस्थलप्राया भूमयश्च निवासाय प्रशस्यन्ते । भूभुजां भूतिमिच्छतामिति प्रतीतम् ॥ ६१ ॥

बह्वादानोऽल्पनिःस्रावः ख्यातः पूजितदैवतः ।
ईप्सितद्रव्यसम्पूर्णो हृद्य आप्तै[50]रधिष्ठितः ॥ ६२ ।
मुक्ताकनक रत्नाढ्यः पितृपैतामहोचितः ।
धर्मार्जितो व्ययसहः कोशः कोशज्ञसम्मतः ॥ ६३ ।

[50] स्वाप्तै

62-63. *Kośa* (Royal Treasury), according to experts in public finance (***kośajña***), should be endowed with multiple means of income (by way of revenue collection) and limited or restricted outlets for expenses (by observance of rules of economy), which enjoys credit (in public estimation), where regular offerings are made to the deities (presiding deities of wealth and prosperity), which is full of desired

commodities (for trade, yielding profit) and which is supervised by trusted officials of proven character. It should be rich with accumulation of pearls, gold and precious jewels, inherited from ancestors as heirlooms as well as earned by righteous means (by normal course of revenue collection) and hence capable of bearing the burden of expenses (*vyayasahah*).

कोशप्रकृतेगुणसम्पदमभिधातुमाह—बह्वादान इति। बह्वादानः बह्वादानमायो यस्य, अल्पनिःस्रावोऽल्पव्यय इत्युभयं न्यायेनैवेति भावः। ख्यात इति निःशेषविषयव्यवहारार्हः। पूजितानि श्रीधनदादीनि दैवतानि यस्मिन्, तत्पूजयाः क्षयो न भवतीति भावः। ईप्सित द्रव्य सम्पूर्ण इति सुवर्णादीप्सित धनसम्पन्नः। हृद्य इति मनोरमो महार्हालङ्कारसम्पन्नत्वात्। स्वाप्तैरधिष्ठित इति सुष्ठ्वौपधाशुद्धत्वाद् .आप्ता विश्वास्या (विश्वस्ता) स्तैरधिष्ठितो रक्षितः ॥ ६२ ॥

मुक्तेति। मुक्ताकनकरत्नाढ्य इति प्रतीतम्। पुनरुच्यते आदरदर्शनार्थम्। पितृपैतामहोचित इति, पितुरपि पैतामह इति। न्यायोपार्जितत्वादुचितो विजिगीषोर्धर्मार्जितत्वात्, व्ययसह इति प्राचुर्याद् व्ययं सहते नैव क्षीयत इत्यर्थः। कोश एवं विधः कोशज्ञानां सम्मतोऽनुमतः ॥ ६३ ॥

धर्महेतोस्तथाऽर्थाय[51] भृत्याणां भरणाय च।
आपदर्थं च संरक्ष्यः कोशः कोशवता सदा ॥ ६४ ।

[51] धर्म्मपूतो यथार्थाय

64. *Kośa* (the accumulation of wealth in the treasury) should be utilised for religious purposes (purposes approved by the *śāstras*), for purposes of increasing wealth (by investment in industries and trade) and for the maintenance of attendants and dependents as well as for making provision against emergencies.

कोशविनियोगमभिधातुमाह—धर्महेतोरिति। कोशस्योपार्जनं धर्महेतोर्धर्मनिमित्तम्। तथा अर्थाय, अर्थनिमित्तम्। भृत्यानां भरणार्थम। आपदर्थं च रक्ष्यः। कोशः कोशवता सदेति प्रतीतम् ॥ ६४ ॥

पितृपैतामहो वश्यः संहतो दत्तवेतनः।
विख्यातपौरुषौर्जित्यः[52] कुशलः कुशलैर्वृतः ॥ ६५ ।
नानाप्रहरणोपेतो नानायुद्धविशारदः।
नानायोध[53]समाकीर्णो नीराजित हयद्विपः ॥ ६६ ।
प्रवासायास दुःखेषु युद्धेषु च कृतश्रमः।
अद्वैध्यः क्षत्रियप्रायो दण्डो दण्डविदाम् मतः ॥ ६७ ।

[52] पौरुषो जन्यः [53] नानायौध

65-67. Experts in the science of polity hold that *Daṇḍa* (or *bala*,

army) would constitute *daṇḍasampad,* a source of power and strength of the king, if it is endowed with the following qualities. The army should be composed of soldiers, loyal for generations (*pitṛpaitāmaho-vaśyah* i.e., not of foreign extraction), well-organised and regularly paid, renowned for valour and fighting power, skilful themselves and led by skilful commanders. The army should be fully equipped with different types of arms and weapons, manned by experts experienced in different kinds of warfare (operations of land army, of navy etc). The army consisting of different classes of soldiers (*caturaṅga,* footmen and others) and war horses and war elephants should be duly purified by *Nirājana* ceremonies (to instil divine grace in them necessary for victory). Further the soldiers should be accustomed to prolonged stay abroad (on military duty) and under difficult circumstances, who ungrudgingly put in hard labour during military actions with unflinching devotion (*advaidhya* i.e., without any *dvaidhībhāva* or hesitation), and of *kṣatriya* extraction (the warrior caste, the special feature of whom is loyalty and devotion).

श्लोकत्रयेण दण्डप्रकृतेर्गुणसम्पदमभिधातुमाह—पितृपैतामह इति। पित्रादिक्रमायातः। वश्य इति विधेयः। संहत इत्यविभिन्नः। दत्तवेतन इति कृतभरणः। विख्यातपौरुषौर्जित्यः इति, विख्यातं प्रसिद्धिं गतं पौरुषौर्जित्यं पुरुषस्य बलवत्वम् 'उर्ज' बलप्राणनयोरिति पाठात्। पौरुष बलवत्ता प्रख्याता यस्य स तथा। कुशलः सर्वायुधयुद्धकुशलः। कुशलैर्वृतः कुशलैरेवाधिष्ठातृभिः परिवृतोऽनुगतः॥ ६५॥

नानेति। नानाप्रहरणोपेतो धनुःकुन्ताऽसिचक्रगदाद्यायुधयुक्तः। नानायुद्धविशारद इति जल-स्थलखनिकाकाशयुद्धादिपण्डितः। नानायोधसमाकीर्ण इति जलस्थलादियोधसङ्कीर्णः। नीराजितहय-द्विप इति। तथा अत्र कौटिल्यः—"नीराजनामाश्वयुजे कारयेन्नवमेऽहनि। यात्रादाववसाने वा व्याधौ वा शान्तिके रतः॥" इति (कौ. अर्थ. २।३०।५१)॥ एवं नीराजिता हयद्विपा यत्रेति॥ ६६॥

प्रवासेति। प्रवासायासदुःखेषु इत्यादि प्रतीतम्। अद्वैध्य इति परस्परं द्वैधीभावरहितः। क्षत्रियप्राय इति क्षत्रियाः स्वभावत एव महासत्वा भवन्तीति। दण्डश्चतुरङ्गबलं, स एवंविधो दण्ड-विदामाचार्याणां मतो मान्य इति॥ ६७॥

त्यागविज्ञानसत्त्वाढ्यं महापक्षं प्रियंवदम्।
आयतिक्षममद्वैध्यं मित्रं कुर्वीत सत्कुलम्॥ ६८।
समुत्पन्नेषु कृच्छ्रेषु दारुणेष्वप्यसंशयम्।
दर्शयत्यच्छहृदयः[84] कुलीनश्चतुरश्रताम्॥ ६९।
पितृपैतामहं नित्यमद्वैध्यं हृदयानुगम्।
महल्लघुसमुत्थानं मित्रं मित्रार्थमिष्यते॥ ७०।

[84] दर्शयेत् स्वच्छहृदयः

68-70. (In enumerating *Mitrasampad* or ally as a source of power

to the king, it is said thus). An ally should be endowed with benevolence, knowledge of different sciences and of unwavering character. He should be well connected with illustrious families, agreeable in speech, free from malice and dependable even for the future (under changing circumstances). Alliance should be made with such a person of noble lineage, who would unhesitatingly stand by even under distressing conditions and devise ways and means by his own ingenuity and sincerity for the king. An ally related for generations would remain constant in friendship, without any vacillation, rather conforming to the heart (i.e., desires and designs) of the king, and would always be ready to work for the interests of the king promptly and with all his resources.

मित्रप्रकृतेर्गुणसम्पदमभिधातुमाह—त्यागेति। त्याग इत्यलुब्धता। विज्ञानमिति सर्वशास्त्रप्रवीणता। सत्वामिति व्यसनेऽभ्युदये यदविकारि। महापक्षमिति बहुबन्ध्वादिवर्गम्। प्रियंवदमिति प्रियहितवादि। आयतिक्षममित्यागामिकालेऽव्यभिचारि साधु, अद्वैध्यं नेतरि शत्रौ चेति द्विधाभावरहितम्। मित्रमेवंविधं कुर्वीत। सत्कुलं सत्कुलोत्पन्नम्। सदित्युभयपक्षेऽपि व्यभिचारो नास्ति तत् कदाचिदपि न व्यभिचरतीति ॥ ६८ ॥

सत्कुलस्य गुणान् दर्शयन्नाह—समुत्पन्नेष्विति। कृच्छ्रेष्वित्यापत्सु। दारुणेष्वित्यप्रतिविधेयेषु। दर्शयत्यच्छहृदयः सुजनो मित्रतां गतः। चतुरस्रतामेकरूपताम् ॥ ६९ ॥

पित्रिति। पितृपैतामहमिति क्रमायातम्। अद्वैध्यं शत्रुसङ्गत्या द्वैधीभावं न गच्छति। हृदयानुगं हृदयहारिस्वभावादेव। महदिति शक्तित्रयोपचितम्। लघुसमुत्थानं विजिगीषुकार्यं प्रति शीघ्रमुत्तिष्ठति। एवंविधं मित्रं कार्यार्थिमिष्यते विजिगीषुणेति ॥ ७० ॥

दूरादेवाभिगमनं स्पष्टार्थ[55]हृदयानुगा।
वाक् सत्कृत्य प्रदानं च त्रिविधो मित्रसंग्रहः ॥ ७१ ।

[55] स्पष्टार्था

71. To move forward in extending welcome, to speak clearly and agreeably (without any duplicity) and to offer cordial hospitality are the three ways of securing an ally.

त्रिभिः प्रकारैर्मित्राणि भवन्तीति दर्शयन्नाह—दूरादिति। मित्रे समागते दूरादेवाभिमुखं गमनम्। स्पष्टार्था हृदयानुगा वागिति, कपटवर्जितः स्पष्टार्थो हृदयानुगश्च यस्याः सा तादृग्भूता वाक् प्रयोक्तव्येति शेषः। सत्कृत्य सत्कारं कृत्वा। प्रदानं देयवस्तूनामिति। त्रिविधो मित्रसङ्ग्रह इति, अनेनानन्तरोक्तेन त्रितयेन मित्राणि सङ्गृह्यन्ते मित्राणि भवन्तीत्यर्थः ॥ ७१ ॥

धर्मार्थकामसंयोगो मित्राणां[56] त्रिविधं फलम्।
[57]यस्मादेतत् त्रयं न स्यात् न तत् सेवेत पण्डितः ॥ ७२ ।

[56] धर्मकामार्थसंयोगो मित्रात् तु

[57] यस्मिन्नेतत् त्रयं नास्ति तत्सेवेत न

72. A sincere friend is likely to promote and fulfil the threefold interests of *Dharma, Artha* and *Kāma.* The wise (ruler) should not go in for any alliance if these three prospects are not foreseen.

मित्रात्फलमभिधातुमाह—धर्मेति । धर्मोऽर्थश्च कामश्च येन सहायेन संयुज्यते प्राप्यते मित्रेण, तदिदं मित्रात् त्रिविधं फलम् । यस्मिन्नेतत् त्रयं व्यस्तं समस्तं वा नास्ति न तत् सेवेत पण्डितो विवेकीति ॥ ७२ ॥

आदौ तन्व्यो बृहन्मध्या विस्तारिण्यः पदे पदे ।
यायिन्यो न निवर्तन्ते[58] सतां मैत्र्यः सरित्समाः ॥ ७३ ।

---

[58] निवर्तिन्य

73. The nature of a good friend is comparable to the course of the river, lean and shallow in its early stage (i.e., when the river comes down the hill side), deep and wide in the middle (while coursing through the plains) and widening at every stage, flowing unceasingly and unchecked.

मैत्रीस्वरूपमभिधातुमाह—आदाविति । सतां सत्पुरुषाणां । मैत्र्यो मित्रता । सरित्समा नदीसमाः, कथमित्याह—आदौ तन्व्यो जलप्रदेशस्यादावल्पत्वात् । बृहन्मध्याः, मध्यप्रदेशे बहुजलत्वात् । विस्तारिन्यः पदे पदे स्थाने स्थाने । यायिन्य इति निर्वहणशीलाः । न निवर्तिन्यो न निवर्तनशीला भवन्ति । प्रतिपन्ननिर्वहणशीलत्वात् सताम्, एवंविधा मैत्री यत्र तदेव मित्रमिति ॥ ७३ ॥

औरसं कृतसम्बद्धं[59] तथा [60]वंशक्रमागतम् ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ ७४ ।

---

[59] मैत्रसम्बद्धं ; तन्त्रसम्बद्धं [60] देश

74. Friends may be of four classes: viz., *aurasam* (related by blood), *maitrasambaddham* (political compact for obvious reasons), *deśakramāgatam* (alliance in consideration of situation in the *maṇḍala* or interstatal circle) or *vaṁśakramāgatam* (a variant, an alliance subsisting for generations) and *rakṣitam*, alliance in return of (protection given during his danger or afflictions).

कारणैरपि मित्रभेदानभिधातुमाह—औरसमिति । औरसमिति सोदर्यं भूत्वा स्वभावत एव स्निग्धं, सोदर्या अस्निग्धाः शत्रवोऽपि दृश्यन्ते, अतः स्निग्धमौरसं मित्रं भवति । कृतसम्बन्धं सम्बन्धजनितं [तन्त्रसम्बन्धमिति, तन्त्रंमण्डलं तेन कृतसम्बन्धं], भूम्येकानन्तरं मित्रमिति । तथा वंशक्रमागतं पितृपैतामहमिति, रक्षितं व्यसनेभ्य आपद्भ्यः । मित्रमेवं चतुर्विधं कारणचतुष्टयेन मित्रं भवतीति ॥ ७४ ॥

शुचिता त्यागिता शौर्यं समानसुखदुःखता।
अनुरागश्च दाक्ष्यं च सत्यता[61] च सुहृद्गुणाः ॥ ७५ ॥

[61] सत्यवाचः

75. The essential qualities of a friend are therefore, purity of conduct, spirit of sacrifice, valour, participation in weal and woe, devotion and sincerity, ingenuity and truthfulness or honesty of purpose.

भूयोऽपि मित्रगुणानभिधातुमाह—शुचितेति। शुचिताऽर्थव्यये। त्यागिता संव्यवहार-विषयेऽलुब्धत्वम्। शौर्यं विजिगीषोः[31] साहाय्यदानेऽभीरुत्वम्। समानसुखदुःखता विजिगीषुणा सह सुखी दुःखी वा। अनुरागश्च विजिगीषौ। दाक्ष्यं च विजिगीषुकार्याणां सम्पादने। सत्यता चामृषावादश्च। एते सुहृद्गुणाः, एभिर्गुणैर्युक्तः सुहृद्भवतीति ॥ ७५ ॥

[31] विजिगीषुणा सहायदाने ; विजिगीषुकार्याणां सम्मादने

तदर्थं ह्यनुरागश्च[62] संक्षिप्तं मित्रलक्षणम्।
[63]यस्मिन्नेतन्न तन्मित्रं तत्रात्मानं न निक्षिपेत् ॥ ७६ ॥

[62] तदर्थेहानुरागश्च [63] यस्मिन्नेतत्तु तन्मित्रं तत्रात्मानं विनिक्षिपेत् ॥

76. In brief, the special features of an ally are—desire for promoting the interests of the king and expression of sincere love for him. In the absence of these features one should not throw himself in such a company.

विस्तरेण मित्रसम्पदमभिधाय संक्षेपेणाभिधातुमाह—तदर्था इति। तदर्था विजिगीषुनिमित्ता। ईहा यत्किञ्चिदीहते तत् सर्वं विजिगीषु हितार्थमेवेति। अनुरागश्च तद्विषय एव वाङ्मनः कायकर्मभिरपि विजिगीषुहितकारित्वमित्यर्थः। एतत् संक्षिप्तं मित्रलक्षणं, गुणद्वयमेव मित्रत्वे लिङ्गमित्यर्थः। यस्मिन् मित्रे एतद् गुणद्वयं तदेव मित्रं तत्रात्मानं विनिक्षिपेत् तत्रात्मसमर्पणं कर्तव्यमिति ॥ ७६ ॥

इति स्म राज्यं सकलं समीरितं
परा [64]प्रतिष्ठाऽस्य धनं ससाधनम्[65]।
गृहीतमेतन्निपुणेन[66] मन्त्रिणा
त्रिवर्गनिष्पत्तिमुपैति शाश्वतीम् ॥ ७७ ॥

[64] परं [65] सुसाधनम् [66] गृहीतमेव त्रिगुणेन

77. Thus have been explained the essential features of the kingdom in its full complements (seven constituent elements). It is well established by the strength of treasury and proper use of coercive power (*sādhana*)

under the supervision of efficient ministers, leading to the achievement of *trivarga* (*dharma, artha and kāma*) by the king.

उपसंहरन्नाह—इतीति। इत्येवमभिहित प्रकारेण। राज्यं सप्ताङ्गम्। सकलं समीरितं व्याख्यातम्। अस्य राज्यस्य परोतकृष्टा प्रतिष्ठा स्थितिहेतुः। धनं कोशो द्रव्यचयः। साधनमिति चतुरङ्गो दण्डस्तेन सह स्थितिहेतुः, अस्य राज्यस्येति सम्बन्धः। गृहीतं प्रतिगृहीतम्। एतद्-राज्यम्। निपुणेन मन्त्रिणा त्रिवर्गनिष्पत्तिमुपैति। शाश्वतीमविनश्वरमिति॥ ७७॥

यथाऽन्तरात्मा प्रकृती[67]रधिष्ठितश्चराचरं
विश्वमिदं समश्नुते।
तथा नरेन्द्रः प्रकृतीरधिष्ठितश्चराचरं
विश्वमिदं समश्नुते॥ ७८।

[67] प्रकृते

78. Just as the great soul of the universe (*antarātmā*) residing in the midst of elements of nature, lords over the whole world, so also the king endowed with the sevenfold elements (*saptānga prakṛti*) of state dominates over the earth (kingdom).

तथैवान्तरात्मसमवेत (प्रकृतिवत्) स्वामिनाऽधिष्ठितं राज्यं कार्यकारीति दर्शयन्नाह—यथेति। यथाऽन्तरात्मा परमात्मा। प्रकृतीरात्मव्यतिरिक्ताः शरीरप्रकृतीः। अधिष्ठितो व्याप्य स्थितः। चराचरं स्थावरजङ्गमम्। विश्वमिदं समश्नुते व्याप्नोति। तथा नरेन्द्रः प्रकृतीरमात्यादिकाः समधिष्ठतः स्वीकृत्य विश्वं राष्ट्रं समश्नुते भुनक्ति॥ ७८॥

प्रकृतिभिरिति सम्यगर्चितो[68]
जनपदमादरवांस्तु पालयेत्।
जनपद परिपालनाच्चिरं
स्पृशति[69] नृपः परमं श्रियः पदम्॥ ७९।

[68] सम्यगन्वितो [69] व्रजति

79. The kingdom, perfectly organised in all its (seven) elements, should be governed with affection by the king. Because by careful and just administration of the kingdom only can the king enjoy supreme prosperity.

प्रकृतिभिरिति। इत्युक्तगुणसम्पद्भिः प्रकृतिभिरमात्यादिकाभिः। सम्यगर्चितः (सम्यगन्वितः) सम्पन्नः। जनपदं राष्ट्रम्। आदरवान् नीत्यादरेण। पालयेद् वृद्धिं नयेत्। जनपद परिपालनात् परमसमृद्धकोशदण्डः परमं श्रियः पदं चिरं बहुकालं स्पृशति, एकच्छत्रं पृथिवीपतित्वं प्राप्नोतीत्यर्थः॥ ७९॥

प्रकृतिगुणसमन्वितः सुधीर्व्रजति
नृपः स्पृहणीयतां पराम् ।
भवति च स[70] रणेषु विद्विषाम्
प्रबल इव श्वसनः[71] पयोमुचाम् ॥ ८० ।

इति कामन्दकीये नीतिसारे स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि (प्रकृतिसम्पन्नाम) चतुर्थः सर्गः ॥

---

[70] स च भवति [71] श्वसन इव प्रबलः

80. A king with the assistance of well qualified *prakṛtis* gains the highest esteem of the wise, and wins victory over his enemies in battles by scattering their forces as clouds are scattered by strong wind.

एतदेव समर्थयन्नाह—प्रकृतीति । प्रकृतिगुणसमन्वित इति प्रकृतिगुणैः (प्रकृतिसम्पत्) प्रकरणोक्तगुणैः कुलशीलादिभिरन्वितः सुधीः सुविज्ञः (सुप्रज्ञः) व्रजति नृपः स्पृहणीयतामाश्रयणीयतां परामुत्कृष्टाम् । स्पृहनीयश्च सद्भिराश्रितत्वात् । अनन्तरं च स नृपो रणेषु समरेषु विद्विषां शत्रूणां प्रबल इव प्रचण्ड इव, श्वसनो महावातः, पयोमुचां मेघानां, यथा प्रचण्ड पवनेन मेघाः खण्डशः क्रियन्ते तथा प्रकृतिगुणसमन्वितेन राजा शत्रव इति ॥ ८० ॥

इति प्रकृतिसम्पत्प्रकरणम् ।

इति कामन्दकीय नीतिसारटीकायामुपाध्याय निरपेक्षानुसारिण्यां प्रकृतिसम्पद्नाम चतुर्थः सर्गः ॥

८। स्वाम्यनुजीविवृत्तप्रकरणम्।

इत्यर्थवृत्तिसम्पन्नाः[1] कल्पोवृक्षोपमं नृपम्।
अभिगम्य गुणैर्युक्तं सेवेयुरनुजीविनः[2] ॥ १।

---

[1] वृत्तस्थं वृत्तसम्पन्नाः [2] सेवेरन्ननुजीविनः

Sarga—V

Prakaraṇa 8.

Svāmyanujīvivṛttaṁ (Relation between the Lord and his dependents)

1. A king devoted to his duties (i.e., royal duties of *prajāpālana*) and equipped with strong *vṛttis* or *prakṛtis* (particularly *kośa* and *daṇḍa* or treasury and army), and who is generous like the *Kalpa vṛkṣa* (legendary celestial tree fulfilling all desires), may be resorted to by dependents.

अनन्तरं स्वामिनोऽनुजीविनां च गुणसम्मदुक्त्वा। प्राधान्यात् तेषां परस्परं वृत्तमनुष्ठानं चाह वृत्तस्थमिति। वृत्तस्थं वृत्तिसम्पन्नं। वृत्तमनुष्ठानं विजिगीषुवृत्तं पृथिवीपालनादिकं, तस्मिंस्तिष्ठतीति वृत्तस्थस्तं स ह्यनुजीविनर्थी भवति। वृत्तिसम्पन्नमिति वृत्तिहेतुत्वात् कोशो वृत्तिस्तत्सम्पन्नः, अर्थ्यपि कोशरहितः किं दास्यतीति भावः। कल्पवृक्षोपममिति, ईप्सितफलदायिनं दानशक्तियुक्तमित्यर्थः। नृपं स्वामिनम् अभिगम्यगुणैराभिगामिकैः कुलशीलादिभिरनन्तरोक्तैर्युक्तं समन्वितं सेवेरन् सेवकत्वेनोपतिष्ठेरन्, अनुजीविनो भृत्याः ॥ १ ॥

द्रव्य[3]प्रकृतिहीनोऽपि सेव्यते सद्गुणान्वितः[4]।
भवत्याजीवनं तस्माच्छ्लाघ्यं कालान्तरादपि ॥ २।

---

[3] धमे [4] सेव्यः सेव्यःगुणान्वितः

2. Even without material properties (*dravya prakṛti* i.e., ministers, treasury etc.), a king possessing necessary qualities may be resorted to for the prospect of an honourable living in the future.

पक्षान्तरं दर्शयन्नाह—द्रव्यप्रकृतीति। द्रव्यप्रकृतिहीनोऽपि कोशप्रकृतिविहीनोऽपि सेव्यः स्वामी-सेव्यगुणान्वितः आभिगामिकगुणयुक्तः। कस्मादित्याह—भवत्याजीवनं भरणं श्लाघ्यं स्पृहणीयतरं कालान्तरादपि तस्मात् जीवनं भवत्येवेति। साम्प्रतिकाभावेऽपि गुणयुक्तत्वादुपजीवनं भवेदिति ॥ २ ॥

अपि स्थाणुरिवासीत्[5] शुष्यन् परिगतः क्षुधा।
न त्वेवानात्मसम्पन्नाद् वृत्तिमीहेत पण्डितः ॥ ३।

---

[5] स्थाणुवदासीत

3. A conscientious person would rather remain inactive like a withering tree or suffer from acute hunger than accept service under a king devoid of royal qualities (*anātmasampanna*).

असेव्यस्वामिनमभिधातुमाह—अपीति। स्थाणुश्छिन्नशाखस्तरुः, स इव शुष्यन् परिगतः क्षुधा आसीत तिष्ठेत् न त्वेव कदाचिदनात्मसम्पन्नादनन्तरोक्तात्मसम्पद्गुणरहिताद् वृत्तिं जीवनमीहेत। पण्डितो विवेकीति ॥ ६ ॥

अनात्मवान् नयद्वेषी वर्द्धयन्नरिसम्पदः।
प्राप्यापि महदैश्वर्यं सह तेन विपद्यते[6] ॥ ४ ॥

[6] विनश्यति

4. Such a king by his unjust actions indirectly contributes to enhancement of enemy prosperity (*arisampad*) (i.e., by neglecting his own interests), and however much wealth he may acquire, he perishes along with it ultimately.

एतदेव दर्शयन्नाह—अनात्मवानिति। अनात्मवान् नयं द्वेष्टुं शीलं यस्य सः नयद्वेषी। वर्द्धयन्नरिसम्पदः इत्यनात्मवत्तयैवारीणां सम्पदो वर्द्धयति, स काकतालीयवत् प्राप्यापि महदैश्वर्यं, सह तेनैश्वर्येन अनुजीविना च सह विपद्यते विनश्यति। अतोऽनात्मवान् न सेव्य इति भावः ॥ ४ ॥

लब्धावकाशो निपुण आत्मवानविकारवान्[7]।
स्थाने स्थैर्यमवाप्नोति मतिकर्मसु[8] निश्चितः ॥ ५ ॥

[7] आत्मवत्यविकारवान् [8] मन्त्री कर्मसु ; बुद्धिसाध्येषु

5. Having got an opportunity of service under a ruler of qualities, a skilful and unwavering person secures permanence of his position by rendering good counsel and firm and devoted service.

एतदेव समर्थयन्नाह—लब्धावकाश इति। लब्धावकाशः प्राप्तसेवावसरः। निपुणं सुश्लिष्टं यथा भवति तथा। आत्मवति स्वामिनि। अविकारवानिति सर्वप्रकार (शरीरवेषादि) विकाररहितः। स्थाने सचिवादिपदे। स्थैर्यं स्थिरत्वमवाप्नोतीति। मतिकर्मसु बुद्धिसाध्येष्वनुष्ठानेषु, निश्चितः कृतनिश्चय इति संक्षिप्तमिदमनुजीविवृत्तमिति ॥ ५ ॥

आयत्यां च तदात्वे च यत् स्यादास्वादपेष(श)लं।
तदेव तस्य[9] कुर्वीत न लोकद्विष्टमाचरेत् ॥ ६ ॥

[9] तत् क्रियतामपि

6. In rendering service he should be careful that his actions are conducive to all concerned in the present as well as in future, but never against their interests even if it entails in his personal suffering.

अनुजीविना नोभयलोकविरुद्धं आजीवमभिलषणीयमिति दर्शयन्नाह—आयत्यामिति। आयत्यामागामिनि काले। तदात्वे वर्तमानकाले च। यदास्वादपेशलमास्वादरमणीयं, तदाचरेदिति। अर्थाधिकारिविषयोऽयमुपदेशः। यदर्थाधिकारी तदा त्वर्थलोलुपो[1] भक्षयति तत् तदात्वे, आस्वादपेशलं भवति। किं तु आयत्यां लेखदानकाले वधबन्धादिभिः कटुकास्वादं भवति। यत् तु स्वाम्यनुमतं भक्ष्यते तदा आयत्यां तदात्वे चास्वादपेशलं भवति। तदेव क्लिश्यन्नपि, क्षुधयेति शेषः। कुर्वीत। अर्थाधिकारीत्यर्थादापद्यते। न लोकद्विष्टमिहलोकपरलोकविरुद्धमाचरेत्। स्वामिनमतिसन्धायार्थभक्षणे[2] लोकद्वयविरुद्धो भवतीत्यर्थः॥ ६॥

[1] लोलुपा [2] लक्षणे

तिलाश्चम्पकसंश्लेषात् प्राप्नुवन्त्यधिवासताम्[10]।
रसो न भक्ष्यस्तद्गन्धः[11] सर्वे साङ्क्रामिका गुणाः॥ ७॥
अपां प्रवाहो गाङ्गो वा[12] समुद्रं प्राप्य तद्रसः।
भवत्य पेयस्तद्[13] विद्वान् नाश्रयेदशुभात्मकम्॥ ८।

[10] वासनाम् [11] भक्षास्तद्गन्धाः
[12] गाङ्गोऽपि [13] भवत्यवश्यं तद्

7-8. Sesamum seeds kept with *Campaka* flowers acquire the latter's fragrance, but those who consume garlic (*rasona*) acquire its bad smell. So men are also susceptible to contagion. The water of the Ganges flowing into the sea invariably acquires the latter's (salty) taste. That is why no conscientious person would seek the company of an unrighteous man.

कोशवान् कल्पवृक्षोपमोऽप्यशुभात्मको म्लेच्छादिर्न सेव्य इति दर्शयन्नाह—तिलाश्चेति। तिलाः शस्यविशेषाः, चम्पकपुष्पसंश्लेषात् तिलमध्यन्यस्तनागचम्पकसम्पर्कात्, तदधिवासतां (वासनां) तद्गन्धित्वं प्राप्नुवन्ति। ततश्च पीडितेषु तिलेषु चम्पकतैलं भवतीति संसर्गजोऽयं गुणः। रसोनभक्षाः पुरुषास्तद्गन्धाः रसोनगन्धा एव भवन्त्ययं संसर्गजो दोषः। एवं च सर्वे गुणा इति पुरुषधर्माः साङ्क्रामिकाः सङ्क्रमणशीलाः। तस्मादविशुद्धः सङ्गः परित्याज्य इति॥ ७॥

एतदेव समर्थयन्नाह—अपामिति। अपां जलानां, प्रवाहः ओघः, गाङ्गोऽपि अमृतमयोऽपि, समुद्रं क्षारं, प्राप्य गत्वा, तद्रसः क्षारः, भवत्यवश्यं निःसन्देहम्। तत् तस्माद् विद्वान् पण्डितो विवेकी अशुभात्मकमकुलीनं म्लेच्छादिकं नाश्रयेद् न सेवेत, तत्सङ्गात् तत्सम एव भवतीति॥ ८॥

क्लिश्यन्नपि हि मेधावी शुद्धं जीवनमाचरेत्।
तेनेह श्लाघ्यतामेति लोकेऽन्यत्र न हीयते॥ ९।

9. A wise man, even if beset with difficulties, will pursue a pure (honest) living, as thereby he will gain respect in the society which will never decline (in this world and the next).

एतदेव द्रढयितुमाह—क्लिश्यन्नपीति। क्लिश्यन्नपि दौर्गत्येन बुभुक्षादिभिः क्लेशं गच्छन्नपि। मेधावी बुद्धिमान्। शुद्धं न्याय्यम्। जीवनं जीविकाम्। आचरेदातिष्ठेत्। शुद्धता च जीवनस्यात्मसम्पन्नत्वात् स्वामिनो यथोक्तसेवाधर्मादधिगतत्वम्। तेनेहलोके श्लाघ्यतां स्पृहणीयतामेति प्राप्नोति। लोकेभ्यश्चेहपरलोकबन्धुलोकेभ्यश्च न हीयते न प्रच्यवते ॥ ९ ॥

अभिलक्ष्यं[14] स्थिरं पुण्यं ख्यातं सद्भि[14a]र्निषेवितम्।
सेवेत सिद्धिमन्विच्छन् श्लाघ्यं विन्ध्यमिवेश्वरम् ॥ १० ॥

---

[14] अभिलक्ष्यं [14a] सद्भिः

10. A man securing a successful career (for himself) should serve the lord, who like the great Vindhya mountain, possesses a towering personality (visible from a distance), firmness (of decisions), and purity (of conduct), and who is widely renowned (for his qualities), and who is always resorted to by the honest people.

सेव्यस्वामिस्वरूपमभिधातुमाह—अभिलक्ष्य(क्ष्य)मिति विन्ध्यमिवेश्वरं सेवेत इति सम्बन्धः। अभिलक्ष्य(क्ष्य)मुन्नतिमत्त्वाद् दूरादेवाभिलक्ष्यते विन्ध्यः पर्वतः। ईश्वरोऽपि बहूनां मध्ये त्यागशौर्यादिभिरवातकीर्तित्वादेवाभिलक्ष्यते। स्थिरमिति, विन्ध्य पर्वतोऽप्यविचलत्वात् स्थिरः। ईश्वरोऽपि स्थितं न चलतीति। पुण्यमिति पवित्रः। विन्ध्य इव ईश्वरोऽपि पुण्ययोगात् महाकुलोत्पन्नत्वेन पुण्यः। ख्यातमिति विन्ध्यो जगद्विदितः, ईश्वरोऽपि महाविजिगीषुत्वेन ख्यातः। सद्भिर्निषेवितम् इति[3] सत्पुरुषैर्निषेवितं सिद्धिमिच्छुभिः। ईश्वरोऽपि सर्वार्थसिद्धिमिच्छुभिरिति विन्ध्यसमानमीश्वरं सेवतेति। सिद्धिमन्विच्छन्निति विन्ध्यमष्टमहासिद्धीनां मध्येऽभिलषितां सिद्धिमन्विच्छन्। ईश्वरमपि लोकद्वयसिद्धिमन्विच्छन्निति। श्लाघ्यं स्पृहणीयं विन्ध्यमिवेश्वरं चेति ॥ १० ॥

[3] इति सद्भिः साधुजनधन्याभ्यां सेवितम्।

दुरापमपि लोकेऽस्मिन् यद्यद् वस्त्वभिवाञ्छति।
तत्तदाप्नोति मेधावी तस्मात् कार्यः समुद्यमः ॥ ११ ॥

---

11. Though it is difficult indeed to obtain fulfilment of all desires in this world, still a prudent person achieves them by sheer intelligent and energetic actions (efforts).

अभिमतगुणः स्वामी न प्राप्यत इत्याशङ्क्याह—दुरापमिति। दुरापं दुष्प्रापमपि, अस्मिन्जगति, उद्यमी पुरुषो यद्यद्वस्तु धर्मार्थकाममोक्षादिकमपि, अभिवाञ्छति अभिलषति, मेधावी प्राज्ञः तत्तदाप्नोति। तस्मान् कार्यः समुद्यमः, आभिगामिक गुणोपेत स्वामिप्राप्त्यर्थं समुद्योगः ॥ ११ ॥

आरिराधयिषुः सम्यगनुजीवी महीपतिम्।
विद्याविनयशिल्पाद्यैरात्मानमुपपादयेत् ॥ १२ ॥

---

12. A true servant (dependent) intending to serve the king can do

it only through his learning (knowledge of the *Sāstras*), disciplined conduct and acquaintance of arts and crafts.

स्वामिगुणानभिधाय, अनुजीविगुणानभिधातुमाह—आरिराधयिषुरिति, आराधयितुमिच्छुः। सम्यगिति निरूपचरितत्वेन। अनुजीवी सेवको महीपतिम्। सेवान्तरे, विद्याभिरान्वीक्षिक्यादिभिः विनयेन्द्रियजयेन। शिल्पैः सकल कलाविज्ञानैः। आदिग्रहणादन्यैरपि नृपाराधनगुणैः, आत्मानमुपपादयेद् सम्पन्नं कुर्यादिति ॥ १२ ॥

कुलविद्याश्रुतौदार्यशील[15]विक्रमधैर्यवान्[16] ।
वपुस्सत्त्वबलारोग्यस्थैर्यशौचदयान्वितः[17] ॥ १३ ।
पैशुन्यद्रोहसम्भेदशाठ्यलौल्यानृतातिगः ।
स्तम्भचापलहीनश्च सेवनं कर्तुमर्हति ॥ १४ ।

[15] शिल्प [16] शौर्य [17] शीलशौचसमन्वितः

13-14. The qualities that make a dependent worthy of his position are as follows : noble lineage, learning, proficiency in the Vedas, liberality, knowledge of arts, courageousness, endurance, physical fitness, unflinching devotion, strength of body and mind, good health, firmness of mind, purity (tested by *upadhās*) and benevolence. He should be free from meanness, malice (spitefulness), nature of sowing dissensions, deceitfulness, avarice, rigidity or fickleness.

श्लोकद्वयेनैतदेव स्पष्टयन्नाह—कुलविद्येति। कुलमाभिजात्यम्। विद्यानामनन्तरोक्तानां श्रुतम्। श्रुतं च सम्यग्ज्ञानपर्यन्तमत्र ग्राह्यम्। औदार्यमलुब्धत्वम्। शिल्पं कलाकौशलम्। विक्रमो विविधं प्रतिपक्षाक्रमणम्, धैर्यमभीरुत्वम्, कश्चिद्धीरोऽप्यविक्रान्तो भवतीति भेदः, एभिरन्वितः। वपुः शरीरं तच्च यथोक्तप्रमाणं ग्राह्यम्। सत्त्वं व्यसनेऽभ्युदये यदविकारि। बलं महाप्राणता। आरोग्यं रोगाभावः नीरोगता। स्थैर्यं प्रतिष्ठितत्वम्। शौचमुपधाशुद्धिः। दया कारुण्यम् क्रौर्याभावः। एभिरन्वितः संयुक्तः ॥ १३ ॥

पैशून्यं पिशुनभावः, खलता। द्रोहो विश्वासघातित्वम्। सम्भेदं संहतभेदनशीलता शाठ्यं वञ्चकत्वम्। लौल्यं आहारादिलोलुपत्वम्। अनृतमसत्यम्। तान्यत्येति, अतिगच्छति तैः रहित इत्यर्थः। स्तम्भः स्तब्धता, प्रश्रयरहितत्वमित्यर्थः। चापलमप्रतिष्ठितत्वम्, ताभ्यां हीनः। चकारादुक्त गुणैर्युक्तो यः सेवको दोषैरेभिर्हीनः सः, सेवनं कर्तुमर्हति सेवाफल्योगात्। इतरस्तु नार्हति विफलप्रयासत्वात् ॥ १४ ॥

दक्षताभद्रता दार्ढ्यं क्षान्तिः[18] क्लेशसहिष्णुता ।
सन्तोषः शीलमुत्साहो मण्डयत्यनु[18a]जीविनम् ॥ १५ ।

[18] आपत्क्लेश [18a] मण्डयन्त्यनु

15. But the most essential qualities considered to be ornaments of the dependent are skilfulness, amiableness, firmness, forbearance, endurance (in straitened circumstances), sense of satisfaction, good conduct and energy or ever-readiness to exertions.

अलङ्कारभूतान् सेवकगुणानभिधातुमाह—दक्षतेति। दक्षता कौशलम्, आशुकारित्वं च। भद्रता भद्रकारित्वम् दार्ढ्य' स्थिरस्नेहता। क्षान्तिः क्षमा। क्लेशः क्षुत्तृड्भयवातातपादिजन्यः, तत सहिष्णुता। सन्तोषोऽविषादिता। शीलं सत्स्वभावः। उत्साहः शौर्यममर्षो दार्ढ्यं चेति कौटिल्य-कृतलक्षणः। एते गुणा मण्डयन्त्यनुजीविनम्। गुणानामेते प्रधानभूता यत्नतः सम्पादनीया इति भावः ॥ १५ ॥

अर्थशौचपरो नित्यं गुणैरेतैः[19] समन्वितः।
भूतये भूतिसम्पन्नं साधुविश्वासयेन्नृपम् ॥ १६ ॥

[19] गुणैरेभिः

16. A dependent, whose integrity in money matters is proved by *arthopadhā* test, and who possesses necessary qualities (as enumerated above), should in his own interest first of all earn confidence (about himself) of the prospererous lord.

प्रधानतरं गुणं दर्शयन्नाह—अर्थेति। "अर्थार्थी जीवलोकोऽयम्" इति अर्थशौचं—दुष्करम्। न चानेन विना विश्वासः स्यादित्यर्थशौचपरो नित्यम्। अनन्तरोक्तगुणैर्युक्तो भूतये भूतिसम्पन्नं प्रभुशक्तिकोशप्रकृतिकम्[3]। साधु यथा भवति तथा। विश्वासयेत्, आत्मनि विश्वस्तं कुर्यात्, विश्वस्ते सेवाफलं सम्पद्यत इति भावः ॥ १६ ॥

[3] प्रचुर कोष प्रभृतिकं

प्रविश्य[20] सम्यगुचिते स्थाने तिष्ठन् स वेषवान्[21]।
यथाकालमुपासीत राजानं विनयान्वितः ॥ १७ ॥

[20] प्रविष्टः [21] सुवेषवान्

17. Having been formally admitted into the court, a dependent who must be properly attired should take his allotted seat and wait for his turn to pay respect to the king with due humility.

अनुजीविवृत्ते सेवाधर्मविषयमभिधातुमाह—प्रविश्येति। प्रविश्य प्रियहितद्वारेण राजसभाम्। सम्यगिति प्रतीहारनिर्दिष्टे स्थाने। तिष्ठन् वक्ष्यमानन्यायेन। सुवेषवानिति निर्मलानुद्धतनेपथ्यवान्। यथाकालमुपासनाकालानतिक्रमेण, उपासीत सेवेत राजानं विनयान्वितः प्रश्रयवानेति ॥ १७ ॥

परस्थानासनं क्रौर्यमौद्धत्यं मत्सरं त्यजेत्।
विगृह्य कथनं चैव[22] न कुर्याज्ज्यायसा सह ॥ १८ ।

[22] कथनं चापि

18. He should avoid (occupying) places and seats allotted to others as well as expressions of deceitfulness, haughtiness and malice, nor should he speak disrespectfully opposing the superiors (in the court).

तत्र सभायां यत्कर्तव्यं तदभिधातुमाह—परस्थानिति। परस्य अन्यसेवकस्य। स्थानं प्रदेशम्। आसनं विष्टरादि, क्रौर्यं क्रूरभावम्। औद्धत्यं असामान्यवेशत्वम् (असभ्यवेशत्वम्)। मत्सरं विद्याशौर्यादिासहनं, त्यजेदनुजीवी। विगृह्य ज्यायसाऽधिकेन सह विरोधं कृत्वा कथनं (विरोधपूर्विका कथां) न कुर्यात्। यस्माज्ज्यायान् विगृहीतः सन् सेवाविघातं करोति ॥ १८ ॥

विप्रलम्भं च मायां च दम्भं स्तेयं च[23] वर्जयेत्।
पुत्रेभ्यश्च नमस्कुर्याद् वल्लभेभ्यश्च[24] भूपतेः ॥ १९ ।
न नर्मसचिवैः सार्द्धं किञ्चिदप्य[24a]प्रियं वदेत्।
ते हि मर्माण्यभिघ्नन्ति[25] प्रहासेनापि[26] संसदि ॥ २० ।

[23] स्तेयं दम्भश्च
[24] भूपतेभ्यश्च
[24a] क्वचिद्
[25] तेऽस्य मर्माण्यपि घ्नति
[26] प्रहासेनैव ; विग्रहेणैव

19. Deception, trickery, arrogance and cupidity should also be avoided by a dependent. He should be respectful to the royal princes and king's favourites.

20, Uncharitable remarks should not be flung at the intimate friends and companions (like jesters etc) of the king, lest such men pierce the heart of the dependent concerned (expose his weaknesses) in the very court (publicly) by their sarcastic remarks.

किञ्च, विप्रलम्भमिति। विप्रलम्भं वञ्चनम्। मायां रूपपरिवर्तनम्। दम्भं कूटदीनारादिव्यवहारम्। स्तेयं तृणादेरपि चौर्यं यज्ज्ञात्वा न विश्वसिति। इति विप्रतारणादिकं वर्जयेत्। पुत्रेभ्यः स्वामिपुत्रेभ्यः नमस्कुर्याद् वल्लभेभ्यश्च (प्रियपार्श्वचरेभ्यश्च) भूपतेः, ते हि प्रश्रयेणाराधिताः स्वामिनमनुकूलं कुर्वन्तीति भावः ॥ १९ ॥

अपरञ्च, न नर्मेति। नर्मसचिवा विदूषकादयः सचिवाः, यैः सह स्वामी नर्मालापान् करोति। तैः सह न किञ्चिदप्यप्रियं वदेद्। हि यतस्ते नर्मसचिवाः संसद्येव सभायामेव, विग्रहेण विरोधेन हेतुना, मर्माण्यपि गोप्यानि छिद्राण्यपि घ्नन्ति उद्घाटयन्ति प्रहासेनैवेति ॥ २० ॥

भर्तुरन्वासने तिष्ठन् दृष्टिन्नान्यत्र विक्षिपेत्[27] ।
कुर्यात्किमयमित्यस्य[28] तिष्ठेद्वास्यं विलोकयन् ॥ २१ ।

[27] भर्तुरन्वासितो(सो)वा दृष्टिं मुहुर्नान्यत्र निक्षिपेत् ।

[28] ब्रूयान्न किञ्चिदन्योनं ; ब्रूयात् किमयमित्येव

21. While sitting near the lord the dependent should not for a moment even allow his eyes to look at any thing but his (lord's) countenance, in order to observe reactions reflected on it and listen carefully to whatever he says.

भर्तुरिति । भर्तुः स्वामिनः । अन्वासने आसनसमीपस्थाने । तिष्ठन् स्थितः । दृष्टिं नान्यत्र संक्षिपेत् कुर्यात् किमयं स्वामी किं ब्रूयात् किं वदेत्, इति तदाकर्णनार्थं मुहुरास्यं विलोकयंस्तिष्ठेत् । सावधानताप्रदर्शनार्थमिति ॥ २१ ॥

कोऽत्रेत्यहमिति ब्रूयात् सम्यगाज्ञापयेति च ।
आज्ञां चावितथो[29]कुर्याद् यथाशक्त्यऽविलम्बितम् ॥ २२ ।

[29] चावितथां ; चापि तथा

22. Whenever the king says 'who is there', the dependent should promptly respond 'I am here, kindly command me, my lord', and carry out the order properly and promptly (to the best of his abilities).

क इति । स्वामिनाऽदिष्टे 'कोऽत्र' इति, 'अहम अत्र तिष्ठामि' इति ब्रूयात् । 'सम्यक् आज्ञापय' इति च ब्रूयात् । आज्ञां शासनं दत्तां[4] तथा कुर्यात्, एवं करोमीति सत्यसम्पादनेन यथाशक्ति शक्त्यनतिक्रमेण, अविलम्बितमतिकालहीनम् सत्वरमिति ॥ २२ ॥

[4] अवितथा असत्यरहिता कुर्यात्

उच्चैः प्रहसनं कासं[30] ष्ठीवनं कुत्सनन्[31] तथा ।
जृम्भनं गात्रभङ्गं च पर्वास्फोटं[32] च वर्जयेत् ॥ २३ ।

[30] प्रकथनं हासं [31] कुत्सितं तथा [32] पर्वस्फोटं च

23. (In the presence of the lord) the dependent should shun speaking loudly or breaking out in loud laughter, coughing and spitting, sitting in an ugly posture, yawning, stretching of limbs (to shake off idleness) and making sounds by twisting fingers.

भूयो वर्जणीयमाह—उच्चैरिति । सत्सु उपहासकारणेषु, उच्चैरत्यर्थं प्रहसनमट्टहासं, कासमप्युच्चैः, ष्ठीवनं श्लेष्ममोक्षं, कुत्सितम्[5]अपि, अपानदर्शनादिकं तथा जृम्भणं गात्रभङ्गं पर्वस्फोटं च वर्जयेदिति प्रतीतम् ॥ २६ ॥

[5] कुत्सितं कुक्ष्यपानवनादिकम्

प्रविश्य सानुरागस्य[33] चित्तं चित्तज्ञसम्मतः ।
समर्थयंश्च तत्पक्षं साधुभाषेण भाषितः[34] ॥ २४ ।

[33] चानुरागेण [34] भाषेत भाषितम् ; भाषिते ।

24. Gaining the affection (confidence) of the lord, a dependent should behave in conformity with other royal confidants and speak in elegant terms upholding the master's views.

भाषणावसरे यदभिलषितव्यं तदुपदेष्टुमाह—प्रविश्येति । सानुरागस्य स्वामिनश्चित्तं प्रविश्य, अपरेषामपि चित्तज्ञानां सम्मतः स्वामिचित्तज्ञत्वेन । समर्थयंश्च तत्पक्षमिति स्वामिपक्षं संस्थापयन् साधुभाषेण भाषितः आलापे सति ॥ २४ ॥

तन्नियोगेन वा ब्रूयादर्थं सुपरिनिश्चितम् ।
सुखप्रवृद्ध[35]गोष्ठीषु विवादे[35a] वादिनां मतम् ॥ २५ ।

[35] सुखप्रबन्धगोष्ठीषु [35a] वादे वा

25. When directed by lord to give his opinion on any debatable point raised in the assembly convened for his (lord's) pleasure, the dependent should speak clearly explaining the issue in unequivocal terms pointing out the views of expert debaters.

पक्षान्तरमभिधातुमाह—तन्नियोगेनेति । स्वामिनियोगेन ब्रूयादर्थं वाक्यस्य । सुपरिनिश्चितं सुनिर्णीतं कृत्वेति शेषः । सुखप्रवृद्धगोष्ठीषु, सुखार्थं प्रवृद्धा या गोष्ठ्यः परिषदः तासु ब्रूयात् । वादे वा शास्त्रोक्तलक्षणे वादिनामपि मनीषिणामपि (अन्येषामपि) यन्मतं अभिप्रायं तद् ब्रूयात् ॥ २५ ॥

विजानन्नपि न ब्रूयाद् भर्तुः क्षिप्तोत्तरं[35b] वचः ।
प्रवीणोऽपि हि मेधावी वर्जयेदभिमानिताम् ॥ २६ ।

[35b] क्षिप्त्वोत्तरं

26. No sensible dependent (employee), however well informed, should give prompt and curt replies (*kṣiptottaraṁ* or *kṣiptvottaraṁ*) to his master (so as to negative the master's views). However experienced, he should avoid display of ego (*abhimānitā*) on that account.

अभाषणीममभिधातुमाह—विजानन्नपीति । विशेषेण जानन्नपि भर्तुः क्षिप्त्वोत्तरं वचो येन भर्ता निरुत्तरो भवति तन्न ब्रूयात् । प्रवीणोऽपि हि भाषणे कुशलोऽपि मेधावी प्राज्ञोऽपि वर्जयेत् स्वामिविषयेऽभिमानिताम् । अभिमानान्न स्वामी निरुत्तरः कार्य इति भावः[6] ॥ २६ ॥

[6] स्वामिनो मनोधारणं कार्यमिति शेषः ॥

यद्यप्युच्चै[36]विजानीयान् नीचैस्तदपि कीर्तयेत् ।
कर्मणा तस्य[37]वैशिष्ट्यं कथयेद् विनयान्वितः ॥ २७ ।

[36] उच्चैर्यदपि जानीयान् [37] कर्मणस्तस्य

27. Inspite of possessing the best of knowledge an employee should express it humbly (as if his knowledge is meagre) in the presence of the master. He should demonstrate his special knowledge by his actions (not by speech) and in moderate language.

विद्याशिल्पविषये यन्नब्रूयात् तदभिधातुमाह—यद्यप्युच्चैरिति । उच्चैरतिशयेन यदपि विजानीयात् तदपि नीचैः कीर्तयेत्, किञ्चिदत्र जानामीति ब्रूयात् । कर्मणा सुक्रियया तस्य वैशिष्ट्यं श्रैष्ठ्यं कथयेद्दर्शयेत्, न वाचा । तत्रापि विनयान्वितः प्रश्रययुक्तः सन् । ज्ञानमगर्वमिष्यत, आत्मगर्वो न युक्तः इति भावः ॥ २७ ॥

आपद्युन्मार्गगमने कार्य[38]कालात्ययेषु च ।
अपृष्टोऽपि हितान्वेषी ब्रूयात् कल्याणभाषितम् ॥ २८ ।

[38] कार्ये

28. In times of emergency (imminent danger) or when the king deviates from the path of morality (or is inclined to take irregular measures), or when any action is likely to fall through due to lapse of time, an employee desirous of the welfare of the master, though unasked should speak out (tender his well merited opinion), but with due politeness.

अपृष्टस्यापि कारणविशेषात् भाषणमभिधातुमाह—आपदीति । आपदि परप्रयुक्त तीक्ष्णादि प्रारब्धायाम् । उन्मार्गगमने स्वामिनः शास्त्रविरुद्धाचरणे । कार्यात्यये स्वामिनः कार्यं विनश्वरं दृष्ट्वा कालात्यये च, अनुगुणकालातिक्रमे । अपृष्टोऽपि स्वामिहितान्वेषी ब्रूयात्, आपदि विक्रिया-प्रतीकारार्थम् । तत्रापि कल्याणभाषितं मङ्गल्यं वचनीयमिति ॥ २८ ॥

प्रियं तथ्यं च पथ्यं च वदेद्धर्मार्थमेव[39] च ।
अश्रद्धेयमसत्यं च[39a] परोक्षं कटु चोत्सृजेत् ॥ २९ ।

[39] धर्म्यार्थ्यमेव [39a] अश्रद्धेयमसभ्यं च

29. In order to derive spiritual and material benefits of the master, an employee should speak in sweet (polite) words while relating true facts (*tathyam*) and give his advice (suggestion) as salutary as a special diet (*pathyam*) to a patient, avoiding incredible, indecent, bitter and unauthenticated (*parokṣam*) remarks.

किञ्च, प्रियमिति । प्रियं अभीष्टं भूत्वा यत् पथ्यं हितमित्यर्थः । तथ्यं सत्यं भवेत् । ब्रूयाद्धर्मार्थमेव च यद्धर्मात्, अर्थात्, चानपेतम् । अश्रद्धेयं श्रद्धातुं अयोग्यम् (यत्र शक्यते), असभ्यमश्लीलादि । यत् परोक्षं यदश्रद्धेयमिति सम्बन्धः । कटु श्रुतिकटु (कर्णकटु) चोत्सृजेत् न ब्रूयादित्यर्थः ॥ २९ ॥

परार्थं देशकालज्ञो देशे काले च साधयेत् ।
स्वार्थं च स्वार्थकुशलः कुशलेनानुकारिणा ॥[40] ३० ।

[40] कुशलेनार्थकारिणा

30. An employee conversant with advantages of just time and place, may suitably (considering proper opportunities of time and place) try to promote other's interests (in gaining recognition from the lord), but for his own interests he should move carefully and intelligently (by reading the mind and mood of the master).

परार्थमिति । प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मतः इत्यपेक्ष्य, परार्थं स्वामिनं विज्ञाप्य साधयेदित्यर्थः । देशकालज्ञ इति[7], यस्मिन देशे स्थितः स्वामी कार्यं करोति यस्मिंश्च काले, तौ जानातीति तज्ज्ञोऽनुजीवी । तत्र देशे काले चार्थं साधयेत् । स्वार्थमात्मीयकार्यं कुशलेनान्येन स्वार्थ-कुशलोऽनुजीवी साधयेत, न स्वयम् । अर्थकारिणाऽत्महितेन । प्रत्यक्षं प्रार्थनाभङ्गे वैलक्षण्यं मा भवत्विति ॥ ३० ॥

[7] वक्तव्यकालरोषराहित्यसमये कान्तदेशज्ञानवाननुजीवी

गुह्यं कर्म च[41] मन्त्रं च न भर्तुः सम्प्रकाशयेत् ।
विद्विष्टिं च विनाशं च[42] मनसापि न चिन्तयेत् ॥ ३१ ।

[41] गुह्यकर्म च

[42] विद्विष्टमपि नाशं च ; विद्विष्ट त्वं विनाशं च

31. A sincere attendant must not divulge the secret policies and decisions (*guhyakarmaṁ ca mantraṁ ca*) of the king nor should he ever harbour in his mind any evil design of maligning the king or causing his death.

गुह्याप्रकाशनमाह—गुह्यमिति । गुह्यं गोपनीयं कर्म शत्रुविषयेऽभिचारादिकम्, अन्यद्वाऽप्रकाश्यं मन्त्रञ्च भर्तुसम्बन्धिनं न प्रकाशयेत् । तथा "मन्त्रम् उच्छिद्य न विभेदयेत्" इति कौटिल्यः । तथा च विद्विष्टं भर्तुराज्यभ्रंशादिकं, विनाशं मरणादि, मनसा हृदयेन, न चिन्तयेत् । वचनेन तु नैवेत्यर्थादिति ॥ ३१ ॥

स्त्रीभिस्तद्दर्शिभिः पापैर्वैरिदूतैर्निराकृतैः[43] ।
एकार्थचर्यां साहित्य[43a] संसर्गं च विवर्जयेत् ॥ ३२ ।

[43] दूतैर्निराकृतैः

[43a] एकार्थचर्यां संघातं ; सवासं

32. Association with the women (of the harem) and their supervisors (matrons or female guards) as well as with habitual sinners (of immoral conduct), messengers from hostile chiefs and those turned out (dismissed

from service) by the master, should not only be shunned, but also meeting or discoursing with them should be avoided.

स्त्रीभिरिति । स्त्रीभिः स्वामिभोग्याभिः, तद्दर्शिभिः शम्भली प्रभृतिभिः संसर्गं विवर्जयेत् । कामोपधाशुद्धो न भवतीति शङ्कानिवृत्त्यर्थम् । पापैः पातकिभिः, कृतस्वामिविरोधिभिः, तत्सङ्गागत पातकशङ्कानिवृत्त्यर्थम् । वैरिदूतैः शत्रुप्रेषितैः, अहितगत्यागमशङ्कानिवृत्त्यर्थम् । निराकृतैर्दोषात् स्वामिना कार्यादुत्सारितैः । एभिरभिहितैः सह, एकार्थचर्यामेकमर्थमुद्दिश्य सहचर्यां गमनम्, साहित्यं संघातं सर्वदा मिलित्वाऽवस्थानम्, संसर्गं सङ्गतिं च विवर्जयेत, शङ्कानिवृत्त्यर्थमिति ॥ ३२ ॥

वेष(श)भाषानुकरणं न कुर्यात् पृथिवीपतेः ।
सम्पन्नोऽपि हि मेधावी स्पर्द्धेत न च तद्गुणैः ॥ ३३ ।

---

33. Dress and demeanour or the speaking style of the monarch should not be imitated by a sensible employee. However well qualified he may be, he should not arrogate himself with the king's form and features.

वेषेति । पृथिवीपतेर्यो वेषो (वेशो) नेपथ्यादिः, या च भाषा स्वामिना व्युत्पादिता[8] वाक् तदनुकरणं न कुर्यात् । मया स्पर्धत इति शङ्कानिवृत्त्यर्थम् । तथा सम्पन्नोऽपि गुणैरनुजीवी मेधावी-प्राज्ञोऽपि सन् स्पर्धेत न च तद्गुणैः, द्वेष्योऽन्यथा भवतीति ॥ ३३ ॥

[8] अभ्युत्पादिता ; अव्युत्पादिता

रागापरागौ जानीयाद् भर्तुः कुशलकर्म कृत् ।
इङ्गिताकारलिङ्गाभ्यामिङ्गिताकार तत्त्ववित् ॥ ३४ ।

---

34. An intelligent employee, capable of reading the mood of the master (whether pleased or displeased) expressed through gestures, appearances and movements (of the body), should act accordingly like an expert in interpreting such gestures, appearances and movements of his master.

रागेति । भर्तुः स्वामिनः, रागोऽनुरक्तता, अपरागो विरक्तता । तौ जानीयादनुजीवी कुशल-कर्मकृत्, अन्यैरपि कुशलैर्यदकृतं तत् कर्म करोति यः । न हि कर्मकरणाभावे रागापरागौ ज्ञातुं शक्येते । काभ्यां जानीयात्, इत्याह—इङ्गिताकारलिङ्गाभ्यामित्यादि । "इङ्गितम् अन्यथा—वृत्तिः, आकृतिग्रहणम् आकारः" इति कौटिल्यः । इङ्ग्यते ज्ञायते हृदयस्थोऽर्थो येन तदिङ्गितमित्यर्थो युज्यते । सर्वे गत्यर्था ज्ञानार्था इति वचनात् । तत्र अन्यथावृत्तिः पूर्ववृत्तायाः क्रियाया अन्यथात्वमिति[9] । आकृत्यन्तरस्य ग्रहणं, पूर्ववृत्तायाः प्रसन्नादिकायाः आकृतेराकृत्यन्तरस्य ग्रहणमाकारः । क्रियाया अन्यथा-त्वमिङ्गितं, कर्तुरन्यथात्वं चाकार इति समुदायार्थः । तयोर्लिङ्गानि चिह्नानि ताभ्याम् । इङ्गिताकार-तत्त्वविदित्यनुजीवी ॥ ३४ ॥

[9] मिति । ग्रहः आकारः

दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
विशत्यासनमभ्यासे[44] कुशलं परिपृच्छति ॥ ३५ ।
विविक्तदर्शनस्थाने[45] रहस्ये च न शङ्कते ।
तदर्थां तत्कृतामुच्चै[46]राकर्णयति सत्कथाम्[47] ॥ ३६ ।

[44] मभ्याशे [45] दर्शने स्थाने
[46] तत्कृतां चोच्चै [47] सत्कथाम्, सैकथाम्

35-36. The king, (favourably disposed with the employee) expresses delight to meet him, accepts his views with sympathy, offers him a seat close to his own and enquires about his welfare. He would also not hesitate to meet him in the secret place (*viviktadarśana*, inner chamber) for an exclusive interview and entrust him secret duties (*rahasya*). He would for this purpose (i.e., prior to giving the employee secret commissions) listen to the reports of high officials about the merit of the performances of the employee with attention and sympathy.

रागलिङ्गानि[10] इङ्गिताकाराभ्यामभिधातुमाह—दृष्ट्वेति। दृष्ट्वा प्रसन्नो भवति इति आकारलिङ्गम्। वाक्यं गृह्णाति आदरात् इति इङ्गितलिङ्गम्। पूर्ववृत्ते वाक्यग्रहणेऽन्यथावृत्तिग्रहणमेव ॥ ३५ ॥

[10] इङ्गिताकारज्ञानार्थं तावत्प्रीतेर्लक्षणान्याह—दृष्ट्वा प्रसन्नो हास्ययुक्तवदनो राजा भवति चेदयं मयि प्रीतियुक्तो वर्तते इति ज्ञेयम्। एवमेवाग्रेऽप्युह्यं यावत् प्रीतिलक्षणम्। वाक्ये प्रसङ्गादुक्ते सति आदरात् हितवक्तेति विश्वस्तः सन् तथा गृह्णाति स्वीकरोति। परिषद् गते सति आसनमास्यतेऽस्मिन्निति स्थिति स्थानमभ्याशे निकटे दिशति ददाति ॥ ३५ ॥

विविक्तेति। विविक्तदर्शन स्थाने एकान्तदर्शने तादृशस्थाने च, रहस्ये गोपनीये च कार्ये न शङ्कते विश्वासयोगात्। तदर्थामनुजीविगुणग्रहणपक्षपाताम्। तत्कृतामनुजीविकृताम्। सत्कथामिष्टैः सह उच्चैराकर्णयति नावज्ञां करोतीत्येददपीङ्गितम् ॥ ३६ ॥

श्लाघते श्लाघनीयेषु श्लाघ्यमानं च नन्दति ।
कथान्तरेषु स्मरति प्रहृष्टः कीर्तयेद्गुणान् ॥ ३७ ।

37. Hearing others' encomiums on the employee's work the master applauds such people and congratulates the employee concerned too. He would also remember such an employee in course of his discussions (with others) and refer to his qualities in elegant terms to express his full satisfaction.

श्लाघते इति। श्लाघनीयेष्वन्येषु कीर्त्यमानेषु स्वामी श्लाघतेऽनुजीविनम्। श्लाघ्यमानमन्यैर्नन्दति अभिनन्दति। कथान्तरेषु अन्यैः क्रियमाणेषु ईदृश एवासाविति स्मरति। यादृशोऽयं तादृशो नान्य इति प्रहृष्टः कीर्तयेद् गुणान् तद्गुणानिति ॥ ३७ ॥

सहते पथ्यमप्युक्तं[48] न निन्दामनुमन्यते ।
करोति वाक्यं तत् तत्प्रोक्तन् तद्वचो[49] बहु मन्यते ॥ ३८ ।

---

[48] पथ्यमुक्तः सन् [49] वाक्यं तस्यैव तद्वच ; तद्भक्तं तद्वचो

38. The master (gladly) tolerates the words of such an employee even if it is unpalatable and does not take it amiss (i.e., insulting). On the other hand he implements the latter's advice by giving it due regard.

सहत इति। सहते समर्थयति (मर्षयति)। पथ्यं हितमुक्तः सन्। तत्कृतां न निन्दामप्यनुमन्यते। त्वमनारमवान् विजिगीषुर्गर्हित इत्यादिकं निन्दात्वेन नानुमन्यते। करोति वाक्यमनुजीविना प्रोक्तं, तद्वचोऽनुजीविवचनं बहु मन्यते श्लाघत इत्यर्थः ॥ ३८ ॥

*[वृद्धौ प्रसन्नो[49a] भवति व्यसने परितप्यते ।]
उपकारेषु माध्यस्थ्यं दर्शयेत्यद्ध तेष्वपि[49b] ।
तत्कृतं कर्म चान्येन कृतमित्यभिधीयते[50] ॥ ३९ ।
विपक्षमुत्थापयति विनाशं चाप्युपेक्षते ।
कार्यं संवर्द्धयत्याशां फले च कुरुतेऽन्यथा ॥ ४० ।

[49a] प्रतीतो [49b] तेषु च [50] कृत्यमित्यभिभाषते

* This line is omitted in the B. I. Text.

39. A king when displeased with any employee, would be indifferent to him inspite of his having rendered meritorious services (in the past), taking him to be too old and incapable of bearing the strain (of royal duties). Even actions performed by him would be ascribed to others.

40. On the other hand the master would incite his rivals against him and take no notice of his danger (ruin). Instead of encouraging the employee with reward on his performance of some work assigned to him, the master acts otherwise (does not fulfil his promise) on successful completion of it.

वृद्धाविति। अनुरक्तस्य स्वामिनो लक्षणमुक्त्वा विरक्तस्याभिधातुमाह—उपकारेष्विति। उपकारेषु अद्ध तेष्वपि, अनुजीविना कृतेषु विरक्तत्वात् माध्यस्थ्यमेव दर्शयति नानुरागम्। तत्कृतं कर्म चान्येन कृतमभिभाषते तौष्टिकमदातुम् ॥ ३९ ॥

विपक्षमिति। विपक्षमनुजीविनं शत्रुभूतमुत्थापयति उद्वेजयति (उत्तेजयति) तद्विनाशाय। विनाशे च विपक्षादिभिः क्रियमाणमुपेक्षते। 'विनश्यताम् अयम्' इति। कार्ये च तत्साध्ये समुपस्थिते, संवर्धयत्याशां यथा-'निस्तौ त्वद्दारिद्र्यमोक्षं करोमि' इत्याशां संवर्द्धयति, फले च कार्ये स्वे सम्पन्ने कुरुतेऽन्यथा 'त्वया नैतत् साधितम्' इति ॥ ४० ॥

यद्वाक्यं मधुरं किञ्चित् तदप्यर्थं न निष्ठुरम् ।
आचरत्यात्मशंसासु[51] परिवादं च केवलम् ॥ ४१ ।
अकोपोऽपि सकोपाभः प्रसन्नश्चापि निष्फलः ।
वदत्यकस्माद्[52] व्रजति रूक्षं च मुहुरीक्षते[53] ॥ ४२ ।

*[विश्लाघ्यमानो वृत्तर्थं सहसोत्थाय गच्छति ।]

---

[51] आचरत्यात्मसंसत्सु ; शंसत्सु [52] हसत्यकस्माद्

[53] समुदीक्षते

* This line is omitted in the B. I. Text.

41-42. However sweet words are used by the master those are of unkind import for the employee. He is always made to be an object of censure (*parivādam*) in the court (by the king himself), even when he praises the lord, who feigns to be angry, though not actually so. His show of pleasure also does not bear fruit (becomes useless for, it is not followed by due reward).

In the midst of a statement by the employee on an undertaking and its result, the master suddenly breaks out in laughter (to deride the speaker), and pacing his steps towards him with frowning looks suddenly moves out of the chamber.

यद्वाक्यमिति । स्वामी अनुजीविविषये यत्किञ्चिद् वाक्यं मधुरमपि प्रयुंक्ते तदप्यर्थेन निष्ठुरम्, यथा—'भद्र । त्वया प्रियहितैषिणा विपक्ष उपेक्षितो ममैव समग्रं यशो दातुम्', इति मधुरं भाषते, तदर्थतस्तु विपक्षपक्षपाती भवानिति समर्थितं भवति । तथाऽचरत्यात्मशंसासु, अनुजीविना कृतासु परिवादं निन्दादिकं केवलमाचरति ॥ ४१ ॥

अकोपोऽपीति । कोपरहितोऽपि तद्दर्शने सकोप इवाभाति मा किमप्यर्थं प्रार्थयत्विति । प्रसन्नः कैतवेन निष्फलो भवति । रूक्षं च मुहुरीक्षते प्रसादानुरूपाकरणात्, अकस्मात् व्रजति कस्मादयं मद्दृष्टि पथेऽवतिष्ठत इति ॥ ४२ ॥

आघट्टयति मन्त्राणि ब्रुवन् हास्यं प्रपद्यते[54] ।
सम्भावयति दोषेण वृत्तिच्छेदं करोति च ॥ ४३ ।
साधूक्तमपि तद्वाक्यं[55] समर्थयति चान्यथा ।
अपर्वणि कथाभङ्गं करोति विरसीभवन् ॥ ४४ ।

---

[54] आघट्टयति मर्माणि गुणैर्न बहु मन्यते ; गुणान् न बहुमन्यते ।

[55] यद्वाक्यम् रहस्येष्वशङ्कते ; हासस्थानं न मन्यते

43. The master would not care to recognise the good qualities of

such an employee, rather he would make cutting remarks against him deriding his actions and for imaginary accusation dispense with his services (*vṛtticchedaṁ karoti*).

44. However just observations such an employee may make, the master would not pay any heed to them, but would rather accept the contrary opinion and unusually (unceremoniously) stop him in the midst of his speech by expressing dissatisfaction.

आघट्टयतीति। मर्माणि दुश्चरितानि, आ-समन्तात् घट्टयति स्पृशन्नेव वक्ति। गुणान् न बहु मन्यते, हासस्थानमनुजीवि-प्रस्तावितं न मन्यते न हसतीत्यर्थः। दुष्टत्वमात्मनो गोपायितुं तथा सम्भावयति अविद्यमानेनापि दोषेण। वृत्तिच्छेदं करोति चेति ॥ ४३ ॥

साधूक्तमिति। यद्वाक्यं अनुजीविवाक्यं साधूक्तमपि अन्यथा समर्थयति असाध्विति योजयति। अपर्वणि अयथास्थान एव कथाभङ्गं करोतीति तूष्णीभावमापद्यते। विरसी भवन असन्तोषमभिगच्छन्नित्यर्थः ॥ ४४ ॥

उपास्यमानः शयने[56] सुप्तलक्ष्येण[57] तिष्ठति।
बलेन बोध्यमानोऽपि[58] सुप्तवच्च विचेष्टते ॥ ४५ ॥

[56] विजने [57] सुप्तव्याजेन [58] यत्नेनाराध्यमानोऽपि

45. The master lying on bed, would feign to be asleep, if entreated for a favour by the servant attending him, and even if awakened by the efforts of the latter, would continue to be under the influence of sleep.

उपास्यमान इति। उपास्यमानः प्रायेण सुप्तलक्ष्येण तिष्ठति। सेवाऽस्य व्यर्थाऽस्त्विति। यत्नेनाराध्यमानोऽपि सुप्तवच्च विचेष्टते 'न जानामि कदा त्वमागतोऽसि' इति सुप्त इव वक्ति। तत् सेवां निष्फलां कर्तुमिति ॥ ४५ ॥

इत्यादि[59] ह्यनुरक्तस्य विरक्तस्य च लक्षणम्।
रक्ताद् वृत्तिं समीहेत विरक्तस्य[60] विवर्जयेत् ॥ ४६ ॥

[59] इत्येवमनु [60] विरक्तं च ; विरक्तिं च परित्यजेत्

46. These are the features of a master pleased or displeased with his dependents. Hence one should seek for service under a master, generous by nature and avoid the ungenerous.

इत्यादीति। इत्युक्तमादौ कृत्वा अन्यदपि अनुरक्त-विरक्तलक्षणं विद्यते, तदपि लोकतो ग्राह्यम्। ततश्च रक्तात् स्वामिनो वृत्तिं समीहेतानुजीवी। विरक्तं च परित्यजेत, निष्फलत्वादनर्थहेतुत्वाच्च ॥ ४६ ॥

निर्गुणं ह्यपि[61] भर्तारमापत्सु न परित्यजेत्।
ततः परतरो नास्ति य आपत्सूपतिष्ठति[62] ॥ ४७ ॥

[61] ह्यपि ; वापि [62] तिष्ठते

47. A servant should by no means forsake his master, however lacking in qualities (*nirguṇaṁ*), when he is afflicted with danger (troubles). There is nothing more meritorious for a servant to stand by his master during an emergency (*āpatsu*).

अस्यापवादमभिधातुमाह—निर्गुणमिति। श्लोकार्थः सुगमः। ततश्च कृतज्ञतयाऽस्य बहूपकरोतीति भावः॥ ४७॥

सुस्थवृत्तेषु[63] सत्त्वाढ्या नैव[64] यान्त्यभिलक्ष्यताम्।
विपत्सु धर्मधुर्याणां[65] तेषां नामातिरिच्यते॥ ४८।
श्लाघ्या चानन्दनीया च[66] महतामुपकारिता।
काले कल्याणमाधत्ते स्वल्पापि सुमहोदयम्॥ ४९।

---

[63] स्वस्थवृत्तेषु [64] नोपयान्त्यभि
[65] विरोधे कर्मधुर्याणां ; धर्मतुर्यानां [66] चानन्दनी चैव ; श्लाघ्यैवानन्दनी

48. In normal times the firmness of devotion of a servant does not receive due recognition (for it is not duly noticed), but in times of danger names of such loyal servants are highly commended.

49. Any service for the benefit of a great (generous) soul is always a matter of pride and pleasure for the servant. Because an insignificant act of goodness may in proper time bring about prosperity for the performer.

आपत्सूपकारस्य गुणं दर्शयितुमाह—स्वस्थवृत्तेष्विति। स्वस्थवृत्तानि आपदामभावे, निराकुलानि यानि वृत्तानि तेषु, अनाकुलेषु प्रभुषु। सत्त्वाढ्याः सत्त्वसम्पन्नाः, अनुजीविगुणाः। अभिलक्ष्यतां नैव यान्ति, न प्रकाशन्ते। किन्तु विपत्सु, (विरोधे) च समुपस्थिते धर्मधुर्याणां तेषां सत्त्वानुजीविनां नामाभिधानमतिरिच्यते, अतिरिक्तं जनैरभिधीयते। यथाऽनेनानुजीविनां विपत्सु विपक्षविरोधी स्वामी रक्षित इति शेषानुजीविमध्ये तस्य नामातिरिच्यते, शौर्येणातिरिक्तं भवतीत्यर्थः॥ ४८॥

एतदेव समर्थयन्नाह—श्लाघ्येति। महतां स्वाम्यादीनाम्। उपकारिता आपत्सु परित्राणादिका। काले कालप्रस्तावे। कल्याणमभ्युदयम्। आधत्ते करोति। स्वल्पापि सुमहोदयम्, महाभ्युदयसम्पन्नमित्यर्थः। तस्मान्महतां स्वामिनामुपकारः कर्तव्य एवेति॥ ४९॥

अकार्ये[67] प्रतिषेधश्च कार्ये चैवानुवर्तनम्।
सङ्क्षेपादिति सद्वृत्तं बन्धुमित्रानुजीविनाम्॥ ५०।

---

[67] अकार्यात्

50. In brief, to dissuade the king from acting contrary to legal injunctions and to pursuade him to act in conformity with them are the essential duties of friends, well-wishers and dependents.

केवलमनुजीविवृत्तमभिधाय बन्धु मित्र साधारणमभिधातुमाह—अकार्ये इति। अकार्ये शास्त्रनिषिद्धाचरणे। प्रतिषेधो निवारणम्। कार्ये धर्मार्थफले, अनुवर्तनम् क्रियतामेतदित्यनुष्ठानम्। संक्षेपात् समासतः सत् शोभनं वृत्तम् अनुष्ठानं बन्धुमित्रानुजीविनां इति सद्वृत्तं, एतत् शोभनं चरितम्॥ ५०॥

पानस्त्रीद्यूतगोष्ठीषु राजानमभितश्चराः।
बोधयेयुः प्रमाद्यन्तमुपायैर्नाडिकादिभिः[68] ॥ ५१।
राजानं येऽत्युपेक्षन्ते[69] सज्जमानं विवर्त्मसु[70]।
ते गच्छन्त्यकृतात्मानः सह तेन पराभवम्॥ ५२।

[68] नालिकादिभिः [69] ये ह्युपेक्षन्ते [70] विक्रमेषु

51. Personal attendants or companions of the king should convince him of the evil effects of addiction to women, drinking and gambling (by means of suitable illustrations), failing which (i.e., if the king is not dissuaded from those addictions), they should try other expedients like the use of *nālika* (*sāma* etc).

52. Attendants who neglect in preventing the king, lacking in self restraint, from taking illegal actions perish along with the master.

प्रसङ्गतो बन्धुमित्रवृत्तमुद्दिष्टमपि भूयोऽप्यनुजीविनां वृत्तमभिधातुमाह—पानेति। पानस्त्रीद्यूतगोष्ठीषु, पानगोष्ठी यथाऽह कौटिल्यः-'मद्यकामं योगपानैरुद्वेजयेयुः' इति। 'परस्त्रीकामम्, आर्याव्यञ्जनाभिः अमेध्याभिः शून्यागारेषु उद्वेजयेयुः' इति। 'द्यूतकामं कापटिकैः पुरुषैः उद्वेजयेयुः' इति। राजपुत्रावस्थायामभिहिता एते उपाया यथासम्भवं वृद्धस्यापि योज्या इति। एवं राजानं स्वामिनमभितश्चराः चतुर्दिक्षुस्थिताः अनुजीविनः बोधयेयुः प्रबोधयेयुराख्यानकादिभिः। ततः प्रमाद्यन्तं राजप्रणिधौ निरुद्वेगं (निरुद्योगं) नालिकादिभिरुपायैः सामादिभिरिति॥ ५१॥

अनुजीविनां स्वामिबोधने प्रमादे दोषमाह—राजानमिति। राजानं येऽनुजीविन उपेक्षन्ते न निवारयन्ति, सज्जमानं आसक्तिं गच्छन्तं, विवर्त्मसु (विक्रमेषु) विरुद्धाचरणेषु, तेऽनुजीविनः, गच्छन्त्यकृतात्मानः, असंस्तुतात्मानः[11] सह तेन स्वामिना पराभवं नाशमिति[12]॥ ५२॥

[11] असंस्कृतात्मानः

[12] तथा च कौटिल्यः-नालिकाप्रबोधेन अभिनयेयुरिति

जयाज्ञापय जीवेति नाथ देवेति[71] चादरात्।
आज्ञामस्य[72] प्रतीक्षन्तो[72a] भृत्याः कुर्युरुपासनम्॥ ५३।
भर्तुश्चित्तानुवृत्तित्वं[73] सद्वृत्तमनुजीविनाम्।
रक्षांस्यपि हि गृह्यन्ते नित्यं छन्दानुवर्तिभिः॥ ५४।

[71] देवेति नाथ जीवेति [72] आज्ञां चास्य

[72a] प्रतीच्छन्तो [73] भर्तुश्चितानुवर्तित्वं

53. "Victory unto My Lord !" "I am at Your Majesty's command !" "May Your Excellency live long" and such other honorific expressions should always be used by attendants as marks of respect for the master. They should thus worship him while awaiting royal commands.

54. The foremost duty of a dependent is to implement the desires (*cittānuvṛttitvaṁ*) of the master. Because Rākṣasas or men of devilish disposition are also won over by the obedient followers (*chandānuvartibhiḥ*).

राजोपासनाक्रममभिधातुमाह—जयेति। दर्शने 'जय जीव महाराज' इत्यादि वचनम्। स्वामिसमाह्वानेषु जीव, देव, नाथ, आज्ञापय इति कार्यावसरे वक्तव्यम्[13]। एवमाज्ञामस्य स्वामिनः प्रतीक्षन्तो (प्रतीच्छन्तो) भृत्याः कुर्युरुपासनां सेवाम् इत्यर्थः ॥ ५३ ॥

संक्षिप्तगुणानभिधातुमाह[14]—भर्तुरिति। भर्तुः स्वामिनः, चित्तानुवर्तित्वं नाम सद्वृत्तम्, अनुजीविनां सेवकानामेतत् च शोभनं वृत्तम्। यस्मात् रक्षांस्यपि हि क्रूरकर्मकारीण्यपि हि, गृह्यन्ते वशीक्रियन्ते। नित्यं छन्दानुवर्तिभिः सेवकैः, मनुष्यास्तु गृह्यन्त एवेत्यर्थः। छन्दानुवर्तनं वशीकरणमिति वचनात् ॥ ५४ ॥

[13] देव नाथेति आदरे वक्तव्यम्। [14] संक्षिप्त सेवाधर्ममभिधातुमाह—

धीसत्त्वोद्योगयुक्तानां किं दुरापं महात्मनाम्।
छन्दानुवर्तिनां लोके कः परः प्रियवादिनाम ॥ ५५ ॥
अलसस्याल्पतोषस्य[74] निर्विद्यस्याकृतात्मनः।
प्रदानकाले भवति मातापि हि पराङ्मुखी ॥ ५६ ॥

---

[74] दोषस्य

55. What is unattainable (*durāpaṁ*) on the earth to persons possessing intellect, firmness and industriousness, and who is superior to one who is agreeable in speech and acts in conformity with the master's desires ?

56. Even the mother is reluctant to help a son who is idle, unambitious (easily satisfied, *alpatoṣa*), illiterate and of unrestrained conduct, (what to speak of others then).

परचित्तवृत्तयो दुर्ग्राह्या भवन्तीत्याशङ्क्याह—धीति। धीरित्यष्टगुणा प्रज्ञा, तद्यथा 'शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः' इति। सत्त्वं व्यसनेऽभ्युदये यदविकारि। उद्योग उद्यमः। 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः' इति वचनात्। एवं गुणत्रययुक्तानां महात्मनामात्मसम्पदुपेतानां, किं दुरापं किं नाम दुष्प्रापम् ? अपितु सर्वमेव प्राप्यमेव। एवं च स्वामिचित्तमुक्तगुणैर्महात्मभिर्ग्रहीतुं शक्यत एव। तथा छन्दानुवर्तिनामिच्छानुविधायिनां लोके प्रियवादिनां कः परः ? न कश्चिदपि परो भवति। सर्वो लोकः स्वजन एव भवति। तस्मादनुजीविना धीसत्त्वोद्योगयुक्तेन भाव्यमिति भावः ॥ ५५ ॥

उक्तगुणहीनस्तु न कुतश्चित् किञ्चिदासादयतीतिदर्शयन्नाह—अलसस्येति। अलसस्य निरुद्यमस्य। अल्पतोषस्याल्पसन्तुष्टस्य। निर्विद्यस्य मूर्खस्य। अकृतात्मानोऽजितेन्द्रियस्य पुंसः। आस्तां तावदन्यः, प्रदानकाले दानावसरे। मातापि हि पराङ्मुखी खिन्नचित्ता। तस्मादुक्तगुणेनानुजीविना भवितव्यमिति भावः॥ ५६॥

ये शूरा येऽपि विद्वांसो ये च सेवाविपश्चितः।
तेषामेव विकाशिन्यो भोग्या नृपतिसम्पदः॥ ५७।
अप्रियोऽपि हि पथ्यः स्यादिति वृद्धानुशासनम्।
वृद्धानुशासने तिष्ठन् प्रियतामधिगच्छति[75]॥ ५८।

[75] प्रियतामुपगच्छति

57. Such dependents who are brave, learned and devotedly loyal enjoy the increasing wealth of the king.

58. According to the injunctions of the elders (the wise), an employee not enjoying the favour of the master should go on proffering wholesome advice to him. For, by following this wise injunction he may regain the favour of the master.

गुणवतामनुजीविनामुपभोग्या नृपसम्पदो भवन्ति नेतरेषामिति दर्शयन्नाह—य इति। येऽनुजीविनः शौर्यसम्पन्नाः, ये च विद्वांसः सेवाविपश्चितः सेवाधर्मपण्डिताः। तेषां विकाशिन्यो भोगानुगुणा नृपसम्पदो भवन्ति॥ ५७॥

अप्रिय इति। अप्रिययोऽपि प्रियव्यसनाद्यालापानमकृतत्वेन यद्यप्यप्रियः स्वामिनस्तथापि पथ्यः स्यात्। पथ्येषूभयलोकहितेषु कार्येषु प्रेरणादुपचारादनुजीवी पथ्य उच्यत इति। वृद्धानुशासने पथ्यकार्येषु प्रेरणे तिष्ठन्ननुजीवी पश्चात् प्रियतामुपगच्छतीति॥ ५८॥

आजीव्यः सर्वभूतानां राजा पर्जन्यवद्भुवि[76]।
निराजीव्यं त्यजन्त्येनं शुष्कवृक्षमिवाण्डजाः[77]॥ ५९।

[76] पर्जन्यवद् भवेत्   [77] शुष्कं सर इवाण्डजाः

59. The king is the source of subsistence of all people, just as rainbearing clouds are to the earth. But the king who is incapable of providing the means of subsistence is forsaken by all as a dried-up tree or lake is avoided by birds.

एवमनुजीविवृत्तमभिधाय स्वामिवृत्तमभिधातुमाह—क्रमश्चायं स्वामिवृत्तस्यानुजीविवृत्तापेक्षया स्वामिना भरण कल्पना कर्तव्येति। वृत्तिसम्पन्नोऽपि यद्यदाता स्यात् तदा न सेव्यते। तदर्थमाह—आजीव्य इति। आजीव्य अनुजीवनीयः (उपजीवनीयः) सर्वभूतानां सर्वप्राणिनाम् दानाश्रय रक्षणादिभिः, राजा प्रजापतिः पर्जन्य इव जीमूत इव स्यात्। निराजीव्यमाजीविकारहितम्। वृत्त्यभावादेनं राजानं त्यजन्ति, मुञ्चन्ति, आजीविनः। शुष्कं निर्जलं (रसाभावात्), सरस्तडागमिव, अन्डजाः

पक्षिणो हंसादयः। तस्माद् राज्ञा दानशीलेन भवितव्यमिति। स्वामीवृत्तिसम्पन्नोऽप्यदाता चेत् न सेव्यत इत्यर्थः ॥ ५९ ॥

कुलं वृत्तं च शौर्यं च[78] सर्वमेतन् न गण्यते।
दुर्वृत्तेऽप्यकुलीनेऽपि[79] जनो दातरि रज्यते ॥ ६० ।
लक्ष्मीरेवान्वयो लोके न लक्ष्म्याः परतोऽन्वयः।
यस्मिन् कोशो बलं चैव तस्मिंलोकोऽनुगच्छति ॥ ६१ ।
उत्थिता एव पूज्यन्ते जनाः कार्यार्थिभिर्नरैः।
शत्रुवत् पतितं कोऽनुवन्दते मानवं पुनः ॥ ६२ ।

---

[78] कुलं वृत्तं श्रुतं शौर्यं

[79] दुर्वृत्ते वा सुवृत्तेवा ; दुर्वृत्ते वा कुलीने वा

60. People do not consider the nobility of lineage, high qualities, learning or valour of a king as sufficient. They are drawn to him who is generous, whether ignoble or noble.

61. *Lakshmī* or prosperity bespeaks of a man's good fortune and high lineage (i.e., his actual lineage, whatever it may be, becomes insignificant, if he is prosperous), and nothing is more illustrious than that (blessings of *Lakshmī*). A king, possessing a solvent treasury and a strong army, is resorted to by all men.

62. A prosperous (ruler) is always respected by people seeking means of subsistence. For, who cares to do homage to one fallen from grace like vanquished enemies ?

एतदेव समर्थयन्नाह—कुलमिति। कुलं सोमसूर्यवंशप्रभवम्। वृत्तं रामयुधिष्ठिरवत् सदनुष्ठानम्। श्रुतं सर्वशास्त्रपारङ्गमत्वम्। शौर्यं परशुरामसमानम्। सर्वमेतन्न गण्यते आश्रयणीयत्वे हेतुत्वे नारोप्यते। एभिर्गुणैरेव स्वामी नाश्रयणीयोभवतीत्यर्थः। दुर्वृत्तेऽपि, अकुलीनेऽपि स्वामिनि जनो दातरि रज्यते। 'त्यागः गुणशताधिकः मतः' इति वचनात् ॥ ६० ॥

प्रसङ्गात् सधनप्रशंसा श्लोकद्वयेनाह—लक्ष्मीरेवेति। उत्थिता एवेति। स्पष्टं ॥ ६१ ॥ ६२ ॥

अर्थार्थी जीवलोकोऽयं ज्वलन्तमुपसर्पति।
क्षीणक्षीरां निराजीव्यां[80] वत्सस्त्यजति मातरम् ॥ ६३ ।
अहापयन् नृपः कालं भृत्यानामनुजीविनाम्[80a]।
कर्मणामानुरूप्येण वृत्तिं समनुकल्पयेत् ॥ ६४ ।
काले स्थाने च पात्रे च न हि वृत्तिं विलोपयेत्।
एतद्वृत्तिविलोपेन राजा भवति गर्हितः ॥ ६५ ।

---

[80] निराजीवां [80a] भृत्यानामनुवर्तिनाम्

63. All beings in this world strive for means of subsistence and they flourish by obtaining the same from one who is prosperous. A calf forsakes the mother-cow when she is dry and is unable to sustain it.

64. From time to time (or at regular intervals) the servants and dependents should be paid by the king due remuneration proportionate to the services rendered by them.

65. The king should not discontinue fixed payments to deserving persons in proper time and place. Such discontinuation of fixed payments (*vṛtti vilopa*) brings disgrace (*garhitah*) to the king.

भूयोऽपि स्पष्टयन्नाह—अर्थार्थीति। अर्थो जीविकोपकरणम्। अर्थार्थी जीविकोपकरण-प्रार्थयिता, जीवलोको जीववर्गः ज्वलन्तं दानशक्त्या प्रज्वलन्तं पार्थिवमुपसर्पति समीपं गच्छति, एवमर्थार्थी परिजनोऽप्युपसर्पति। क्षीणक्षीरां दुग्धहीनां (गतपयसम्) अतएव नीराजीव्यां वत्सकस्तर्णकः गतपरिचय सन् मातरं त्यजति। तस्मात् स्वामिना त्यागिना भवितव्यमिति भावः। ६३॥

भृत्यभरणमभिधातुमाह—अहापयन्निति। अहापयन् नृपः कालं दानकालयापनमकुर्वन्, भृत्यानां भरणार्हाणाम्। अनुवर्तिनां इच्छानुविधायिनामनुजीविनाम्। कर्मणामानुरूप्येण, उत्तम-मध्यमाधमरूपेणौचित्येन, वृत्तिं जीविकाम्, समनुकल्पयेत् दद्यादित्यर्थः॥ ६४॥

वृत्तिविलोपे दोषं दर्शयन्नाह—काल इति। यस्मिन् काले यस्य दातव्यं, स्थाने च कोशगृहजन-पददेवालयादिके। पात्रे च गुणसम्पन्ने यद्दातव्यं तस्य तादृशीं वृत्तिं न लोपयेत्। हि यस्मात्, एतस्याः पूर्वरूपायाः वृत्तेर्विलोपेन राजा भवति गर्हितो निन्दितः। निन्द्यश्च नाभिगम्यत इति भावः॥ ६५॥

अपात्रवर्षणं जातु न कुर्यात् सद्भिर्गर्हितम्।
अपात्रवर्षणादन्यत् किं स्यात्[81] कोशक्षयादृते॥ ६६।
कुलं विद्यां श्रुतं शौर्यं सौशील्यं भूतपूर्वताम्।
वयोऽवस्थां च सम्प्रेक्ष्य आद्रियेत महात्मवान्[82]॥ ६७।

---

[81] अपात्रवर्षणात् किं स्यादन्यत्

[82] संवीक्ष्य स्वाद्रियेत महामनाः

66. Gift to unworthy persons (*apātra varṣaṇaṁ*), contrary to the views of the wise, should not be resorted to, as it entails in nothing but waste of money (exhaustion of treasury, *kośakṣaya*).

67. In selecting persons worthy of favour the king should carefully ascertain their ancestry, learning, proficiency in the Vedas, courage, good conduct, antecedents (*bhūtapūrvatām*), age and personal circumstances.

अपात्रे दाननिषेधमभिधातुमाह—अपात्र इति। पुरुषार्थत्रयोत्पत्तिस्थानानि क्षेत्राणीव पात्राण्य-भिधीयन्ते। यत्र कनकवर्षणेन धर्म उत्पद्यतेऽर्थो वा कामो वा तानि पात्राणि। यत्र न पुरुषार्थोत्-पत्तिस्तान्यपात्राणि। अपात्रवर्षणमिति असत्पात्रे धनदानं जातु कदाचिदपि न कुर्यात्। यतस्तत्

सद्भिर्गर्हितं सद्भिर्निन्दितम् निष्फलत्वात्। तथा च अपात्रवर्षणात् किमन्यत् स्यात्? कोषक्षयाद्भवे केवलं कोशक्षयं एव स्याद् भाण्डारहीनत्वम्। यथार्थमपि दानं गुणवत्स्वेव कृतं यशसे भवति। न सर्वास्वस्थासु। श्लाघनकेषु श्लाघापि गुणवद्भिः कृता यशसे धर्माय च भवतीति ॥ ६६ ॥

पात्रस्वरूपसूचनापूर्वकं तत्सङ्ग्रहार्थमाह—कुलमिति। कुलं शुद्धोभयपक्षताम्, विद्याश्रुतं आन्वीक्षिक्यादिश्रवणम्, शौर्यं अभीरुत्वम्, सौशील्यं सुशीलताम्, भूतपूर्वतां पितृपैतामहायातताम्, वयोऽवस्थां यौवनावस्थाम्, सम्प्रेक्ष्य (संवीक्ष्य) निरूप्य, स्वाद्रियेत सुन्दरं पात्रं संगृह्णीयादित्यर्थः। महात्मवान् विजिगीषुरिति ॥ ६७ ॥

कुलीनान् नावमन्येत सम्यग्वृत्तान् मनस्विनः।
त्यजन्त्येतेऽवमन्तारं[83] घ्नन्ति वा मानहेतुना[84] ॥ ६८ ।
गुणैरुदारैः संयुक्तान् प्रोन्नयेन्मध्यमाधमान्।
महत्वं[85] प्राप्नुवन्तस्ते वर्द्धयन्ति नरेश्वरम् ॥ ६९

[83] त्यजन्ते हि भर्तारं [84] मानहेतवः [85] महत्तां

68. No disrespect should be shown to employees who are high born, wise and devoted to their respective duties. As, in that case, (for the sake of their prestige) they may forsake the sovereign (who insults them) or may cause his death even.

69. Necessary steps should be taken to promote employees of middle and lower cadres endowed with high qualities, to higher positions. Entrusted with greater responsibilities they would strive for increasing the prosperity of the monarch.

पात्रभूतानामनादरे दोषं दर्शयन्नाह—कुलीनानिति। कुलीनान् महाकुलप्रसूतान्, नावमन्येत। सम्यग्वृत्तान् सदाचारान्, मनस्विनः प्रज्ञायुक्तान् बुद्धिसमेतान्। यस्मात् अवमन्तारं एते जनाः मानहेतुना त्यजन्ति परिहरन्ति, घ्नन्ति च निपातयन्ति च। तस्मान्माननीयान्नावमन्येत ॥ ६८ ॥

मध्यमाधमानां गुणस्फुरणमभिधातुमाह—गुणैरिति। गुणैरुदारैरुत्तमैः शौर्यादिभिः संयुक्तान्, अनुजीविनः प्रोन्नयेत् प्रकर्षेण उन्नतिं नयेत्। मध्यमाधमानपि स्वतोऽवश्यमुन्नतियोग्या न भवन्ति। कुत इत्याह, महत्तां महतीं उन्नतिं प्राप्नुवन्तस्ते नरेश्वरं स्वामिनं वर्द्धयन्ति वृद्धिं नयन्ति, कृतज्ञतयाऽर्थसामर्थ्यात् ॥ ६९ ॥

उत्तमाभिजनोपेतान् न नीचैः सह वर्द्धयेत्।
कृशोऽपि हि विवेकज्ञो याति संश्रयणीयताम् ॥ ७० ।
निरालोके हि लोकेऽस्मिन् नासते तत्र पण्डिताः।
जातस्य हि मणेर्यत्र काचेन समता मता ॥ ७१ ।

70. Higher grade employees of respectable status should not be brought at par with the promoted lower cadres. A conscientious ruler,

however weak, by following this principle, is resorted to by persons seeking refuge.

71. The wise in the society do not keep company with the foolish people (those who are ignorant of real state of things). To think of equality among them is to consider precious gems at par with ordinary pieces of glass (or crystals).

स्वामिना विवेकयुक्तेन भवितव्यमित्यभिधातुमाह—उत्तमेति। उत्तमं सर्व्वाधिकं अभिजनं कौलीन्यं तेनोपेतान् महाकुलीनान्। तान् न नीचैः सह संवर्द्धयेत्, नियोगेनाभियोजयेदित्यर्थः। तथा च कौटिल्यः 'नीचैरुपहताः कुद्धवर्गे पतन्ति' इति। एतच्चाविवेकित्वम्। विवेकयुक्तमाभिजनोपेतानु-त्तमैरेव सह संवर्द्धयेत्, नियोगेन नियोजयेत्। अत्र गुणं दर्शयन्नाह—कृशोऽपि हि क्षीणोऽपि हि विवेकज्ञः, याति संश्रयणीयताम्। बह्वाश्रयत्वं राजत्वं याति ॥ ७० ॥

अविवेकित्वस्य दोषं दर्शयन्नाह—निरालोके इति। निरालोके हेयोपादेयोपदेशक विवेकशून्ये, तत्रास्मिन् प्रसिद्धे लोके जगति, पण्डिता नासते, विवेकिनो नावतिष्ठन्ते। यत्र जात्यस्य हि मणेर्वज्रादे काचेन निकृष्टमणिना समता समानता मताभिमतेत्यर्थः ॥ ७१ ॥

विश्राम्यन्ति महात्मानो यत्र कल्पतराविव।
स श्लाघ्यं जीवति श्रीमान् सत्यम्भोगफलाः[86] श्रियः ॥ ७२ ।
लक्ष्म्या लक्ष्मीवतां लोके विकाशिन्या च[86a] किन्तया।
बन्धुभिश्च सुहृद्भिश्च विश्रब्धं या न भुज्यते ॥ ७३ ।

---

[86] स श्लाघ्यो भवति श्रीमान सत्सम्भोग फलाः ; सत्संयोग [86a] विकासिन्यापि किं तया।

72. The king, under whose domain his righteous dependents feel secure as under the shade of the heavenly tree *kalpataru*, is indeed praise-worthy, because prosperity thrives only in association with honest dependents.

73. The increasing prosperity of a wealthy king is useless unless it is sufficiently shared by his friends and well-wishers.

यथा विवेकिसुहृदौचित्याद्विनियोग इष्यते तथा सत्पात्रेषु प्रतिपत्तिश्चेति दर्शयन्नाह—विश्राम्यन्तीति। कल्पतराविव, यत्र श्रीमति स्वामिनि, महात्मानः सकलगुणशालिनः समीहित सम्पादकाश्चानुजीविनः, विश्राम्यन्ति अवस्थितिं कुर्वन्ति, स श्रीमान् स्वामी श्लाघ्यं स्पृहणीयं यथा भवति तथा, स जीवति। यतः सत्सम्भोगफलाः श्रियः गुणवद्भोग्याः, श्रियां फलमेतदेव यत् सद्भिः सम्भुज्यन्त इति। तथा च कौटिल्यः 'अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्द्धनी वृद्धस्य तीर्थव्ययप्रतिपादनी च इति (कौ. अर्थः १।४।३) ॥ ७२ ॥

एतदेव द्रढयितुमाह—लक्ष्म्या इति।[15] लक्ष्म्या विभूत्या। लक्ष्मीवतां श्रीमतां राज्ञां। विकाशिन्यापि विस्तारिण्यापि, तया लक्ष्म्या निष्फलया विभूत्या, किं फलं, या विभूतिः, बन्धुभिः सुहृद्भिर्मित्रैर्विश्रब्धं यथेष्टं यथा तथा न भुज्यते इति ॥ ७३ ॥

[15] लक्ष्म्या सम्पत्याऽविकासिन्या विकासरहितया किम्?
न किञ्चित्। बान्धवैः विस्रब्धं स्फुटं न भुज्यते ॥

आयद्वारेषु (आयद्वारेषु) सर्वेषु कुर्यादाप्तान् परीक्षितान् ।
आददीत धनं तेभ्यो[87] भास्वानस्रै[88]रिवोदकम् ॥ ७४ ।

[87] तैस्तु [88] भास्वानुस्रैः

74. The monarch should appoint trusted officials after due tests (*arthopadhā*) as superintendents of sources of income (*āyadvāreṣu*, Departments of revenue collection etc.) and through them collect taxes from the subjects like the sun, who draws moisture up through his rays (i.e., imperceptibly, without resorting to oppressive levies).

अध्यक्षप्रचारं अभिधातुमाह—आयद्वारेष्विति । आयद्वारेषु कोशागममार्गेषु, सर्वेषु वक्ष्यमाणेष्वपि, आप्तान् अध्यक्षान् परीक्षितान् उपधाशोधितान्, कुर्यात् । तैस्तु आप्तैः पुनः, करणभूतैः, भास्वान् आदित्यः, उस्रैः किरणैः, उदकमिव, धनमाददीत ॥ ७४ ॥

अभ्यस्तकर्मणस्तज्ज्ञान् शुचीन् सुज्ञानसम्मतान्[89] ।
कुर्यादुद्योगसम्पन्नानध्यक्षान् सर्वकर्मसु ॥ ७५ ।
यो यद्वस्तु विजानाति तं तत्र विनियोजयेत् ।
अशेषविषयप्राप्तावपीन्द्रियार्थ इवेन्द्रियम्[90] ॥ ७६ ।

[89] शुद्धार्थसङ्गतान् [90] विन्द्रियार्थेष्विवेन्द्रियाम् ।

75. Energetic officials as are experienced and well acquainted with different aspects of particular branches of (administrative) work, who are of tested ability (by means of *upadhās*) and are capable of coordinating the services of their subordinates, should be made heads of all administrative departments (*adhyakṣas*).

76. But utmost care should be taken in appointing to different offices (positions) such men as possess special knowledge for particular branches of administration, just as different sense organs perform specific functions.

किञ्च, अभ्यस्तेति । अभ्यस्तकर्मः अभ्यस्तं कर्म्म यैस्तान्, शिक्षित कर्मनिश्चयान्, तज्ज्ञान् कर्मविदः, शुचीन् उपधाशुद्धान्, सुज्ञानसङ्गतान् निबन्धलेखकाद्युपयुक्तपुरुषसहितान्, उद्योगसम्पन्नान् अप्रमादितः, सर्वकर्माध्यक्षान्, कुर्यात्, स्वामीत्यर्थः ॥ ७५ ॥

अपरञ्च, य इति । योऽध्यक्षो, यद्वस्तु यत् कर्मादिकं जानाति तं तत्रैव विनियोजयेत् । अशेषविषयप्राप्तौ शब्दस्पर्शरूपरसगन्धास्तत्प्राप्तये, इन्द्रियार्थे इन्द्रियविषये, इन्द्रियमिव यस्येऽन्द्रियस्य योऽर्थः । तद् यथा—शब्दविषयं प्राप्तुं श्रवणेन्द्रियं युञ्जीत । शेषैः शब्दो नैन प्राप्यते । तथा स्पर्शं प्राप्तुं त्वगिन्द्रियं, रूपं प्राप्तुं चक्षुः, गन्धं प्राप्तुं घ्राणम् । नहि अन्यविषयोऽन्येन प्राप्तुं शक्यते । तस्माद् यो यज्जानाति तत्र तन्नियोजयेदिति ॥ ७६ ॥

कोष्ठागारेऽभियुक्तः स्यात् तदायत्तं हि जीवितम् ।
नात्यायं व्ययं कुर्यात् प्रत्यवेक्षेत चान्वहम् ॥ ७७ ।

77. The store house (*koṣṭhāgāra* or the grain store, a part of the treasury), being a vital organ of the state, its chief sustainer, the king should see that the officer in charge (*adhyakṣa*) does not indulge in making excess realisations (from the subjects, for that will amount to extortion and loss of incentive for the producers) or incur excess expenditure (i.e., in excess of income, as in that case there will be no balance left, ultimately resulting in exhaustion of treasury). The monarch should personally inspect the transactions of the store house every day.

किञ्च कोष्ठागार इति । तथा कोष्ठमुदरम् । तत् पूरणार्थं धान्याद्युपचारात् कोष्ठं, तत् स्थापनार्थं आगारं कोष्ठागारम् । तत्राभियुक्तस्तत्परः स्यात्, विजिगीषुरित्यर्थः, तद्भरणं वृद्धिं तद्रक्षणं च कुर्यादित्यर्थः । हि यस्मात, जीवितं तदायत्तं । रत्नादिभिर्विनाऽपि जीव्यते, कोष्ठागारेण विना क्षणमपि न जीव्यते । अतएव रामेणोक्तम्—"सर्वरत्नप्रधानस्य कोष्ठस्य कुशलं गृहम् । नात्यायं हि व्ययं कुर्यादनत्यायं हि वर्तनाम् ॥" नात्यायं नाधिकं व्ययं कुर्यात्, व्यय आयादधिक इत्यर्थः । तं न कुर्यात्, तावायव्ययौ प्रत्यवेक्षेत तत्रान्वहं, स्वयं विजिगीषुरध्यक्षान्तरकरण निषेधार्थमिति ॥ ७७ ॥

कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरधनादानं[91] शून्यानां च निवेशनम् ॥ ७८ ।
अष्टवर्गमिमं साधु स्वच्छवृत्तो[92] विवर्द्धयेत् ।
जीवनार्थमिहाजीव्यैः कर्तव्यः करणाधिकैः[93] ॥ ७९ ।

---

[91] खन्याकरो वनादानं [92] स्वस्थवृत्तं
[93] कारयेत् करणान्वितैः

78-79. Agriculture, trade routes (*vaṇikpatha*), fortifications, (towns); dams and reservoirs (for irrigation), enclosures for elephant (elephant forests), mines, mine fields, forests and reclamation of uninhabited settlements (*śūnya niveśa*) are the eight sources of income (*aṣṭavarga*) which a king should maintain in proper condition and develop, thereby promoting the means of livelihood for the people engaged in different trades and professions through considerate officials.

अनन्तरोद्दिष्टानि आयद्वाराण्यभिधातुमाह—कृषिरिति । कृषिः सा द्विविधा, कुसीदेन कृता राजकुटुम्बिकृता च । वणिकपथो द्विविधः, स्थलपथो जलपथश्चेति । दुर्गं राजधान्यामुत्पत्तिः, परिखावेष्टितं सेनादिसन्निवेशनस्थानम् । सेतुः आलिः, शाल्यादिवापार्थं तडागादिजलाधार प्रतिबन्धः सेतुरभिधीयते । तदुत्पन्नेक्षुशाल्यादि च । कुञ्जरबन्धनं हस्तिधारणस्थानमायद्वारं महामूल्यहस्तिनोलाभात् । खनिः रत्नादि खननात् रत्नोत्पत्तिस्थानम् । आकरः सुवर्णादीनामासमन्तात् करणात्

सुवर्णादिधातुजनकं तत्र मृत्पाषाणरत्नधातुसंस्कारात् सुवर्णरूप्यादि लोहान्युत्पद्यन्ते। वनादानं कुप्यं सारदार्वादीनां वृक्षाणामादानात्। शून्यानां च ग्रामादीनाम् निवेशनम्। एतदष्टममायद्वारमिति ॥ ७८ ॥

किञ्च, अष्टवर्गमिति। पूर्वोक्तमष्टकमायद्वारमिति सम्बन्धः। तत् साधु विवर्द्धयेत् विशेषेण वृद्धिं नयेत्। किमर्थं कैरित्याह, जीवनार्थं वृत्त्यर्थं राष्ट्रस्य। इहाजीव्यैरिति। आजीव्यत इत्याजीव्याः, भूयोप्युपजीवितुं शक्यते यैः, तैः कारयेत् करणाधिपैरध्यक्षैरिति ॥ ७९ ॥

तथा यया प्रवर्तेत[94] वृत्त्या क्षीणोऽपि पार्थिवः।
तस्यां तस्यान्न संरोधं कुर्यात् पण्योपजीविनाम् ॥ ८० ॥

---

[94] यया ययेह वर्धेत

80. A ruler, even if weak, should promote the interests of the trading class (*paṇyopajīvinām*), (particularly of the importers of commodities), and not cause obstructions (*saṁrodham*) to the free flow of it (by imposing embargo or tariff).

अपरञ्च, तथेति। तथा यया यया वृत्त्या कृष्या पाशुपाल्येन वाणिज्यया वा वर्तेत। स्वयं राजा क्षीणोपि तस्यां वृत्तौ न संरोधं द्रव्यग्रहणेन प्रतिबन्धं कुर्यात् प्रवर्तयेदेव। विशेषेण तु पण्योपजीविनां न संरोधं कुर्यादिति ॥ ८० ॥

यथारक्षेच्च निपुणं शस्यं कण्टकिशाखया[95]।
फलाय लगुडः कार्यस्तद्वच्च भोग्यमिदं[96] जगत् ॥ ८१ ॥

---

[95] सुसंरक्षेत निपुणः सस्यं कण्टकशाखया
[96] कार्यो दस्युभोग्यमिदं

81. Just as a field with standing crop is secured (from depredation by animals) by planting thorny shrubs all around and by application of cudgel for the protection of the harvest, so the kingdom is also secured by proper safeguards and application of punishments to wrongdoers and mischief-makers in order to derive its benefits. (Unprotected it is usurped by robbers or enemies).

जगतो भोगोपदेशं दातुमाह—यथेति। यथा, कश्चित, शस्यं प्ररूढं धान्यं, कण्टकिशाखया सर्वतः परिवार्यकृतया निपुणं यथा तथा पश्वाद्युपद्रवात् रक्षति पालयति। फलाय लगुडः कार्यः, फलार्थं यथा लगुडं करोति, अवटाद्रौ वा स्थापयति—चौरादिनिषेधार्थम्। तद्वत् तेनैव प्रकारेण भोग्यमिदं जगत्।[16] प्रजां शस्यस्वरूपां कण्टकिशाखासमानदण्डप्रणयनेन पश्वादिसमानायुक्तकेभ्यो रक्षेत्। दण्डेन आयुक्त विपक्षाटविकतस्करेभ्यो रक्षितं सम्भोग्यं भवतीर्थः ॥ ८१ ॥

[16] तथा एतज्जगत् चौरादिकण्टकेभ्यो रक्षितं लगुड समानेन प्राम्यवृत्तिस्थापितं सत् सुखभोग्यं भवतीति भावः ॥

आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात् ।
पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम् ॥ ८२ ।
पञ्चप्रकारमप्येतदपोह्य नृपतेर्भयम्[97] ।
आददीत धनं[98] काले त्रिवर्गपरिवृद्धये ॥ ८३ ।

[97] नृपतिर्भयम्   [98] फलं

82-83. (Oppressive) state officials, thieves, enemies, king's friends or relatives and the lust of the king himself are the five sources of fear to the subjects. The king, by removing the five-fold fears reaps full benefits (revenue from the subjects) in time so as to secure the merits of *trivarga* (*Dharma*, *Artha* and *Kāma*).

एतदेव समर्थयन्नाह—आयुक्तेभ्य इति। आयुक्तेभ्यः अध्यक्षकादिभ्यः; तथा चोरेभ्यः स्वपरमण्डलस्थेभ्यः; परेभ्यः शत्रुभ्यः, राजवल्लभात् देवी कुमारादेः, पृथिवीपति लोभात्। प्रजानां पञ्चधा भयम्। तद् यथा न भवति तथा विधेयमिति ॥ ८२ ॥

पञ्चप्रकारमिति। इत्येतत् अनन्तरोक्तं पञ्चप्रकारं भयम्। अपोह्य भीतिमपनीय, नृपतिः स्वयम्, आददीत धनं (फलं) धान्यहिरण्यादिकम्, काले, आदानयोग्ये। त्रिवर्गपरिवृद्धये धर्मार्थकाम-वृद्ध्यर्थम् ॥ ८३ ॥

यथा गौः पाल्यते काले दुह्यते च तथा प्रजा ।
सिच्यते चीयते चैव लता पुष्प फलार्थिना[99] ॥ ८४ ।

[99] पुष्पप्रदा यथा ; मालार्थिना

84. Just as the cow maintained properly yields milk in time and the creeper sprinkled with water yields flowers, so also the subjects (yield revenue in time when their interests are promoted by the ruler).

दृष्टान्तप्रदर्शनेन प्रजापालनमुपजीवनमभिधातुमाह—यथा गौरिति। यथा गौः पाल्यते काले, पिण्याकतृण-जलादिना (लवणादिना)। काले दुह्यते च, तथा प्रजापि। कालविशेषे प्रजानां धान्य पशुहिरण्याद्यनुग्रहेण पाल्यते। कालान्तरे च भाग (षड्भाग) करादानादिना दोहः सम्पद्यते। तथा द्वितीयो दृष्टान्तः—यथा पुष्पप्रदा लता, पुष्पमालार्थिना मालाकारेण, सिच्यते पुष्यते, उपचीयते च, तद्वदियं प्रजा पाल्यते उपचीयते[17] चेति ॥ ८४ ॥

[17] उच्चीयते

आस्रावयेदुपचितान् साधु दुष्टव्रणानिव[100] ।
आयुक्तास्ते च वर्तेरन् वह्नाविव[101] महीपतौ ॥ ८५ ।
स्वल्पमप्यपकुर्वन्ति ये पापाः पृथिवीपतौ ।
ते वह्नाविव दह्यन्ते पतङ्गा मूढचेतसः ॥ ८६ ।

[100] दुष्प्रवणाणिव   [101] अग्नाविव

85. Just as a swollen abscess is operated upon (by the surgeon) and bled out (of the infected blood), the corrupt royal officers accumulating wealth are punished in the same manner by the king. Hence such officers are afraid of coming near the king, who resembles a blazing fire (that may burn any body approaching it carelessly).

86. Those who commit sins (wrongs) against the subjects in the slightest degree are burnt by the royal wrath like the foolish insects in the burning flame (i.e., the corrupt officials are surely punished by the king).

आयुक्तककृत प्रजापीडननिवारणार्थमाह—आस्रावयेदिति। उपचितान्, प्रजापीडया प्रवृद्धान् वृद्धिं गतास्तान् अध्यक्षान्, साधु यथा तथा आस्रावयेत् दण्डप्रणयनेनापहृतधनान् कुर्यात्। दुष्टव्रणानिव, यथा दुष्टव्रणाः स्राविताः सुखाय भवन्ति, तथा तादृशा अध्यक्षाः आयुक्तकाः। ते च वर्तेरन्, वह्नाविव (अग्नाविव) महीपतौ। यथा वह्निः किं करिष्यत्ययमिति लङ्घितो दहति, परित्यक्तः, पाकादिसाधको न भवति, तथा महीपतिरपि। युक्त्या सेवितः फलदो भवति नान्यथेति भावः॥ ८५॥

स्वल्पमपीति। ये पापाः पृथिवीपतौ स्वल्पं स्तोकमप्यपकुर्वन्ति, ते वह्नाविव दह्यन्ते पतङ्गाः, मूढं द्रव्यलोभादिनासच्चेतो येषां ते नृपकोपात्॥ ८६॥

संवर्द्धयेत् सदा कोशमाप्तै स्तज्ज्ञै रधिष्ठितम्।
काले चास्य व्ययं[102] कुर्यात् त्रिवर्गपरिवृद्धये[102a]॥ ८७।
धर्मार्थं क्षीणकोशस्य कृशत्वमपि शोभते।
सुरैः पीतावशेषस्य शरच्छिमरुचेरिव॥ ८८।

---

[102] व्ययः कार्यस्त्रिवर्गं [102a] प्रतिपत्तये

87. The king should always, strive for augmenting his treasury (financial resources) by placing his trusted and experienced officials in charge of it. He will then be in a position to spend (money) in the pursuit of *trivarga.*

88. If the king becomes weak (in financial resources *kṣīṇakośa*) by spending for religious purposes, still he will continue to enjoy love and respect of the people like the autumnal moon, the digits of which are drunk off by the gods.

नृपतेः कोशविषयकमनुष्ठानमाह—संवर्द्धयेत्यादि। आप्तैः विश्वास्यै, तज्ज्ञैः कोशवृद्ध्युपायज्ञैः अधिष्ठितं परिचालितम्, कोशं सदा संवर्द्धयेत्। काले च कालविशेषे, युद्धधर्मादौ व्ययावसरे त्रिवर्ग-परिवृद्धये त्रिवर्ग प्रतिपत्तये धर्मार्थकाम प्राप्तय व्ययं कुर्यात्॥ ८७॥

धर्मार्थव्ययप्रशंसामाह—धर्मार्थमिति। धर्मेण धर्मार्थं क्षीणकोशस्य निर्धनस्य राज्ञः कृशत्वमपि शोभते। यथा सुरैः देवैः पीतावशेषस्य शरच्छिमरुचेश्चन्द्रमस इव कृशत्वं यथा शोभते तथा नृपस्यापि॥ ८८॥

बृहस्पतेरविश्वास इति शास्त्रार्थनिश्चयः।
[103]अविश्वासी तथा च स्याद् यथा च व्यवहारवान् ॥ ८९ ।
[104]विश्वासयेद् विश्वस्तान् विश्वस्तान् [104a] नातिविश्वसेत् ।
यस्मिन् विश्वासमायाति विभूतेः पात्रमेव सः ॥ ९० ।

---

[103] विश्वासी च तथा च स्याद् यथा संव्यवहारवान्

[104] विश्वासयेदविश्वस्तं, न विश्वसेदविश्वस्तं [104a] विश्वस्तं ; विश्वस्ते

89. 'Suspicion' is the motto (for the king), it is laid down by Bṛhaspati (the preceptor of the Gods), in his science of polity. Still confidence may have to be placed on well-behaved (efficient) officers (lest too much suspicion takes away their initiative).

90. The king should instil confidence in the mind of the officer lacking in self-confidence (i.e., hesitating to take initiative in any matter), but should not place too much trust on him who already enjoys his confidence. One who is trusted by the king earns prosperity.

संक्षिप्तमर्थशास्त्रोपदेशमभिधातुमाह—बृहस्पतेरिति । बृहस्पतेः, शास्त्रस्य निर्णयः क इत्याह । अविश्वासः इति, कस्यचिदाप्ततरस्यापि न विश्वसेत्, चित्तानित्यत्वात् । तथा च कौटिल्यः—"चित्तानित्यत्वात् मनुष्याणाम् । अश्वसधर्माणः हि मनुष्याः कर्मसु नियुक्ताः विकुर्वते" इति । ततश्चाविश्वास इति बृहस्पतिमतम् । अविश्वासधर्मिणां हि मनुष्याणां सर्वथा संव्यवहाराभावः प्राप्नोति । यथा संव्यवहारवान् भवति । अविश्वासश्च तथा कर्तव्य इति भावः ॥ ८९ ॥

विश्वासयेदिति । दण्डोपनयनात् भीतान् अविश्वस्तान् अध्यक्षान् विश्वासयेत् । स्वयं च विश्वस्तान्, अपि नातिविश्वसेत् । लेशतो विश्वसेदिति । यस्मिन् अध्यक्षे स्वामी विश्वासमायाति विभूतेः पात्रमेव सः, इत्यनुजीविनामयमुपदेशः । यथा स्वामी विश्वासमेति तथा विधेयमिति ॥ ९० ।

प्रादुर्भवन्त्यर्थसमं यस्माच्चित्तान्यनुक्षणम् ।
तस्मात् योगीव सततं तानि पश्येत् समाहितः ॥ ९१ ।

91. Achievement of success or otherwise in any undertaking affects the mind of an officer (i.e., he may be elated with joy or depressed). Hence he should always attentively watch his mental reactions with the detachment of a *yogī* (an ascetic).

अविश्वासी संव्यवहारार्थश्च भवति तदुपदेष्टुमाह—प्रादुर्भवन्तीति । प्रादुर्भवन्त्युत्पद्यन्ते । अर्थसमं समर्थैः कार्यैः सहैव चित्तान्यन्यथान्यथा भवन्ति । यदि कार्यं मित्रत्वादिकमुत्पद्यते तदा चित्तमपि स्निग्धं स्यात् । यदि शात्रवादिकं कार्यमुत्पद्यते तदा चित्तमपि शत्रुभावि भवति । कार्यं मित्रारिकारकमित्यनुक्षणं प्रतिमुहूर्तं तस्माद् योगीव समाहित एकाग्रमनास्तानि पश्येत् प्रतीकारार्थम् । एवं अविश्वासश्च संव्यवहारश्च प्रवर्तेत इति ॥ ९१ ॥

उद्योगादनिवृत्तस्य सुसहायस्य धीमतः ।
छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥ ६१ क ॥ *

91A. A ruler who never lacks initiative in taking proper actions (i.e., ever-energetic) and who is always attended by intelligent and reliable counsellors, invariably attains prosperity (*Srī*) that always keeps close to him like his own shadow (*chāyeva .... sahacāriṇī*).

सुसमाहितत्वमेव प्रवर्तयन्नाह—उद्योगादिति । उद्योगाद् व्यवसायादनिवृत्तस्य सन्ततोद्योगिनः, सुसहायस्य धीमतः, इति प्रतीतम् । ये च स्वकीयच्छायेवानुगताः तेषान् नित्यं श्रीः सहचारिणी, अविच्छिन्नेति ॥ ६१ क ॥

* The *śloka* is marked *kroḍa* in the *Tīkā.*

[105]अनुगत परितोषितानुजीवी
मधुरवच[106]श्चरितानुरक्तलोकः ।
सुनिपुणपरमाप्तसक्ततन्त्रो[106a]
भवति नृपः सुचिरं[107] प्रदीप्तरश्मिः ॥ ६२ ।

[105] स्वनुगत [106] मधुरवचा
[106a] शक्यतन्त्रो [107] भवति चिरं नृपति

इति स्वाम्यनुजीविवृत्तं नामाष्टमं प्रकरणम् ।

इति कामन्दकीये नीतिसारे स्वाम्यनुजीविवृत्तं नाम पञ्चमः सर्गः ॥

92. The king, whose dependents are obedient and satisfied, whose subjects are (loyally) attached to him for his sweet speech and ideal character and whose government is in the hands of trusted officials, who are expert and capable of running the administration, shines in full glory for ever like the sun (*pradīptaraśmiḥ*).

उपसंहरन्नाह—अनुगतेति । अनुगत परितोषितानुजीवी अनुगता विधेयतराः परितोषिता दानमानादिभिरनुजीविनो येन सः । मधुरवचोभिश्चरितैश्चानुरक्तो लोको यस्मिन् सः । सुनिपुण परमाप्तसक्ततन्त्रः, सुनिपुणं यथा भवति तथा, परमाप्तेषु सक्तस्तन्त्रो (शक्यं तन्त्रं मण्डलं) राज्यभारो येन नृपतिना सः । सुचिरं प्रदीप्तरश्मिस्तेजस्वी । यथा सुदीप्तरश्मिरादित्यः सदा ध्वान्तनाशाय भवति तथा नृपतिरपीति ॥ ६२ ॥

इति कामन्दकीय नीतिसार टीकायामुपाध्यायनिरपेक्षानुसारिण्यां स्वाम्यनुजीविवृत्तं नाम पञ्चमः सर्गः ॥

षष्ठ सर्गः

९। कण्टकशोधनप्रकरणम्।

लोके वेदे च कुशलः कुशलैः परिवारितः।
आदृतश्चिन्तयेद् राज्यं सबाह्याभ्यन्तरं तथा[1] ॥ १ ।

---

[1] नृपः

Sarge—VI

Prakaraṇa 9.

Kaṇṭakaśodhana (Removal of thorns)

1. The king, well acquainted with the laws and customs of the people and well versed in the injunctions of the Vedas, should apply himself to the governance of the kingdom in all its complements (internal and external) with the assistance of experts (well qualified officers).

प्रकृतिसम्पत्करणे स्वामि-प्रकृत्याभिगामिकात्मसम्पत्तिगुण सम्पादनेनात्मा लब्धः। अमात्यादि प्रकृतीनां च स्व स्व गुणसम्पादनेनात्मलाभः सम्पन्नः। एवं सप्ताङ्गराज्यस्यात्मलाभे सम्पन्ने, तत् पालन-स्यावश्यं वक्तव्यत्वात् तदिहाभिधातुमाह—लोके इति। लोके लोकव्यवहारे; लोकव्यवहारश्च देश-भेदे कालभेदे च स्वतन्त्रः स्वतन्त्रः भवति—यथा मध्यदेशे एको धर्मः, पारसीकादिषु चान्यः, तथा कृत-युगेऽन्यः, त्रेतादियुगेषु चान्यः इति लोकव्यवहारे कुशलः। वेदे शास्त्रे च कुशलः। लोकव्यवहारं वेदोक्तञ्च निरीक्ष्य उभयाविरुद्धं व्यवहरेदिति भावः। तथा लोके वेदे च कुशलैः निपुणैः, अनुजीविभिः परिवारितः सहमिलितः इति। आदृतः आदरपरः, नृपः विजीगिषुः, सबाह्याभ्यन्तरं विभागेनावस्थितं राज्यं चिन्तयेत्, पालनार्थं चिन्तां कुर्यात्॥ १ ॥

आभ्यन्तरं शरीरं स्वं बाह्यं राष्ट्रमुदाहृतम्।
अन्योन्याधार सम्बन्धादेकमेवेदमिष्यते[2] ॥ २ ।

---

[2] मिष्यस्ते

2. Protection of his own self is the internal aspect of administration and that of his dominion (*rāṣṭra*) is the external aspect. In consideration of the mutual relationship subsisting between them (the internal and external aspects), they should be treated as identical (for no state can function without the motor energy of the king).

राज्यस्य बाह्याभ्यन्तरविभागं दर्शयन्नाह—आभ्यन्तरमिति। आभ्यन्तरं राज्यं विजीगिषोः स्वं शरीरमेव। तथा च कौटिल्यः—"राजा राज्यमिति प्रकृतिसंक्षेपः" (८।२।१) इति। बाह्य राज्यं राष्ट्रमेव उदाहृतम्। शेषाः प्रकृतयो राष्ट्रादेवोत्पद्यन्त इति। अन्योन्याधार सम्बन्धादिति राज्ञा विना न राष्ट्रं, राष्ट्रेण विना राजा न वर्तते इत्यर्थः। तस्मादेकमेवेदमिष्यते इति ॥ २ ॥

राज्याङ्गानान्तु सर्वेषां राष्ट्राद् भवति सम्भवः ।
तस्मात् सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत्[3] ॥ ३ ।

[3] समुन्नयेत्

3. A state is composed of its constituent elements like limbs in a body (*aṅgāni*). Hence the king should strive with all his efforts for the development of the state as a whole.

एतदेव दर्शयन्नाह—राज्याङ्गेति । राज्याङ्गानान्तु सर्वेषां अमात्यादीनां राष्ट्राद्भवति सम्भवः । राष्ट्रात्कोशः, कोशाच्चतुरङ्गो दण्डः, राष्ट्रस्य भूम्येकान्तरं मित्रं, राष्ट्र एव स्थानीयं दुर्गं, राष्ट्रादेव जानपदादयोऽमात्याः । तस्मात् सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत, लाभं पालनं च कुर्यादित्यर्थः ॥३ ॥

[4]लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत् ।
राज्ञः संशरणं धाम[4a] शरीरं धर्मसाधनम् ॥ ४ ।

[4] तस्यात्तु [4a] राज्ञः संरक्षणं धर्मः

4. The king should protect himself only for the purpose of earning the good will of his subjects. Protection of the subjects is the greatest duty (*dharmaḥ*) of the king and to fulfil that end he should look after his own body as a part of his duty (*dharmasādhanam*).

राज्ञः स्वशरीरपालनमपि धर्माय भवतीति दर्शयन्नाह—लोकानुग्रहमिति । पूर्वार्द्धस्यार्थः सुगमः । राज्ञः संरक्षणं प्रजासंरक्षणमेव धर्मः नान्यः । तथा च कौटिल्यः—"राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम् । दक्षिणा वृत्तिसाम्यं तु दीक्षा तस्याभिषेचनम् ॥" (१।१९।३३) । एवंभूतस्य धर्मस्य शरीरमेव साधनमिति शरीरं धर्मसाधनं धर्मार्थिना विजिगीषुणा स्वशरीरमेव यत्नेन रक्षणीयमित्यर्थः ॥ ४ ॥

धर्म्यामारेभिरे हिंसामृषिकल्पा महीभुजः ।
तस्मादसाधुन् पापिष्ठान् निघ्नन्[5] पापेन[6] लिप्यते ॥ ५ ।

[5] धर्माय हिंसन् [6] दोषेन

5. In performing his duties the king may have to adopt violent measures (i.e., inflict punishments, including capital punishment), to deal with dishonest and impious people dispassionately like the sages (who sacrifice animals for religious purposes). For that, no blame would lie with the king.

प्रजारक्षणे चौरादिहिंसा हिंसा न भवतीति दर्शयन्नाह—धर्म्यामिति । धर्म्यां धर्मादनपेतां, हिंसां पापिनां हननं, आरेभिरे आरब्धवन्तः, ऋषिकल्पाः ऋषिसमा ऋषितुल्याः एव महीभुजः राजानः । यथा महर्षयो यज्ञेषु पश्वालम्भनरूपां धर्म्यां कुर्वन्ति तथा राजर्षयोऽपि चौरादिनिग्रहरूपां धर्म्यामेव हिंसां कुर्वन्ति । तस्मादसाधुंश्चौर पारदारिकादीन्, अन्यानपि पापिष्ठान् स्वामिद्रोहकरादीन् हिंसन् दोषेन लिप्यत इत्यर्थः ॥ ५ ॥

धर्मसंरक्षणपरो धर्मेणार्थं विवर्द्धयन्[6] ।
ये ये प्रजा प्रबाधेरन् स्तांश्छिन्द्याच्च[7] महीपतिः ॥ ६ ।

[6] धर्मायार्थं विवर्द्धयेत्

[7] विरोद्धार स्तांस्तान् ; तांस्तान् हन्यान्

6. The king is to administer his state with equity and justice and increase his treasury by lawful means. But he should deal sternly (by awarding capital punishment even) with persons obstructing the course of law.

धर्मेति । वर्णानामाश्रमाणां च स्वधर्मसंरक्षणपरो धर्मसङ्करनिषेधात् । धर्मेणार्थं धर्मायार्थं विवर्द्धयेत, अर्थस्यार्जनं वर्द्धनं च धर्माभिसन्धिनैव । ये ये प्रजाविरोद्धारस्तांस्तान् हन्यात्, महीपतिः । एवं हिंसा दोषाय न भवतीत्यर्थः ॥ ६ ॥

यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ति(न्ते) तमधर्मं[8] प्रचक्षते ॥ ७ ।

[8] न तं धर्मं

7. The action which is commended by those well versed in the legal [illegible]) is justice (*dharma*), and the contrary to it (repugnant [illegible]) is injustice (*adharma*).

धर्मस्वरूपमभिधातुमाह—यमार्याः इति । यमार्याः साधव आगमवेदिन आगमज्ञाः शंसन्ति विधिनिषेधरूपमनुष्ठानं स धर्मः । एवं च देशकालजातिभेदेषु विरुद्धं यं धर्मं विगर्हन्ति तमधर्मं प्रचक्षत इति ॥ ७ ॥

धर्माधर्मौ विजानन् हि शासनेऽभिरतः सताम् ।
प्रजां रक्षेन् नृपः साधु हन्याच्च परिपन्थिनः ॥ ८ ।

8. Being conversant with what is just and what is unjust and following the recommendations of the wise in governing the state, the king should protect the honest and law-abiding subjects and destroy the law-breakers.

धर्माधर्माविति । धर्माधर्मौ देशकालानुलोमप्रतिलोमतः प्रणिहितावधारयन् । हि स्फुटम् । शासने उपदेशे, आभिमुख्येन रतः । सतामाचार्याणाम् । प्रजाः साधु यथा भवति तथा रक्षेत्, उपद्रव्येभ्यः । हन्याच्च परिपन्थिनः प्रजोपद्रवकारानिति ॥ ८ ॥

राज्योपघातं कुर्वाणा[9] ये पापा राजवल्लभाः ।
एकैकशः संहता वा दूष्यांस्तान्[10] परिचक्षते ॥ ९ ।

[9] कुर्वीरन् [10] तान् दूष्यान्

9. Dishonest (sinful) officers, who once enjoyed royal favour, creating disturbances (by agitation and other methods) in the state unilaterally or collectively, are treated as criminals.

दूष्यलक्षणमभिधातुमाह—राज्योपघातमिति। स्पष्टं। परिचक्षते पूर्वाचार्या इति शेषः ॥ ९ ॥

दूष्यानुपांशुदण्डेन हन्याद् राजाऽविलम्बितम्।
अदृश्यं वा[11] प्रकाशं वा लोकविद्वेषमागतान् ॥ १० ।

[11] प्रदूष्य वा प्रकाशं हि

10. Such criminals should be done away with promptly (without any delay) by the king either secretly (by application of *upāṅgśudaṇḍa*) or openly after implicating them with culpable charges and inciting the public against them.

दूष्येषु कर्तव्यमभिधातुमाह—दूष्यानिति। उपांशुदण्डेन गुप्तविषदानयोगकृतेन प्रच्छन्नवधरूपेण। अदृश्यं वा प्रकाशं हि, प्रदूष्योपायै(प्रकृष्टोपायै)र्दोषयुक्तान् कृत्वा लोकविद्वेषमागतान् ॥ १० ॥

राजा रहसि दूष्यं हि दर्शनायोपमन्त्रयेत्।
गूढशस्त्रा विशेयुस्तत् पश्चादासञ्जिता[12] नराः ॥ ११ ।
विश्वस्तांस्तान्[13] विचिन्वीयुर्द्वाःस्थाः कक्षान्तरं गतान्[14] ।
ते शस्त्रग्राहका[15]ब्रूयुः प्रयुक्ताः स्म इति स्फुटम् ॥ १२ ।
इति दूष्यांस्तु[16] सन्दूष्य प्रजानामभिवृद्धये ।
विनयन् प्रिय उत्कर्ष[17] राजशल्यं समुद्धरेत् ॥ १३ ।

[12] पश्चादासञ्जिता [13] विश्वस्ता हि ; विशतस्तान् वि
[14] कक्ष्यान्तरागतान् [15] शस्त्रग्राहिणो
[16] इत्यादि दूष्यान् [17] विनयच्छ्रियमुत्कर्षं राजा शल्यं ; निणीषुः श्रिय ; निणीषुः पदम्

11-13. (In describing the method of secret killing it is stated thus). The king would summon the alleged criminal to a secret meeting in the inner chamber where special agents armed with hidden weapons would follow him. When charged by the doorkeepers during their entry into the chamber those armed agents (trusted by the king) would declare to have been appointed by the alleged criminal to slay the king. In this way by imputing criminal motive the undesirable person would be secretly done away with for the purpose of securing prosperity of the subjects. The king should act like a surgeon (in removing the thorns by the side of the state or *kaṇṭakaśodhana*) so that the people may be disciplined and prosperous.

अपरञ्च, राजेति। रहसि एकान्ते मध्यमकक्षायाम् इत्यर्थः। दूष्यन् (दुष्टं) उपलक्षणं दर्शनायोप-

मन्त्रयेत् समाह्वयेत्। गूढशस्त्राः प्रच्छादितशस्त्रकाः, तत्पश्चात् तेषां पश्चात, आसंज्ञिता (आसज्जिता), प्रागेव राज्ञा तैर्दूष्यैः संहतिं नीताः प्रतीयत्वेन स्थापितास्ताननुप्रविशेयुरिति ॥ ११ ॥

किञ्च, विशत इति। द्वाःस्थाः प्रतिहाराः रक्षिणः, शस्त्रग्राहकाः कक्षान्तर गतान् (कक्षान्तरागतान मध्यमकक्षान्तरप्राप्तान्)। स विशतस्तान, विचिन्तीयुः शोधयेयुः। ते च शस्त्रग्राहकाः पृष्टाः सन्तः, सङ्केताद् ब्रूयुः प्रयुक्ताः स्मः स्वामिवधाय दुष्टैः, इति स्फुटम ब्रूयु ॥ १२ ॥

इतीति। इत्येवमादिकैः प्रयोगैः। दूष्यान् स्वामिद्रोह-सम्पन्नान् सन्दूष्य हत्वा प्रजावृद्धये न द्वेषात्, निनीषुर्नेतुमिच्छुः पदं राज्यं महदुत्कर्षमभिवृद्धिं राजा शल्यं दूष्यादिकं समुद्धरेत् छेदयेत् ॥ १६ ॥

यथा बीजाङ्कुरः सूक्ष्मः परिपुष्टोऽभिरक्षितः।
काले फलाय भवति साधु तद्वदियं प्रजा ॥ १४।

---

14. Just as delicate and sprouting grain seeds well-protected and nourished yield harvest in due time so also do the subjects.

प्रजावृद्धिः फलाय भवतीति दर्शयन्नाह—यथेति। सम्यक् बीजाङ्कुरः सूक्ष्मो यथाभिरक्षितः। निष्पत्तिकाले फलाय भवति साधु, तद्वदियं प्रजा (दुष्टदण्डात्) साधुरक्षिता काले फलाय भवतीति ॥ १४ ॥

उद्वेजयति तीक्ष्णेन मृदुना परिभूयते।
तस्माद् यथार्हतो दण्डं नयेत् पक्षमनाश्रितः ॥ १५ ।

इति कामन्दकीये नीतिसारे कण्टकशोधनं नाम षष्ठः सर्गः ॥

15. Severity of punishments terrifies the people (and the king becomes repulsive tc them), and leniency makes him contemptible. Hence punishment should be meted out impartially and proportionate to the seriousness of the offence (*yathārhato*).

दुष्टदमनात् प्रजारक्षणं भवतीत्युक्तं तच्च शास्त्रोक्तं श्रेय इति दर्शयन्नाह—उद्वेजयतीति। तीक्ष्णेन न्यायादधिकेन दण्डेन, उद्वेजयति प्रजा इति शेषः। मृदुना चानुकम्पया प्रमाणहीनेन परिभूयते भयाभावात्। तस्मात् तेन कारणेन, यथार्हतः यो यद्दण्डयोग्यस्तदनुसारेण, पक्षमनाश्रितः पक्षपातमनाश्रितः अपक्षपाती सन्, दण्डं नयेत् तथा च कौटिल्यः—"तीक्ष्णदण्डो भूतानामुद्वेजनीयो भवति। मृदुदण्डः परिभूयते। यथार्हदण्डः···प्रजा अर्थकामैर्योजयति। कुप्रणीतः (दुष्प्रणीतः) कामक्रोधाभ्यामज्ञानाद्वा वानप्रस्थपरिव्राजकानपि कोपयति। किमङ्ग पुनर्गृहस्थानिति" (१।४।८-१२) ॥ १५ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां कण्टकशोधनं नाम षष्ठः सर्गः ॥

सप्तमः सर्गः

१०। राजपुत्ररक्षण प्रकरणम् ।

प्रजात्मश्रेयसे राजा कुर्वीतात्मजरक्षणम् ।
लोलुभ्यमानास्तेऽर्थेषु हन्युरेनमरक्षिताः ॥ १ ।

Sarga—VII

Prakaraṇa 10.

Rājputra rakṣaṇaṁ (Protection of princes).

1. In the best interest of the subjects as well as for himself the king should take steps for proper protection of his sons (against going astray), as otherwise yielding to temptations of wealth, they may conspire to kill the sire.

कण्टकशोधनशेषमेवात्मजरक्षणमभिधातुं, अरक्षिताः पुत्राः कण्टकीभवन्ति पितुः प्रजानाञ्चेति दर्शयन्नाह—प्रजात्मश्रेयसे इति। प्रजात्मश्रेयसे प्रजानां आत्मनश्च श्रेयसे रक्षार्थं मङ्गलाय, राजा विजिगीषुः, आत्मजानां पुत्राणां रक्षणं कुर्वीत। कुतस्तद् रक्षणमिति लोलुभ्यमाना लोभं गच्छन्तः, ते पुत्राः, अर्थेषु तदर्थं हन्युरेनं विजिगिषुमरक्षिता इति ॥ १ ॥

राजपुत्रा मदोन्मत्ता गजा इव निरङ्कुशाः ।
भ्रातरं वा विनिघ्नन्ति[1] पितरं वाभिमानिनः[2] ॥ २ ।
राजपुत्रै र्मदोपेतैः[3] प्रार्थ्यमानमितस्ततः ।
दुःखेन रक्ष्यते राज्यं व्याघ्राघ्रातमिवामिषम् ॥ ३ ।

[1] वापि निघ्नन्ति [2] वापमानिताः

[3] र्मदोन्मत्तैः

2. Princes, intoxicated with pride and uncontrolled like the rutting elephants, with no drivers to apply the goad, may kill the brother (the heir-apparent) or the royal father, under the influence of conceit (that he is rightfully entitled to the throne).

3. If the prince intoxicated by pride aspires for acquiring the throne through all possible efforts, the king finds himself in a difficult position in protecting the kingdom as if from the attack of a tiger who has tasted (human) flesh.

किञ्च, राजपुत्रा इति। यौवनादिमदोन्मत्ता गजा इव निरङ्कुशाः, भ्रातरं राज्ययोग्यं निघ्नन्ति तरं राजानं वा, अभिमानिनः अहमेव राज्यार्ह इत्यभिमानसम्भावनया युक्ता इति ॥ २ ॥

राजपुत्रैरिति। मदोन्मत्तः अभिहितमदात्[1] जातोन्मादैः, प्रार्थ्यमानं अभिलष्यमाणं इतस्ततः सर्वतः, अभियोगात् दुःखेन क्लेशेन रक्ष्यते राज्यं व्याघ्राघातमामिषमिव ॥ ३ ॥

[1] अभिहित वृत्ताजातो

रक्ष्यमाणा यदि च्छिद्रं कथञ्चित् प्राप्नुवन्ति ते।
सिंहशावा इव घ्नन्ति रक्षितारमसंशयम् ॥ ४ ।
विनयोपग्रहान् भृत्यैः[4] कुर्वीत नृपति सुतान्।
अविनीत कुमारं हि कुलमाशु विनश्यति[5] ॥ ५ ।

[4] भृत्यै [5] विशीर्यते

4. Even under the protective control (of the king) princes taking advantage of the slightest lapse (on the part of the king) invariably kill the sire like the lion cubs mauling the keeper unawares.

5. The king should arrange for inculcating proper discipline in his sons through trusted officials. Otherwise princes, if unrestrained, soon become instrumental in bringing about the ruin of the royal family.

अपरञ्च, रक्ष्यमाणा इति। सिंहशावा इव घ्नन्ति विनाशयन्ति रक्षितारं पितरमसंशयम् ॥ ४ ॥

राजपुत्राणां रक्षाप्रकारं सुश्लिष्टमभिधातुमाह—विनयोपग्रहानिति। विनयो द्विविधः कृतकः सहजश्च। विद्यावृद्धसंयोगजनितः कृतकः, जन्मान्तरवासनावशाजातः सहजः स्वाभाविकः। द्विविधविनये उपग्रहो बन्धनं येषां ते तान् विनयोपग्रहान् भृत्यैः कुर्वीत नृपतिः सुतान्। तथा च कौटिल्यः "काष्ठमिव घुनजग्धं राजकुलमविनीतपुत्रमभियुक्तमात्रं भज्येत..."(१।१७।२३)। एवंविधेन विनयोपग्रहेण रक्षेदिति भावः। कुर्वीत नृपतिः सुतान्। अविनीतकुमारं राजकुलं आशु विशीर्यत इति ॥ ५ ॥

विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत्।
दुष्टं गजमिवोद्वृत्तं कुर्वीत सुखबन्धनम् ॥ ६ ।
राजपुत्रः सुदुर्वृत्तः परित्यागं हि[6] नार्हति।
क्लिश्यमानः[7] स पितरं परानाश्रित्य हन्ति हि ॥ ७ ।

[6] परित्यागं सुदुवृत्तोऽपि [7] क्लिश्यमानः परित्यक्तः परमाश्रित्य हन्ति तम्।

6. A prince throughly trained and disciplined, should be consecrated as the crown prince (heir-apparent to the throne), and the wicked and immoral prince should like the (rutting elephant) be chained to sensual pleasures (so that, thus engrossed he may not be able to rise against the royal father).

7. A prince, however vicious in habit, should by no means be disowned, lest in distress he may seek refuge with an enemy and (with the latter's help) may inflict death on the father.

विनीतपुत्रस्य यौवराज्याभिषेचनमभिधातुमाह—विनीतमिति। विनीतमिति द्विविधविनययुक्तं, औरसं न क्षेत्रजं पुत्रम्। यौवराज्येऽभिषेचयेत्। उद्वृत्तं तु दुःशीलम्। दुष्टं गजमिव कुर्वीत सुखबन्धनम्। तथा च कौटिल्यः—"ग्राम्यसुखोपरुद्धा हि राजपुत्राः पितरं नाभिद्रुह्यन्तीति" (१।१७।२१)। एवंविधं सुखबन्धनं कुर्वीतेति ॥ ६ ॥

दुर्वृत्तस्यापि राजपुत्रस्यापरित्यागमाह—राजपुत्र इति। सुदुर्वृत्तोऽपि परित्यागं राजपुत्रो नार्हति त्याज्यो न भवतीति ॥ ७ ॥

व्यसने सज्जमानं हि क्लेशयेद्व्यसनाश्रयैः।
तथा च [8]क्लेशयेदेनं यथा स्यात् पितृगोचरः॥ ८।

---

[8] तथा सक्लेश

8. Princes addicted to passions should be made to suffer from the evil consequences of such passions (through spies disguised as companions inciting the princes to the enjoyment of nerve-racking sensual pleasures), so that, thus shattered (in body and mind) they may come back to the ways of the forefathers (the traditional ways of life).

उक्तप्रकारस्य राजपुत्रस्यापरित्यक्तस्य शासनप्रकारमभिधातुमाह—व्यसन इति। पितृगोचर इति पितृवश्यः। तथा च कौटिल्यः "परस्त्रीषु मनः कुर्वाणमार्यव्यञ्जनाभिः स्त्रीभिरमेध्याभिः शून्यागारेषु रात्रावुद्वेजयेयुः। मद्यकामं योगपानेन, द्यूतकामं कापटिकैः पुरुषैरिति।" (१।१७।३५-३७) ॥ ८ ॥

इति राजपुत्ररक्षणं नाम दशमं प्रकरणम्।

११। आत्मरक्षित प्रकरणम्।

याने[9] शय्यासने पाने भोज्ये[9a] वस्त्रे विभूषणे।
सर्वत्रैवाप्रमत्तः स्याद्वर्जेत[10] विषदूषितम् ॥ ९।
विषघ्नैरुदकैः स्नातो विषघ्नमणिभूषितः[11]।
परीक्षितं समश्नीयाज्जाङ्गुला[12]विद्भिषग्वृतः ॥ १०।

---

[9] पाने [9a] भोज्ये पाने [10] सन् बुध्येत; स्यादुज्झेत

[11] मणिभूषणः [12] जाङ्गली

Prakaraṇa 11.

Ātmarakṣita (Self protection)

9. A king should be very careful with regard to his carriages (vehicles), beds, seats, food and drinks, dresses and ornaments and in all other things, and ascertain if those are poisoned.

10. He should take his bath in water purified by antidotes of poison, use gems and jewels capable of neutralising poison and eat thoroughly examined food in the presence of toxicologists and physicians.

राजपुत्ररक्षणमभिधाय राजात्मरक्षणं तावदाह। याने इति। याने शिबिकादौ, शय्यासने पर्यङ्कादिके सिंहासने विष्टरकादौ, पाने पानीयादौ, भोज्ये आहारादौ, वस्त्रे वसनोत्तरीयादौ, विभूषणे अलङ्करणादौ, सर्वत्रैव आर्यस्त्री[2]सङ्गादौ, अप्रमत्तः सावधानः स्यात्, न विश्वसेदित्यर्थः। तथा, उज्जृम्भेत वक्ष्यमानलक्षणैः विषदूषितं, तं ज्ञात्वा परिहरेदित्यर्थः ॥ ९ ॥

[2] वाह्यस्त्री

विषप्रतीकारार्थमाह—विषघ्नै रिति। विषघ्नै रुदकैः, तथा च कौटिल्यः-श्वेतपुष्करपुष्पकृन्तादिभी-रक्षितैर्जलैः, स्नातः, एवं विधजलैः स्नातस्य स्थाने गुप्तानि सर्वविषाणि न प्रसरन्तीति। तथा विषघ्नमणि-भूषितः गरुडोद्गारमणिनाऽलंकृतः। तथाचोक्तं "रचितो गरुडोद्गारमणिर्यस्य विभूषणम्। स्थावरं जङ्गमं तस्य विषं निर्विषतां व्रजेत्॥ इति"। परीक्षितं वक्ष्यमानप्रकारेण, समश्नीयात् राजा जाङ्गुलीविद् भिषग्वृतः इति, महानुभाववृद्ध सिद्धान्ताद्युक्तविषविद्याविशारद विषवैद्यगणैः परिवृतो राजा भोजनं कुर्यादित्यर्थः ॥ १० ॥

भृङ्गराजः शुकश्चैव शारिका चेति पक्षिणः।
क्रोशन्ति भृशमुद्विग्ना विषपन्नगदर्शनात् ॥ ११ ।
चकोरस्य विरज्येते नयने विषदर्शनात्।
सुव्यक्तं माद्यति क्रौञ्चो म्रियते कोकिलः किल[13] ॥ १२ ।
नित्यं जीवस्य[14] च ग्लानिर्जायते विषदर्शनात्।
[15]एषामन्यतमेनापि समश्नीयात् परीक्षितम् ॥ १३ ॥

---

[13] म्रियते मत्त कोकिलः [14] जीवञ्जीवस्य च [15] तेषाम

11-12. The *Bhṛṅgarāja, Śuka* and *Sārikā* birds shriek out terrified at the sight of snake venom and the natural red hue of the eyes of the *Cakora* bird (partridge) fades away sighting poison, the *Krauñca* (heron) becomes excited and the youthful cuckoo (*matta Kokila*) dies.

13. The pheasant also languishes at the sight of poison. Hence the king should take his food only after the same is examined by one of these creatures.

विषदूषितान्नपरीक्षामभिधातुमाह—भृङ्गराज इति। भृङ्गराजः कृष्णपक्षी गोपुच्छक इति प्रतीतः। शुकः सारिका चेति पक्षिणः प्रतीताः। क्रोशन्ति भृशमुद्विग्ना विषपन्नगदर्शनात् इति प्रतीतम् ॥ ११ ॥

किञ्च, चकोरस्येति। चकोरस्य लोहिताक्ष पक्षिविशेषस्य, तस्य नयने विरज्येते रागरहिते भवत इत्यर्थः। क्रौञ्चः लोहितमस्तक पक्षिविशेषः, सुव्यक्तं यथा तथा, माद्यति सुरया इव। कोकिलः मत्तो भूत्वा म्रियते प्राणान् परित्यजतीति ॥ १२ ॥

अपरञ्च, नित्यमिति। एषामन्यतमेनापि परीक्षितं विषदोषरहितं समश्नीयात, नान्यथेति ॥ १३ ॥

मयूरपृषतोत्सर्गे[16] न भवन्ति भुजङ्गमाः ।
तस्मान्मयूरपृषतौ भवने नित्यमुत्सृजेत् ॥ १४ ।

[16] पृषतोत्सर्गान् न

14. Snakes do not live where the peacock and (one-horned) deer cast their droppings. Hence they (peacocks and deer) should be allowed to cast their droppings freely inside the palace (i.e., by moving about freely).

अन्यच्च, मयूरेति । मयूरपृषतोत्सर्गे, मयूरः प्रसिद्धः, पृषतः श्वेतबिन्दुश्चित्र एकशृङ्गो मृगः, भवने तयोरुत्सर्गे विमोक्षे, न भवन्ति भुजङ्गमाः । तथा च कौटिल्यः—"मयूरपृषतोत्सर्गः सर्पाञ्नाशयति(भक्षयति)" (१।२०।६) । तस्मान् मयूरपृषतौ भवने नित्यमुत्सृजेत् । इति प्रतीतम् ॥ १४ ॥

भोज्यमन्नं परीक्षार्थं प्रदद्यात् पूर्वमग्नये ।
वयोभ्यश्च ततो दद्यात् तत्रो लिङ्गानि लक्षयेत् ॥ १५ ।
धूमार्चिर्नीलता वह्नेः शब्दस्फोटश्च जायते ।
अन्नेन विषदिग्धेन वयसां मरणं भवेत्[17] ॥ १६ ।
अखिन्नता[18] मादकत्वमाशु शैत्यं विवर्णता ।
अन्नस्य विषदिग्धस्य तथोष्मा स्निग्धमेचकः[19] ॥ १७ ।

[17] ध्रुवम् [18] अक्लिन्नता मोदकत्वमाशु शैत्यं
[19] तथा स्निग्धत्वमेव च

15. When rice is served, the king, in order to examine it (that it is free from poison), should at first throw a little to the fire (as if a part of ritual) and a little to the birds and observe reactions.

16. Rice grains, if poisoned, thrown into fire emit smoke and flame of blue colour and crackle and birds die eating the same.

17. Poisoned rice, if not fully boiled (not rendered soft by boiling), is rapidly cooled off, loses its natural colour and emits vapour of light bluish tint.

भोज्यमिति । भोज्यं भोजनार्हमन्नं परीक्षार्थं प्रदद्यात् पूर्वमग्नये । वयोभ्यश्च ततो दद्यात्तत्र लिङ्गानि लक्षयेदिति प्रतीतम् ॥ १५ ॥

विषदिग्धान्नप्रदानेनाग्नेः पक्षिणाञ्च स्वरूपवैलक्षण्यमभिधातुमाह—धूमेति । वह्नेः धूमार्चिर्नीलता धूमस्यार्चिषां च नीलता, शब्दस्फोटश्च शब्दोपलक्षितं च स्फुटं (स्फुटनं) जायते । तथान्नेन विषदिग्धेन वयसां मरणं ध्रुवं तथेति प्रतीतम् ॥ १६ ॥

विषदिग्धान्नस्वरूपमाह—अखिन्नेति । अखिन्नता, तीव्रेण वह्निनापि खिन्नता न भवतीति । मादकत्वं मदजनकता, आशु शैत्यं सत्वरमुष्णतापगमः । विवर्णता श्यामता, अन्नस्य शाल्यादेर्विषदिग्धस्य, उष्मा बाष्पः, स्निग्धमेचकः नीलोज्ज्वल इति ॥ १७ ॥

व्यञ्जनस्याशु[20] शुष्कत्वं क्वथने[21] श्यामफेनता ।
गन्धस्पर्शरसाश्चैव नश्यन्ति विषदूषणात् ॥ १८ ।
छायाऽतिरिक्ता हीना वा स्याद्रसे[22] विषदूषिते ।
दृश्यते राजिरूर्ध्वा च फेनमण्डलमेव च ॥ १९ ।

[20] व्यञ्जनस्य च [21] क्वथनं
[22] वा द्रवे च

18. Curry contaminated with poison dries up quickly, acquires bluish froth (on its surface) and loses its usual flavour, delicacy and taste.

19. Liquids (soups, etc.) mixed with poison show one's own reflection unusually enlarged or shortened and appear bright on surface but fringed with streaks.

विषदूषितव्यञ्जनस्य स्वरूपमाह—व्यञ्जनस्येति । व्यञ्जनस्य ईषदार्द्रस्य वटिकातेमनादेः । आशु शीघ्रं शुष्कत्वं, क्वथनं अग्निं विना श्यामफेनता । गन्धस्पर्शरसाश्चैव नश्यन्ति विषदूषणात्, इति प्रतीतम् ॥ १८ ॥

विषदूषितरसद्रव्यस्य स्वरूपमभिधातुमाह—छायेति । रसे (द्रवे) क्षीरजलादौ, छाया दीप्तिरधिका हीना वा दृश्यते । विषदूषिते राजिरुर्ध्वा[3] च दीप्तिमच्छिरस्कं फेनमण्डलमेव च दृश्यते इति ॥ १९ ॥

[3] राजिरेवोर्ध्वा

रसस्य नीला पयसश्च ताम्रा
मद्यस्य तोयस्य च कोकिलाभा ।
श्यामा सरन्ध्रा[23] विषदूषितस्य
मध्ये भवत्यूर्ध्वगता च लेखा[24] ॥ २० ।

[23] श्यामा च दध्नो [24] रेखा

20. When contaminated with poison, juices become bluish, milk (milk products) coppery, wine and liqour of the colour of the cuckoo (blue black), and curds bluish with rising streaks on surface.

विषदूषितरसविशेषाणां सरसद्रव्यविशेषाणां च वर्णविशेषानभिधातुमाह—रसस्येति । रसस्य इक्ष्वादिरसस्य नीला राजिर्भवति । पयसस्ताम्रा । कोकिलाभा श्यामा मध्ये रेखा भवेत् ॥ २० ॥

आर्द्रस्य सर्वस्य भवेत्तु सद्यः
प्रम्लानभावो विषदूषितस्य ।
पाकं विना क्वाथ विनीतभावः[25]
सश्यामता[26] चेति वदन्ति तज्ज्ञाः ॥ २१ ।

[25] उत्पक्वता क्वाथविनीलता च ; क्वाथं विना पाकविनीलता च [26] प्रश्यामता

शुष्कस्य सर्वस्य विषोपदेहाद्
विशीर्णता वाऽशुविवर्णता च[27]।
खरं मृदु स्यान्मृदुनः खरत्वं
[27a]वदन्ति के चाल्पकजन्तुघातः ॥ २२ ।

[27] चाशु विवर्णता च [27a] तदन्तिके

21-22. Mixed with poison juicy substances (fruits like mango, etc.) at once become faded in colour and in the opinion of experts (toxicologists) look over-ripe with deposits of bluish froth, and dried fruits suffer more shrinkage and loss of natural colour; all acrid fruits taste delicious and delicious ones acrid (pungent). Small creatures (ants and insects) die immediately coming close to such poisoned dishes.

आर्द्रस्येति। आर्द्रस्य हरितस्य फलादेः (आम्रफलादेः), प्रम्लानभावः सद्यस्तत्क्षणादेव भवति विषदूषितस्य, तथा उत्पक्वता पूतिभावः पाककाले वृन्तप्रदेशे। पाकं विना क्वाथविलीनभावः (क्वाथविनीलता) अपक्वशुष्कता भवेत्। कदाचिद्वा श्यामता वेति वदन्ति तज्ज्ञा विषदूषणलक्षणज्ञा इति ॥ २१ ॥

अपिच, शुष्कस्येति। विषोपदेहात् विषसम्पर्कात्, शुष्कस्य सर्वस्य वटकादेः, विशीर्णता म्लानता अशुचिवर्णता च, भवति। खरं मृदु स्यात्, मृदुनः खरत्वं कठिनत्वम्। अल्पकजन्तुघातः पिपीलिकादीनां वधः ॥ २२ ॥

प्रावारास्तरणानां च श्याममण्डलकीर्णता।
तन्तूनां पक्ष्मणां लोम्नां स्याद् भ्रंशश्च विषाश्रयात् ॥ २३ ।

23. Garments (overlays) and blankets (coverlets) when poisoned develop blackish circular spots on them; threads of cotton substances are displaced and hairs and feathers of woollens and furs fall off.

अपरञ्च, प्रावारेति। प्रावारास्तरणानां, प्रावरणानि [4]कम्बलादीनि, आस्तरणानि [5]सरोमकार्पासतूलिकादीनि। तेषां श्यामैर्मलिनैर्मण्डलैराकीर्णता व्याप्तता। तन्तूनां तन्तुविरचितानां (तरूनां तरुत्वग्रचितानां)। पक्ष्मणां विशिष्टमृगलोमनिर्मितानां (पक्षिणां विशिष्ट पक्षिलोम निर्मितानां), लोम्नां अविलोमविरचितानां। भ्रंशः शातनं स्यात्। विषाश्रयात् विषोपदेहादित्यर्थः ॥ २३ ॥

[4] रल्लककम्बलादीनि [5] हंसरोम

लोहानां च मणीनां च मलपङ्कोपदिग्धता।
प्रभाव गौरवस्ताग्ध्यो वर्णस्पर्शवधस्तथा ॥ २४ ।

24. Metals (minerals) and gems, when contaminated with poison, look as if stained with miry substances, and their potentiality (of doing

good and averting danger), delicacy, splendour, colour and softness of touch disappear.

अपिच, लोहानाद्येति। लोहानां सुवर्णादीनां, मणीनां प्रवालादीनां (वैदूर्यादीनां), विषाश्रयाद् मलपङ्कोपदिग्धता कलङ्ककीट (किट्ट) लिप्तता। प्रभावो वीर्यं सर्वोपद्रवनिषेधः। स्नेहः स्निग्ध भावः, गुरुता गुरुत्वम् भारः, वर्णो लोहितपीतादिः, स्पर्शः सुखस्पर्शत्वम्। एतेषां च वधः विनाशः। तथा संस्कृतविषाश्रयादेव, न हि सामान्यविषेण लोहमणीनां प्रभावो विनाशयितुं शक्यतेति ॥ २४ ॥

मुखस्य श्यामवर्णत्वं त्वग्भेदो[28]जृम्भणं मुहुः।
स्खलनं वेपथुः स्वेद आवेगो[29] दिग्विलोकनम् ॥ २५ ।
स्वकर्मणि स्वभूमौ स्यादनवस्थानमेव च।
लिङ्गान्येतानि निपुणो[30] लक्षयेद् विषदायिनाम् ॥ २६ ।

---

[28] संशुष्क श्यामवक्त्रत्वं वाग्भङ्गो

[29] स्वेदो ह्यावेशो [30] निपुणं

25-26. Those who administer poison reveal the following features: dried up and pallied face, faltering speech, yawning (as if just awakened), stumbling in steps, trembling, perspiring, staring outside with vacant looks, unwilling to keep to their appointed work and place. An intelligent person carefully observes the presence of these signs to identify those who administer poison.

श्लोकद्वयेन विषदायिनामपि लिङ्गान्यभिधातुमाह—संशुष्केति (मुखस्येति)। संशुष्कश्याम-वक्त्रत्वं स्वदोषदण्डभयभावनया मुखस्य शुष्कत्वं विवर्णत्वं च भवतीत्यर्थः। वाग्भङ्गः, स्पष्टार्थं वक्तुं न शक्नोतीत्यर्थः। जृम्भणं मुहुः, सुप्तोत्थितस्येव भवति। स्खलनं समेऽपि मार्गे गतिभङ्गः, वेपथुः कम्पः शीतस्याभावेऽपि, स्वेदः प्रवातेऽपि, आवेगः उद्विग्नता, निमित्ताभावेऽपि, दिग्विलोकनं दण्डप्रणेतृ-पुरुषागमनशङ्कया। अपिच, स्वकर्मणीति। स्वपाकपेषणाद्यनुष्ठाने। स्वभूमौ स्वीयगृहादौ अनवस्थानं दोषपरिहारबुद्ध्या अहमत्र नावस्थित इति सङ्कल्पेन। लिङ्गान्येतानि निपुणं लक्षयेद्विषदायिनामिति प्रतीतम् ॥ २५ ॥ २६ ॥

औषधानि च सर्वाणि पानं पानीयमेव च।
तत्कल्पकैः समास्वाद्य प्राश्नीयाद् भोजनानि च ॥ २७ ।
प्रसाधनादि यत्किञ्चित् तत् सर्वं परिचारिकाः[31] ।
उपनिन्युर्नरेन्द्राय सुपरीक्षितमुद्रितम् ॥ २८ ।

---

[31] परिचारकाः

27. While taking medicines, drinks and food the king shall get them tasted by respective experts (i.e., by physicians for medicines and by those who serve food and drinks) before putting them into his own mouth.

28. All artic'es of toilet after being thoroughly examined and sealed (by officers) shall be brought before the king by the personal attendants.

विषप्रयोगप्रतिषेधार्थमाह—औषधानि चेति। औषधानि, वैद्यैर्निर्दिष्टानि, यथायोगं, पानं पेयोद्भवं, पानीयमेव च तत्कल्पकैः प्रतिस्थ्याद्य, आस्वादं ग्राहयित्वा, भोजनानि च प्राश्नीयाद् राजेति ॥ २७ ॥

अपिच, प्रसाधनादीति। प्रसाधनं अलङ्कारः; आदिशब्दात् वस्त्रविलेपनमाल्यादि। यत्किञ्चित्, अन्यदपि वस्तु, तत्सर्वं सुपरीक्षितं मन्त्र्यादिभिः। परिचारकाः सेवकाः, उपनिन्युर्नरेन्द्राय, नान्यथेति ॥ २८ ॥

परस्मादागतं यच्च तत्सर्वं[32] च परीक्षयेत्।
[33]सदा स्वेभ्यः परेभ्यश्च रक्ष्यो राजाऽभिरक्षिभिः॥ २९।

---

[32] तत्तत् सर्वं ; तत्सर्वं सुपरीक्षयेत्

[33] स्वेभ्यः परेभ्यश्च सदा रक्ष्यो राजा हि रक्षिता।

29. Whatever comes from outside sources (as presents or offerings) to the king must be properly checked and examined (before it reaches the king), for the king has to be guarded against friends and foes alike by the bodyguards.

अपरञ्च, परस्मादिति। यच्च परस्मादमित्र-मित्रादिकात्, आगतं भवति तत् परीक्षयेत् यतो राजा स्वेभ्यः, परेभ्यः परमण्डलस्थेभ्यश्च रक्ष्यो भवति, अभिरक्षिभि रक्षानियुक्तैः। तथा च कौटिल्यः "रक्षिणा राजा रक्ष्य आसन्नेभ्यः परेभ्यश्च" इति ॥ २९ ॥

[34]यानं वाहनमारोहेज्ज्ञातं ज्ञातोपपादितम्।
अविज्ञातेन मार्गेण[35] सङ्कटेन च न व्रजेत्॥ ३०।

---

[34] यानवाहन [35] अविज्ञातेन हि पथा

30. The king should ride carriages or horses (or elephants) after due check-up by himself or by his trusted men. He should avoid journeying through unfamiliar regions or narrow tracks.

यानमिति। यानं शिविकादि, वाहनं हस्त्यश्वाद्यारोहेत्। ज्ञातमिति ज्ञातस्वभावम्। ज्ञातेनैव विश्वास्येन कर्मकरेण हस्त्यश्ववाहेनोपपादितं ढौकितम्। अविज्ञातेन, स्वयमनुचरैर्वा, सङ्कटेन अविस्तीर्णेन मार्गेण पथा न व्रजेत्। परकृतातिसन्धान प्रतिषेधार्थमिति ॥ ३० ॥

वीक्षिताद्दुष्ट[36] कर्माणमाप्तं वंशक्रमागतम्।
संविभक्तं च कुर्वीत जनमासन्नवर्तिनम्॥ ३१।
अधार्मिकांश्च क्रूरांश्च दुष्टदोषान् निराकृतान्।
परेभ्योऽभ्यागतांश्चैव दूरादेतान् विवर्जयेत्[37] ॥ ३२।

---

[36] दुष्ट [37] समाचरेत्

31. Officers, who are never known to have acted against the king (i.e., whose antecedents are verified), who have been in service for generations (i.e., whose father and forefathers had also been in service), and are not in straitened circumstances, should be appointed to quarters close to the king (i.e., body-guards).

32. Those who are unrighteous, crooked, habitual offenders (*dṛṣṭa doṣān*), demoted or relegated from positions held, or refugees from foreign (hostile) sources, should be appointed in distant regions away from the court (i.e., such people should not be appointed in the personal staff of the king).

परप्रयुक्ततीक्ष्णरसदादिप्रतिषेधमाह—वीक्षितादृष्टेति। वीक्षितादृष्टकर्माणं स्वामिना वीक्षितमप्यदृष्टं दुष्कर्म यस्य तम् (दुष्टकर्म स्वामिविरुद्धाचरणं न वीक्षितं कदाचिदपि यस्य तम्)। आप्तं विश्वासयोग्यम्। वंशक्रमागतं पितृपैतामहम्। संविभक्तं कृतजीविका संविभागम्। अकृतजीविकासंविभागस्तु "बुभुक्षितः किं न करोति पापम्" इति। एवंविधं जनं आसन्नवर्तिनं, राजा आत्मरक्षार्थं कुर्वीत ॥ ३१ ॥

[6]ये आसन्नवर्तिनो न कर्तव्यास्तानभिधातुमाह—अधार्मिकांश्चेति। अधार्मिकाः पापिष्ठाः, क्रूराः हिंस्राः, दृष्टदोषाः प्रत्यक्षीकृत शस्त्र (शास्त्र)-विरुद्धाचरणाः, निराकृताः दोषादेव दूरीकृताः (शत्रुणानिर्वासिताः)। परेभ्योऽभ्यागताः शत्रुसमीपतः समागताः, ये तान् एतान् सर्वान् दूरादेव विवर्जयेत्। अवर्जनीयास्तु आकरकर्माणि प्रयोजयेत्। तेषु शत्रुबुद्धिर्मा भवत्विति कौटिल्यः ॥ ३२ ॥

[6] ये न कर्तव्यास्ता ; ये न योग्यास्ता

महावात समुद्धूतामपरीक्षित नाविकाम्[38] ।
अन्यनौप्रतिबद्धां वा[39] नोपेयान्नावमातुराम् ॥ ३३ ।
परितापिषु वासरेषु पश्यंस्तटलेखास्थितमात्म[40]सैन्यचक्रम् ।
शुचि शोधित नक्रमीनजालं[41] व्यवगाहेत जलं सुहृत्समेतः ॥ ३४ ।

---

[38] महावात परिभ्रान्तां परीतानाप्तनाविकाम् ।

[39] तां   [40] लेखान्तिकमाप्त

[41] सुविशोधित मीननक्रजालं

33. (For the safety of the king in a journey by boat) the king should not board a vessel which tosses about by strong wind, manned by untried or untested sailors, tied to or towed by another vessel, is unstable and frail in structure.

34. During the summer days the king, accompanied by his friends should get into water for bathing after careful observation that it is free from large fishes and crocodiles and having trustworthy soldiers to guard.

जलपथे आत्मरक्षार्थमाह—महावातेति। महावातसमुद्धूतां,[7] महावातैरस्थिरतरां, अपरीक्षित

राविकां अनाप्ततरनाविकामित्यर्थः; अन्यनौप्रतिबद्धान्तां अन्यनौसक्रान्तां नोपेयाद्यावम्। तन्मज्जनाद् द्वितीयायाऽपि नाशो भवेदिति। आतुरां दुर्घटितत्वादनवस्थिताम्। नोपेयात् नारोहेदिति ॥ ३३ ॥

जलक्रीडायामप्यात्मरक्षार्थमाह—परितापिष्विति। परितापिषु परितापवत्सु ग्रीष्मदिवसेषु। पश्यन् स्वयमित्यर्थः प्रत्यक्षीकुर्वन्। जलतटलेखास्थितमाप्तसैन्यचक्रम्। शुचिं (शु) शोधित मीननक्र-जालं मीनसाहचर्याद् मकरशिशुमारादयो गृह्यन्ते। ते विशोधिता अपनीता यस्मात्। तद् अवगाहेत जलं सुहृत्समेत इति, इष्टसुजनयुक्तः ॥ ३४ ॥

[7] महावातैरसद्भूतां स्थिर; महावातैरयोद्भूतां स्थिर; महावातरंप्यनुद्भूतां स्थिर

गहनानि विवर्जयन्[42] विशुद्धं बहिरुद्यानवनं समभ्युपेयात्[43]।
विहरन् मधुरं वयोनुरूपं[44] न च माद्येद् विषयोपभोगरागात् ॥ ३५ ॥
सुविनीत सुवेग[45]पृष्ठयानः सुखगम्यामुचितां च लक्ष्यसिद्धैः।
सुपरिक्षीतरक्षितान्तसीमां लघुकोष्ठस्तु मृगाटवीमुपेयात् ॥ ३६ ॥

---

[42] विसर्जयेद् [43] समभ्युपेतः
[44] वयोनुरूपैर्न [45] सुवेष

35. Avoiding dense forests the king should resort to outer gardens (parks) and reserved forests, after those are thoroughly cleared (of ferocious animals and reptiles as also of hostile elements) for relaxation with the (pleasurable) companions of his own age, but should not indulge in drinking wine.

36. For hunting expeditions the king shall drive riding on the back of a trained animal (horse or elephant), swift-moving, but easily controllable for successful shooting at the target (i.e., the running game), to the game-forest (*mṛgāṭavī*), the outskirts of which are examined (cleared) and protected (by forest guards) and inside lightened or rendered free of ferocious animals.

वनविहारमभिधातुमाह—गहनानीति। गहनानि लतास्तम्बकण्टकादीनि वनानि विवर्जयेत् (विसर्जयेत्)। विशुद्धं शस्त्रिभिर्बहिरन्तश्च कृतशोधनमुद्यानवनम् समभ्युपेयाद् गच्छेत्। मधुरं वयोऽनुरूपं यथा भवति तथा, विहरन् विलसन्। न माद्येत्, न च मदं गच्छेद्विषयोपभोगरागात् ॥ ३५ ॥

मृगयायानमभिधातुमाह—सुविनीतेति। सुविनीत सुवेगपृष्ठयानः, सुशिक्षित उपहितविनयः, यो आहितवेगः शोभनवेगश्चबद्धहस्त्यश्वपृष्ठयायी (सुवेगश्च शोभनवेगः), तत्पृष्ठयानः। सुखगम्यां सुप्रवेशां, उचितां उपयुक्तां, लक्ष्यसिद्धैः चललक्ष्यसिद्ध्यर्थं। सुपरीक्षितरक्षितान्तसीमां सुविज्ञातप्रान्तभागां, मृगाटवीं आरण्यजीवबहुलामरण्यानीं, लघुकोष्ठश्चातुन्दिलकोष्ठः क्षिप्रहस्तः मृगयार्थचललक्ष्यार्थं राजा उपेयात् ॥ ३६ ॥

कारयेद् भवनशोधनमादौ मातुरन्तिकमपि प्रविविक्षुः ।
आप्तशस्त्र्यनुगतः प्रविशेच्च सङ्कटेषु गहनेषु[46] न तिष्ठेत् ॥ ३७ ।

[46] प्रविशेत् तत् सङ्कटे च गहने च

37. The king should arrange for the purification or clearing of undesirable elements (from the harem) as the first measure, even if he desires to meet his mother, and while entering the apartment he should be escorted by trustworthy armed followers, and should not tarry in narrow passages or deep alleys (on the way, lest he is surprised by hidden hostiles).

परगृहप्रवेशे तच्छोधनमभिधातुमाह—कारयेदिति । आदौ प्रथमे भवनशोधनं कारयेत् तीक्ष्णादि निरासार्थम् । मातुरन्तिकमप्युपविविक्षुः जननीसन्निधिमुपवेष्टुमिच्छुः । आप्तशस्त्र्यनुगतः विश्वस्तशस्त्रधारिपुरुषैरनुगतः । सङ्कटेषु गहनेषु न तिष्ठेदपायस्थानत्वादिति ॥ ३७ ॥

पांशूत्कराकर्षिणि[47] वाति वाते संसक्तधाराजलदे च मेघे[48] ।
अत्यातपे[49] वापि तथान्धकारे स्वस्थस्तु सन् न क्वचिदभ्युपेयात् ॥ ३८ ।
निर्गमे च प्रवेशे च राजमार्गं समन्ततः ।
प्रोत्सारित जनं गच्छेत् सम्यगाविष्कृतोन्नतिः ॥ ३९ ।

[47] पांसूत्करोत्कर्षिणि [48] काले

[49] शीतातपे

38. When the storm blows throwing dust and sand, when the sky is overcast with rain-bearing clouds in the rainy season, when there is scorching sun-shine or enveloping darkness, the king should not move out even during peaceful or normal times.

39. While going out or returning (to the palace) the king should pass along the highway (*rājamārga*) after the assembled crowd is removed from all sides in order to display his majestic splendour.

राजगमननिषेधकसमयमभिधातुमाह—पांशूत्करेति । पांशूत्करो धूलिसमूहः, तदाकर्षिणि वाते वाति सति । संसक्तधाराजलदायके मेघे° पर्जन्ये । अत्यातपे तथा अन्धकारे स्वस्थो निराकुलः सन राजा न क्वचिदभ्युपेयात् । तेषु परद्रोहाणामवकाशात् ॥ ३८ ॥

राजनिर्गमप्रवेशावभिधातुमाह—निर्गमे चेति । सम्यगाविष्कृतोन्नतिः° शरीरसौष्ठवप्रदर्शनार्थं समन्ततः सर्वतः, प्रोत्सारितजनं अपसारितलोकं, राजमार्गं गच्छेत् ॥ ३९ ॥

°मेघे वर्षति च । तथा अन्धकारे °सौष्ठवार्थम्

यात्रोत्सवसमाजेषु जनसम्बाधशालिनः ।
प्रदेशान् नावगाहेत नातिवेलं च सम्पतेत् ॥ ४० ।

40. The king should not (generally) visit temples or places o:

pilgrimage, public festivals or fairs, and social and cultural assemblies where large numbers of people congregate, at least not after the appointed hour.

यात्रोत्सवसमाजेषु जनतायुतप्रदेशेषु च राज्ञो गमनागमननिषेधमाह—यात्रेति। यात्रा देवतायतनतीर्थादिकं प्रति। उत्सवः पुत्रजन्मविवाहादिकः। समाजो जनसमूहः। तेषु जनसम्बाधशालिनो जनसम्बाधशाल्यान्वितप्रदेशान्[10] नावगाहेत। परप्रयुक्तानामवकाशत्वात्। नातिवेलं नातिक्रान्तसम्पातवेलं सम्पतेत् गत्यागमनं कुर्यादिति ॥ ४० ॥

[10] शालान्वताद् प्रदेशान्; मालान्वतान् प्रदेशान्

निषेवितो वर्षधरैः[50] कञ्चुकोष्णीषधारिभिः।
अन्तःपुरे च विचरेत्[51] कुब्जकैरातवामनैः ॥ ४१ ॥
नीचैरन्तःपुरामात्याः शुचयश्चित्तवेदिनः।
शस्त्राग्निविषवर्जं हि नर्मयेयुर्महीपतिम् ॥ ४२ ॥

[50] वर्षवरैः [51] अन्तःपुरेषु विचरेत्

41. The king should move about in his inner apartments (harem) (evidently during the night) escorted by daring (like the bull), mailed and turbaned hunchbacks, *kirātas* and dwarf (eunuchs).

42. Officers in charge of the harem (*antaḥpurāmātyāḥ*) duly tested (by *kāmopadhā*), and conversant with the king's trend of mind (desires) arrange for him pleasurable pastimes free from weapons, fire and poison, with proper humility.

निशीथप्रणिधीनभिधातुमाह—निषेवित इति। वर्षधरैः षण्ढैः, कञ्चुकोष्णीषधारिभिः, वारबाणशिरोवेष्टनं धारिभिः। स्त्रीणां चित्तविकारो मा भवत्विति। अन्तःपुरेषु निशावासेषु विचरेत्, राजा कुब्जकैरातवामनैः सह। कुब्जा वक्रावयवाः। किराता निर्गतपृष्ठाः। वामना अल्पशरीराः। तैः सहेति ॥ ४१ ॥

अन्तःपुरामात्ये राजनर्माभिधातुमाह—नीचैरिति। नीचैः औद्धत्यमपहाय,[11] अन्तःपुरामात्याः अन्तःपुररक्षानियुक्ताः। शुचयः कामोपधाविशुद्धाः। चित्तवेदिनश्चित्तज्ञाः। शस्त्राग्निविषवर्जं, यथा भवति तथा, अपायहेतुत्वात् ते वर्जनीया इत्यर्थः। नर्मयेयुः क्रीडयेयुः महीपतिम् ॥ ४२ ॥

[11] औद्धत्यरहितै

अन्तर्वंशिकसैन्यं च[52] सन्नद्धं साधुसम्मतम्।
रक्षेदायुक्तकुशलमन्तःपुरगतं नृपम् ॥ ४३ ॥
आशीतिकाश्च पुरुषाः पञ्चाशत्काश्च योषितः।
कुर्युरेवावरोधानां[53] शौचमागारिकाश्च ये ॥ ४४ ॥

[52] सैन्यं हि [53] पश्येयुरवरोधानां

43. During the king's presence in the harem armed palace-guards (*antarvaṁśika sainya*) of proven merit, should protect him by application of requisite measures in which they are experts.

44. Men of eighty years of age and women of fifty as well as attendants (eunuchs, *āgārikā*) should (be appointed to) look after the purity (of morals) of the members of the harem.

अन्तर्वंशिकसैन्यस्य राज्ञो रक्षाविधानमाह—अन्तर्वंशिकसैन्यमिति। अन्तर्वंशिकसैन्यं पुत्रदाराद्याभ्यन्तरवंशरक्षानियुक्तं सैन्यं, हि स्फुटम्, सन्नद्धं गृहीतशस्त्रसन्नाहम्, साधुसम्मतं सकलगुणयुक्तत्वात्, आयुक्तकुशलं आयुक्तस्थाने कुशलं (आयुधकुशलं वा) रक्षाविधाननिपुणं, नृपं रक्षेत्। अन्तः पुरगतं नृपमिति, अन्येषां तत्रानवकाशत्वादिति ॥ ४३ ॥

अवरोधशौचकर्मनाधिकारमाह—आशीतिकाश्चेति। आशीतिकाः पूर्णाशीतिवर्षाः पुरुषाः, पञ्चाशत्काः पूर्णपञ्चाशद्वर्षाः योषितः, उपशान्तरागत्वाद्विघ्नो न भवतीति। शुध्येरन् अवरोधानां अन्तःपुराणां, शौचं शुचिभावत्वं पतिभक्तिं, आगारिका आगारे (अगारे) नियुक्ताः ॥ ४४ ॥

रूपाजीवाः स्त्रियः स्नाताः परिवर्तितवाससः।
राजानमुपतिष्ठेयु[54]र्विशुद्ध स्रग्विभूषणाः ॥ ४५ ॥
कुहकैर्जटिलैश्चैव[54a] मुण्डैराभ्यन्तरो जनः।
संसर्गं न क्वचिद् गच्छेद् बाह्यैर्दासीजनैः सह[55] ॥ ४६ ॥

[54] तिष्ठेयुः शुद्ध स्रगुगन्धभूषणाः [54a] जटिलैश्चापि
[55] जनैस्तथा

45. Courtesans, having bathed and changed their dresses, and having decorated themselves with pure (not poisoned) ornaments and flower garlands, should attend the king (provide pleasures to the king).

46. Members of the harem should not be allowed to have any contact with sorcerers and mendicants with matted hair or shaven head and also with public women.

पण्यस्त्रीणां[12] राजसेवामभिधातुमाह—रूपाजीवा इति। रूपमेवाजीवन्ति इति रूपाजीवाः पण्यस्त्रियः। स्नाताः राजस्नानावसरे कृतमज्जनाः[13]। परिवर्तितवाससः राजकीयैर्वस्त्रैरेव परिवर्तितानि स्ववासांसि याभिस्ता राजानमुपतिष्ठेयुः। विशुद्धस्रग्विभूषणाः रसधूपादिप्रक्षेपशङ्कानिवृत्त्यर्थम् ॥ ४५ ॥

कुहकादिभिः राजसंसर्गनिषेधमाह—कुहकैरिति। कुहकैः इन्द्रजालविद्यावद्भिः, जटिलैः जटाधरैः शैवादिभिः, मुण्डैः मुण्डितमुण्डैः भिक्षुकादिभिः, बाह्यैर्दासीजनैः वेश्यादिभिः आभ्यन्तरो जनः अन्तःपुरसञ्चारीजनः, संसर्गं सम्बन्धं न क्वचिद् गच्छेत्। परप्रयुक्तरसादि साक्रमभयादिति। विष प्रवेशादिनिषेधार्थम् ॥ ४६ ॥

[12] पण्यस्त्रीणामलङ्कारादिमाह [13] राजकीयैर्जलैर्वस्त्रैश्च

[56]निर्गच्छेत् प्रविशेच्चापि सर्वश्चाभ्यन्तरो जनः ।
विज्ञातद्रव्यसञ्चारी कारणे[56a] नोपलक्षितः ॥ ४७ ।
न चानुजीविनं पश्येदकल्यं पृथिवीपतिः ।
अन्यत्रात्ययिकाद्रोगात् सर्वस्यैवातुरो गुरुः[57] ॥ ४८ ।

[56] निर्विशेत् प्रविशेच्चापि सर्वत्राभ्य [56a] करणे [57] कार्यात् सर्वत्रात्ययिको गुरुः

47. During their exit and entry (to the palace) the attendants of the harem must show their passports (to the palace guards) and adduce satisfactory reasons for their movements.

48. The king should not allow the presence of any attendant afflicted with (infectious or communicable) disease. But in case of one so afflicted in course of his duty elsewhere, the king may see him (of course taking due protective measures) as, such a person is worthy of his attention.

विषप्रवेशादि संसर्गनिषेधार्थमाह—निर्गच्छेदिति । निर्गच्छेत् प्रविशेच्चापि आभ्यन्तरो जनः अन्तःपुरसञ्चारीजनः । विज्ञातद्रव्यसञ्चारी द्वारस्थैर्विज्ञातानामेव द्रव्याणां सञ्चारणं विद्यते यस्य । कारणेनोपलक्षितः राज्ञा विदितेनैव प्रयोजनेन लक्षितो विदितः ॥ ४७ ॥

साङ्क्रामिकव्याधिप्रतीकारार्थमाह—न चेति । अनुजीविनं भृत्यं, अकल्यं व्याधितं, पृथिवीपतिः, व्याधिसंसर्गप्रतिषेधार्थं न पश्येत् । अन्यत्रात्ययिकात् रोगात, यदि मुख्योऽनुजीवी अत्ययकारिणा रोगेणाभिभूयते तथा पश्येत् आत्मना प्रतीकारं कृत्वा इत्यर्थः । कस्मादित्याह सर्वस्यैवातुरोगुरुः । स मञ्चादिस्थितोऽपि द्रष्टव्य इव । एवमनुजीविनोऽनुरक्ता भवन्तीति ॥ ४८ ॥

स्नातोऽनुलिप्त[58] सुरभिः स्रग्वी रुचिरभूषणः ।
स्नातां विशुद्धवसनां[59] गच्छेद्[60] देवीं सुभूषणाम् ॥ ४९ ।
[61]न हि देवीगृहं गच्छेदात्मीयात् सन्निवेशनात् ।
अत्यर्थवल्लभोऽपीह विश्वासं[62] स्त्रीषु न व्रजेत् ॥ ५० ।

[58] स्नातानुलिप्तः [59] स्वदत्तवसनां
[60] पश्येद् देवीं सभूषणाम् [61] न च
[62] अत्यन्तं वल्लभोऽस्मीति विस्रम्भं

49. Having bathed and decorated himself with unguents and scents, garlands and attractive ornaments, the king should meet the (chief) queen (*devi*) also bathed and dressed in pure garments and ornaments.

50. The king should not go out of his own apartment to that of his chief queen in order to meet her. However beloved, too much confidence should never be reposed on women.

देवीदर्शनक्रममभिधातुमाह—स्नात इति। राजा स्नातो विशुद्धकायः, अनुलिप्तसुरभिः कुङ्कुममृगमदादिभिः सौरभवान्, स्रग्वी माल्यादि सुरभिपुष्पमालाधारी, रुचिरभूषणः भास्वराभरणशाली, सर्वथा देवीनां मनोहरो भूत्वा तच्चित्ताराधनार्थम्। स्नातां विशुद्धवसनां देवीं पश्येदलङ्कृताम्। स्वानुरागवृद्ध्यर्थम् ॥ ४९ ॥

पराभिसन्धाननिवारणार्थमिदमाह—न हीति। न हि नैव आत्मीयात् सन्निवेशनात् स्वीयवासभवनात् रिरंसया देवीगृहं गच्छेत्। अत्यन्तं वल्लभोऽपीह कलौ विस्रम्भं विश्वासं स्त्रीषु न व्रजेत् राजा ॥ ५० ॥

देवीगृहगतं[63] भ्राता भद्रसेन[64]ममारयत्।
मातुः शय्यान्तरे लीनः[65] कारूषं चौरसः सुतः ॥ ५१ ॥
लाजान् विषेण संयोज्य मधुनेति विलोभित[66]।
देवी तु काशीराजेन्द्रं निजघान रहोगतम् ॥ ५२ ॥
विषदिग्धेन[67] सौवीरं मेखलामणिना नृपम्।
नूपुरेण च वैरन्त्यं[68] जारूषं दर्पणेन च ॥ ५३ ॥
वेण्यां शस्त्रं समाधाय तथा चापि विदूरथम्[69]।
अहिवृत्तं[70] परिहरेच्छत्रौ चापि प्रयोजयेत् ॥ ५४ ॥

[63] देवीगृहं गतो
[64] वीरसेन
[65] शय्यान्तरालीनः
[66] विलोभ्य तम्
[67] विषाक्तेन च
[68] वैरूप्यं जारूष्यं; वैराज्यं
[69] विडुरथम्
[70] इति वृत्तं

51-54. By way of illustration of faithlessness of queens it is stated as follows. King Bhadrasena (Vīrasena) while in queen's chamber was assassinated by his own brother (in illicit relation with the queen), king Kāruṣa by his own son who kept himself hidden under the bed (out of disappointment for not being declared as the crown prince), king of Kāśī by his own queen who administered some poisoned fried rice (*lāja*), making him believe the same as mixed with honey during a secret meeting (out of abhorrence), king Sauvīra (also by his queen) by the poisoned gem attached to her girdle, king Vairantya (Vairūpya) by the poisoned anklet, and Jāruṣya by the reflection of a poisoned mirror, and king Viduratha also by the queen who stabbed him (while asleep) with a dagger concealed within the braid of her hair (*veṇī*). Hence a king should regulate his dealings with his queens and take guard as if against his enemies.

विश्वस्तानामपि स्त्रीकृतविनाशमाह—देवीगृहेति। देवीगृहगतं भद्रसेनाख्यं भ्राता कनीयान निषिद्धप्रवेशो वीरसेनोऽनुरक्तया देव्या प्रेरितोऽमारयत्। तथा मातुः शय्यान्तरालीनः कारूषं कारूषविषयाधिपतिं, औरसः सुतः पुत्रान्तरदत्तराज्यं कुपितया जनन्या प्रेरितोऽमारयदिति अनुवर्तते ॥ ५१ ॥

अपरञ्च, लाजानिति। देवीदत्तविषदिग्धलाजभक्षणेन रहोगतः काशीराजो विनाशित इति फलितार्थः ॥ ५२ ॥

अन्यच्च, विषदिग्धेति। विषाक्तेन मेखलामणिना सौवीरविषयाधिपम्। नूपुरेण वैरन्त्याख्यं (वैरन्त्यं) नृपम्। आदर्शेन जारूथ्याख्यं नृपं जघान स्पर्शादिति श्रूयते ॥ ५३ ॥

अपरञ्च, वेण्यामिति। बलादानयन कोपाद्वेण्यां शस्त्रमाधाय विदूरथाख्यं नृपं निद्रावशंगतं जघानेति। इत्येवं वृत्तं परिहरेद्विजिगीषुः। शत्रौ चापि प्रयोजयेत्, यथा स्वभार्याभिरेव गृहगतः शत्रुर्विनाश्यत एवम् ॥ ५४ ॥

यस्य दाराः सुगुप्ताः स्युः पुरुषैराप्तकारिभिः।
सर्वभोगान्वितं तस्य हस्ते लोकद्वयं स्थितम् ॥ ५५ ।
धर्ममिच्छन् नरपतिः सर्वान्[71] दाराननुक्रमात्।
गच्छेदनुनिशं[72] नित्यं वाजीकरणबृंहितः ॥ ५६ ।

[71] सर्वदारानन्तु [72] गच्छेदनुदिनं

55. The king, whose wives are well protected (from evil influences) by trusted officials, not only enjoys all the pleasure but also earns merit both in this world and the next.

56. To fulfil the ends of morality (*Dharma*) the king should daily visit his wives according to the order of precedence, after having strengthened himself by the ceremony of *vājīkaraṇa* (aphrodisiac).

दारगुप्तेः फलं दर्शयितुमाह—यस्येति। यस्य पुंसो राज्ञो वा दाराः स्त्रियः (कलत्राणि) सुगुप्ताः स्युः। पुरुषैराप्तकारिभिः, आप्तं हितं ये कुर्वन्ति तैः। सर्वभोगान्वितं सर्वकामावाप्तियुक्तं लोकद्वयं तस्य हस्ते स्थितम्। परलोकेऽपि कुलकलङ्काभावात् स्वर्ग इति भावः ॥ ५५ ॥

धर्मार्थं दाररक्षणार्थमभिधातुमाह—धर्ममिति। धर्ममिच्छन् नरपतिः सर्वदारान् अनुक्रमात् शास्त्रोक्तक्रमेण मार्गेण गच्छेद् धर्माभिसन्धिना प्रतिनिशं नित्यं सम्यग् वाजीकरणैः शास्त्रोक्तैः प्रक्रियाविशेषैः बृंहितः कृतशुक्रवृद्धिः ॥ ५६ ॥

विचार्य कार्यावयवान् दिनक्षये विसृज्य लोकं प्रमदाहृतक्रियः[73]।
आशस्त्र[74]बन्धेन हि साधु पाणिना स्वपेदसक्तं परमाप्तरक्षितः ॥ ५७ ।

[73] प्रमदाहृतक्रियः [74] अशस्त्र ; सशस्त्र

57. At the end of the day after completing the schedule of his daily business the king would retire to his apartment for relaxation after due precautions have been taken. Even while falling asleep he should avoid deep slumber and keep his arms ready at hand while trusted attendants would stand guard.

शयनविधिमभिधातुमाह—विचार्येति। विचार्य निर्णीय, कार्यावयवान्, अहोरात्रे षोडशधा

विभज्या, तत्र ये कार्यावयवास्तान् निर्वर्त्य दिनक्षये लोकं विसृज्य (विसर्ज्य), प्रमदाहृतक्रियः प्रमदागण-समाहितकार्यजातः, पुरुषेणान्तःपुरप्रवेशाभावात्। अशस्त्रबन्धेन शस्त्रबन्धविरहितेन, पाणिना स्वकीयकरेण, विशिष्टः सन, सर्वदा करसन्निहितं शस्त्रं विधेयमित्यर्थः। स्वपेत् निद्रां गच्छेत्, असक्तं यथा तथा, निद्रायामपि आसक्तिर्ण कर्तव्येत्यर्थः। परमाप्तरक्षितः विश्वस्तान्तर्वंशिकपुरुषैः रक्षित इति ॥ ५७ ॥

नये न जाग्रत्यनिशं नरेश्वरे
सुखं स्वपन्तीह निराधयः प्रजाः।
प्रमत्तचित्ते स्वपितीह सम्भयात्[75]
प्रजागरेणास्य जगत् प्रबुध्यते[76] ॥ ५८ ।

---

[75] स्वपति त्रसद् भयाद् [76] प्रबाध्यते

58. When the king is wide awake in discharging his royal duties conforming to the prescribed laws, his subjects, free from anxiety, may enjoy comfortable sleep (i.e., live in peace). But if on the other hand the king is addicted to sensual pleasures (and neglects his duties), the subjects have to pass sleepless nights out of anxiety and fear. When the king is awake and active the world is also awake (and active).

निद्रासक्तिनिरासार्थमाह—नयेनेति। नयेन नीत्यनुष्ठानेन, जाग्रति अप्रमत्तत्वेन सर्वं कार्यजातं पश्यति, नरेश्वरे, सति निराधयः निःशेषितचित्तपीडाः, उपद्रवकारिणां निग्रहादित्यर्थः। प्रजाः सुखं, यथा भवति तथा, स्वपन्ति निद्रां यान्ति। प्रमत्तचित्ते नरेश्वरे विषयासक्तमानसे, स्वपितरि (स्वपिति) तस्मिन् सति, असद्भयात् दस्युप्रभृतिभ्यो भयं प्राप्य, प्रजागरेण, अस्य राज्ञः जगत् प्रजारूपं, प्रबुध्यते निद्राविहीनं भवति। तस्मात् जितनिद्रेण (सततोत्थेन) राज्ञा भवितव्यमित्यर्थः ॥ ५८ ॥

इति स्म पूर्वं[77] मुनयो बभाषिरे
नृपस्य राज्यस्य च साधु लक्षणम्[78]।
तदेतदेवं परिपालयन् नयान्
नरेश्वरः पालककल्पतां[79] व्रजेत् ॥ ५९ ।

इति कामन्दकीये नीतिसारे राजपुत्ररक्षणमात्मरक्षितकं नाम सप्तमः सर्गः।

---

[77] पूर्वे [78] साधु रक्षणम्

[79] पालनकल्पतां

59. Protection of the kingdom on the lines indicated, is the sacred duty of the king. This is the view of the sages of yore. The king who runs the administration according to laws, moves like the sustainer among his subjects.

नृपराज्ययोः साधुलक्षणे पूर्वाचार्यसम्मतिमाह—इतीति। इत्येवं पूर्वे बृहस्पतिशुक्रादयः। नृपस्य राज्यस्य च साधु लक्षणं। एतदुक्तप्रकारेण नृपः साधु पालयन् पालनकल्पतां पालनसामर्थ्यं स्वाम्यमात्य सुहृत्कोशराष्ट्रदुर्गबलानि चेत्यादिपूर्वोक्तप्रकारं यथास्थितं पर्यालोच्य शासति सति विशिष्ट विधानवत्तां व्रजेत् प्राप्नु यादिति ॥ ५९ ॥

इत्यात्मरक्षितकं नामैकादश प्रकरणम्।

इति श्रीकामन्दकीये नीतिसारे उपाध्यायनिरपेक्षायां सप्तमः सर्गः ॥

अष्टमः सर्गः

१२। मण्डलयोनिप्रकरणम्।

उपेतः कोशदण्डाभ्यां सामात्यः सह मन्त्रिभिः।
दुर्गस्थश्चिन्तयेत् साधु मण्डलं मण्डलाधिपः॥ १।

Sarga—VIII

Prakaraṇa 12.

Maṇḍalayoni (The nave of the interstatal circle)

1. The King, securely settled in his fortified castle, possessing a flourishing treasury, a strong army and an efficient band of officers and counsellors, is regarded by the wise to be the master of the *maṇḍala* or the inner circle (i.e., the kingdom).

स्वमण्डलपरमण्डलानि विजेतुं मण्डलमेव विचारयन् मण्डलयोनि-मण्डलशोधन प्रकरणमभिधातुमाह[1]—उपेत इति। उपेतः सम्पन्नः कोशदण्डाभ्यां पूर्वोक्त प्रकृतिसम्पद्युक्तः॥ १॥

[1] प्रकरणे अभिधातुमाह

रथी विराजते[1] राजा विशुद्धे मण्डले चरन्।
अशुद्धे मण्डले सर्पन्[2] शीर्यते रथचक्रवत्॥ २।

---

[1] रथीव राजते [2] सर्वं

2. A king who is supported by a pure, strong and devoted *maṇḍala* (internal organs of his state), moves about as a (proud) charioteer (*rathīva*). But to a king whose *maṇḍala* is imperfect, i.e., who does not enjoy the full support of the internal elements of his state, wears away (i.e., declines) like the rim of the chariot wheel (*cakranemi*).

अपरञ्च, रथीति। रथी विजिगीषुः, विशुद्धिश्च मण्डलस्य मित्रत्वे स्थापनम्। शत्रुमध्यमोदासीना अपि यदा विजिगीषोर्मित्रभावेन[2] भवन्ति तदा शुद्धं मण्डलम्। तत्र चरन् राजते विधेयमण्डलत्वात्। अशुद्धे कलुषे मण्डले सर्पन्[3] तस्याशुद्धत्वात् रथचक्रवत् विशीर्यते। चक्रलमिव रथचक्रादिकं विशीर्यते विजिगीषोर्विगुणं भवति। ततश्च राजा न विराजते इति मण्डलशुद्धिर्विधेयेति भावः॥ २॥

[2] विजिगीषु मित्रभाविनी [3] सर्पन्-शीर्यते,

रोचते सर्वभूतेभ्यः शशीवाखण्डमण्डलः।
सम्पूर्णमण्डलस्तस्माद्विजिगीषुः सदा भवेत्॥ ३।

3. As such he is adored by all beings like the full moon (*Saśivākhaṇḍamaṇḍalaḥ*). A *vijigīṣu* (an ambitious ruler with expansive designs) should therefore develop his kingdom in all its complements.

विजिगीषोः स्वमण्डलापेक्षत्व[4]मभिधातुमाह—रोचत इति। रोचते प्रियो भवति[5]। सर्वभूतेभ्यः वर्णचतुष्टयसङ्कीर्णजात्यादिरूपप्रजाभ्यः। शशीवामृतांशुरिवाखण्डमण्डलस्तस्माद्विजिगीषुः सदा भवेत्। सप्तप्रकृतिकं राज्यं[6] मण्डलमभिधीयते। ताश्च सप्तप्रकृतयो[6a] यदा स्वगुणसम्पदुपेता भवन्ति तदा सम्पूर्णमण्डलमुपेतः। एवं सम्पूर्णमण्डलः सदा भवेदिति॥ ३॥

[4] पेक्षण, पेक्षम [5] भवेत्

[6] राजमण्डलम [6a] सप्तापि प्रकृतयः

अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः।
एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः॥ ४।

---

4. In the opinion of the experts (in the law of polity), the ministers, the kingdom, the fortifications, the treasury and the army—these five are the constituent elements of the state for a *vijigīṣu* (excluding the king and his allies, who also are classed as *prakṛtis*).

एतदेव समर्थयन्नाह—अमात्येति। अमात्या मन्त्र्यादयः। राष्ट्रं जनपदः। दुर्गमुक्तलक्षणम्। कोशः सुवर्णादिः। दण्डश्चतुरङ्गबलं पञ्चमः। एताः प्रकृतयः पञ्च विजिगीषोर्भोग्यत्वेनोदाहृताः। भोक्ता विजिगीषुरासामिति भावः॥ ४॥

एताः पञ्च तथा मित्रं सप्तमः पृथिवीपतिः।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः॥ ५।

---

5. These five and the allies (*mitra*) and the king himself in the seventh place, constitute according to Bṛhaspati the state in its even component elements (*Saptaprakṛtikaṁ rājyaṁ*).

एतद्व्यतिरिक्तं प्रकृतिद्वयमभिधातुमाह—एता इति। एता अनन्तरोक्ताः प्रकृतयः पञ्च। तथा मित्रम्। सप्तमः पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः सुरगुरुः॥ ५॥

सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः।
जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः॥ ६।

---

6. The *vijigīṣu* ruler (desirous of conquests) is he, who is equipped with these elements in perfect forms, is himself highly energetic and painstaking and is fired by the ambition of conquests.

विजिगीषुलक्षणमभिधातुमाह—सम्पन्न इति। प्रकृतिभिरुक्तलक्षणाभिः। सम्पन्नः समृद्धः।

महानुत्साहो यस्य। "शौर्यममर्षो दाक्ष्यं चोत्साहगुणा" इति कौटिल्यः। कृतश्रमोऽभ्यस्त सर्वायुधादिः। जेतुमेषणशीलश्चेति विजेतुमिच्छुः[7]। विजिगीषुरिति स्मृत इति ॥ ६ ॥

[7] मिच्छुता ॥ ६ ॥

कौलीनं[3] वृद्धसेवित्वमुत्साहः स्थूललक्षिता[4]।
चित्तज्ञता[5] बुद्धिमत्त्वं प्रागल्भ्यं सत्यवादिता ॥ ७।
अदीर्घसूत्रताऽक्षौद्र्य[5a] प्रश्रयः स्वप्रधानता।
देशकालज्ञता दाढ्य[6] सर्वक्लेश[6]सहिष्णुता ॥ ८।
सर्वविज्ञानिता[7] दाक्ष्यं[7a] सदासंवृतमन्त्रता[7b]।
अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता ॥ ९।
शरणागतवात्सल्यममर्षित्वमचापलम्।
स्वकर्मदृष्टशास्त्रत्वं कृतित्वं दीर्घदर्शिता ॥ १०।
जितश्रमित्वं[8] धर्मित्व[9]मक्रूरपरिवारता।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः[10] ॥ ११।

---

[3] कौलीन्यं [4] स्थूललक्षता

[5] कृतज्ञता [5a] क्षौद्र्यं

[6] दाढ्यमापात्क्लेश [7] विज्ञानता

[7a] दाक्ष्यमर्जः [7b] सम्भूतमन्त्रता [8] जितश्रमत्वं

[9] वाग्मित्वम [10] विजिगीषोर्गुणोदयः

7-11. Essential qualities of a *vijigīṣu* monarch are : nobility of ancestry, association with the elders or the wise (for good counsel), energy, broad vision, power of reading the minds of others (*cittajñatā*), intelligence, boldness in repartees, truthfulness, promptness (absence of procrastination), liberality (large-heartedness), tolerance (of other's views, *praśraya*), predominance (of personality), acquaintance with place and time (for the successful execution of any undertaking (*deśa-kālajñatā*), firmness, power of endurance of all sorts of troubles, knowledge of all sciences and skillfulness (in their practical applications), strength of body and mind, capability of maintaining secrecy of policy decisions, consistency, valour, recognition of loyalty of the dependents (*bhaktijñatvam*), gratitude, affectionate dealings with those seeking refuge, forgiveness (in deserving cases), steadiness, awareness of his own duties as prescribed in relevant Śāstras, wisdom, farsightedness, indefatigability, eloquence, association of honest (not crooked) counsellors and flourishing condition of the component organs of the kingdom (*prakṛtisphītatā*).

कौलीनमिति। कुलीनस्यभावः कौलीनं (कौलीन्यं) उभयकुलविशुद्धता। वृद्धसेवित्वं विद्यावृद्ध सेवातत्परः। उत्साह उपलक्षणः। स्थूललक्षिता दानावसरे स्थूलं बहु व लक्ष्यीकरोति, स्वल्पं दातं

न जानातीत्यर्थः। कृतज्ञता कृतं जानातीति, कृतस्य प्रत्युपकारं करोति। बुद्धिमत्त्वमष्टगुणबुद्धिमत्त्वम्। प्रागल्भ्यमपरिषद् भीरुत्वम्। सत्यवादिता अमृषावादित्वमिति ॥ ७ ॥

अदीर्घसूत्रेति। अदीर्घसूत्रता सूत्र्यते पर्यालोच्यते इति कार्यं सूत्रम्। दीर्घं सूत्रं यस्य स दीर्घसूत्रः, तस्य भावो दीर्घसूत्रता, तस्याभावोऽदीर्घसूत्रता शीघ्रकारितेति। अक्षौद्रं क्षुद्रः परगुणासहिष्णुः, न क्षुद्रोऽक्षुद्रः, तस्य भावः। प्रश्रयः अनुद्धतत्वम् विनीतभावः। स्वप्रधानता आत्मायत्तसिद्धित्वम्, स्वयं प्रधानत्वम्। देशकालज्ञता कार्यानुगुणदेशकालस्वरूपज्ञानवत्त्वं[8]। दार्ढ्यं दृढत्वं परिगृहीतापरित्यागः। सर्वक्लेशसहिष्णुता क्षुत्तृष्णाशीतातपसर्वक्लेशान् सहत इति तस्य भावः ॥ ८ ॥

सर्वेति। सर्वविज्ञानिता सकलकलाकुशलत्वम्। दाक्ष्यं आशुकारित्वम्। ऊर्जः कायबलवत्त्वम्। संवृत[8a]मन्त्रता इङ्गिताकारादिगोपनात्। अविसंवादिता विरहितशब्दच्छलाभिसन्धानशीलत्वम्। शौर्यमभीरुत्वम्। भक्तिज्ञत्वं अनुजीव्यादिकृतां भक्तिं जानातीति तस्य भावः। कृतज्ञता कृतोपकारमानित्वम् ॥ ९ ॥

शरणागतेति। शरणागतवात्सल्यं शरणं प्रविष्टानां स्निग्धोपचारपूर्वकं रक्षणम्। अमर्षित्वं अपराधिषु क्षान्तिः (अपकारिषु अक्षान्तिः)। अचापलम् स्थैर्यम्। स्वकर्मदृष्टशास्त्रत्वं राज्ञां स्वकर्म प्रजापालनं, तच्चायुधसाध्यं सकलायुधविषये दृष्टानि शास्त्राणि (येन) तस्यभावः। कृतित्वं पाण्डित्यम् आन्वीक्षिकी परिज्ञानित्वम्। दीर्घदर्शिता दीर्घदेशेन कालेन यत् व्यवहितं चारचक्षुषा शास्त्रचक्षुषा च द्रष्टुं शीलं यस्य तस्य भावः ॥ १० ॥

जितश्रमित्वमिति। एते अनन्तरोक्तागुणाः विजिगीषोर्विजिगीषुत्व सम्पादका भवन्तीति (विजिगीषोरभ्युदयोभवतीति) ॥ ११ ॥

[8] कार्यानुगुणं देशं कालं जानातीति तस्य भावः [8a] सम्भूत

सर्वैर्गुणैर्विहीनोऽपि स राजा यः प्रतापवान्।
प्रतापयुक्तात् त्रस्यन्ति परान् सिंहा मृगानिव[11] ॥ १२ ।

[11] त्र्यस्यन्ति परे सिंहान्मृगा इव

12. If a king is devoid of all the qualities (mentioned above) but possesses prowess (*pratāpa*), still he is regarded as worthy of his position (the royal status). Because by virtue of his prowess a king terrifies his enemies as the lion does the deer (or all other animals).

उत्साहगुणस्यैव प्राधान्यं दर्शयन्नाह—सर्वैरिति। सर्वैरनन्तरोक्तैर्गुणैर्विहीनोऽपि स राजा प्रजारञ्जनात् यः प्रतापवान्। प्रतापयुक्तात् त्र्यस्यन्ति प्रतापयुक्त उत्साहविशेषशाली राज्ञः, परान् (परे) शत्रवः इतरे जना वा, सिंहात् मृगा इव, त्र्यस्यन्ति विभ्यति ॥ १२ ॥

प्रतापसिद्धो[12] नृपतिः प्राप्नोति महतीं[12a] श्रियम्।
तस्मादुत्थानयोगेन प्रतापं जनयेत् परम्[13] ॥ १३ ।

[12] युक्तो [12a] परमां

[13] प्रभुः

13. A king wedded to prowess attains supreme prosperity and prowess is generated by constant activity (*utthāna*).

एतदेव समर्थयन्नाह—प्रतापसिद्धाविति। प्रकर्षेण तापयति शत्रूनिति सकलशत्रुविकर्तनजनितं च यशः प्रतापशब्देनाभिधीयते। तस्य सिद्धौ सत्यां नृपतिर्महतीं श्रियमश्नुते। तस्मादुत्थानयोगेन सततं विग्रहोद्योगयोगेन प्रतापं जनयेत्, परमुत्कृष्टम्। तेन प्रतापेनोपसन्तप्तं द्वादशराजकं मण्डलं वशे भवतीति भावः ॥ १३ ॥

एकार्थाभिनिवेशित्वमवि[14]लक्षणमुच्यते।
दारुणस्तु स्मृतः शत्रुर्विजिगीषुगुणान्वितः ॥ १४ ।
लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः।
मूढो योधावमन्ता च सुखच्छेद्यो[15] रिपुः स्मृतः ॥ १५ ।

[14] मरि [15] सुखोच्छेद्यो

14. The distinctive feature of an enemy is the pursuit of the common objective (the same as that of the *vijigīṣu* i.e., conquests), and the enemy who is endowed with the qualities of a *vijigīṣu* is regarded formidable.

15. The one who is covetuous, crooked, lazy (inactive), untruthful, inadvertent, cowardly, unsteady, foolish and contemptuous of his soldiers is considered as easily assailable (*sukhacchelyo or sukhocchedyo*).

अरेर्लक्षणमभिधातुमाह[9]—एकेति। एकार्थीभूमिहिरण्यादिः। तत्रैकास्मिन्नेवार्थे अभिनिवेशः आत्मसात्करणाग्रही द्वयोरपि यन्नस्तदेकार्थाभिनिवेशित्वमरिलक्षणम् अतः[9a] परस्परमरीभवतः। स च द्विप्रकारः दारुणः सुखोच्छेद्यश्च। दारुणं दर्शयितुमाह—दारुणस्तु इत्यादि। ये विजिगीषोर्गुणास्ते यस्य स दारुणो दुरुच्छेद्यः। अत आत्मनो दुरुच्छेद्यता विजिगीषुणा आत्मनि सम्पादनीयेति भावः ॥ १४ ॥

सुखोच्छेद्यं शत्रुं दर्शयन्नाह—लुब्ध इति। लुब्धः अर्थलोभात् दानशक्तिरहितः, दानाभावे ताश्च प्रकृतयो विरज्यन्ते। क्रूरोऽतितीक्ष्णदण्डः स च उद्वेजनीयो भवति। अलसो निरुद्योगस्तस्य प्रकृतयोऽपि निरुद्योगो भवन्ति। असत्यः असत्यशीलः। "स यच्छीलस्तच्छीलाः प्रकृतयः" इति वचनात्। भीरुः संग्रामभीरुता शौर्यरहितः। स संग्रामासमर्थो भवतीति। अस्थिरः स्थितेरहितत्वात्[9b] स च प्रकृतिभिर्न सज्यते (प्रकृतिभिस्त्यज्यते)। मूढः निर्विवेकः, स त्वकिञ्चनकारी भवति। योधावमन्ता युद्धविशारद-शूरपुरुषावमानकृत्, स च योधविमुक्तः सुखेनैवोच्छेद्यो रिपुः स्मृतः ॥ १५ ॥

[9] विजिगीषौ लक्षणमभिधातुमाह [9a] तौ परस्पर

[9b] स्थितिरहितत्वात्

अरिर्मित्रमरेर्मित्रं मित्रमित्रमतःपरम्।
[16]तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्थिताः[16a] ॥ १६ ।

[16] मित्रारिमित्र [16a] स्मृताः

पार्ष्णिग्राहः स्मृतः[17] पश्चादाक्रन्दस्तदनन्तरम् ।
आसारावनयोश्चैव विजिगीषोस्तु[18] मण्डलम्[18a] ॥ १७ ।

[17] पार्ष्णिग्राहस्ततः [18] श्चेति [18a] पृष्ठतः

16-17. (In the inter-statal circle or *Maṇḍala*) the states in the front of the *Vijigīṣu's* is contemplated to be those of *Ari* (the enemy, the immediate neighbour), *Mitra* (ally or the friendly state situated beyond that of *ari*), *Arimitra* (the enemy's ally) *Mitra-mitra* (the friend's ally) and *Arimitramitra* (the ally of enemy's ally). On the rear side of the *Vijigīṣ's* the contiguous state is that of the *Pārṣṇigrāha* (the rearward enemy, who attacks the *vijigīṣu* from the rear in order to lend support to the latter's *ari*), beyond it is that of the *Ākranda* (the rearward friend, who is summoned to counteract the hostile action of the *pārṣṇigrāha*), followed by the two *Āsāras* or friends (viz., *Pārṣṇigrāhāsāra* and *Ākrandāsāras*) who move forward to assist the *pārṣṇigrāha* and the *ākranda* respectively.

विजिगीषोररेर्मित्रस्य लक्षणानि अभिहितानि । इदानीं विजिगीषोर्यातव्यं प्रतियियासोरग्रतः पश्चादासन्नव्यवहितभेदेनारिमित्रादीनां संज्ञान्तराणि व्यवहारार्थमभिधातुमाह—अरिर्मित्रमिति । अरेः अनन्तरोक्ताया विजिगीषोर्भूम्यनन्तराष्टकादिदिग्भागेषु व्यवस्थिताया अरिप्रकृतेः । मित्रमिति तथैव भूम्येकान्तरस्थितम् । अरिमित्रमिति तथैवारेर्भूम्यनन्तरस्यैकान्तरम् । मित्रमित्रमतःपरमिति विजिगीषोर्भूम्येकान्तरं मित्रं, तस्यापिभूम्येकान्तरम् । तथाऽरिमित्रमित्रं चेति विजिगीषोर्भूम्यनन्तरस्यारेर्भूम्येकान्तरमरिमित्रं तस्यापि तथैव मित्रमरिमेत्रं तम चेति विजिगीषोः पुरोऽग्रतः स्मृताः (स्थिताः) प्रोक्ता गुरुभिः ॥ १६ ॥

पश्चाद्यवस्थितानां[10] संज्ञान्तराण्याह—पार्ष्णिग्राह इति । पार्ष्णिग्राहः पश्चात्स्थितो विजिगीषोर्भूम्यनन्तरश्च । आक्रन्दस्तदनन्तर तत्पश्चाद्वर्ती विजिगीषोर्भूम्येकानन्तरः । आसारावनयोः पार्ष्णिग्राहाक्रन्दयोरासारौ मित्रम् । तद्यथा पार्ष्णिग्राहस्य यः आसारः सः पार्ष्णिग्राहासारः । एवमाक्रन्दासार इति पश्चाद्वर्तिनो राजानश्चत्वारः । पुरस्तात् पञ्च, मध्ये विजिगीषुरिति दशराजकमिदं मण्डलं विजिगीषोः सम्बन्धि भवति । आसामेव प्रकृतीनां अग्रपश्चाद्भावभेदेन व्यपदेशभेदः । तत्राग्रवर्तिनोऽरिव्यपदेश एव । पश्चाद्वर्तिनस्तु अरित्वेऽपि पार्ष्णिग्राहव्यपदेशः । "एताः प्रकृतयो मूलं" इति (७।१५६) मनुवचन व्याख्यायां कुल्लूकभट्टः । 'अन्यथाष्टौ समाख्याताः, तद्यथा अग्रतोऽरिभूमीनां मित्रमरिमित्रं मित्रमित्रमरिमित्रमित्रश्चेति । एवञ्च चतस्रः प्रकृतयोभवन्ति, पश्चाच्च पार्ष्णिग्राहः आक्रन्दः पार्ष्णिग्राहासारः आक्रन्दासार इति चतस्रः, एवमष्टौ प्रकृतयो भवन्ति' इति ॥ १७ ॥

[10] पश्चाद्व्यवस्थितानां

अरेस्तु विजिगीषोस्तु[19] मध्यमो भूम्यनन्तरः ।
अनुग्रहे संहतयोः[20] समर्थो व्यस्तयोर्वधे ॥ १८ ।

[19] अरेश्च विजिगीषोश्च [20] र्व्यस्तयोर्निग्रहेप्रभुः

18. The king whose state is contiguous to both the *vijigīṣu* and his *ari* and who is (uncommitted but) capable of showing favour to both when they are united (and in peace) and taking hostile action against either of them if they are disunited (and fall out) is designated as *Madhyama.* (i.e., the *Madhyama* king is more powerful then either of the *vijigīṣu* and his *ari,* but not so when they are consolidated.)

अरिप्रकृतेरेव वलापेक्षं संज्ञान्तरमभिधातुमाह—अरेरिति। अरेर्यातव्यस्यापि भूम्यनन्तरो भूम्यनन्तररूपो रिपुः मध्यमोनाम विजिगीषोरपि रिपुरेव। उभयोरिभावादरित्वमित्रत्वयुक्तः। अनुग्रहे संहतयोः एकीभूतयोस्तयोररिविजिगीष्वोः अनुग्रहे कोशदण्डाभ्यामुपकारे समर्थः प्रभुः, तदपेक्षया हीनशक्तित्वात्। तयोरेव व्यस्तयोर्भिन्नयोः, निग्रहे दण्डने च प्रभुः। एकैको मध्यमस्य युद्धे समर्थो न भवतीति। अत्र 'मधमस्य प्रचारस्य विजिगीषोश्च चेष्टितम्' इति (७।१०५) मनुवचनव्याख्याने कुल्लुकभट्टेनैवं कृतं 'अरिविजिगीष्वोर्यो भूम्यनन्तरः संहतयोरनुग्रहे समर्थो निग्रहे चासंहतयोः समर्थः स मध्यमः तस्य प्रचारं चिन्तयेत्' इत्यादि ॥ १८ ॥

[21]मण्डलत्वे हि चैतेषामुदासीनो बलाधिकः।
अनुग्रहे संहतानां व्यस्तानाञ्च बधे प्रभुः॥ १६।

[21] मण्डलाद्बहिरेतेषामु

19. Beyond the regions of them (the *vijigīṣu, ari* and *madhyama*) lies the state of *Udāsīna* (neutral power) who is more powerful than all of them (individually). He is capable of offering his graces if they are united (i.e. is unable to cope with the consolidated strength of the three), but, if disunited (or when they are in hostile relations among them) of assailing any one of them.

मण्डलाद्वहिरुदासीनप्रचारमभिधातुमाह—मण्डलादिति (मण्डलत्वे हि मूलपाटः)। एतेषां विजिगीष्वरिमध्यमानां मण्डलाद् भूभागाद् वहिः सान्तरः विजिगीषोर्भूम्यनन्तरः उदासीनः नाम वलाधिकः वलापेक्षया भवति। स च संहतानां तेषामरिविजिगीषुमध्यमानां अनुग्रहे साहाय्यदाने, व्यस्तानां तेषां वधे वधदण्डने च प्रभुः पूर्ववत् समर्थः। अत्र 'उदासीन प्रचारञ्च' (७।१५५) इति मनुवचनं, 'न तथा अरिविजिगीषुमध्यमानां यः संहतानामनुग्रहे समर्थो निग्रहे चासंहतानां समर्थः स उदासीनस्तस्य प्रचारं चिन्तयेदिति' तद्व्याख्यानञ्च ॥ १६ ॥

मूलप्रकृतयस्त्वेताश्चतस्रः परिकीर्तिताः।
आहैव मन्त्र[22]कुशलश्चतुष्कं मण्डलं मयः॥ २०।

[22] आहैतत्तन्त्र

20. It is said that the principal components of a *maṇḍala* are four in number (those of *Vijigīṣu, Ari Madhyama* and *Udāsīna*). Maya, the reputed expert in the science of polity, holds that the *maṇḍala* is composed of the four principal sovereigns.

विजिगीष्वरिमध्यमोदासीनानां मूलप्रकृतित्वमाह—मूलप्रकृतयस्त्विति। एताः अनन्तरोक्ताः विजिगीष्वरिमध्यमोदासीनरूपाः, चतस्रः चतुःसंख्याकाः, मूलप्रकृतयः अपरासां प्रकृतीनाममात्यादीनां मूलभूताः प्रकृतयः, कारुण्यप्रयोगसन्निहितत्वात्, प्रकीर्तिताः (परिकीर्तिताः) कथिताः। एतत् चतुष्कं चतुर्भेदभिन्नं मण्डलं तन्त्रकुशलः (मन्त्रकुशलः) नीतितन्त्रप्रवीणः मयः मयनामाचार्यः आह। एतदुक्तं मनुनापि 'एता प्रकृतयो मूलं मण्डलस्य समासतः' इति (७।१५६) ॥ २० ॥

विजिगीषुररिर्मित्रं पार्ष्णिग्राहोऽथ मध्यमः।
उदासीनः पुलोमेन्द्रौ षट्कं[23] मण्डलमूचतुः ॥ २१ ।

---

[23] पार्ष्णिग्राहश्च मध्यमः [23a] मण्डलंषट्कम्

21. In the opinion both Puloma and Indra, the *maṇḍala* includes six rulers viz., *Vijigīṣu*, *Ari*, *Mitra*, *Pārṣṇigrāha*, *Madhyama* and *Udāsīna*.

विजिगीषुरिति विजिगीष्वरिमित्रपार्ष्णिग्राहमध्यमोदासीनानां षणां षड्राजकमण्डलत्वं सन्निहितत्वात षाड्गुण्यव्यापार इति पुलोमा शचीपिता इन्द्रश्च तौ षट्कं षड्भेदं मण्डलमूचतुः ॥ २१ ॥

उदासीनो मध्यमश्च विजिगीषोस्तु[24] मण्डलम्।
उशना मण्डलमिदं प्राह द्वादशराजकम् ॥ २२ ।

---

[24] श्च

22. According to Uśanas. *Udāsīna* and *Madhyama* along with the *maṇḍala* rulers of the *Vijigīṣu* (ten in number) make a *maṇḍala* of twelve rulers in all.

उदासीन इति। विजिगीषोर्दशराजकमण्डलस्योदासीनमध्यमसहितस्य द्वादशराजकमण्डलत्वं। एवमुशना दैत्यगुरुर्मण्डलं द्वादशराजकं प्राह ॥ २२ ॥

द्वादशानां नरेन्द्राणामरिमित्रे पृथक् पृथक्।
षट्त्रिंशत्कमिदं[24a] प्राहुस्ते च ते च पुनर्मयः[25] ॥ २३ ।

[24a] मिति [25] महर्षयः

23. These twelve kings together with an ally and an enemy of each, constitute a *maṇḍala* of thirty six is also held by Maya.

द्वादशानामिति। अनन्तरोक्तानां द्वादशानां नरेन्द्रानां मित्रामित्रैः पृथक्सहेति द्वादशत्रिकाः षट्त्रिंशत्कं मण्डलं। ते च द्वादशनरेन्द्राः ते च तन्मित्रामित्रौ चतुर्विंशतिरिति षट्त्रिंशत्कं मण्डलं पुनरपि मयो मन्यते ॥ २३ ॥

द्वादशानां नरेन्द्राणां पञ्च पञ्च पृथक् पृथक्।
अमात्याद्याश्च प्रकृतीरामनन्तीह मानवाः ॥ २४ ।

24. The Mānavas (the school of Manu) compute five constituent elements of *mantrī* and others (*prakṛtis* or *dravya prakṛtis,* operative organs) for these twelve sovereigns (i.e., 5×12=60 elements).

द्वादशानामिति। द्वादशानां नरेन्द्रानां द्वादशमण्डलनरेन्द्राणां पृथक् पृथक् प्रत्येकं पञ्च पञ्च भवन्ति। अमात्याद्याश्च अमात्यराष्ट्रदुर्गकोशदण्याख्याः प्रकृतीरामनन्ति त्रिगणयन्ति मानवाः मनुशिष्याः ॥ २४ ॥

मौला द्वादश यास्त्वेता[26] ह्यमात्याद्यास्तथा च याः।
सप्ततिश्चाधिका ह्येताः[27] सर्वं प्रकृतिमण्डलम् ॥ २५ ।

---

[26] चैवैता [27] सप्ततिद्व्यधिकाह्येषां

25. The twelve principal sovereigns along with each of their constituent elements of ministers and others (five in number) complete the *prakṛtimaṇḍala* of (12+60=72) seventy two elements.

ततश्च किं भवतीत्याह—मौला इति। मौलाः मूलभूताः द्वादश द्वादशसंख्याकाः, याः स्वामिप्रकृतयः, तथा अमात्याद्याः याश्च गुणकस्वरूपाः पञ्च, ताः एताः, ह्यधिका सप्ततिः द्विसप्ततिसंख्याकाः प्रकृतयः, एतत्सर्वं प्रकृति मरडलम्[11] इति मानवा मन्यन्ते। एतदुक्तं मनुना "अमात्यराष्ट्र दुर्गार्थदण्डाख्याः पञ्च चापराः। प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः॥" (७।१५७) इति। मनु वचन व्याख्याने कुल्लुकभट्टेनैव कृतम्। 'आसां मूलप्रकृतीनां चतसृणां अष्टानां शाखाप्रकृतीनां उक्तानां एकैकस्याः प्रकृतेः अमात्यदेशदुर्गकोशदण्डाख्याः पञ्च द्रव्यप्रकृयो भवन्ति, एताश्च पञ्च द्वादशानां प्रत्येकं भवन्त्यो द्वादशगुणजाताः षष्टिरेव द्रव्यप्रकृतयो भवन्ति, तथा मूल प्रकृतिभिश्चतसृभिः शाखाप्रकृतिभिश्चाष्टाभिः सह संक्षेपतो द्विसप्तति प्रकृतयो मुनिभिः कथिताः' इति ॥ २५ ॥

[11] सर्वप्रकृतिमण्डलमिति

संयुक्तस्त्वरिमित्राभ्यामुभयारिस्तथा सुहृत् ।
मौला द्वादश राजान इत्यष्टादशकं गुरुः ॥ २६ ।

---

26. These twelve kings having a common enemy and a common ally plus an enemy and a friend of each of the latter two, make a *maṇḍala* of (12+2+4=18) eighteen rulers.

बृहस्पतिसम्मतमष्टादशकराजकं मण्डलमभिधातुमाह—संयुक्तस्त्विति। उभयारिः विजिगीषु र्यातव्ययोर्भुम्यनन्तरं, 'एकार्थाभिनिवेशत्वमरिलक्षणमिति' वचनात्। तथा सुहृत् एवं उभयमित्रः, अरिमित्राभ्यां संयुक्तः, षट् राजानो भवन्ति, मौला द्वादश राजानः, एवमष्टादशराजकमण्डलं[12] गुरुर्मन्यते ॥ २६ ॥

[12] राजकं मण्डलं

अष्टादशानामित्येषा[28]ममत्याद्याः पृथक् पृथक् ।
अष्टोत्तरशतं ह्येत[29]न्मण्डलं कवयो विदुः ॥ २७ ।

---

[28] मेतेषाम [29] ह्येतन्

27. The Sages hold that these eighteen rulers along with five constituent elements of each make a total of one hundred and eight elements. (18×5=90+18=108).

ऐतद्राजमण्डलं अष्टोत्तरशतं कवयो मन्यते इत्याह—अष्टादशानामिति । अनन्तरोक्तानां अष्टादशानामेतेषां पृथक् पृथक् एकैकस्य, अमात्याद्याः अमात्यराष्ट्रदुर्गकोशदण्डमित्ररूपाः षट्राजानो भवन्ति । एवं षड्गुणिताष्टादशकं अष्टोत्तर शतंभवति । ह्येतन्मण्डलं कवयोः विदुः ॥ २७ ॥

[30]अष्टादशानामेतेषां मित्रं शत्रुः पृथक् पृथक् ।
चतुः पञ्चाशत्कमिति विशालाक्षः प्रभाषते ॥ २८ ।

---

[30] एतेऽष्टादश चैतेषां शत्रु मित्रे

28. Viśālakṣa says that these eighteen sovereigns each with an enemy and an ally constitute a *maṇḍala* of fifty four rulers (18×2=36+18=54).

चतुःपञ्चाशद्राजकं मण्डलं विशालाक्षसम्मतमभिधातुमाह—अष्टादशानामिति । मतान्तराणि सर्वाणि देशकालप्रजापेक्षया (पर्यपेक्षया) सार्थकानीति द्रष्टव्यम् । अस्मिन् मते अनन्तरोक्तानामष्टादशानामेतेषां प्रत्येकस्य मित्रशत्रु पृथक् पृथक् (अमात्यराष्ट्रदुर्गाणीति वा) त्रयं त्रयं भवति । तेन गुणिताश्चतुःपञ्चाशत् सम्पद्यन्ते । एतद्त्रिगुणितं चतुःपञ्चाशत्कं मण्डलं विशालाक्षः प्रभाषते ॥ २८ ॥

चतुः पञ्चाशतां[31] राज्ञाममात्याद्याः पृथक् पृथक् ।
[32]चतुर्विंशतिसंयुक्तं मण्डलं त्रिशतं स्मृतम्[33] ॥ २९ ।

---

[31] शतो [32] सचतुर्विंशतीदं हि

[33] मतम्

29. These fifty four rulers each with their *prakṛtis* of ministers and others (five in number), make a *prakṛti maṇḍala* of three hundred and twenty four elements (54×5=270+54=324).

चतुर्विंशत्यधिकत्रिशतमण्डलं केषाञ्चिन्मतमाह—चतुःपञ्चाशतमिति । अनन्तरोक्तानां चतुः पञ्चाशतं राज्ञां अमात्याद्याः पृथक् पृथक् एकैकस्य षट्राजानो भवन्ति । तेनैतदपरमन्डलं चतुर्विंशत्यधिकत्रिशतमितं भवतीति ॥ २९ ॥

सप्तप्रकृतिकं युक्तं[34] विजिगीषोररेश्च यत्[35] ।
चतुर्दशकमेवैतन्[36]मण्डलं परिचक्षते ॥ ३० ।

---

[34] यत् [35] तत्

[36] मेवेह

30. The seven component elements of both the *Vijigīṣu* and the *Ari* make a *maṇḍala* of fourteen elements.

अपरे चतुर्दशराजकं मण्डलं मन्यन्त इत्याह—सप्तप्रकृतिकमिति। विजिगीषोररेश्च तत् सप्तप्रकृतिकं राज्यं चतुर्दशभेदभिन्नं, समूहवाचित्वान्मण्डलशब्दस्यैतदभिन्नं, मण्डलं समूहं परिचक्षते। षाड्गुण्य प्रयोगेऽस्य सन्निहितत्वात् ॥ ३० ॥

मण्डल[37]त्रिकमित्याहुर्विजिगीष्वरिमध्यमाः।
मित्रयुक्ताः पृथक् चैतैः षट्कमित्यपरे जगुः ॥ ३१ ।

[37] मण्डलं त्रय

31. The *maṇḍala* of three is composed of the *Vijigīṣu*, the *Ari* and the *Madhyama* rulers. Each of three having an ally make a *maṇḍala* of six rulers according to some.

मण्डलत्रिक षट्कंपक्षावाह—मण्डलत्रिकमिति। मण्डलं त्रयमित्याहुः त्र्यवयवं त्रिविधं मण्डलं। एते (एतैः) विजिगीष्वरिमध्यमाः, पृथक् एकैकशः, मित्रयुक्ताः पृथक् पृथक्मित्रेण षट्कमित्यपरे जगुराचार्या इति ॥ ३१ ॥

अमात्याद्याः प्रकृतयः एकैकस्यैव भूपतेः।
मण्डलं मण्डलविदः षट्त्रिंशत्कं प्रचक्षते ॥ ३२ ।

32. These six rulers (the *Vijigīṣu*, the *Ari* and the *Madhyama* with an ally for each) endowed with their state elements (the ruler and five *prakṛtis*) constitute thirty six elements in all.

षट्त्रिंशत्कपक्षमाह—अमात्याद्या इति। भूपतेः अनन्तरोक्तभूपतिषट्कस्य एकैकस्य अमात्याद्याः प्रकृतयः षट् भवन्ति। तेन षट्त्रिंशत्संख्या सम्पद्यते। मण्डलविदः षट्त्रिंशत्कं मण्डलं प्रचक्षतेति ॥ ३२ ॥

सप्तप्रकृतिकाः सर्वे विजिगीष्वरिमध्यमाः।
एकविंशत्कमित्याहुः[38] परे च नयवादिनः ॥ ३३ ।

[38] एकविंशतिरित्याहुरपरेपरिवादिनं

33. The *Vijigīṣu*, the *Ari* and the *Madhyama* with all the seven elements in each case, are regarded by others to compose a *maṇḍala* of twenty one elements.

एकविंशतिराजकं मण्डलमपरनयवित्सम्मतमित्याह—सप्तप्रकृतिका इति। सप्तानामेकैकस्य विजिगीष्वरिमध्यमाः त्रयो भवन्ति। तेन एकविंशति संख्या भवति ॥ ३३ ॥

चत्वारः पार्थिवा मौलाः पृथङ्मित्रैः सहाष्टकम् ।
अमात्यादिभिरेतैश्च जगत्यक्षरसम्मितम्[39] ॥ ३४ ।

[39] संमिताः

34. The four principal monarchs (*pārthivā maulāh*) of the *maṇḍala* (viz., *Vijigīṣu, Ari, Madhyama* and *Udāsīna*) with their respective allies (one for each) would make eight rulers, and with their respective *prakṛtis* (ministers etc., five in number) plus the ruler himself, would constitute a *maṇḍala* of as many elements as the number or syllables in the *Jagatī* metre (i.e., 48).

अष्टचत्वारिंशत्कं मण्डलमभिधातुमाह—चत्वार इति। मौलाः विजिगीष्वरिमध्यमोदासीनाः चत्वारः पार्थिवाः। पृथङ्मित्रैः सहाष्टकं, पृथक् पृथक् मित्रसहिताः सन्तः अष्टकं भवति। तदेव अमात्यादिभिः पूर्वोक्तैः षड्भिः प्रकृतिभिः सह, षड्गुणितमित्यर्थः। जगत्यक्षरसम्मितं द्वादशाक्षरनिबद्ध जगतीच्छन्दोगताष्टचत्वारिंशदक्षर सम्मितं मण्डलं भवतीति ॥ ३४ ॥

विजिगीषोः पुरस्ताच्च ये पश्चाच्च प्रकीर्तिताः ।
दशकं मण्डलमिदं मण्डलज्ञाः प्रचक्षते ॥ ३५ ।

35. Those well versed in the science of *Maṇḍala* (Polity) speak of a *maṇḍala* of ten rulers with the *vijigīṣu* and the rulers situated in his front and rear sides.

दशराजकमण्डलमभिधातुमाह—विजिगीषोरिति। व्याख्यातपूर्वम् ॥ ३५ ॥

दशानां भूमिपालानाममात्याद्याः पृथक् पृथक् ।
मण्डलं मण्डलविदः षष्टिसङ्ख्य[40] प्रचक्षते ॥ ३६ ।

[40] संख्यं

36. These ten rulers with their respective *prakṛtis* consisting of ministers and others, make a group of sixty units (of *prakṛti maṇḍala*).

षष्टिराजकं मण्डलमभिधातुमाह—दशानामिति। श्लोकव्याख्यानं सुप्रतीतम् ॥ ३६ ॥

[41]अरिमित्रे पुरो नेतुः पश्चिमे चेति पञ्चकम् ।
अमात्याद्याः पृथक् तेषां त्रिंशत्कं परिचक्षते[41a] ॥ ३७ ।

[41] प्राग्गौ द्वौ विजिगीषुश्च पश्चिमौ [41a] चैषां त्रिंशकं हि प्रचक्षते ।

37. The *vijigīṣu* with two (adjacent) rulers in front (viz., *Ari* and *Mitra*) and two (adjacent) rulers in the rear (viz., *Pārṣṇigrāha* and *Ākranda*) would make a *maṇḍala* of five rulers. These endowed with their respective *prakṛtis* of ministers and others, would make a *prakṛti-maṇḍala* of thirty units.

त्रिंशत्कामिथं मण्डलमभिधातुमाह—अरिमित्रे इति। नेतुः विजिगीषोः, पुरः अग्रतः,अरिमित्रे भूम्यनन्तर-भूम्येकान्तरौ द्वौ, पश्चिमे ते च पश्चिमौ च, तथैव भूम्यनन्तर-भूम्येकान्तर संज्ञौ द्वौ, विजिगीषुणा सह पञ्चकं भवति। तेषां पृथक् अमात्याद्याः, षट् भवन्ति। एवं गुणिते त्रिंशत्संख्या सम्पद्यते ॥ ३७ ॥

अरेरप्येवमेवेति दृष्टं दृष्टिमतां वरैः।
पञ्चकं मण्डलं योज्यं[42] त्रिंशत्याञ्च मनीषिभिः ॥ ३८ ।

[42] न्याय्यं त्रितयं च मनीषिणः ; त्रिंशत्कं च

38. The wise (*dṛṣṭimatām*) recognise that the *Ari* is also endowed with a *maṇḍala* of five rulers, and as such a *prakṛtimaṇḍala* of thirty units.

अरेरप्येवमेवेतीति। यथा विजिगीषोस्तथा शत्रोरनन्तरोक्तन्यायेन पञ्चकं त्रिंशत्कं चेति सर्वं योज्यम् ॥ ३८ ॥

द्वे एव प्रकृती न्याय्ये इत्युवाच पराशरः।
[43]अभियोक्ता प्रधानः स्यात्तथा न्याय्योऽभियुज्यते ॥ ३९ ।

[43] अभियोक्तृप्रधानत्वात् तथान्यो योऽभियुज्यते ; अभियोक्त्री प्रधाना स्यात्तयान्या याभियुज्यते।

39. In the opinion of Parāśara the *maṇḍala* in fact consists of two rulers (viz., the *Vijigīṣu* and the *Ari*). The one who leads the attack is the principal party and the other is the party attacked.

पराशरसम्मते द्वे प्रकृती न्याय्ये इत्याह—द्वे एवेति। न्याय्ये न्यायोपपन्ने, इत्युवाच पराशरो मुनिः। अभियोक्ता प्रधानः विजिगीषुरभियोक्ता, तथाऽन्या याऽभियुज्यते यातव्याख्या ॥ ३९ ॥

परस्पराभियोगेन विजिगीषोररेस्तथा।
अरित्वे[44] विजिगीषुत्वे एका प्रकृतिरिष्यते[44a] ॥ ४० ।

[44] अरित्व [44a] प्रकृतिरित्यतः

40. In view of the fact that the *Vijigīṣu* and the *Ari* attack each other, the action of the *Vijigīṣu* and of the *Ari* fuse into one (i.e., hostility), resulting in one *prakṛti* only.

एकायाः प्रकृतेरिष्टत्वमाह—परस्परेति। परस्पराभियोगेन यथा विजिगीषुणा अरिः। एवमरिणाऽपि विजिगीषुरभियुज्यते। एवमेव विजिगीषुरभियोक्ता तथा शत्रुरपि अरिरपि। य एवारिः स एव विजिगीषुरित्यतः कारणात् एकैव प्रकृतिरित्येक-प्रकृतिकमिदं मण्डलमित्यन्ये ॥ ४० ॥

इति प्रकारं[44b] बहुधा मण्डलं परिचक्षते।
सर्वलोकप्रतीतं तु स्फुटं द्वादशराजकम् ॥ ४१ ।

[44b] प्रकारैः

41. In this way various types and forms of the *Maṇḍala* have been enunciated (by different authorities). But it is clear that the *maṇḍala* of twelve rulers is recognised universally.

उपसंहरन्नाह—इतीति। इतिप्रकारं बहुधा मण्डलं परिचक्षते पूर्वाचार्य्याः इत्यर्थः। कामन्दकिना बहुश्रमित्व (श्रुतत्व) ख्यापनार्थं अयं ग्रन्थविस्तरदोषोऽपि न गणितः इति। सर्वलोकप्रतीतं तु स्फुटं द्वादशराजकमिति सुगमम् ॥ ४१ ॥

अष्टशाखं चतुर्मूलं षष्टिपत्रं द्वये स्थितम्।
षट्पुष्पं त्रिफलं वृक्षं यो जानाति स नीतिवित् ॥ ४२ ।

इति मण्डलयोनिर्नाम द्वादशं प्रकरणम्।

---

42. Comparing the *Maṇḍala* to a tree it is said to be possessed with eight branches (a friend or an ally of each of the four cardinal rulers), four roots (*Vijigīṣu, Ari, Madhyama* and *Udāsīna*), and sixty leaves (five *prakṛtis* of each of the twelve rulers of the *maṇḍala*) standing on two trunks (i.e., all actions are either divinely ordained or engineered by human efforts, *daiva* and *puruṣakāra*) and producing six flowers (positive political expedients *Sāḍguṇya* viz., *sandhi, vigraha, yāna, āsana saṁśrayavṛtti and dvaidhībhāva*) and three fruits (loss, preservation and enlargement of territory). He who realises the full import of the simile of the tree in respect of the *maṇḍala* is indeed a true politician (*nītivid*).

एतदेव समर्थयन्मण्डलं वृक्षत्वेन रूपयति—अष्टशाखमिति। चतुर्मूलमिति विजिगीष्वरिमध्यमोदासीनरूपाणि चत्वारि राजमण्डलमूलानि यस्य स तम्। अष्टशाखमिति उक्तानाम् विजिगीष्वादीनां चतुर्णां मूलानां प्रत्येकमरिमित्रे इत्यष्टौ राजानोऽष्टौ शाखा यस्य तम्। षष्टिपत्रमिति विजिगीष्वादि द्वादशनृपानां प्रत्येकममात्याद्याः पञ्च पञ्च प्रकृतय इति द्वादशानामित्यनन्तरोक्त (२५) श्लोकोक्ता याः षष्टिसंख्याः प्रकृतयः ता एव पत्राणि यस्य स तम्। द्वये स्थितमिति दैवं पुरुषकारं चेति द्वयमाधारभूतं तत्र क्षेत्रभूते स्थितम्। षट्पुष्पमिति सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षड्गुणाः सन्ति ते पुष्पाणि यस्य स तम्। त्रिफलमिति उक्तषाड्गुणस्य फलभूता उत्तमा मध्यमा अवराः क्षयः स्थानं वृद्ध्यादयो ये लाभास्तान्येव फलानि यस्य स तम्। एवं मूलमण्डलवृक्षं यो जानाति स नीतिविदिति ॥ ४२ ॥

इति द्वादशं मण्डलयोनिप्रकरणम्।

पार्ष्णिग्राहस्तथाऽऽसारः[45] शत्रुमित्रे प्रकीर्तिते।
आक्रन्दोऽथ तदासारो विजिगीषोरुदाहृते ॥ ४३ ॥

[45] स्तदासारः

Prakarana 13.
Mandalaśodhana (carita)
(Purification of the *mandala* by necessary expedients)

43. The *Pārṣṇigrāha* and his *āsāra* (*Pārṣṇigrāhāsāra*) are known to be friends of the *Ari* (enemy of the *Vijigīṣu*) and the *Ākranda* and his *āsāra* (*Ākrandāsāra*) are friends to the *Vijigīṣu*.

मण्डले षाड्गुण्यप्रयोगमभिधातुमाह—पार्ष्णिग्राह इति। विजिगीषोर्यातव्यं प्रति गच्छतः पार्ष्णिग्रहणेन विघ्नविधायी[13] पृष्ठतो भूम्यनन्तरः[13a]। तदासारः (तथाऽऽसारः मूलम्) पार्ष्णिग्राहस्यैव भूम्येकान्तरं मित्रम्। एतौ द्वावपि शत्रुमित्रे प्रकीर्तिते। एते शत्रोर्यातव्यस्य मित्रे भवतः। आक्रन्दः पार्ष्णिग्राहस्य भूम्यनन्तरः, विजिगीषुणा पार्ष्णिग्राहविग्रहणार्थं[14] आक्रन्द्यते आहूयते इति। तदासारः आक्रन्दस्य भूम्येकान्तरः आपदि परित्रानार्थमासरतीति। द्वावेतावपि विजिगीषोः यातव्यं प्रति (गच्छतः) उदाहृते। मित्रे भवतः इत्यनुवर्तते ॥ ४३ ॥

[13] विघ्नविघाताय [13a] भूम्यन्तरः

[14] निग्रहणार्थं

पुरो यायाद् विगृह्यैव मित्राभ्यां पश्चिमावरी।
पश्चिमाविव पूर्वाभ्यामरिं तन्मित्रमेव च ॥ ४४ ॥

44. So when he (the *Vijigīṣu*) considers marching out (against the enemy) on the front side, he should engage friends of the *Ari* on the rear of the *Vijigīṣu* (the *Pārṣṇigrāha* and his *āsāra*) in conflict with his own friends (the *Ākranda* and the *Ākrandāsāra*). Similarly (in case of a rear-ward march) he should foment conflict on his front side between the *Ari* and the *Arimitra* and his own *Mitra* and *Mitramitra*.

पुरोयायादिति। पुरोऽग्रतो यायात् यातव्यं प्रति, विगृह्यैव विग्रहं कारयित्वा। मित्राभ्यां आक्रन्दतदासाराभ्याम्। पश्चिमौ पृष्ठस्थौ अरी पार्ष्णिग्राह तन्मित्रे। पश्चिमाविव पृष्ठस्थावरीव, पूर्वाभ्यां मित्र-मित्रमित्राभ्याम्। अरिं यातव्यम्। तन्मित्रमपि। अरिमित्रमपि यातव्यं प्रतियायादित्यर्थः विग्रहं कारयित्वेत्यनुवर्तते ॥ ४४ ॥

अरिमित्रस्य मित्रन्तु कृतकृत्येन भूयसा ।
संस्तभ्योभयमित्रेण पश्चाद्गच्छेन्नरेश्वरः ॥ ४५ ॥

45. Before undertaking a march (against the enemy), the king (*Vijigīṣu*) should neutralise the friend of the enemy's friend (the *Arimitra-mitra*) with the aid of a common friend (common to both the *Vijigiṣu* and the *Ari,* possibly *Madhyama* or *Udāsīna,* more powerful than either), winning him over by sufficient gifts and services.

किञ्च, अरिमित्रस्येति। अरिमित्रस्य यातव्यमित्रस्य, मित्रं यत् तस्य पुरोवर्ति तच्च कृतकृत्येन साधित महोपकारेण, भूयसा उपचितशक्तिना, संस्तभ्य निरुद्धविरुद्धचेष्टं कृत्वा गन्तव्यमित्रमित्रं स्तम्भितं कृत्वा, उभयमित्रेण उदासीनेन। विशेषेण किमित्यसौ स्तम्भयति इति चेत् विजिगीषुणा कृतकृत्यः कृत इत्येव कृत्वा, पश्चाद्गच्छेन्नरेश्वरः। नान्येतीत्यर्थः ॥ ४५ ॥

आक्रन्देनात्मना चैव पार्ष्णिग्राहं प्रपीडयेत् ।
आक्रन्देन तदासारमाक्रन्दासारभाजिना[46] ॥ ४६ ॥

[46] भागिना

46. With the assistance of the *Ākranda* he (the *Vijigīṣu*) should molest the *Pārṣṇigrāha,* and his (*pārṣṇigrāha's*) *āsāra* should be dealt with similarly with the help of the *Ākranda* and the *Ākrandāsāra.*

एतदेव समर्थयन्नाह—आक्रन्देनेति। आक्रन्देन अनन्तरोक्तेन, आत्मना च, पार्ष्णिग्राहं मध्यस्थं प्रपीडयेत्। आक्रन्दासारभाजिना, आक्रन्देन तदासारं पार्ष्णिग्राहासारम् आक्रन्दासारं भजति य आक्रन्दस्तेन पीडयेदित्यनुवर्तते ॥ ४६ ॥

मित्रेणैवात्मना[47] चैव कुर्वीतोद्धरणं रिपोः ।
मित्रेण हि समित्रेण[47a] रिपुमित्रं प्रपीडयेत् ॥ ४७ ॥

[47] मित्रेण चात्मना ; स्वमित्रेणात्मना [47a] मित्रेण सस्वमित्रेण

47. (In the same way on the front side) the *Ari* (the enemy) should be molested by joint endeavour of himself and of the *Mitra* (ally) and the enemy's friend (*Arimitra*) by the *Mitra* in association with the latter's friend (*Mitramitra*).

पुरस्ताद्विधेयमभिधातुमाह—मित्रेणेति (स्वमित्रेणेति)। मित्रेण पुरस्तादवस्थितेन, आत्मना स्वेन, एव च रिपोः, यातव्यस्य, उद्धरणं उच्छेदनं कुर्वीत। मित्रेण सस्वमित्रेण स्वीयमित्रेण सह वर्तमानेनारि रिपुमित्रं यातव्यमित्रं प्रपीडयेत् ॥ ४७ ॥

अरिमित्रस्य मित्रस्य पीडनं पृथिवीपतिः ।
कुर्वीतोभयमित्रेण मित्रमित्रेण चैव हि ॥ ४८ ॥

48. The *Arimitramitra* (the friend of enemy's friend) should be tormented with the help of a common friend (*Madhyama* or *Udāsīna*) in association with the *Mitramitra*.

अपरञ्च, अरिमित्रस्येति। अरिमित्रस्य मित्रस्य यातव्यमित्रमित्रस्य प्रपीडनं पृथिवीपतिः कुर्वीत। उभयमित्रेण पूर्वोक्तेन, मित्रमित्रेण विजिगीषु-मित्रमित्रेण चैव हीति प्रतीतमवशिष्टम् ॥ ४८ ॥

अनेन क्रमयोगेन विजिगीषुः सदोत्थितः।
पीडयेदहितं शत्रुं मित्राणामन्तरान्तरां ॥ ४९ ॥

49. Following the order (prescribed above) the *Vijigiṣu* with relentless endeavour should suppress the evil-designing enemy along with the latter's allies situated in intervening regions.

किञ्च, अनेनेति। अनेन अनन्तरोक्तेन क्रमयोगेन विजिगीषुः सदोत्थितः सर्वदोद्यमशाली, अहितं सर्वदापकारिणं शत्रुं भूम्यनन्तरं। मित्रानामन्तरान्तरां मित्रभूम्यनन्तरं शत्रुमित्रमित्यर्थः, पीडयेत् ॥ ४९ ॥

पीड्यमानो ह्युभयतः सदोद्युक्तैर्मनीषिभिः।
रिपुरुच्छेदमायाति तद्वशे चावतिष्ठते[48] ॥ ५० ॥

[48] वावतिष्ठते

50. (Constantly) oppressed by energetic and wise rulers from both sides (the front and the rear, pincers drive) the enemy is either exterminated or brought under submission.

रिपुपीडनेफलमाह—पीड्यमान इति। पीड्यमानो हि उभयतः सन्दंशन्यायेन, एकतो विजिगीषुणा, अन्यतो विजिगीषुमित्रैः, क्रमोत्क्रमं व्यवस्थितैः, सदोद्युक्तैर्मणीषिभिः प्राज्ञैः, पीड्यमानः रिपुरुच्छेदमायाति उच्छिन्नो भवति, तद्वशे विजिगीषुवशे वावतिष्ठते इति ॥ ५० ॥

सर्वोपायेन कुर्वीत[49] सामान्यं मित्रमात्मसात्।
भवन्ति मित्रादुच्छिन्नाः सुखच्छेद्या हि शत्रवः[49a] ॥ ५१ ॥

[49] सर्वोपायैः प्रकुर्वीत [49a] विद्विषः

51. The *Vijigiṣu* by all possible means should win over and absorb (within his dominion) the kingdom of common allies (of both his enemies and his). The liquidation of the allies makes the enemy easily destroyable.

स्वपरोभयमित्रस्यात्मसात्करणार्थमाह—सर्वोपायैरिति (सर्वोपायेन इति मूलः)। सर्वोपायैः सामप्रदानादिभिः। सामान्यं शत्रोरात्मनः साधारणं मित्रं उक्तलक्षणं, आत्मसात् आत्मन एवासाधारण कुर्वीत। हि यस्मात् सुखोच्छेद्याः निःसहायत्वादित्यर्थः, शत्रवः मित्रात् उच्छिन्नाः विश्लेषिताः, भवन्तीति ॥ ५१ ॥

कारणेनैव[50] जायन्ते मित्राणि रिपवस्तथा।
रिपवो येन जायन्ते[50a] कारणं तत् परित्यजेत् ॥ ५२ ॥

[50] कारणैस्त्वैव [50a] जायेरन्

52. Friendship and enmity are born out of relevant causes (promoting them). Hence such causes as lead to the development of hostility should be shunned (avoided).

अरेरपि मित्रतापादनार्थमभिधातुमाह—कारणैरिति (कारणैस्त्वैवेति)। कारणैः हेतुभिरेव जायन्ते मित्राणि रिपवस्तथा। उपकाराख्यकारणैर्मित्राणि जायन्ते। अपकाराख्यकारणे शत्रवो जायन्ते। उपकारापकारौ हि लक्ष्यं लक्षणमेतयोरिति वचनात्। रिपवो येन जायेरन् कारणं तत् परित्यजेदिति ॥ ५२ ॥

प्राधान्येन हि सर्वत्र सर्वाः संसर्जयेत्[51] प्रजाः।
तासां संसर्जनाद्[52] राजा सर्वाङ्गीं श्रियमश्नुते ॥ ५३ ॥

[51] संवर्जयेत्, संरञ्जयेत्
[52] संवर्जनाद्, संरञ्जनाद्

53. The king (*Vijigīṣu*) should take suitable measures to satisfy all his subjects throughout the dominion (including the newly acquired territories) and win their hearts over (by providing them with all possible amenities). Because when the king enjoys love and devotion of his subjects, no doubt he secures all round prosperity.

विजिगीषुर्न केवलं मुख्यानेव जगति मित्रत्वेन स्थापयेत् क्षुद्रकानपीति दर्शयन्नाह—प्राधान्येनेति। प्राधान्येन मुख्यतया, सर्वत्र पत्तनग्रामादिषु दशसु[15] स्वीय जनपदे यथायोगं परकीयजनपदेऽपि सर्वाः च प्रजाः समस्ता वर्णाश्रमादिलक्षणाः, संसर्जयेत् सामादिभिरानुरूप्येणानुरञ्जयेत्। अनुरागो हि सार्वगुण्यमिति वचनात्। तासां संसर्जनात् सर्वप्रजाजनानुरञ्जनात् राजा विजिगीषुः सर्वाङ्गीं सर्वावयवसम्पन्नां श्रियं विभूतिं अश्नुते भुनक्ति[15a] ॥ ५६ ॥

[15] सर्व्वत्र स्थानीय-द्रोणमुख कर्वट पत्तनादि दशग्राम्यादिषु

[15a] श्रियो हेतुत्वादुपचारात् पृथिवी श्रीरूपचर्यते। तस्याश्चाङ्गानि चतुः समुद्रावसानवर्तिनो विषया एवं भूतानि सर्वाण्यप्यङ्गानि यस्यास्तां श्रियमश्नुते। व्याप्नोति चक्रवर्तित्वेनाधिपतिर्भवतीत्यर्थः।

[53]दूरेचरान्माण्डलिकान् स्थानदुर्गनिवासिनः।
मित्रीकुर्वीत तत्प्राणाः साधयन्तीह मण्डलम् ॥ ५४ ॥

[53] दूरेचरान्मण्डलिन (माण्डलिन) स्थयान्यान् दुर्गवासिनः।

54. The *Vijigīṣu* in order to achieve predominance in the *maṇḍala* (inter-statal circle) should cultivate cordiality with (independent) gover-

nors (*māṇḍalikas*) of distant regions (frontier states beyond his own dominion) and other captains or governors of forts (may be of forest forts).

विजिगीषोर्मण्डलसाधनं समर्थयन्नाह—दूरेचरानिति। दूरेचरान् अतिव्यवहितान्, मण्डलिनो (माण्डलिकानितिमूलः) अनन्तरोक्तद्वादशराजकादीन् तथाऽन्यान् बहिर्भूतांश्च दुर्गवासिनः आटविकान् तथाऽरिमित्रादीनपि मित्रीकुर्वीत। यतः तत्प्राणाः मित्रप्राणाः (तदवष्टम्भा राजानः) इह जगति, मण्डलं अनन्तरोक्तं साधयन्तीत्यर्थः ॥ ५४ ॥

चलेत्सदोर्जितबलो[54] मध्यमो विजिगीषया।
एकीभूयारिणा तिष्ठेदशक्तः सन्धिमानमेत्[55] ॥ ५५ ॥
विजिगीषत्युदासीने[56] सर्वे[57] मण्डलिनः सह।
सर्वधर्मेण[58] तिष्ठेयुः प्रणमेयु[59]रशक्तयः ॥ ५५।१ ॥*
समुत्पन्नेषु कृच्छ्रेषु सम्भूय स्वार्थसिद्धये।
आपत्प्रतरणं सम्यक् सर्वधर्म[60] इति स्मृतः ॥ ५५।२ ॥*

[इदं श्लोकद्वयं मूल पुस्तके नास्ति]

[54] चलेच्चेदूर्जित [55] सन्धिना नमेत्
[56] उदासीने विचलति [57] सर्व्वे
[58] सङ्घधर्मेण [59] सन्नमेयु
[60] सङ्घधर्मइतिस्थितिः ॥

* Ślokas 55/1 and 55/2 are not in the B.I. text but are included as *kroḍa* in the *Tīkā*

55. If the *Madhyama* ruler (apparently more powerful than the *Vijigīṣu* and the *Ari* separately) intent on conquest, undertakes a march (against the *vijigīṣu*), he should be resisted unitedly by the *Vijigīṣu* and the *Ari*. But if the united stand on the latter's part is not possible, the *Vijigīṣu* should submit to make peace with the *Madhyama*.

55/1 When the *Udāsīna* ruler (the most powerful power in the circle) moves out (intent on conquest), the *Vijigīṣu* with all the other rulers of the *Maṇḍala* (i.e., pooling all their resources) should put up organised resistance unitedly, failing which, he should surrender to him.

55/2 When a critical situation develops, all endeavour should be directed to eradicate the difficulties collectively by all the rulers (of the *Maṇḍala*) in their own interest. This is what is called the *Saṁghadharma* (the law of collective existence).

सर्वधर्म(सङ्घधर्म्म)मभिधातुमाह—चलेदिति। ऊर्जितबलः शक्तित्रयसम्पन्नः मध्यमः अनन्तरोक्तः

वैजिगीष्या, चलेत् अभियायात् विजिगीषुः, तदा तदानीं, एकीभूय मिलित्वा, अरिणा यातव्येन सह कृतसन्धिस्तिष्ठेत्। अशक्तश्चेत् सन्धिना हेतुभूतेन नमेत् कोशादिभिरुपनमेत् ॥ ५५ ॥

उदासीने विजिगीषति मण्डलिनां सर्वधर्मेणावस्थानमाह—विजिगीषत्युदासीन इति। उदासीने वैजिगीष्या विजिगीषति[16] सति, सर्वे मण्डलिनः, विजिगीष्वरिमध्यमाः, सह मिलित्वा सर्वधर्मेण (सङ्घधर्मेण), वक्ष्यमानलक्षणेन, सह तिष्ठेयुः। अशक्ताः, प्रणमेयुः,[16a] आत्मरक्षार्थम् ॥ ५५ । १ ॥

उपक्रमेण सन्धिधर्मं (सङ्घधर्मं) व्याख्यातुमाह—समुत्पन्नेष्विति। कृच्छ्रेषु महाव्यसनेषु, समुत्पन्नेषु, सम्भूय एकीभावमुपेत्य, स्वार्थसिद्धये आपत्प्रतरणं सम्यक् कुर्वन्ति यत्तदिति वाक्यशेषः। सर्वधर्ममिति स्मृतम्। तत्सर्व(सङ्घ)वृत्तमितिस्मृतम् ॥ ५५ । २ ॥

[16] विचलति [16a] सन्नमेयुरशक्ताः

सहजः कार्यजश्चैव द्विविधः शत्रुरुच्यते[61]।
सहजः स्वकुलोत्पन्न इतरः कार्यजः स्मृतः ॥ ५६ ॥

---

[61] शत्रुरिष्यते

56. Enemies are of two kinds viz., *Sahaja* (natural or a born enemy), one born in the same family or a blood relation, (one whose kingdom is immediately proximate is also designated as a *sahaja* enemy or *prakṛtyamitra*), and the *Kāryaja*, whose hostility is derived from acts (or *kṛtrima*).

अरिप्रकारकथनपूर्वकं तत्र विजिगीषोर्वृत्तमभिधातुमाह—सहज इति। सहजः स्वकुलोत्पन्नो दायादादिः। [17]कार्यजः एकार्थाभिनिवेशित्वात् कार्ये जायते[17a] इति। द्विविधः शत्रुरुच्यते ॥ ५६ ॥

[17] इतर कार्य्यजः [17a] कार्येण जायत

उच्छेदापचयौ[62] काले पीडनं कर्षणन्तथा[63]।
इति विद्याविदः प्राहुः शत्रौ वृत्तं चतुर्विधम् ॥ ५७ ॥

---

[62] उच्छेदनं चापचयः [63] कर्शनं ; कर्त्तनं तथा

57. Destruction of enemy territory, forcing loss or waste of his powers, taking oppressive and harassing measures against him and his subjects, these are the four expedients to be adopted suitably by the *Vijigīṣu* against his enemy, as recommended by experts in the science of polity.

शत्रौ विजिगीषुवृत्तस्य चातुर्विध्यमभिधातुमाह—उच्छेदापचयाविति। उच्छेदः स्वभूमेः परित्यजनं (परित्याजनं), अपचयः शक्तिभिर्वियोजनं, पीडनकर्शने[18] वक्ष्यमाण लक्षणे, काले अनुकूलसमये, इति एतत्, विद्याविदः दण्डनीतिज्ञाः, शत्रौ विषयभूते वृत्तं शीलं, चतुर्विधं चतुःप्रकारं विजिगीषोरित्यर्थः, प्राहुः ॥ ५७ ॥

[18] पीडनं कर्षणमितिमूलम्

उच्छेदनं तु विज्ञेयं सर्वप्रकृतिनाशनम् ।
नाशो युग्यनरादीनां[63a]श्चुधैरपचयः स्मृतः ॥ ५७।१ ।*

[63a] योग्यनरादीनां

*मूलश्लोक उपाध्याय-निरपेक्षाया मते नास्तीति भाति

Destruction of enemy territory (*ucchedanam*) which means impaling of all the component elements (*prakṛtis*) of his state, and wasting of his powers (*apacaya*) or loss of means of transport and of the leading and influential men of his kingdom (*yugya-narādīnāṁ*) by defection and migration.

रेचनं कोशदण्डाभ्यां महामात्रवधस्तथा ।
एतत्कर्षण(कर्शन)मित्याहुराचार्याः पीडनं परम् ॥ ५८ ॥

58. Creation of disaffection and dissatisfaction in the enemy's dominion by (covert) uses of *kośa* and *daṇḍa* (i.e., by showering bounties among the subjects as well as by coercing them) and also by (secret) assassination of important state officials (*mahāmātras*) are oppressive and harassing measures (to be adopted by the *Vijigīṣu*).

कर्शनपीडनयोः स्वरूपमभिधातुमाह—रेचनमिति । रेचनं कोशदण्डाभ्यां, कोशदण्डतनूकरणं । महामात्रः प्रधानः । [कर्षणं तन्मण्डले दाहविलोपादिकरणमिति ।] परं कर्शनादधिकं महामात्रबधादिकमिति । स्पष्टमन्यत् ॥ ५८ ॥

समाश्रयविहीनो वा दुर्बलं वा समाश्रितः ।
शक्योऽरिः सम्पदा युक्त उच्छेत्तुं भूम्यनन्तरः ॥ ५९ ॥

59. Action should be taken to exterminate the enemy (*ari*) of the adjacent territory (*prakṛtyamitra*) if he is devoid of (adequately strong) fortifications, whose allies are weak themselves and enemies strong.

उच्छेद्यलक्षणमभिधातुमाह—समाश्रयविहीन इति । समाश्रयविहीनः दुर्गमित्रबलरहितः[10] । दुर्बलं वा समाश्रितः शक्योऽरिसम्पदा युक्तः, भूम्यनन्तरः, विजिगीषुभूम्यनन्तर इति अरोविशेषणं, उच्छेत्तुमित्यर्थः ॥ ५९ ॥

[10] समाश्रयो दुर्गं बलीयस्तद्विहीनस्तद्रहितः ।

लुब्धः क्रुरोऽलसोऽत्यन्तप्रमादी भीरुरस्थिरः ।
मूढो योगवमन्ता च सुखोच्छेद्य रिपुः सदा[64] ॥ ५९ । १ ॥*

[64] सुखोच्छेद्यो रिपुस्तथा

· 59/1. The enemy who is avaricious, crooked, lazy, addicted to passions, cowardly, restless or prone to indecisions and wrong decisions due ignorance, is always easily exterminable.

यथमैररिः सुखोच्छेद्योभवति तानाह—लुब्ध इति। एवम्भूतयाऽरिसम्पदा। युक्तो रिपु सदा सुखोच्छेद्यो भवति ॥ ५६ । १ ॥

* The Śloka appears in the Ṭikā as *kroḍa* and not in the B.I. text,

कर्षणं (कर्शनं) पीडनं काले कुर्वीताश्रयमानिनः ।
समाश्रयं दुर्गमाहुर्मित्रं वा साधुसम्मतम् ॥ ६० ॥

---

60. An enemy boasting of the strength of his protective resources may be harassed and oppressed by the *Vijigīṣu* in opportune times, keeping in mind the fact that forts and allies are, according to the wise, the really dependable sources.

कर्शनपीडनयोर्विषयमभिधातुमाह—कर्शनमिति। कर्शनं तनूकरणं, पीडनं कर्शनादप्यधिकदुःखोत्पादनं महामात्रवधादिकम्। काले सर्वथानुकूले (देशकालाद्यनुकूलसमये), कुर्वीत विजिगीषुरित्यर्थः। आश्रयमानिनः समाश्रयाभिमानिनः। समाश्रयं दुर्गमाहुर्मित्रं वा साधुसम्मतमिति स्पष्टम् ॥ ६० ॥

विभीषणस्य सोदर्यस्तथा सूर्यसुतस्य च ।
सर्वतन्त्रापहारित्वात्तथोच्छेद्यो निजो रिपुः ॥ ६१ ॥

---

61. The natural enemy (*Sahaja,* born in the same family or collateral) who usurps all powers and resources, deserves extirpation. The cases of Vibhīṣaṇa and the son of the Sun God, Sugrīva (whose such natural enemies were Rāvaṇa and Vālī respectively) may be cited as examples.

पूर्वोक्तः सहजो रिपुः सर्वथा उच्छेद्य इत्येवं दर्शयन्नाह—विभीषणस्येति। विभीषणस्य सोदर्यो रावणो यथोच्छेद्यः, सूर्यसुतस्य सुग्रीवस्य सोदर्यो वाली सहजो रिपुः (यथोच्छेद्यः)। सर्वतन्त्रापहारित्वात्, मन्त्रराजादिकं सर्वतन्त्रं तदपहरणशीलत्वात् हेतोः,[20] निजोरिपुः (तथा) उच्छेद्य एवेति ॥ ६१

[20] तन्त्रमन्त्र सज्यं तत्सर्वमपहर्तुं शीलमिति तस्माद् हेतोः

छिद्रं कर्म च[58] वित्तञ्च विजानाति निजो रिपुः ।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः ॥ ६२ ॥

---

[58] मर्म च वीर्यञ्च स जानाति

62. Conversant with the lapses, policies and military resources, the natural enemy brings about complete destruction of the kingdom, as the internal fire burns down a withered tree.

सोदर्यः कथमुच्छेद्यो भवतीति दर्शयन्नाह[21]—छिद्रमिति। छिद्रं रक्षाशैथिल्यादि। मर्म (कर्मचेतिमूलम्) यत्राभियुक्तमात्रो म्रियते। वीर्यं (वित्तमितिमूलम्) बलवत्तां च विजानाति निजो रिपुः सोदर्यादिः। असौ अन्तर्गतः अन्तःस्थितः, दहति शुष्कं वृक्षमिवानलः इति। तस्मादुच्छेद्य एवेति ॥ ६२ ॥

[21] कस्मात् समुच्छेद्य इत्यत आह

वर्तते पक्षपातेन मित्रं यदुभयात्मकम्।
वज्रीव हि त्रिशिरसं तदुच्छिन्द्यात्कृतत्वरः ॥ ६३ ॥

---

63. In the case of open partiality (towards the enemy) by a common friend, the latter should be promptly liquidated, as Triśiras (a god, friendly to the Asuras) was killed by the weilder of the thunderbolt, i.e., Indra the lord of the Gods.

न केवलं शत्रुविशेष एवोच्छेद्यः, मित्रविशेषस्योच्छेद्यताऽभीष्टेति दर्शयन्नाह—वर्तते इति। यत् मित्रं, उभयात्मकं अर्थादरिविजिगीष्वोर्मध्यवर्ति भूत्वा, अरिपक्षपातेन वर्तते विश्वस्ते विजिगीषौ अपकरोमीति कृताध्यवसायं भवति। तदुच्छिन्द्यात् वज्रीव त्रिशिरसं इन्द्र इव त्रिशिरोनामकदेवविशेषं। कृतत्वरः अकृतविलम्बः (शीघ्रतरमित्यर्थः)। त्रिशिरा नाम देवविशेषो दानवारिः इन्द्रस्यामित्रं, स दानवाधिपत्ते सुतरां स्निग्ध इति वज्रिणा निहत इति पौराणिकी कथा ॥ ६३ ॥

बलिना विगृहीतस्य द्विषतः[66] कृच्छ्रवर्तिनः।
कुर्वीतापचयं[66a] शत्रोरात्मोच्छित्तिविशङ्कया ॥ ६४ ॥

---

[66] जिगीषुः ; द्विषता [66a] कुर्वीतोपचयं

64. In the event of an invasion by a stronger foe, apprehending total annihilation, the *Vijigīṣu* should provide resources (in the form of land or money or both) to the invader (in order to pacify him).

कार्यवशादरेरप्युपचयो विधेय इति दर्शयन्नाह—बलिनेति। बलिना बलवता, द्विषता शत्रुणा, विगृहीतस्य विग्रहकारिणः, कृच्छ्रवर्तिनः सङ्कटापन्नस्य, शत्रोः, उपचयं (अपचयं मूलपाठे) कुर्वीत, आत्मोच्छित्तिविशङ्कया भूम्यनन्तरादरावुच्छिन्ने बलिर्भूम्यन्तरो भवति बलवत्वात्। विजिगीषुमप्युच्छिन्द्यात् इति शङ्कया, भूम्यनन्तरत्वेऽरावप्युपचयः कार्यं एवेति ॥ ६४ ॥

यस्मिन्नुच्छिद्यमाने तु रिपुरन्यः प्रवर्तते।
न तस्योच्छित्तिमन्विच्छेत्[67] कुर्वीतैनं स्वगोचरम् ॥ ६५ ॥

---

[67] मातिष्ठेत्

65. If on the liquidation of an enemy there is a chance of breaking out of hostility with another enemy (presumably a stronger one), the *Vijigīṣu* should not go in for that (i.e., liquidate his territory), but he should bring it under his control (by making it a dependency).

एतदेव समर्थयन्नाह—यस्मिन्निति। यस्मिन् भूम्यनन्तररूपेऽरौ, उच्छिद्यमाने रिपुरन्यः प्रवर्तते, न तस्योच्छित्तिमन्विच्छेत् (मातिष्ठेत्)। कुर्वीतैनं स्वशत्रुं स्वगोचरं कुर्वीत, भृत्यभावे स्थापयेदिति ॥ ६५ ॥

वंशागतो[68] रिपुर्यस्तु विचलेद् दुरवग्रहः।
तस्य संशमनायाशु[68a] तत्कुलीनं समुन्नयेत् ॥ ६६ ॥

[68] वंशं गतो रिपुर्यश्च विचलेद् दुस्सग्रहः [68a] संयम

66. If a natural enemy (of the same family) is found to be indulging in wrongful actions and is implacable (normally), (i.e., by persuasion and gifts or *sāma* and *dāna*), the *Vijigīṣu* should promptly incite another of the same family against him (so that he may be dissuaded from his wrongful motive).

अपरञ्च, वंशागत इति। वंशागतः वंशानुगतः स्वकुलप्रभवः, यो रिपुः विचलेत् एकार्थाभिनिवेशित्वात् व्यभिचरति, यतः सः दुरवग्रहः कथमप्यात्मसात्कर्तुं न याति, तस्य संशमनाय तद्दमनार्थं, तत्कुलीनं तद्दायादं, आशु समुन्नयेत् सत्वरमुत्थापयेत्। अयमेवैतत् प्रतीकार इति ॥ ६६ ॥

विषं विषेण व्यथते वज्रं वज्रेण भिद्यते।
गजेन्द्रो दृष्टसारेण गजेन्द्रेणैव बध्यते ॥ ६७ ॥

67. Poison is counteracted by poison (of the same potency), a piece of diamond is pierced by a similar piece of diamond, a tusker elephant of strong physique is killed by another of similar strength.

किञ्च, विषमिति। विषं विषेण स्थावरविषेण, व्यथते[22] निर्वीर्य्यं[23] क्रियते नान्येन, वज्रं वज्रेणैव भिद्यते नान्येन। गजेन्द्रो दृष्टसारेण परिचितबलेन गजेन्द्रेणैव वध्यते, पोषितेनेत्यर्थः नान्येन ॥ ६७ ॥

[22] च्यवते [23] नैर्वीर्य्यं

मत्स्यो मत्स्यं[69] समादत्ते ज्ञातिर्ज्ञातिमसंशयम्।
रावणोच्छित्तये रामो विभीषणमपूजयत् ॥ ६८ ॥

[69] मत्स्यमुपादत्ते

68. Fish devours fish. So also unsuspected collaterals or relatives cut each other's throat. With that in view Rāma honoured Vibhīsana in order to exterminate Rāvaṇa.

अपरञ्च, मत्स्य इति। विभीषण तत्सूचितमर्मप्रहारैरावण उच्छिन्न इति भावः। अवशिष्टं प्रतीतमिति ॥ ६८ ॥

यस्मिन्मण्डलसङ्क्षोभः कृते भवति कर्मणि।
न तत् कुर्यात्तु[70] मेधावी प्रकृतीरनुरञ्जयेत् ॥ ६९ ॥

[70] कुर्वीत

69. An intelligent *Vijigiṣu* should not indulge in any action that may lead to agitation (against him) in the *Maṇḍala* (the inter-statal circle of rulers). (On the other hand by his beneficient actions) he should satisfy the *prakṛtis* (the component elements) of all of them, (particularly of the friendly powers).

द्वादशमण्डलाराधनायाह—यस्मिन्निति। यस्मिन् कर्मणि कृते मण्डलसंक्षोभः मण्डलस्य द्वादश राजकरूपस्य संक्षोभोऽमर्षादक्षमा भवति, मेधावी विजिगीषुः, तन्न कुर्यात्। प्रकृतीः एकादशापि राजप्रकृतीः, तदीयामात्यादिकाश्च प्रकृतीरनुरञ्जयेत्। एवं कृते सकलमण्डलेष्टो भवति नेता ॥ ६९ ॥

साम्ना दानेन मानेन प्रकृतीरनुरञ्जयेत्।
आत्मीया भेददण्डाभ्यां परकीयाश्च दारयेत्[71] ॥ ७० ॥

[71] परकीयास्तु भेदयेत्

70. For the purpose of rendering satisfaction to his own *prakṛtis* and also to his allies, the *Vijigiṣu* should adopt the means of conciliation, gifts and bestowal of honour. But among the *prakṛtis* of his enemies (including their allies) he should arrange for sowing dissensions (in order to weaken them) and also of crushing them by applying his financial and military power.

स्वपरविभागेन प्रकृतिषूपाय प्रयोगमाह—साम्नेति। आत्मीयाः मित्रादिकाः प्रकृतीः, साम्ना सन्धिना, दानेन मानेन यथोचितपूजया, सर्वा अनुरञ्जयेत्। परकीयास्तु शत्रु-तन्मित्रादिकाः प्रकृतीः, भेददण्डाभ्यां दारयेत् हन्यादिति ॥ ७० ॥

आकीर्णं मण्डलं सर्वं मित्रैररिभिरेव च।
सर्वः स्वार्थपरो लोकः कुतो मध्यस्थता क्वचित् ॥ ७१ ॥

71. The whole *Maṇḍala* (of twelve rulers) is composed of hostile and friendly powers and all of them are selfish (i.e., looking for their own interests). (As friendliness and hostility depend upon selfish motives, such feelings cannot be stable, that is, ever-shifting, according to circumstances). Hence perfect neutrality is hardly possible among them.

मित्रादीनामप्यात्मीयत्वं कादाचित्कमित्येतद्दर्शयन्नाह—आकीर्णमिति। मण्डलं द्वादशराजकं चक्रवर्तिक्षेत्रं, सर्वं निरवशेषं, आकीर्णं व्याप्तं, मित्रैः अरिभिः एव च, भूम्यनन्तरभूम्येकान्तरतया[24] तत्र मण्डले सर्वः निरवशेषः, लोकः स्वार्थपर एव। तथा चोक्तं 'स नास्ति पुरुषो लोके यः श्रियं नाभिवाञ्छति। अशक्तिभग्नमानास्तु नरेन्द्रं पर्युपासते' इति। एवञ्च कस्यचिदपि मित्रत्वं न विद्यते। एकार्थाभिनिवेशित्वादरित्वमेव सम्भाव्यमिति सर्वोऽपि लोकः स्वार्थपर एव। कुतो मध्यस्थता क्वचित्, क्वचिदपि कस्मात् माध्यस्थं भवतीत्यर्थः ॥ ७१ ॥

[24] भूम्यनन्तरतया

भोगप्राप्तं विकुर्वाणं मित्रमप्युपपीडयेत्[72] ।
अत्यन्तं विकृतं हन्यात् स पापीयान् रिपुर्मतः ॥ ७२ ॥

[72] मित्रमप्यवपीडयेत्

72. If any one among the friendly rulers by virtue of his accumulation of resources, adopts wrongful actions he should be persecuted, and if by his obsession he exceeds all limits, he should be done away with as a sinful enemy.

एतदेव समर्थयन्नाह—भोगप्राप्तमिति । भोगप्राप्तं भोगहेतुककोश[25] सम्बन्धमित्यर्थः । विकुर्वाणं विकारं गच्छन्तं, मित्रमपि उपपीडयेत् । अत्यन्त विकृतं विजिगीषोरित्यप्रवृत्तं चेत, हन्यात्, पापीयान् निकृष्टतरो रिपुः स्मृतः इति ॥ ७२ ॥

[25] भोगहेतुत्वात्कोशः । तेन प्राप्तं कोशेन

[73]अमित्राण्यपि कुर्वीत मित्राण्युपचयावहान् ।
अहिते वर्तमानानि मित्राण्यपि परित्यजेत् ॥ ७३ ॥

[73] अमित्रानपि

73. Even enemies may be befriended if found to be contributing to the resources of the *Vijigīṣu* (directly or indirectly) (*upacayāvahān*) while friends working against his interests (indulging in mischief-making) should be forsaken by him.

हिताहितवर्तमानयोरेव मित्रामित्रस्वरूपत्वमित्याह—अमित्राण्यपीति । यानि मित्राणि प्राक् न सम्भवन्ति तान्यपि मित्राणि कुर्वीत, उपचयावहान्[25a] हितकारिणो जनान् । अहिते वर्तमानानि मित्राण्यपि परित्यजेदिति प्रतीतम् ॥ ७३ ॥

[25a] उपचयावहानि

स[74] बन्धुर्योऽनुबध्नाति हितेऽर्थे वा[74a] हितादरः ।
अनुरक्तं विरक्तं वा[75] तन्मित्रमुपकारि यत् ॥ ७४ ॥

[74] बन्धुरप्यहिते युक्तः शत्रुस्तं परिवर्जयेत्

[74a] हितेष्वत्याहितादरः [75] विरक्तश्च

74. He is to be regarded as a real friend (of the *Vijigīṣu*) who is intent on rendering useful service to him and promotes his welfare. (Variant : A friend or brother intent on acting against the interests of the *Vijigīṣu* should be forsaken by him). There is no scope for love or hatred in the matter of friendliness). A friend is identified by the beneficient service he renders whether he is satisfied or not.

एतदेव समर्थयन्नाह—बन्धुरपीति । बन्धुरपि सोदर्योऽपि अहितेयुक्तः अहितकारी यः स शत्रुः[26], तं परिवर्जयेत् । अनुरक्तं विरक्तं वा तन्मित्रमुपकारि यदिति प्रतीतम् ॥ ७४ ॥

[26] शत्रुवत्

मित्रं विचार्य बहुशो ज्ञातदोषं परित्यजेत् ।
त्यजन्नभूतदोषं हि धर्मार्थावुपहन्ति हि[75a] ॥ ७५ ॥

[75a] सः

75. A friend, who has been detected to have committed many wrongs should be forsaken after thorough investigation. But by forsaking an unoffending friend the king loses prospects for both spiritual and material benefits.

मित्रं दोषवदिति सूचितं तदेवात्र समर्थयति[37]—मित्रमिति । बहुशः वारं वारं, विचार्य प्रमाणत्रयेण ज्ञातदोषं सुविदितापराधं, परित्यजेत्, नान्यथा । हि यतः अभूतदोषं अकृतापराधं, त्यजन् सः विजिगीषुः धर्मार्थौ उपहन्ति, मित्रसाध्यश्चार्थस्तत्त्यागे स उपहन्यत एव ॥ ७५ ॥

[37] मित्रं प्रायो न दोषवदिति सूचयितुं बहुशो विचार्येत्युक्तम् । ज्ञातदोषं

स्वयं दोषगुणान्वेषी भवेत् सर्वत्र सर्वदा ।
स्वयं ज्ञातेषु दोषेषु शस्यते[76] दण्डपातनम् ॥ ७६ ॥

[76] शास्यं स्यात्

76. The ruler should always investigate himself into the guilts and merits in all cases, and inflict punishments only when he is convinced of the guilt of any one, and that is indeed praiseworthy.

स्वयमिति । विजिगीषुः स्वयमेव दोषगुणान्वेषी भवेत् सर्वत्र सर्वदा । शेषं प्रतीतम् ॥ ७६ ॥

न ह्यविज्ञाय तत्त्वेन कोपकुर्यात् कदाचन[77] ।
भुजङ्गमिव मन्यन्ते निर्दोषक्रोधनं[78] जनाः ॥ ७७ ॥

[77] दोषं कुप्येत् कथञ्चन [78] क्रोधिनं

77. A ruler shoult not get excited or enraged without examining the facts and nature of wrongs. In that case the king who injudiciously gets furious on the innocent is regarded as a venomous serpent by the people.

व्यतिरेकमुखेनैतत् समर्थयति—न हीति । स्पष्टम् ॥ ७७ ॥

मित्राणामन्तरं विद्यान्मध्य[79]ज्यायः कनीयसाम् ।
मध्यज्यायः कनीयांसि कर्माणि च पृथक् पृथक् ॥ ७८ ॥

[79] विद्यात् समज्याय;

78. The *Vijigiṣu* should realise that amongst the *mitras* (allies) some are equal, some superior and some inferior, and that the services rendered by them also vary as superior, mediocre and inferior (ordinary).

मित्राणामन्तरं कर्मभेदेन ज्यायोमध्यमकनीयसांस्वरूपमाह—मित्राणामिति । ज्यायोमध्यम-

कनीयसां मित्राणाम् अन्तरं विद्यात् जानीयात्। कर्माणि उपकरणानि[28]। मध्यज्यायःकनीयांसि कर्माण्यपि पृथक् पृथक्। ज्यायः कर्मोपकारलक्षणं यत् करोति तत् ज्यायो मित्रम्। मध्यमोपकारलक्षणं यत् करोति तन्मध्यमं मित्रम्। कनीयः कर्मोयोगात् कनीयमित्रमित्यर्थः ॥ ७८ ॥

[28] कर्मणा उपकारेणेत्यर्थः

न हि मिथ्याऽभियुञ्जीत[80] शृणुयाच्चापि[80a] तद्विधम्।
मित्रभेदन्तु[81] ये कुर्य्युस्तान् सर्वांस्तु[82] परित्यजेत् ॥ ७९ ॥

---

[80] मिथ्याभियुञ्जीत [80a] शृणुयाद्वापि
[81] मित्रभेदं च ये [82] समस्तान्

79. He should by no means accuse his allies falsely listening to allegations to that effect made by others. Rather all such people who (by their false allegations) attempt at creating rifts in the ranks of allies, should be forsaken.

मिथ्याभियोगकरणश्रवणे निषेधति—न हि मिथ्येति। पिशुनवचनान्मिथ्या। शेषं स्पष्टम् ॥ ७९ ॥

प्रायोगिकं मात्सरिकं माध्यस्थं पाक्षपातिकम्[83]।
सोपन्यासञ्च जानीयाद् वचः संशयितं[83a] तथा ॥ ८० ॥

---

[83] पक्षपातिकम् [83a] सानुशयं

80. He should be capable of reading through the utterances of the nature of *prāyogikaṁ* (relating to political expedients), *mātsarikaṁ* ('spiteful), *mādhyasthaṁ* (feigned impartiality or apparent indifference), *pākṣapātikaṁ* (partiality), *sopanyāsaṁ* (veiled irony) and *sānuśayaṁ* (expressing repentance for omission and commission).

विजिगीषुणा मित्रारिविषये परप्रयुक्तानि वचनानि परीक्षणीयानीति दर्शयन्नाह—प्रायौगिकमिति। प्रायोगिकं[29] भेदाद्युपायरूपप्रयोगभवम्। यथा मुद्राराक्षसे चाणक्यचन्द्रगुप्तयोः कृतकृत्ययोर्भेदं[29a] कर्तुं राक्षसप्रयुक्तो वैतालिकः पठति—"भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः। परैरपरिभूताज्ञस्त्वमिव प्रभुः" ॥ इत्यादि। मात्सरिकं मत्सरभवं, यथा तत्रैव नेपथ्ये चाणक्योक्तिः—"आः क एष मयि स्थित चन्द्रगुप्तमभिभवितुमिच्छति" इति। माध्यस्थ्यं इच्छाद्वेषराहित्यं, यथा तत्रैव चाणक्यः (पर[29b]वचनमाकर्ण्य) "नूनं सुहृत्तमः न खल्वात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यतीति"। पाक्षपातिकं पक्षपातेन युक्तं, यथा तत्रैव चरेण समर्पितां राक्षसनामाङ्कितां अङ्गुरीयकमुद्रां अङ्गुल्यां निवेश्य चाणक्येण मनस्येवोक्तं "ननु वक्तव्यं राक्षस एवास्मदङ्गुलिप्रणयी संवृत्तः" इति राक्षसपक्षपातवचनमिदमिति। सोपन्यासं यस्मिन् वचसि स्थितस्यार्थस्य उप समीपे सादृशादन्यो न्यसते स उपन्यासः

[29] प्रयोगा भेदोपायास्तत्र [29a] कृतककलहयोः भेदं
[29b] चर

तेन सह वर्तमानः सोपन्यासः। यथा तत्रैव चाणक्येन "भोः श्रेष्ठिन् स्वागतमिदमासनमास्यताम्"। इत्युक्ते चन्दनदासः प्रणम्य, "किं ण आणादि अज्जो, जहा अनुचिदो उअआरो सहिअअस्स परिहवादो विमहन्तं दुःखमुप्पादेदि, ता इहज्जेव अहं उचिदाए भूमिए उवविसामि" इति। चाणक्यः—"भोः श्रेष्ठिन् मा मैवम्। उचितमेतदस्मद्विधैः सह भवतस्तदुपविश्यतामासन एव।" चन्दनदासः (स्वगतम्) "उवलक्खिदमणेण किम्पि" इत्येवंविध उपक्षेप उपन्यास उच्यते। सानुशयं अनुशयः पश्चात्तापः तेन सह वर्तमानः तम्। यथा तत्रैव राक्षसः शस्त्रमाकृष्य ससम्भ्रमं,—"मयि स्थिते कः कुसुमपुरमवरोधत्स्यति। प्रवीरक प्रवीरक क्षिप्रमिदानीं—प्राकारान् परितः शरासनधरैः क्षिप्रं परिक्षिप्यतां, द्वारेषु द्विरदैः परद्विप घटाभेदक्षमैः स्थीयताम्।' मुक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले, ते निर्यान्तु मया सहैकमनसो येषामभीष्टं यशः॥" विराधः, अमात्यालमावेगेन, वृत्तमिदं वर्ण्यते। राक्षसः (सलज्जं)— "कथं वृत्तमिदम्? मया पुनर्ज्ञातं स एव कालो वर्तते" इति। एतत् सर्वं सानुशयं वचः जानीयात्॥ ८०॥

प्रकाशपक्षग्रहणं न कुर्यात् सुहृदां स्वयम्।
अन्योन्यमत्सरं चैषां स्वयमेवाशु धारयेत्[84] ॥ ८१ ॥

---

[84] वारयेत्

81. A *vijigīṣu* should not openly take the side of any one of his allies (lest others may be estranged from him out of envy). He himself should prevent them from being malicious against one another (or encourage a feeling of rivalry amongst them to gain his favours).

विजिगीषोर्मित्रविषये वृत्तमभिधातुमाह—प्रकाशपक्षग्रहणमिति। स्वयं विजिगीषुः सुहृदां मित्राणां मध्ये कस्यचिदपि मित्रविशेषस्य प्रकाशपक्षग्रहणं स्पष्टतः एकपक्षपातं, न कुर्यात्। परन्तु एषां मित्राणां, अन्योन्यमत्सरं अहमेव विजिगीषोर्मत इति परस्परमत्सरं, आशु शीघ्रं धारयेदिति प्रतीतम्॥ ८१॥

कार्यस्य हि गरीयस्त्वान्नीचानामपि कालवित्।
सतोऽपि दोषान् प्रच्छाद्य गुणानप्यसतो वदेत्॥ ८२॥

---

82. In view of the importance of royal duties a ruler conversant with the needs of circumstances, should overlook the lapses of even his mean allies and attribute to them the qualities that they do not possess.

मित्रविशेषे वृत्तमभिधातुमाह—कार्यस्येति। कार्यस्य पृथिवीपालनादेः,[30] गरीयस्त्वात्, गुरुतरत्वात्, नीचानां मित्रविशेषाणां, अपि, कालवित् मित्रसाध्यकार्य्यकालज्ञः,[30a] सतोऽपि विद्यमानानपि, दोषान् प्रच्छाद्य संगोप्य, असतः अविद्यमानान्, गुणान् वदेत्॥ ८२॥

[30] कार्य्यं पृथिवीपालनं तस्यैव

[30a] कालवित्—यस्मिन् काले मित्रसाध्यं कार्य्यमुपस्थितं भवति तत्र

प्रायो मित्राणि कुर्वीत सर्वावस्थानि भूपतिः ।
बहुमित्रो हि शक्नोति वशे स्थापयितुं रिपून् ॥ ८३ ॥

---

83. A ruler should secure allies of all descriptions (superior, mediocre and weaker). Because one who possesses a large number of allies can keep his enemies under his domination.

बहुमित्रप्रशंसामभिधातुमाह—प्राय इति । प्रायः बाहुल्येन, मित्राणि सर्वावस्थानि उत्तमाधम-मध्यमानि, म्लेच्छाटविकपुलिन्दपतीनपि, भूपतिः विजिगीषुः, कुर्वीत, हि यत्, बहुमित्रः मित्रबाहुल्य-वान्, रिपून् शत्रून्, वशे स्थापयितुं वशीकर्तुं, शक्नोति समर्थो भवति, नान्यथेत्यर्थः ॥ ८३ ॥

न तत्र तिष्ठति भ्राता न पिताऽन्योऽपि[85] वा जनः ।
पुंसामापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति ॥ ८४ ॥

---

[85] तथान्योऽपि

84. In remedying dangers the brother (of the *vijigīṣu*) or his father or any other of his well-wishers cannot vie with the real ally in status and in effectiveness.

मित्रप्रशंसामाह—न तत्रेति । स्पष्टम् ॥ ८४ ॥

अमित्राण्यवतो[86] मित्रैर्न्नं गृह्णीयाद् दृढव्रतैः ।
इति मण्डलवृत्तं हि[87] मण्डलज्ञाः प्रचक्षते ॥ ८५ ॥

---

[86] अमित्रान् सर्वतो मित्रैर्निगृह्णीयाद्

[87] तन्

85. A ruler should not take the risk of attacking an enemy when the latter is supported by strong and devoted allies. This, in brief, is the law of the *maṇḍala* confirmed by experts in the science of *maṇḍala* formation.

मण्डलवृत्तमभिधातुमाह— अमित्रानीति । अमित्राणि अवतः, पालयितॄन्, दृढव्रतैः अचलैः मित्रैः न गृह्णीयात्. शेषः सुगमः ॥ ८५ ॥

मित्रोदासीनरिपव एतन्मात्रं हि मण्डलम् ।
सम्यक् शोधन[88]मेतेषामिति मण्डलशोधनम् ॥ ८६ ॥

---

[88] साधन

86. A *Maṇḍala* consists of allies, enemies and the *udāsīna* (the neutral power), and as such *maṇḍala* can be purified or kept in perfect order, (favourable to the *vijigīṣu*) only by dealing judiciously with all of them.

मण्डलं तच्छोधनञ्चाभिधातुमाह— मित्रोदासीनरिपव इति । स्पष्टम् ॥ ८६ ॥

इति स्म राजा नयवर्त्मना व्रजन्
समुद्यमी मण्डलशुद्धिमाचरन्[89] ।
विराजते साधु विशुद्धमण्डलः
शरच्छशीव प्रतिनन्दयन्[90] प्रजाः ॥ ८७ ॥

---

[89] माचरेत् [90] प्रतिरञ्जन्

इति मण्डलशोधन (चरित) नाम त्रयोदशं प्रकरणम् ।

इति कामन्दकीये नीतिसारे मण्डलयोनि-मण्डलचरितान्यष्टम सर्गः ॥

87. Thus an energetic *vijigisu*, moving righteously according to legal norms and effecting the purification of the *maṇḍala*, shines brilliantly like the glorious moon on the autumnal sky.

प्रकरणार्थानुष्ठानफलमाह—इतीत्यादिना। एवमुक्तेन तथान्यायेन च नयमार्गेण मण्डले चरन्। राजा विजिगीषावस्थावस्थितः। समुद्यमीति—उत्साहः प्रधानमिति दर्शयति। मण्डलशुद्धिमाचरेद् यथा तत्र कुप्येत, कुपितं वा शाम्येत्। प्रतिरञ्जन् प्रजा इति मण्डलशुद्धिफलमेतत् ॥ ८७ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां मण्डलयोनिर्नामाष्टम सर्गः ॥

१४। सन्धिविकल्प प्रकरणम्।

बलीयसाऽभियुक्तस्तु[1] नृपोऽनन्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत् कुर्वाणः कालयापनाम्[1a] ॥ १ ॥

---

[1] बलिना विगृहीतः सन्; बलवद् विगृहीतः [1a] यापनम्

Sarga IX.

Prakaraṇa 14.

Sandhivikalpa (Types of *Sandhi* or alliances)

1. Attacked by a stronger foe and finding himself in a critical situation, a ruler, incapable of adequate power of resistance, should seek peace and bide time (in expectation of a suitable opportunity for retaliation).

अनन्तरोक्तक्रमेण विशुद्धमण्डलो विजिगीषुः षाड्गुण्य प्रयोगयोग्यो भवति। तत्र पूर्वपठितस्य सन्धेः प्रयोगं दर्शयन सन्धिकर्मणोऽवस्थामेव तावदाह—बलवद्विगृतीत इति (बलीयसाऽभियुक्तस्त्विति मूलम्)। बलवता शत्रुणा समुच्चि(च्छि)त शक्तित्रयेण विगृहीतः सन् नृपो विजिगीषुः अनन्यप्रतिक्रियो दुर्गमित्रादिप्रतिक्रियारहितो हीयमान, इत्यर्थः। अतएवापन्नः सन्धिमन्विच्छेत् कुर्वाणः काल्यापनम्। कुर्वाण इति वाङ्मात्रेनैव सन्धिमन्विच्छेत् कर्मणा तु काल्यापनं कुर्वाणः, न तु कर्मणा सहसैव। कदाचित् काल्यापनादभियोक्तुर्व्यसने सति विग्रहस्यावसरः स्यादित्याभिप्रायः ॥ १ ॥

कपाल उपहारश्च सन्तानः सङ्गतस्तथा।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ २ ।
अदृष्टनर आदिष्ट आत्मामिष उपग्रहः।
परिक्रयस्तथोच्छिन्नस्तथा च परिभूषणः[2] ॥ ३ ।
स्कन्धोपनेयः सन्धिश्च षोडशः परिकीर्तितः।
इति[3] षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥ ४ ।

---

[2] परदूषणः [3] द्विरष्टविधमित्याहुः

2-4. Experts in the matter of peace-making identify sixteen well-known types of alliances, viz., *Kapāla, Upahāra, Santāna, Saṁgata, Upanyāsa, Pratīkāra, Saṁyoga, Puruṣāntara, Adṛṣṭanara Ādiṣṭa, Ātmāmiṣa, Upagraha, Parikraya, Ucchinna, Paribhūṣana* or *Paradūṣaṇa* and *Skandhopaneya.*

षोडशविधसन्धिं श्लोकत्रयेणोपदेष्टुमाह—कपाल इत्यादि। सुप्रतीतम् ॥ २, ३, ४ ॥

*[तथान्तर्भेदरूपेण भवत्येकोऽप्यनेकधा]
कपालसन्धिर्विज्ञेयः केवलं समसन्धितः[4] ।
सम्प्रदानाद्भवति य उपहारः स उच्यते ॥ ५ ।
सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्वकः ।
सद्भिः सङ्गतसन्धिस्तु मैत्रीपूर्व उदाहृतः ॥ ६ ।
यावदायुः प्रमाणस्तु(न्तु) समानार्थप्रयोजनः ।
सम्पत्तौ च विपत्तौ च कारणैर्यो न भिद्यते ॥ ७ ।
सङ्गतः सन्धिरेवैष[5] प्रकृष्टत्वात् सुवर्णवत् ।
सोऽपरैः[6] सन्धिकुशलैः काञ्चनः परिकीर्तितः[7] ॥ ८ ।
अन्यामेकार्थसंसिद्धि[8] समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ ९ ।

---

[4] समसन्धिकः

[5] सन्धिरेवेह प्रकृष्टत्वात् [6] अपरैः

[7] स उदाहृतः ; समुदाहृतः । [8] र्थसिद्धिं तु

* This line does not occur in the B.I. Text

5-9. Each of the above mentioned types has a number of varieties. *Kapālasandhi* is that type of alliance which is concluded between two powers of equal resources (and on terms of status quo *samasandhitah*).

Upahārasandhi is so called as it is accompanied by offer of gifts (like cession of land and/or cash or other presents) and *Santāna-sandhi* by offering the daughter in marriage (to the assailant).

Saṁgatasandhi is an alliance of perpetual amity for life between two parties of good intentions for the purpose of pooling their resources together (in normal times or in times of emergency). Such an alliance (*Saṁgatasandhi*) by virtue of its supreme importance is considered as golden (*suvarṇavat*). As such some experts in peace-making call it *Kañcana sandhi*; perfectly so, it is golden because it does not break down for any reason whether in prosperity or in adversity.

Upanyāsa-sandhi is that which is concluded between two parties intent upon achieving a common purpose according to experts (*ekārtha-saṁsiddhi*).

कपालोपहारसन्धिद्वयलक्षणमभिधातुमाह—कपालसन्धिरिति । समसन्धितः, घटकपालयोरिव विशिष्टयोररिविजिगीष्वोः शक्तिसाम्ये कोशदण्डाद्युपनतिं विनैव केवलं समसन्धिरित्युच्यते । कपाल-सन्धिः, यथा घटकपालभङ्गप्रदेशे द्वितीये कपाले श्लेषिते बहिरभिन्न एव घटो दृश्यते । न च निरन्तरं संश्लेषः । तथा सत्यशपथादि[1] सन्धिकर्मरहितत्वात् वाङ्मात्रेण यः सन्धिः क्रियते स कपाल-

सन्धिरित्युच्यते यथेष्टं व्यभिचारादित्यर्थः। सम्प्रदानादिति। यथा सम्प्रदानात् कोशदण्डादीनां भवति यः सन्धिः स उपहारः तन्नामकः सन्धिः उच्यते ॥ ५ ॥

[1] सैन्यद्यापथादि

सन्तानसङ्गतनामकसन्धिद्वयलक्षणमभिधातुमाह—सन्तानेति। दारिकादानपूर्वकः कन्यासम्प्रदान कृतो यः सन्धिः, सः सन्तानसन्धिः विज्ञेयः। सद्भिरिति। मैत्रीपूर्वः मित्रताव्यवस्थापनपूर्वकः सन्धिः, सङ्गतसन्धिः ॥ ६ ॥

सङ्गतसन्धेः केनाऽपि कारणेन अभ्येयत्वात् काञ्चनसन्धित्वमपर सम्मतमिति श्लोकद्वयेनाह—यावदिति। यावदायुः प्रमाणमरिविजिगीष्वोरायुषः प्रमाणं यावत्। समानार्थप्रयोजनः, द्वयोरपि समान एवार्थः कोशस्त्वदीयो मदीय इति विभक्तिर्नास्ति। प्रयोजनानि धर्मार्थकामविषयाणि तान्यपि समानानि प्रयोजनविषये विभक्तिर्नास्तीत्यर्थः। सम्पत्तौ वृष्ट्यादिकारणैः चित्तविकारे यो न भिद्यते इति। विपत्तौ च व्यसने। स सङ्गत एव सन्धिः सम्यग् विशेषेण उदाहृतः। प्रकृष्टत्वात् (प्रहृष्टत्वात् इति मूलम्) अत्युत्तमत्वात् सुवर्णवत् (काञ्चनः) इति शेषं प्रतीतम् ॥ ७, ८ ।

उपन्याससन्धिलक्षणमभिधातुमाह—भव्यामिति। भव्यां शुभां, एकार्थसंसिद्धिं एकस्य भूम्यार्थस्य या सिद्धिः तां समुद्दिश्य लक्ष्यीकृत्य, उपन्यासकुशलै उपन्यासचातुरीविद्भिः, त्वं यातव्यं गत्वा तद्भूमिं गृहाण, अहमपि स्वयं यातव्यं गत्वा तद्भूमिं ग्रहीष्यामि एवेति उपन्यस्य च यः सन्धिः क्रियते स उपन्यास सन्धिः उच्यते ॥ ९ ।

मयास्योपकृतं पूर्वं[9] ममाप्येष करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥ १० ।
उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ ११ ।
एकार्थो[10] सम्यगुद्दिश्य क्रियां यत्राभिगच्छतः[10a] ।
स संहित[11] प्रयाणस्तु सन्धिः संयोगं उच्यते ॥ १२ ।

---

[9] पूर्वमयं प्रतिकरिष्यति [10] एकार्थं
[10a] यात्रां यत्र हि गच्छतः [11] स संहृत

10-12. When peace is concluded under the expectation that the other party will act for 'my benefit in return of beneficient services rendered by me' (the *vijigīṣu*), it is called *Pratīkāra-sandhi*. Again, when benefits are conferred (by the ruler) on another in the hope of similar services from him in return, it is also *Pratīkāra-sandhi* as in the case of Rāma and Sugrīva.

Saṁyoga-sandhi is that which is concluded between two parties (may be, between the ruler and his enemy when the contingency of taking action against an enemy common to both arises) for marching unitedly to secure an identical objective.

प्रतीकार सन्धिलक्षणमभिधातुमाह—मयास्यैति। पूर्वमेव कोशादिभिरुपकृतं, अनन्तरं च मित्रादिकृतो विरोधः सम्यक्तः, ततश्च पुनः सन्धौ कृते ममापि प्रतीकारं करिष्यतीति यः क्रियते सन्धिः स प्रतीकारसन्धिरित्युच्यते ॥ १० ॥

उपकारमिति। अस्य साहाय्यार्थं उपकारं करोमि पश्चात् ममापि प्रत्युपकारं करिष्यति अयं चापि प्रतीकारो रामसुग्रीवयोरिव। रामेण वालिवधलक्षणः सुग्रीवस्योपकारः कृतः। सुग्रीवेणापि साहाय्यं कृत्वा रावणवधः सम्पादितः ॥ ११ ॥

संयोगसन्धिलक्षणमाह—एकार्थमिति। एकार्थां एकमेवार्थं प्रयोजनं यत्र तां, तुल्यप्रयोजना-मित्यर्थः। यात्रां (क्रियां वा) यत्र हि गच्छतः, सन्धौ अभिगच्छतः, सम्यगुद्दिश्य सुखात्मरूपेणाभिलक्ष्य संहितप्रयाणः परमविश्वासयुक्तः सन्धिः संयोगः तन्नामा सन्धिः उच्यते ॥ १२ ॥

आवयोर्योधमुख्याभ्यां मदर्थः साध्य इत्यपि[12] ।
यस्मिन् पणः[12a] प्रक्रियते स सन्धिः पुरुषान्तरः ॥ १३ ।

[12] साध्यतामिति [12a] पणश्च क्रियते

13. When peace is concluded with another (evidently with a weaker power) with the express obligation that his army chiefs (along with forces under their command) will serve 'my (*vijigīṣu's*) interests' (when occasion demands it), it is called the *Puruṣāntara sandhi*.

पुरुषान्तरसन्धिलक्षणमाह—आवयोरिति। आवयोर्योधमुख्याभ्यां स्वप्रतिबद्धप्रधानयोद्धृ-पुरुषाभ्यां सहिताभ्यां मदर्थो भूमिलाभादिकः साध्यतामिति यस्मिन् पणः प्रतिज्ञा क्रियते स सन्धिः पुरुषान्तरः उच्यते। "महीलाभो हि विशिष्टफलसमागमो राज्ञामि" ति वचनात्। दण्डोपनतः स्वात्मीय-पुरुषान्तरेण कार्यं साधयतीति ॥ १३ ॥

त्वयैकेन मदीयार्थः सम्प्रसाध्यस्त्वसाविति ।
यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः ॥ १४ ।

14. The *Adṛṣṭapuruṣa-sandhi* carries the stipulation that the enemy ruler (the weaker or vanquished) will have to endeavour himself for the accomplishment of an objective of 'mine' (the *vijigīṣu* or the conqueror).

अदृष्टनर सन्धि स्वरूपमभिधातुमाह—त्वयैकेनेति। अदृष्टपुरुषः विजिगीषोः पुरुषः कश्चित्र दृश्यत इति। अन्यत्सर्वं सुप्रतीतम् ॥ १४ ॥

यत्र भूम्येकदेशेन पणेन रिपुवर्जितः[13] ।
सन्धीयते सन्धिविद्भिरादिष्टः सन्धिरुच्यते ॥ १५ ।

[13] रिपुरूर्जितः

15. When peace is concluded with a more powerful enemy on condi-

tion of cession of a portion of territory, it is held by the experts in peace making to be *Adiṣṭa sandhi*.

आदिष्टसन्धिलक्षणमभिधातुमाह—यत्रेति। यत्र सन्धौ ऊर्जितः प्रबलः रिपुः, भूम्येकदेशेन पणेन भूम्येकदेशप्रदान प्रतिज्ञया सन्धीयते, स सन्धिविद्भिः सन्धिधर्मविशारदैः, आदिष्टः तन्नामकः सन्धिरुच्यते ॥ १५ ॥

स्वसैन्येन तु सन्धानमात्मामिष इति स्मृतः।
क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः[14] ॥ १६ ॥

[14] सर्वदानमुपग्रहः

16. When the ruler (the weaker or assailed) seeks to conclude peace with the stronger or assailant enemy by presenting himself along with his armed forces before him it is called *Ātmāmiṣa sandhi*. For the purpose of saving his own life, or when he finds his life at stake, when he offers his whole resources (so that if spared alive he may get a chance of retaliation and recovery of his dominion), it is *Upagraha*.

आत्मामिषसन्धिस्वरूपमभिधातुमाह—स्वसैन्येनेति। यत्र संहितेन[a] सैन्यस्य प्रेषणं सर्वत्र कर्तव्यमिति सन्धानं यत् स आत्मामिषः सन्धिः। आत्मैवामिषकृत[2a] इति उदाहृतः। क्रियते प्राणरक्षार्थं सर्वदानात् सकलभूमिहिरण्यादि दानादुपग्रहः[2b]। सर्वदानेन[2c] जीवितमुपगृहीतमिति ॥ १६ ॥

[a] सौम्येन [2a] आमिषीकृत।

[2b] हिरण्यादि पानान्युपग्रहः [2c] सर्वदानेन तु चित्तमुप

कोशांशेनाथ कुप्येन सर्वकोशेन वा पुनः।
शेषप्रकृतिरक्षार्थं परिक्रय उदाहृतः ॥ १७ ॥

17 When in concluding peace one has to surrender a part of his wealth, forest and mineral resources or the whole of his accumulated wealth (as ransom) in order to secure safety of the other elements of state (*prakṛtis*) it is called *Parikrayasandhi*.

परिक्रयसन्धिलक्षणमभिधातुमाह—कोशांशेनेति। कोशांशेन कोशस्य तृतीय-चतुर्थभागेन, कुप्येन सुवर्णरजतभिन्नेन उपलशणेन, सर्वकोशेन वा कोशसाकल्येन, शेषप्रकृतिरक्षार्थं कोशवर्जविशिष्टप्रकृतिसंरक्षणाय, यः क्रियते स परिक्रयः तन्नामकः सन्धिः उदाहृतः। कोशेन शेषाः प्रकृतयः क्रीता इति ॥ १७ ॥

भुवां सारवतीनान्तु दानादुच्छिन्न उच्यते।
सर्वभुम्युत्थित फलादानेन परिभूषणः[14] ॥ १८ ॥

[14] फलदानेन परंदूषणः

18. It is *Ucchinna sandhi* when it is stipulated by cession of richly

fertile (or productive of resources) lands, and it is *Paradūṣaṇa-sandhi* when the total yield of lands is surrendered (so that it may later rouse excitement of the people against the enemy).

उच्छिन्नपरदूषणाख्यसन्धिद्वयलक्षणमाह—भुवामिति। सारभूमिदानमुच्छेदहेतुरित्यर्थः। सर्वभूम्युत्थितफलदानेन परदूषणः,[8] न भवत्येवात्र फलं, त्वयोपद्रवः कृत इति परोऽत्र दूष्यत इति तदाख्यः सन्धिः ॥ १८ ॥

[8] णे नाम भवत्ये तत् सर्वफलं

परिच्छिन्नं फलं यत्र स्कन्धः स्कन्धेन दीयते[15] ।
स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः ॥ १९ ।

[15] स्कन्धस्कन्धेन नीयते ; जायते

19. The kind of peace in which the indemnity (in the form of products from lands) is payable in instalments is designated as *Skandhopaneya sandhi* by experts.

स्कन्धोपनेयसन्धिलक्षणमाह—परिच्छिन्नमिति। तथा परिच्छिन्नं कृतसंख्यं, फलं हिरण्यादि यत्र सन्धौ स्कन्धस्कन्धेन दीयते, इयता कालेनैतत् संख्यं देयमिति यो निबन्धो व्यवस्थोच्यते, स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः ॥ १९ ॥

परस्परोपकारश्च मैत्रः सम्बन्धजस्तथा[16] ।
उपहारश्च विज्ञेयाश्चत्वारस्ते च[16a] सन्धयः ॥ २० ।
एक एवोपहारस्तु सन्धिरेतन्मतं हि नः ।
उपहारस्य भेदास्तु[16b] सर्वेऽन्ये मैत्रवर्जिताः ॥ २१ ।
अभियोक्ता बली यस्मादलब्ध्वा न निवर्तते ।
उपहाराद्दृते तस्मात् सन्धिरन्यो न विद्यते ॥ २२ ।

[16] सम्बन्धकस्तथा [16a] श्चत्वारोऽन्ये तु ; चत्वारश्चिरसन्धयः

[16b] भेदात्तु

20-21. According to some authorities there are four types of peace viz., the one producing mutual benefit (*Pratīkāra sandhi*) ; the one of (perpetual) friendship (*Saṁgata* or *Kāñcana sandhi*) ; the one establishing relationship (*Santānasandhi*) ; and the one with the stipulation of gifts (by way of indemnity in cash or kind) (*Upahāra sandhi*).

In our opinion peace with the stipulation of gifts is the only one recognised form of alliance, as, except the one of perpetual friendship, the rest are mere varieties of peace with gifts (*Upahārasya bhedāh*).

22. The powerful invader does not refrain from his ventures unless

gets enough booty (or presents from the assailed ruler). That is why peace with gifts is generally recognised by all, and no other form of alliance is equal to it.

सम्प्रतः सन्धिविशेषानभिधाय सुश्लिष्ट सन्धिलक्षणं येषां तानभिधातुमाह—परस्परोपकारश्चेति। परस्परोपकारो रामसुग्रीवयोरिव यः सन्धिः। मैत्र इति मित्रत्वेनैव निष्प्रपञ्चरितेन यो भवति सः। सम्बन्धजस्तथा दारिकादानपूर्वक इत्यर्थः। उपहारश्च यत्र कोशाद्याह्रियते। विज्ञेयाश्चत्वारश्चिरसन्धयो येषु विश्लेषाशंका न विद्यत इत्यर्थः॥ २०॥

एकस्यैवोपहारस्य प्रकृतसन्धित्वमस्मत्मतमित्याह—एक एवेति। उपहार एवैकः सन्धिरभिमतोऽस्माकं यस्मादुपहारभेदा एवान्ये। परस्परोपकारेऽपि वस्त्रालङ्कारादिकस्योपहरणमस्ति, सम्बन्धजे दारिकादेरुपहरणमस्ति। केवलं मित्रं वर्जयित्वा शेषा उपहारभेदा एव॥ २१॥

एतदेवोपपादयति—अभियोक्तेति। अभियोक्ता विजिगीषुर्बली शक्त्यादिसम्पूर्णः यस्मात् अलब्ध्वा न निवर्तते तेन प्रार्थितमुपहरणीयमेव तस्मादुपहाराद्रृतेऽन्यः सन्धिरेव न विद्यते सन्धिलक्षणानामभावादिति॥ २२॥

बालो वृद्धो दीर्घरोगस्तथा[17] ज्ञातिबहिष्कृतः।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा॥ २३।
विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान्[18]।
अनेकचित्तमन्त्रस्तु(श्च) देवब्राह्मणनिन्दकः॥ २४।
दैवोपहतकश्चैव दैवचिन्तक एव च।
[18a]दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः॥ २५।
अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च नः[19]
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी[19a]॥ २६।
[19b] एतैः सन्धिं न कुर्वीत विगृह्णीयाच्च[20] केवलम्।
एते विगृह्यमाना हि क्षिप्रं[21] यान्ति रिपोर्वशम्[21a]॥ २७।

---

[17] रोगी तथा [18] सक्तिमान्
[18a] दुर्भिक्ष व्यसनी चैव बल व्यसन संकुलः
[19] यश्च सः ; कालेन पश्यन् [19a] पुरुषास्तिव मे
[19b] एभिः [20] विगृह्णीयात्तु
[21] क्षुर्ण [21a] यान्त्यचिराद्वशम्

23-27. In enumerating some twenty characteristic features of rulers, it is stated that no alliance or peace should be concluded with them. viz., a minor (prince) or one too old, one suffering from protracted illness, an outcaste ruler (excommunicated by his own family members), a coward or whose soldiers and retainers are cowards, one excessively covetous or

whose soldiers and retainers are greedy, one whose *prakṛtis* (elements of state, ministers as well as subjects) are disaffected, one addicted to material pleasures, one whose mind is split up and confused with many counsels, one disrespectful towards God and Brāhmaṇas, one struck by adverse Fate (or suffering from natural calamities or divine dispensations *Daivopahataka*) or one who is too much reliant on divine power (and not on his own resources), one whose territory is famine-stricken and/or suffering from other natural calamities, one whose armed forces are corrupt and indisciplined, one who is dislodged from his own land (a refugee prince *adeśastha*), one who is beset with multiple foes, one who is incapable of taking action in proper time (probably due to hesitancy and vacillation), and one devoid of righteousness and legal norms. It is further emphasised that such rulers deserve only to be assailed, as due to their weaknesses (as indicated above) when assailed, they soon come under the sway of the enemy (assailant).

असन्धेयमभिधातुं श्लोकपञ्चकेनाह—बाल इति। श्लोकानामर्थः सुबोधः ॥ २३-२७ ॥

बालस्य ह्यप्रभावत्वान्न[22] लोको योद्धुमिच्छति।
योद्धुं स्वयमशक्तस्य [23]परार्थे को हि युद्धते[24] ॥ २८ ॥

[22] बालस्यान्य प्रमाणत्वान्न [23] मशक्तः सन्

[24] कोऽभियुज्यते

28. People would not like to fight for a minor prince for the latter's immaturity and lack of political wisdom. Who would like to get involved in conflict (with an invading enemy) in support of one who himself is incapable of fighting (and protecting his resources) ?

अनन्तरोक्तविंशतिसंख्यकानां पुरुषाणां एकैकशोऽसन्धेयत्वमभिधातुमादौ बालस्य तावदसन्धेयत्वे हेतुमाह—बालस्येति। स्पष्टम् ॥ २८ ॥

उत्साहशक्तिहीनत्वाद् वृद्धो दीर्घामयस्तथा।
स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥ २९ ॥

29. Both types of rulers, the over-aged and the one who is sick for long, being devoid of *utsāhaśakti* (energy and physical strength) are invariably let down by his own people (in times of emergency).

वृद्धचिररोगिणोरसन्धेयत्वे कारणमाह—उत्साहशक्तिहीनत्वादिति। उत्साहोऽभ्योयोगः तच्छक्तिहीनत्वात् वृद्धो विग्रहासमर्थः। तस्मात् वृद्धसमानत्वेन दीर्घामयो दीर्घव्याधिरित्यत्र तथेवोपलक्षणमेतदुद्दिष्टत्वात्।[4] एतौ द्वौ अपि स्वैः ज्ञातिभिः एव परिभूयेते असंशयम् ॥ २९ ॥

[4] वोपलक्षयेत् तदुद्दिष्टत्वात्

सुखोच्छेद्यस्तु[25] भवति सर्वज्ञातिबहिष्कृतः ।
ते एवैनं विनिघ्नन्ति ज्ञातयः स्वार्थसत्कृताः[26] ॥ ३० ।

---

[25] च्छेद्यो हि [26] ज्ञातयस्त्वात्मसात्कृताः

30. A ruler, forsaken by his kinsmen (and rendered helpless), falls an easy prey to the invader, and he may be crushed if his relatives are won over (by the invader).

सर्वज्ञातिबहिष्कृतस्यासन्धेयत्वमाह—सुखोच्छेद्य इति । सुखेनैवोच्छेद्यो हि सर्वैरेव ज्ञातिभिर्बहिष्कृतः । त एवैनं ज्ञातयः परित्यक्तं विनिघ्नन्ति विजिगीषुणैवात्मसात्कृता इत्ययमप्यसन्धेयः ॥ ३० ॥

भीरुर्युद्धपरित्यागात् स्वयमेवावसीदति[27] ।
धीरो[28]ऽप्यवीरपुरुषे संग्रामे तैर्विमुच्यते ॥ ३१ ।

---

[27] क्षिप्रमेव विनश्यति [28] वीरोऽप्यवीरपुरुषः

31. A cowardly ruler by (injudiciously) withdrawing from fight in the event of an attack, runs to his own peril. Even a brave ruler is let down by cowardly soldiers who desert him in course of the battle.

भीरुभीरुजनयोरसन्धेयत्वे कारणमाह—भीरुरिति । श्लोकार्थः सुगमः ॥ ३१ ॥

लुब्धस्यासंविभागित्वान्न युद्धन्तेऽनुजीविनः ।
लुब्धानुजीवितैरेव[28a] दानभिन्नैर्निहन्यते[28b] ॥ ३२ ।

[28a] लुब्धानुजीवी तैरेव ; लुब्धा अनुजीविकैरेव [28b] विहन्यते ।

32. A covetuous (miserly) ruler, who does not adequately remunerate his men, loses the whole-hearted support of the latter in battle (and thus comes to grief), and if the dependents (officers and men) are themselves avaricious, they can be purchased (by the enemy) and dissociated from the ruler to bring about his death.

लुब्धलुब्धानुजीविकयोरसन्धेयत्वं प्रतिपादयन्नाह—लुब्धस्येति । लुब्धस्य संविभक्तेरभावात् असम्यग्-वृत्तिविधायित्वात्, अनुजीविनः योद्धृपुरुषादयः न युद्ध्यन्ते, लुब्धानुजीवी तैरेवानुजीविभिर्विजिगीषुणा दानेन भिन्नैर्विहन्यते ॥ ३२ ॥

सन्त्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि ।
सुखाभियोज्यो[29] भवति विषयेऽप्यतिसक्तिमान्[29a] ॥ ३३ ।

---

[29] योगो [29a] विषयेष्वति

33. A ruler, whose *prakṛtis* (statal elements, ministers, subjects etc) are disaffected (presumably due to his unrighteousness), is abandoned by them (the *prakṛtis*, who do not stand by him) in the event

of a battle (against an invading enemy). One addicted to sensual pleasures becomes easily assailable.

विरक्तप्रकृतिक विषयातिसक्तिमतीरसन्धेयत्व प्रतिपादनायाह—सन्त्यज्यत इति। यथा सन्त्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधीति प्रतीतम्। सुखाभियोज्यो भवति विषयेषु स्त्रीमद्यपानादिषु अतिसक्तिमान् अनुरागवान् आसक्तचित्तः ॥ ३३ ॥

अनेकचित्तमन्त्रस्तु[30] द्वेष्यो भवति मन्त्रिणाम्।
अनवस्थितचित्तत्वात् कार्ये तैः स उपेक्ष्यते[30a] ॥ ३४ ।

[30] मन्त्रश्च [30a] समुपेक्ष्यते

34. A ruler, who entertains counsels from different quarters is disliked by his ministers, and for his undecidedness or indecision the very ministers neglect him in times of action.

अनेकचित्तमन्त्रस्यानवस्थितचित्तत्वादसन्धेयत्वमाह—अनेकचित्तमन्त्र इति प्रतीतम् ॥ ३४ ॥

सदा धर्मबलीयस्त्वाद् देवब्राह्मणनिन्दकाः[30b]।
विशीर्यन्ते स्वयञ्चैव[31] दैवोपहतकास्तथा[31a] ॥ ३५ ।

[30b] निन्दकः [31] विशीर्यते स्वयं ह्येव [31a] हतकस्तथा

35. In view of the fact that *Dharma* or righteousness is supremely powerful, the contemner of Gods and Brāhmaṇas as well as one struck down by Fate is weakened as a result of his own actions.

देवब्राह्मणनिन्दक-दैवोपहतकयोरसन्धेयत्वमाह—सदेति। सदा विशीर्यते विनश्यति स्वयं ह्येव विजिगीषूणानभियुक्तोऽपि निन्दाप्रभवपापप्रभावात्, तथा दैवोपहतकोऽपि जन्मान्तरकृत पापादेव स्वयमेव विशीर्यते ॥ ३५ ।

सम्पत्तेश्च विपत्तेश्च[32] दैवमेव हि कारणम्।
इति दैवपरो ध्यायन्नात्मना न विचेष्टते ॥ ३५ ।

[32] सम्पत्तौ च विपत्तौ च

36. Believing Providence to be the only cause behind prosperity and adversity, a fatalist seldom takes initiative for any action.

दैवचिन्तकरूपदैवपरस्यासन्धेयत्वमाह—सम्पत्तेश्चेति। सम्पत्तौ विपत्तौ च न पुरुषकारः कारणम् इति दैवपरो ध्यायन् आत्मना न विचेष्टते; यथोपनतेऽपि भोजने दैवपरो विपद्यत एव तथेत्यर्थः ॥ ३५ ।

दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति।
बलव्यसनसक्तस्य[33] योद्धुं शक्तिर्न जायते[34] ॥ ३७ ।

[33] युक्तस्य [34] विद्यते

37. A ruler whose territory is afflicted with famine, is himself reduced (in resources), and one whose armed forces are corrupt and indisciplined do not have the power to fight (with his invading enemy).

दुर्भिक्षव्यसनिबलव्यसनिनोरसन्धेयत्वमभिधातुमाह—दुर्भिक्षेति। दुर्भिक्षव्यसनी, तथा दुर्भिक्षं भोजनाभावः (भोजनाभावात्)। बलव्यसनसक्तस्य अमानितविमानितादीनिति[5]। शेषः सुगम ॥ ३७ ॥

[5] अमानित मानितादीनि इति।

[35]अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते[35a]।
ग्राहोऽल्पीयानपि जले गजेन्द्रमपकर्षति[36] ॥ ३८ ।
[ग्राहश्चानीरदेशस्थः शुनापि परिभूयते]*

[35] अदेशस्याहि रिपुणा स्वल्पकेनाभिजीयते [35a] वध्यत

[36] गजेन्द्रमपि कर्षति

* This line does not occur in the B.I. Text

38. A ruler, out of his dominion (who takes refuge in a foreign land), may be assassinated by even a weaker enemy, just as the king of elephants (a tusker) is drawn into water even by small sharks, and again as sharks out of water (on land) are overcome even by dogs.

अदेशस्थस्यासन्धेयत्वमाह—अदेशस्थ इति। अदेशस्थः स्वयोग्यदेशेतरदेशस्थः, स्वल्पकेन क्षुद्रेण रिपुणा, अभिजीयते (हन्यते इति मूलम्)। दृष्टान्तेन समर्थयति, ग्राहेति स्पष्टम् ॥ ३८ ।

बहुमित्रस्तु सन्त्रस्तः श्येनमध्ये कपोतवत्।
येनैव गच्छति पथा तेनैवाशु विनश्यति[36a] ॥ ३९ ।

[36a] विपद्यत

39. A ruler infested with many enemies always trembles like a pigeon in the midst of hawks, and in whichever direction he moves he is quickly outmanoeuvred and destroyed.

बहुरिपोरसन्धेयत्वमभिधातुमाह—बहुमित्रस्त्विति ॥ स्पष्टम् ॥ ३९ ।

अकालयुक्तसैन्यस्तु हन्यते कालयोधिना।
कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ ४० ।

40. One who marches out with his forces untimely (or unprepared *akāla-yukta*) is defeated by his enemy arrayed with timely precautions, just as the crow, devoid of sight at night, is struck down by the owl.

अकालयुक्तस्यासन्धेयत्वमाह—अकालयुक्तेति। अकालयुक्तः स्वसामर्थ्याननुगुणकालवर्ती, कालयोधिना स्वानुकूलकाल युद्धकारिणा, अचिरात् सत्वरं, कौशिकेन दिवाभीतेन पेचकेन, निशान्ते हतज्योतिः रात्र्यन्धः वायस इव, हन्यते ॥ ४० ।

सत्यधर्मव्यपेतेन न सन्दध्यात् कथञ्चन[37] ।
स [37a]सन्धितोऽप्यसाधुत्वादचिराद्याति विक्रियाम् ॥ ४१ ।

[37] कदाचन [37a] सुसंहितोऽप्य

41. No alliance whatsoever should be made with one of unrighteous conduct, because even a firmly laid down treaty may soon be trangressed by such a person out of his (inherent) dishonesty.

सत्यधर्मव्यपेतस्यासन्धेयत्वमाह—सत्यधर्मेति । तथा एभिर्विंशतिसंख्यैः शत्रुभिः सह सन्धिर्न कार्यो यस्मात् स्वयमेव विनश्वरा ह्येते ॥ ४१ ।

सत्यार्यधार्मिकानार्य[38] भ्रातृसंघातवान् बली ।
[38a]अनेकविजयी चेति सन्धेयाः सप्त कीर्तिताः ॥ ४२ ।

[38] सत्यार्यौ धार्मिकानार्यौ [38a] अनेकयुद्धविजयीति

42. The following seven types of rulers are worthy of alliance, viz., one steadfast in his promises, an *Arya* (a high born or one who conforms to Vedic tradition), one of righteous conduct, an *Anārya* (not belonging to the Aryan stock, i.e., of indigenous races, capable of taking stern retaliatory measures), one having many (devoted) brothers to support him, a ruler strong (in resources) and one victorious in many encounters.

सप्तानां सन्धेयानामुद्देशमभिधातुमाह—सत्यार्य्यविति । सुगमम् ॥ ४२ ।

सत्यञ्च पालयन्[39] सत्यसन्धितो नैति विक्रियाम् ।
प्राणबाधेष्वपि[40] व्यक्तमार्यो नो यात्यनार्यताम्[40a] ॥ ४३ ।

[39] सत्योऽनुपाल्यन् सत्यं सन्धितो [40] प्राणात्ययेष्वपि
[40a] नायात्यनार्यताम्

43. He who is habitually steadfast in keeping his promises, is not likely to violate it. Similarly an *Arya* (of noble lineage) even for the danger of his life will not behave like an *Anārya* (of vile propensities).

सत्यार्ययोः सन्धेययोः स्वरूपमाह—सत्यञ्चेति । अनार्यतां न याति, स्वकमर्य्यादो न भवतीत्यर्थः ॥ ४३ ।

धार्मिकस्याभियुक्तस्य सर्व एव हि युध्यते ।
प्रजानुरागधर्माभ्यां[41] दुःखच्छेद्यो[41a] हि धार्मिकः ॥ ४४ ।

[41] प्रजानुरागाद्धर्माच्च ; प्रजानुरागाद्भक्त्या च [41a] दुःखोच्छेद्यो

44. A righteous ruler is actively supported by all (all the elements of state, *prakṛtis*) when assailed (by an enemy). So a righteons ruler by

virtue of his love and attachment for his subjects and for *Dharma* (virtue), becomes invincible.

धार्मिकस्य सन्धेयतामभिधातुमाह—धार्मिकस्येति। धार्मिकाभियोगे सर्वाभियोगः प्रपद्यते, यतः स प्रजानुरागधर्मतो दुरुच्छेद्यो भवतीत्यर्थः ॥ ४४ ।

[42]सन्धिः कार्योऽप्यनार्येण सम्प्राप्योत्सादयेद्धि सः ।
रेणुकायाः सुत इव मूलेष्वपि न तिष्ठति ॥ ४५ ।

[42] सन्धिः कार्यो ह्यनार्येण स प्रायः सादयन् द्विषः ।

45. Peace has to be made with an *Anārya* prince in order to avoid his stern wrath leading to total destruction as happened to the Kṣatriyas who had been thoroughly destroyed by Paraśurāma, the son of Reṇukā.

अनार्येणापि सन्धिः कर्तव्य इत्याह—सन्धिरिति। अनार्येणापि दुःशीलेनापि, सन्धिः कार्यः, यतः सः सम्प्राप्योत्सादयेत्, द्विषः शत्रून्, प्राप्य उत्सादयेत् विनाशयति। रेणुकायाः जमदग्निपत्न्याः, सुतः परशुरामः इव मूलेष्वपि क्षत्रियानुत्साद्य तद्बालान्तरेष्वपि न तिष्ठति। तानप्येकविंशतिवारान् उत्सादितवानित्यर्थः। अनार्यता तु शास्त्रेषु दुष्टस्यैव बधोऽभिहितः, तेन तु अदुष्टानां बहूनां वध इति ॥ ४५ ।

संघातवान् यथा वेणुर्निबिडः कण्टकैर्वृतः ।
न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा ॥ ४६ ।

46. Just as a bamboo grove covered by throny thickets (is impenetrable), so also a ruler supported by his (devoted) brothers is invincible.

भ्रातृसंघातवतः सन्धेयत्वमभिधातुमाह—संघातवानिति प्रतीतम् ॥ ४६ ।

समाक्रान्तस्य बलिना सर्वयत्नोवतोऽपि हि ।
हरिणस्येव सिंहेन शरणं नेह[43] विद्यते ॥ ४७ ।

[43] नेव

47. When attacked by a stronger enemy, a ruler inspite of all his efforts finds himself in a helpless condition like a deer in the clutches of a lion.

बलिना सन्धिः कर्तव्य एवेत्याह—समाक्रान्तस्येति। बलवता समाक्रान्तस्य केनाप्युपायेन निस्तारो नास्तीत्यर्थः। अतो बलीयान् सन्धेय एव सर्वथेति प्रतीतम् ॥ ४७ ।

ईषदायच्छमानो[44] हि सिंहो मत्तमिव द्विपम्[45] ।
हिनस्ति[46] बलवांस्तस्मात् सन्धेयः शिवमिच्छता ॥ ४८ ।

[44] मानोऽपि [45] मत्तानपि द्विपान्

[46] निहन्ति

48. Intending to acquire only a portion (not the whole) of the territory when a stronger ruler invades the kingdom (of a weaker ruler), he will kill the latter like a lion killing an infuriated elephant. Hence in the interest of his own welfare he (the weaker ruler) should conclude peace with the assailant.

किञ्च, ईषदिति ईषदायच्छमानः किञ्चिन्मात्रमादातुमुद्यतः, बलवान् मत्तद्विपघाती सिंह इव, हिनस्ति निहन्ति, तस्मात् शिवं स्वकुशलं इच्छता, स सन्धेयः, एव इति ॥ ४८ ।

बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातन् नहि घनः कदाचिदुपसर्पति[47] ॥ ४९ ।

[47] कदाचिदपि सर्पति

49. There is no evidence to justify fighting with a more powerful enemy, for clouds can never move in a direction opposite to that of the wind.

अपरञ्च, बलिनेति । एवं दुर्बलोऽपि बलिनः सम्मुखं स्थातुमशक्त इत्यर्थः ॥ ४९ ।

बलीयसि प्रणमतां काले विक्रमतामपि[48] ।
सम्पदो नापसर्पन्ति[49] प्रतीपमिव निम्नगाः ॥ ५० ।

[48] विक्रामतामपि [49] नापगच्छन्ति

50. Wealth or the resources of a state will not be unnecessarily exhausted if peace is concluded with a stronger adversary, just as rivers naturally flow downwards. It may provide the weaker ruler to demonstrate his prowess in an opportune time.

किञ्च, बलीयसीति । इति प्रतीतम् ॥ ५० ।

जमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा ।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते[50] ॥ ५१ ।

[50] भिद्यते

51. A ruler who has to his credit many victories against his adversaries in different fields of battle on different occasions commands respect from all by the influence of his prowess like the son of Jamadagni (Paraśurāma).

अनेकयुद्धजयिनः सन्धेयत्वं दृष्टान्तेन समर्थयितुमाह—जमदग्नेरिति । सुप्रतीतम् ॥ ५१ ।

अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।
तत् प्रतापेन तस्याशु वशं गच्छन्ति शत्रवः[51] ॥ ५२ ।

[51] विद्विषः

52. When a victor of many battles forms an alliance with a ruler,

the adversaries of the latter soon yield to him out of their fear for his prowess.

एतदेव समर्थयन्नाह—अनेकेति। स्पष्टम् ॥ ५२।

न जातु गच्छेद् विश्वासं सन्धितोऽपि[52] हि बुद्धिमान्।
[53]अद्रोहसमयं कृत्वा वृत्रमिन्द्रः पुराऽवधीत्[54] ॥ ५३।

[52] संहितोऽपि [53] अद्रोहे
[54] पुरावधीत्

53. An intelligent ruler (*Vijigiṣu*) should not place too much reliance on his adversary even after concluding peace (i.e., he should not be complacent) ; rather he should mark time during the period of cessation of hostilities and strike him as had been done to Vṛtra (the demon leader) by Indra (the lord of the Gods) in times of yore.

सन्धिरपि सर्वथा न विश्वसनीय इत्याह—न जात्विति। सन्धित (संहितः) कृत सन्धानः, बुद्धिमान् सुचतुरः, जातु कदाचित् विश्वासं न गच्छेत् न विश्वसेत्। हि यतः, अद्रोहे (अद्रोहसमये वा) द्रोहाकरणविषये, समयं प्रतिज्ञां कृत्वा, इन्द्रः पुरा पूर्वस्मिन् काले, वृत्रं तन्नामकमसुरं अवधीत् ॥ ५३।

विकारं याति पुत्रो हि[55] राज्यालीढः पिता तथा।
तल्लोकवृत्तान् नृपतेरन्यद् वृत्तं प्रचक्षते ॥ ५४।

[55] पुत्रोऽपि राज्यालीढस्तथा पिता

54. A son or a father, whoever comes to throne. undergoes a change in his nature and way of life. So it is said that the ways of life of the common people is much too different from that of the ruler.

राज्यं विकारोत्पादीत्याह—विकारमिति। राज्यालीढः राज्यलक्ष्म्याऽलङ्कृतः, पुत्रोऽपि तथा पिता विकारं विकृतिमद्भावं याति प्राप्नोति। तत् तस्मात् लोकवृत्तान् लोकचरितान्, नृपतेर्वृत्तं अन्यत् विलक्षणं प्रचक्षते स्मृतिकाराः इत्यर्थः ॥ ५४।

अभियुक्तो बलवता तिष्ठन् दुर्गे प्रयत्नवान्।
बलीयस्तराह्वानं कुर्वीतात्मविमुक्तये ॥ ५५।

55. In the event of an attack by a stronger (and more powerful) enemy, the assailed ruler should take shelter in his fort taking necessary measures for resistance, and in the meantime invoke the assistance of a ruler (an ally) more powerful than the invader for his own liberation (from the besieged condition).

यत्र बलवान् सन्धिं नेच्छेत् तत्र विधेयमाह—अभियुक्त इति। तिष्ठन् दुर्गे प्रयत्नवान् कृतरक्षातिशयः। तस्मादपि यो बलीयस्तरस्तस्याह्वानं कुर्वीतात्मविमुक्तये दुर्गोपरोधविमुक्त्यर्थमिति ॥ ५५।

[56]स्वोत्साहशक्तिमुद्वीक्ष्य विगृह्णीयान् महत्तरम् ।
केशरीव द्विपमिति भारद्वाजः[57] प्रभाषते ॥ ५६ ।

[56] स्वशक्त्युत्साह [57] भरद्वाजः

56. (In case the support of a stronger ally is not available) the besieged ruler should assess his own power and resources and give a fight to the more powerful invader with all his energy as a lion would jump upon a more powerful elephant. This is the opinion of Bharadvāja (cr the school of Bhāradvāja).

बलीयस्तराभावे विधेयमभिधातुमाह—स्वशक्त्युत्साहमिति (स्वोत्साहशक्तिमिति मूलम्)। स्वशक्तयः (स्वकीयाः शक्तयः) प्रभुमन्त्रोत्साहलक्षणाः। उत्साहः शक्तित्वेन पठितोऽपि पुनरुपादीयते शौर्यस्याधिकार प्रदर्शनार्थम्। तम् उद्वीक्ष्यात्मनो, विगृह्णीयात् महत्तरं ज्यायांसं, केशरीव द्विपं, केशरी द्विपापेक्षया महत्तरो न भवति किन्तु शक्त्युत्साहयुक्तः। केशरिसमानमात्मानमुद्वीक्ष्य महत्तरमपि (द्विपं विगृह्णाति तथा) विगृह्णीयादिति भारद्वाजो महर्षिः प्रभाषते। मतान्तरदर्शनं च गत्यन्तराभावे ज्यायसा विग्रहो नान्यथेति ॥ ५६ ।

एकोऽपि सिंहः साहस्रं यूथं मथ्नाति दन्तिनः[58] ।
तस्मात् सिंह इवोदग्रमात्मानं[59] वीक्ष्य सम्पतेत् ॥ ५७ ।

[58] दन्तिनाम् [59] सिंहमिवोदारमात्मानं

57. A single lion destroys (with his prowess) the herd of a thousand tuskers. In the same way like a lion, fired by his own valour a (besieged) ruler should fall upon a more powerful enemy.

एतदेव द्रढयितुमाह—एकोऽपीति। एकोऽपि सिंहः साहस्रं यूथं दन्तिनां पक्षे सद्गुशलक्षण-क्षत्रियाणां मथ्नाति विनाशयति। तस्माद् सिंहमिवोदग्रमात्मानं* वीक्ष्य ज्यायांसं प्रति सम्पतेत्। नान्यथेति ॥ ५७ ।

* मिवोरमानमुदारं वीक्ष्य

ज्यायांसं हि ससैन्यस्य[60] बलाद् विक्रम्य निघ्नतः ।
प्रतापसिद्धौ[61] सर्वत्र भवन्ति रिपवोऽपरे[62] ॥ ५८ ।

[60] ज्यायांसमल्पसैन्यस्य [61] सिद्धाः
[62] रिपवो वशे

58. The (assailed) ruler even with his small (limited) forces surcharged with desperate courage can outmanoeuvre the stronger enemy, and then the success of his powerful endeavour brings his other enemies under his submission (without any fight).

अत्र गुणं दर्शयन्नाह—ज्यायांसमिति। ज्यायांसं प्रभुशक्त्यधिकं अल्पसैन्यस्य उत्साहसम्पे-

वाधिकस्य बलाद्विक्रम्य निघ्नतो व्यापादयतः, प्रतापेनैव सिद्धा भवन्ति रिपकेऽपरेः, विग्रहं विनैवेत्यर्थः ॥ ५८ ।

सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि ।
न हि संशयितं कुर्यादित्युवाच बृहस्पतिः ॥ ५९ ।

---

59. If the prospects of victory in war appears doubtful, the *Vijigiṣu,* should conclude peace even with an adversary of equal powers and resources. Bṛhaspati says that no ventuie should be made if the result seems doubtful.

अगतिकगतिपक्षे विग्रहमभिधाय प्रस्तुतसन्धिमेवाभिधातुमाह—सन्धिमिति । न केवलं ज्यायसा, समेनापि समशक्तिनापि सन्धिमिच्छेत् । कुत इत्याह—यतः सन्धिग्धो विजयो युधि, यतो हीनैरपि ज्यायांसो जिता दृश्यन्ते, इति सांशयिकं कार्यं विवेकी न कुर्यादिति बृहस्पतिरुवाच । निःसन्दिग्धे प्रवृत्तिर्नीतिविदामिष्यत इति ॥ ५९ ।

[63]तत्सम्प्रवृद्धे रतिवृद्धिकामः समेन सन्धानमिहोपगच्छेत्[64] ।
अपक्वयोर्वा घटयोरवश्यमन्योन्यभेदी समसन्निपातः ॥ ६० ।

---

[63] आसम्प्रवृद्धे रभिवृद्धिकामः [64] मिथोपगच्छेत्

61. Death and destruction, sometimes of both the parties, are the by concluding alliance with a power of equal resources as otherwise (by fighting with each other) both would perish like two unbaked pitchers striking each other.

तथा—आसम्प्रवृद्धे रिति (तत्सम्प्रवृद्धे रिति मूलम्) । आसम्प्रवृद्धेः सम्यक् प्रकृष्टा वृद्धिः सा भवति यावत् अभिवृद्धिकामो विजिगीषुः समेन सन्धानं इह शास्त्रे स्थित (इह पृथिव्यां वा) उपगच्छेत् । व्यतिरेकेणैतद् द्रढयति, अपक्वयोरिव घटयोः समसन्निपातः तुल्याघातः अन्योन्यभेदी उभयोः परस्परभेदकारी भवति ॥ ६० ।

नाशो[65] भवति युद्धेन कदाचिदुभयोरपि ।
सुन्दोपसुन्दावन्योन्यं समवीर्यौ हतौ न किम् ? ॥ ६१ ।

---

[65] युद्धे विनाशो नियतः ; युद्धेन नाशो भवति

61. Death and destruction, sometimes of both the parties, are the (inevitable) results of war. Did not the demons Sunda and Upasunda of equal strength kill each other ?

एतदेव दर्शयन्नाह—युद्धेन नाशो भवतीति । तथा च सुन्दोपसुन्दाख्यौ दानवावन्योन्यवधौ[5] तिलोत्तमाभिलाषात् जातविरोधौ सोदर्यौ समवीर्यौ हतौ युधीति ॥ ६१ ।

[5] वनन्यवधौ

विहीनोऽपि हि सन्धेयोऽपि[66] व्यसने रिपुरागतः ।
पतन् दुनोति हिमवत्तोयबिन्दुरिव क्षितौ[67] ॥ ६२ ।

[66] हि सन्धेयो [67] क्षते

62. In times of an imminent danger from the enemy quarters threatening a *vijigīṣu,* he may conclude peace even with his weaker adversaries (to avoid the possibility of any trouble from their quarters), for drops of ice-cold water on an open wound would cause severe pain (i.e., when already afflicted with troubles, slight hostility from any direction would make it unbearably painful).

न केवलं समो, हीनोऽपि सन्धेय इति दर्शयन्नाह—विहीन इति । हि यस्मात् मनो दुनोति क्षते तोयबिन्दुरिव (पतन्) एवं व्यसने रिपुर्हीनोऽपि तस्मात् सन्धेयस्तथा ॥ ६२ ।

न सन्धिमिच्छेद्धीनेश्च[68] तत्र हेतुरसंशयः ।
तस्य विश्रम्भमालम्ब्य[69] प्रहरेत् तं गतस्पृहः[70] ॥ ६३ ।

[68] हीनश्चेत् [69] मालक्ष्य
[70] तत्र निःस्पृहः ; निष्ठुरम्

63. If the weaker prince does not like to bind him down in an alliance with the *vijigīṣu,* for the reason of the former's lack of confidence on the latter, the *vijigīṣu* should try to win his confidence (by other means i.e., by offer of *sāma dāna* etc.), failing which he should strike him down ruthlessly.

सन्धिमनिच्छतो हीनस्य बधोपायमाह—न सन्धिमिति । यदि हीनोऽपि सन्धिं नेच्छेत् तत्रालक्षितः कश्चिद्धेतुः कारणमसंशयं विद्यत इत्यनुमीयते इति शेषः । तत्र सामादिभिस्तथा विधेयं यथा विश्रम्भो भवति । विश्रम्भं चालक्ष्य प्रहरेदिति निष्ठुरं, यथा स समूलो नश्यतीति ॥ ६३ ।

बलीयसाभिसन्धाय तं प्रविश्य प्रतापवान्[71] ।
तथा साध्वनुगन्तव्यो[72] यथा विश्रम्भमाप्नुयात् ॥ ६४ ।
विश्रम्भी[73] नित्यमुद्विग्नो निगूढाकारचेष्टितः ।
प्रियाण्येवभिभाषेत यत् कार्यं कार्यमेव तत् ॥ ६५ ।
विश्रम्भात् प्रियतामेति विश्रम्भात् कार्यमृच्छति ।
विश्रम्भेण हि देवेन्द्रो दितेर्गर्भमघातयत्[74] ॥ ६६ ।

[71] प्रयत्नवान् [72] सावुपगन्तव्यो, सावनुगन्तव्यो
[73] विश्रम्भे ; विसन्धोनिरय [74] मपातयत्

64-66. Having concluded peace with a stronger adversary, a ruler

should by all possible means try to be intimate with him, and gain his confidence by meticulously following his commands. But inspite of securing the confidence of the former, the ruler should always be alert and watchful of his movements secretly and try to please him with sweet and gratifying words, while pursuing (covertly though) his own end and aim (i.e., to strike the adversary at an opportune moment). Intimacy develops out of confidence and the desired goal is also achieved by creating confidence. It was through confidence that Indra (the lord of the Gods) could destroy the foetus of Diti (the mother of the demons).

संशयवृत्तेर्हीनतरसन्धिममिधातुमाह—बलीयसेति। बलीयसा ज्यायसा दण्डादिभिरुपनतः अभिसन्धाय सन्धिं कृत्वा तमनुप्रविश्य अनुजीविवृत्त्यादिना प्रयत्नवान् अतिसन्धेयो भूत्वा तथासौ आश्रितोऽनुगन्तव्यः सेवनीयो यथा विश्रम्भमाप्नुयादिति ॥ ६४ ।

एतदेव समर्थयति—विश्रम्भीति। विश्रम्भीलब्धविश्रम्भो (लब्धविश्वासो वा) नित्यमुद्युक्तः सावधानो निगूढाकारचेष्टितः कृतेङ्गिताकारविपर्यासः "आचरन् हि प्राज्ञो धृतिम्" इति वचनात्। प्रियाण्येवाभिभाषेत जयजीवेत्यादिकानि, यत्तु कार्यं विनाशादिकं तत्कार्यमवश्यं कर्तव्यमेव ॥ ६५ ।

विश्रम्भकर्मफलं दर्शयन्नाह—विश्रम्भादिति। विश्रम्भाद्विश्वासात् प्रियतां वल्लभत्वमेति, विश्रम्भात्कार्यं तद्वधादिकं ऋच्छति गच्छति। विश्रम्भेण देवेन्द्रो दितेर्गर्भं दैत्यजनन्या गर्भम् अपातयत्। प्रतिबलो दैत्यो भविष्यतीति शङ्कया ॥ ६६ ।

युवराजेन सन्धाय प्रधानपुरुषेण वा।
ततः[75] प्रकोपं जनयेदभियोक्तुः स्थिरात्मनः ॥ ६७ ।

[75] अन्तः प्रकोपं

67. The assailed ruler should enter into secret alliances with the crown prince and principal officers (of the assailant king) in order to create dissension (in the ranks) of the assailant king of firm resolution (so that his resolution is slackened due to growing internal dissension, *antahprakopa*).

भूयोऽपि ज्यायस्यभियोक्तरि विधेयमाह—युवराजेनेति। अभियोक्तुः युवराजेन प्रधानपुरुषेण वा मन्त्रिपुरोहित-सेनापत्यादिना सन्धाय दृढतरं (गूढतरं वा) सन्धिं कृत्वा अन्तः प्रकोपं जनयेत्। परस्परविरोधं कुर्यादभियोक्तुः स्थिरात्मनोऽपि तथा ॥ ६७ ।

अर्थोत्सर्गेण महता लेखेश्चाप्यात्मसंहिते[76]।
प्रधानपुरुषस्येह प्रकुर्वीतात्मदूषणं[77] ॥ ६८ ।
दूषिते हि महामात्ये रिपुरुग्रोऽपि धीमता।
स्वपक्षे यस्य[78] विश्वास इत्थम्भूतश्च निष्क्रियः ॥ ६९ ।

[76] श्चाप्यर्थसंहिते [77] प्रकुर्वीतार्थदूषणम्; कारयेदर्थदूषणम्
[78] मात्यविश्वासमित्य

68-69. He should also by offering money (bribes) and procuring forged documents (of sinister import) try to implicate the principal officers of the enemy state with false charges of corruption.

When an intelligent ruler is able to implicate the principal officers of the enemy with charges of corruption, the enemy, however formidable thinking faithlessness to be rampant in his own ranks, becomes inactive himself (i.e., does not care to risk a military expedition).

प्रधानपुरुषस्यार्थदूषणोपायमाह—अर्थोत्सर्गेणेति। अर्थस्य हिरण्यादेरुत्सर्गेण दानेन महता प्रचुरेण, लेखैश्चाप्यर्थसंहितैः मुद्राराक्षसोक्तन्यायेन भेदप्रतिपादकार्थसंहितैः प्रधानपुरुषस्यसेनापत्यादेर्दूषणं कुर्यात्॥ ६८।

दूषणफलमभिधातुमाह—दूषिते इति। दूषिते सम्पादितदोषे महामात्ये सेनापत्यादिके रिपुरुग्रोऽपि बलवत्तरोऽपि क्रूरोऽपि धीमता विजिगीषुणा; स्वपक्षे आत्महितपक्षे यात्यविश्वासं, इत्थम्भूतश्च निष्क्रियः अभियोगक्रियारहितो भवतीत्यर्थः॥ ६९।

अरेरमात्यान् सन्धाय तदवस्थं[79] समुन्नयेत्।
भिषग्भेदेन वा शत्रुं रसदानेन साधयेत्[80]॥ ७०।

---

[79] तदारम्भं शमं नयेत् [80] शातयेत्

70. By entering into secret alliances or by conspiracy with the *amātyas* or counsellors of the enemy, the assailed ruler should try to neutralise the move of the assailant, and kill him by estranging the court physicians or by secret administration of poisonous drugs.

अरिसाधनस्यावश्यफलं तदुपायश्चाभिधातुमाह—अरेरिति। अरेः अभियोक्तुः, अमात्यान् सन्धाय तदारम्भं तत्कृत प्रतिकूलताचरणोद्योगं, शमं उपशमनं, नयेत् प्रापयेत्। भिषग्भेदेन उत्कोचादि द्वारा वैद्यभेदं समुत्पाद्य, वा अथवा, रसदानेन विषप्रयोगेन शत्रुं, साधयेत् हन्यात्॥ ७०॥

अरेः सर्वप्रयत्नेन पश्चात्कोपं प्रकल्पयेत्।
पश्चात्कोपमथातिष्ठन्ननुस्मृत्य[81] प्रसाधयेत्॥ ७१।

---

[81] मथानिष्ठमनुसृत्य प्रघर्षयेत्

71. The assailed ruler should in all seriousness incite hosility of the enemy of the assailant, situated to his rearside (so an ally to the former), so that by taking advantage of the critical situation of the assailant due to hostility on his rear (*paścātkopaṁ*) the assailed ruler may crush him.

किञ्च, अरेरिति। तथा अरेरभियोक्तुः सर्वप्रयत्नेन अत्यादरेण पश्चात्कोपं स्थानीये विषये वा कोपं कलहं प्रकल्पयेत् निष्पादयेत्। पश्चात्कोपमथातिष्ठन् विजिगीषुमनुसृत्य (अनुस्मृत्य वा) प्रघर्षयेत् हन्यादिति॥ ७१।

उद्देश[82]कृतसंवासैश्चारै[82a]र्नैमित्तिकैररेः[83] ।
उपोढव्यसनादेशं कारयेत् साधु[84]लक्षणैः ॥ ७२ ।

[82] तद्देश [82a] श्चारै
[83] कैरपि [84] सिद्ध

72. (In order to prevent an imminent invasion by the enemy) the ruler should deploy spies in the guise of astrologers and foretellers decked with all marks of an expert in reading omens and signs, so that they would predict (as if by calculating the movement of stars etc.) the dangerous results of the venture undertaken (which may dampen the spirit of the invader and his men for the time being at least).

उपायान्तरमाह—तद्देशेति (उद्देशेति मूलम्) । अरेर्यो देशः तद्देशकृतसंवासैः, तद्देशवासिभिः, तद्देशवासिनो हि प्रात्ययिका भवन्ति । चारैर्गूढपुरुषैस्तथा नैमित्तिकैर्ज्यौतिषिकव्यञ्जनैररेरभियोक्तुरुत्पात-सूचितं उपोढव्यसनादेशं महाभयक्षयपराजयदं[6] आदेशं सिद्धलक्षणैः (साधुलक्षणैर्वा) कारयेत् ॥ ७२ ।

[6] जयलक्षणामापदं

क्षयव्ययायासवधादिदोषं व्यपेक्षयावेक्षित[85]साधुकृत्यः ।
कामान्तु[86] पीडामपि काञ्चिदिच्छेन्न विग्रहं तत् प्रभवा हि
दोषाः ॥ ७३ ।

[85] दोषव्यपेक्षयान्वीक्षित [86] कामं तु

73. In view of the fact that in a war loss of men and materials (*kṣaya*), heavy expenditure (involving drainage of the treasury, *vyaya*), various difficulties (physical and mental strains, *āyāsa*) and death of principal officers etc., are unavoidable, an intelligent ruler should carefully assess the probable losses and benefits and would not like to continue a war (i.e., call a truce) even by willing acceptance of some hardship, for, the consequences of war are always disastrous.

अभियोगत्याजनार्थं भूयोऽपि निषेधं दर्शयन्नाह—क्षयेति । वाहनपुरुषादिवधः क्षयः । धान्य-हिरण्यादीनामुपक्षयो व्ययः । प्रयाणे शीतोष्णवर्षदुःखाद्या बाधा आयासः । वधो युद्धे शस्त्रादिना मरणम् । आदिशब्दादौपनिषदप्रयोगैरन्नवैकल्यादि । एते दोषा विग्रहे भवन्तीति येषामपेक्ष्या वीक्षितसाधुकृत्यः वीक्षितं साधुकृत्यं निश्चयश्चोपायो येन विजिगीषुणा स तथा । कामन्तु—अगतिकगति पक्षे कामशब्दप्रयोगः—परम् । पीडामपि कोशादिकृतपीडामपि काञ्चिदिच्छेत् न विग्रहं, हि यस्मात् तत्प्रभवाः सर्वेऽपि क्षयादिदोषाः ॥ ७३ ।

आत्मा[87]बलं वा सुहृदो धनानि वृथा भवन्तीह निमेषमात्रात् ।
मुहुर्मुहुर्व्याकुलितानि तानि तस्मान्न विद्वानतिविग्रही स्यात् ॥ ७४ ।

[87] कलत्रमात्मा सुहृदो

74. In course of a war the ruler may in a moment have to suffer the loss of his wives, his own self, friends and allies and also his wealth. In consideration of constant anxiety and mental suffering resulting from wars an intelligent ruler should not indulge in frequent warfare (i.e., he should not be a warmonger (*ativigrahi*).

तदेव स्पष्टयन्नाह—कलत्रमिति। कलत्रं प्राणवल्लभं स्त्रीजनः। आत्मा सकलशास्त्रसंस्कृतः स्वकायः। सुहृदो बान्धवाः मित्राणि च, धनानि रत्नादीनि चतुर्विधानि। वृथा भवन्ति निरर्थकानि जायन्ते। शस्त्रप्रहारैर्गतजीवितस्य तत्कार्यासम्पादनात्। निमेषमात्रादेव। मुहुर्मुहुश्च विग्रहे सति आकुलितानि विग्रहभयेन भवन्ति तानि कलत्रादीनि। तस्मात् कारणात् विद्वान् नीतिशास्त्रवित् अतिविग्रही विरोधकारी स्यान्न च। (अ)न्यायतः समायातविग्रहं परिहरेदित्यर्थः ॥ ७४।

सुहृद् धनं तथा राज्यमात्मानं कीर्तिमेव च।
युधि[88] सन्देहदोलास्थं को हि कुर्यादबालिशः ॥ ७५।

[88] इति

75. Knowing that in a war friends, riches, the kingdom and even his own life and glory are put to stake, who would be so imprudent to launch upon a war ?

अन्यायेन संग्रामे दोषं दर्शयन्नाह—सुहृदिति। इति प्रतीतम् ॥ ७५।

साम्ना प्रदानेन विभेदनेन सन्तापयेत्[89] साध्वभियुज्यमानः।
सन्धित्सुरेवास्य[90] च स्यैन्यचक्रं सीमान्तमायान्तमपेत
सन्धिम् ॥ ७६।

[89] सन्धापयेत्; संस्थापयेत्; संस्तम्भयेत्

[90] सन्धित्सुरारात् समसैन्यचक्रं सामन्तमायान्त

76. A wise ruler when assailed should adopt the three well known means of *sāma* (conciliation), *dāna* (offer of gifts) and *bheda* (sowing dissension in enemy's ranks) and conclude peace with the assailant. If the assailant himself is desirous of peace, though of identical military strength, the ruler would do well to conclude peace with him from a distance (i.e., before he undertakes a march).

समोऽप्यभियोक्ता सन्धेय एवेति दर्शयन्नाह—साम्नेति। साम्ना सम्बन्धोपाख्यानादिपञ्चविधेन। तद्यथा सम्बन्धोपाख्यानम्, गुणकीर्तनम्, परस्परोपकारदर्शनम्, आयतिप्रदर्शनम्, आत्मोपनिधानमिति। तत्र अस्माकं पिता तव भ्राता भवतीत्यादि सम्बन्धोपाख्यानम्। तथा अभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां श्लाघनं गुणकीर्तनम्। तथा भवद्भिरस्माकमस्माभिश्च भवतामिति परस्परोपकारदर्शनम्। तथा अस्मिन्नेव कृते इदमावयोर्भविष्यतीत्याशाजननमायतिदर्शनम्। तथा यन्मम द्रव्यं तद् भवतः स्वकृत्येषु उपयोज्यमिति आत्मोपनिधानमित्येवं साम पञ्चविधम्। तथा प्रदानमथोपकारकद्रव्यदपि

चतुर्विध(पञ्चविध ?)मपूर्वदानं, गृहीतप्रतिदानं, गृहीतानुवर्तनं, (स्वयं ?) माह-प्रमोक्ष इति। भेदनं द्विविधं शङ्काजननमभिर्मत्सनं च भेद इति कौटिल्यः। ऐवंविधोपायत्रयेण सन्धापयेदभियोक्तारं विगतामर्षं कृत्वा सन्धौ योजयेन् साधु सुश्लिष्टं यथा भवति। अभियुज्यमानो विजिगीषुः सन्धितुर्यदि भवति आरात् सन्निहितं सामन्तं भूम्यनन्तरमित्यर्थः। आयान्तमागच्छन्तमपेत सन्धिं सन्धापयेदिति सम्बन्धः॥ ७६।

[91]सुगुप्तिमाधाय सुसंहतेन[92] बलेन धीरो विचरन्नरातिम्।
सन्तापयेद्व येन सुसम्प्रतप्तस्तप्तेन सन्ताप[93]मुपैति तप्तः॥ ७७।

---

[91] स्वगुप्ति [92] सुसंहितेन

[93] सन्धानमुपैति

77. Armed with adequate defences and an well organised army, a wise ruler, if assailed, should deal furiously with the attacking enemy, so that the latter is made to suffer serious consequences. Only when the enemy is afflicted severely, will himself sue for peace, as a piece of red hot iron only is fused with another piece of red hot iron.

सन्धिमनिच्छत्यभियोक्तरि विधेयमाह—सुगुप्तिमिति। सुगुप्तिं (स्वगुप्तिं वा) आत्मनः सपरिच्छदस्य रक्षामाधाय कृत्वा सुसंहतेत (संहितेन) अभेदेनैव एकीभूतेन बलेन चतुरङ्गेण सारतरेण धीरो धैर्यवान् विचरन् विविधं पश्चात् पुरतः सर्वतः चरन् वीवधासारप्रचारं कुर्वन् अरातिं, सन्धिमनिच्छन्तं सन्तापयेदुद्वेजयेत् येन स सुसम्प्रतप्तो भवतीति शेषः। यस्मात् तप्तं लोहं तप्तेनैव लोहेन सन्धानमुपैति नान्यथेति दर्शनार्थः। तथा च कौटिल्यः "नातप्तं लोहं लोहेन सन्धत्त" इति (७।३।८)॥ ७७॥

इति स्म सन्धिं खलु सन्धिवित्तमा बभाषिरे पूर्वतरा[94] महर्षयः।
तदेतदेवं[95] विजयन्नरेश्वरः[96] समीक्ष्य कार्यं गुरु
चेति तद्विधाः[97]॥ ७८।

इति सन्धिविकल्पो नाम चतुर्दशं प्रकरणम्।

इति कामन्दकीये नीतिसारे सन्धिविकल्पोनाम नवमः सर्गः॥

---

[94] पूर्वतना [95] तदेतदेवं

[96] विनयेन्नरेश्वरः संवीक्ष्य [97] चेचरद् द्विधा

78. These are the different forms of peace or alliances enumerated by experts (the great sages of yore) in the theory of peace-making. A ruler should apply those theories in regulating the conduct of his enemies (and bringing them over to the path of peace) after a thorough assessment of possible good and evil consequences.

उपसंहरन्नाह—इतीति। इत्येवमुक्तप्रकारेण सन्धिवित्तमा अतिशयेन सन्धिविदः सन्धिं बभाषिरे प्रोक्तवन्तः पूर्वतमाः शुक्रबृहस्पतिप्रभृतयो महर्षयः। बलादाक्रम्य ततस्तस्मात्कारणादेतत्सन्धिमणिच्छन्नप्यरौ विनयेत् विशेषेण प्रापयेत् अरिः (रिं ?) कारयेदित्यर्थः। समीक्ष्य प्रज्ञया दृष्ट्वा कार्यं गुरु चेतरच्चैवं द्विधेति ॥ ७८ ।

इति चतुर्दशं सन्धिविकल्पप्रकरणम् ॥

इति कामन्दकीय नीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां सन्धिविकल्पो नाम नवमः सर्गः ॥

दशमः सर्गः

१५। विग्रहविकल्पप्रकरणम्।

अमर्षोपगृहीतानां मन्युसन्तप्तचेतसाम् ।
परस्परापकारेण पुंसां भवति विग्रहः ॥ १ ।
आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा ।
देशकालबलोपेतः प्रारभेत[1] हि विग्रहम् ॥ २ ।

[1] प्रारभेतैव ; प्रारभेतेह

Sarga X

Prakaraṇa 15.

(*Vigrahavikalpa*: Varieties of war)

1. Seized with revengefulness and agitated by feelings of resentment due to mutual harmful actions men take recourse to war (*vigraha*).

2. War is also resorted to by one aspiring after elevation of his status (aiming at overlordship) or one suffering from harassment at the hands of his enemies, provided his territorial and military resources and time are advantageous to him.

सन्धिविकल्पादनन्तरं विग्रहविकल्पमभिधातुं विग्रहकारणान्येव तावदाह—अमर्षोपगृहीतानामिति । परस्परापकार-निबन्धनोऽमर्षो मन्यूश्च विग्रहकारणमिति भावः । इति प्रतीतम् ॥ १ ।

आत्मन इति । न केवलममर्षादिकं विग्रहकारणं आत्मनोऽभ्युदयाकाङ्क्षापि[1] । सा विद्यते यस्य सः । पीड्यमानः परेण वा शत्रुणा कृतापकारः, गत्यन्तराभावे देशबलेन स्वसैन्यस्यानुकूल्येन[2] तथैवकालबलेनोपेतः प्रारभेतेह विग्रहं नान्यथेत्यर्थः । ततश्च स्वस्य उन्नतीच्छा, परकृतापकारश्चैतत् युद्ध कारणमिति ॥ २ ॥

[1] काङ्क्षी पीडा विद्यते [2] स्यायामानुकूल्येन

राज्यस्त्रीस्थानदेशानां यानस्य[2] च धनस्य च ।
अपहारो मदो मानः पीडा वैषयिकी तथा ॥ ३ ।
ज्ञानार्थधर्मशक्तीनां[3] विघातो दैवमेव च ।
मित्रार्थश्चापमानश्च[4] तथा बन्धुविनाशनम् ॥ ४ ।
भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् ।
एकार्थाभिनिवेशित्वमिति विग्रहयोनयः ॥ ५ ।

[2] ज्ञानस्य च बलस्य च [3] शक्तिधर्माणां [4] मित्रार्थं चापमानश्च

3-5. The sources (or causes) of war (*vigrahayonayah*) have been enumerated as follows : usurpation of the kingdom, abduction of women (of the royal family), occupation of forts and portions of territory, capture of mounts and vehicles (horses, chariots etc) as well as treasure (*yānasya ca dhanasya ca*), or enticing away of the learned men and soldiers (by the enemy), (one's own) arrogance and false sense of pride, erosion of material resources (due to enemy action, *pīḍā vaiṣayikī*), infliction of damage to learning (or to the academic institutions), to the sources of wealth (or income), to the sources of royal power (state officers and men of the armed forces) and/or to religion (or religious beliefs and institutions of the people), influence of Destiny (or divine afflictions), for the sake of friends (to render aid to them in their difficulties), aggrieved by insulting behaviour (of the adversary), (to avenge) the destruction or killing of friends (at the hands of the latter's enemy), interference or trespass into the dominion of one's dependents previously assured of protection, incitement or disaffection among the rulers of the inter-statal circle and earnestness for the acquisition of the same object or status by both the contending rulers.

विग्रहोत्पत्तिकारणान्यभिधातुमाह—राज्य इति। राज्यं सप्तप्रकृतिकम्। स्त्री सीतादिकल्पा। स्थानं जनपदादि[3]। देशो राष्ट्रैकदेशः। यानं[4] हस्त्यश्वादिवाहनम्। धनस्य रत्नादेरेतेषां प्रत्येकमपहारो विग्रहयोनिरिति सम्बन्धः। तथा मदः शौर्यादिजनितो दर्पो यथा दम्भोद्भवस्य। उक्तं च—"महादम्भोद्भवो नृप" इति। मानोऽहङ्कारः, कथमपि[4a] रामभयात् सीतां न समर्पयामीत्येवंरूपः। उक्तं च "मानाद् रावणः परदारानप्रयच्छन्ति"ति। पीडा वैषयिकी तथैव[5] जनपदरूपविषय सम्बन्धिनी पीडा सापि विग्रहयोनिरिति[6] ॥ ३ ॥

अपराण्यपि विग्रहयोनित्वेन प्रसिद्धानीत्याह—ज्ञानार्थमिति द्वाभ्याम्। ज्ञानविघातो ज्ञानस्य कारणभूतोपाध्यायादिविघातः। अर्थविघातो भूमिहिरण्यमित्ररूपस्यार्थस्य विघातः। धर्मविघातो धर्मस्य सामाजिकनियमस्य विघातः। शक्तिविघातः प्रभुमन्त्रोत्साहशक्तीनां विघातोऽनुत्पत्तौ यत्नः, उत्पन्नानां विनाशः, दैवमेव च जन्मान्तरकृतं शुभाशुभं ग्रहदौस्थ्यादिलिङ्गम्। मित्रार्थं मित्रसहायतारूपप्रयोजनम्। अपमानश्चेति मान्यानामपमाननम्। तथा बन्धुविनाशनं विग्रहयोनित्वेन प्रसिद्धमेव ॥ ४ ॥

भूतेति। भूतानुग्रह इति—एकेन दत्ताभये मृगवने यद्यपरो मृगयायां विचरति तदपि विग्रहकारणम्। तथा मण्डलस्य द्वादशराजकस्य मध्ये अदुष्टस्यापि दुषणं दुष्टत्वापादनम्। एकार्थाभिनिवेशित्वं एकस्मिन् विषये उभयोराग्रहः[7]। इति प्रकारः एवंप्रकाराण्यन्यान्यपि परीवादस्तेयादीनि विग्रहयोनयः विग्रहहेतवो भवन्तीति ॥ ५ ॥

[3] जानपदाधिष्ठानम् [4] ज्ञानं ज्ञानहेतुत्वादुपाध्यायादयः

[4a] अहमपि रावणः भयात् सीतां समर्पयामि ? इत्येवंरूपः

[5] विषयो जनपदस्तस्य पीडा [6] विषयभूल प्रकृतीनाम् (च सा तथा)

[7] एको भूम्यादिः स्त्र्यादिर्वा योऽर्थस्तत्राभिनिवेशित्वम् ग्रहणाग्रहबन्धः।

राज्यस्त्रीस्थानदेशानां दानेन च मदेन[5] च ।
विग्रहस्य तु युक्तैरिति प्रशमनं स्मृतम् ॥ ६ ।

[5] दमेन

6. To mitigate the evils of war breaking out on (any one or more of) the issues like the appropriation of kingdom, of the women (of the royal family), of forts and or portions of territory, conciliatory measures of gifts (for appeasement) and restraint (on one's own self, *dama*) should be adopted. (The method of conciliation for an assailed ruler would be surrender or cession of a part of his territory in order to retain his hold on the rest; and for an assailant it would be restoration of status quo).

कारणाभावात् कार्याभावं मन्यमानो विग्रहकारणानामुत्पन्नानामप्युपशमार्थमाह—राज्यस्त्री इति। राज्यादीनामुक्तरूपाणां प्राधान्याद (प्रमादाद्वा) पहृतानामपि दानेन प्रत्यर्पणेन, दमेनोपशमेन च विग्रहस्य युक्तैरिति प्रशमनं स्मृतमिति प्रतीतम् ॥ ६ ॥

एतदेव तु विज्ञेयं स्वार्थधर्मविघातजे।
विषयध्वंसजे शत्रोर्विषयप्रतिपीडनम् ॥ ७ ।

7. Similar conciliatory measures should also be adopted in cases of wars on the issues of damage to royal interests (or properties) or to laws (*svārtha-dharma*). But if the enemy indulges in destruction of material resources, counter measures of inflicting similar damage to the resources of the enemy kingdom should have to be taken (so as to compel him to desist from hostilities).

विषयभेदेन विग्रहस्य व्यवस्थापनमाह—एतदेव इति। स्वार्थधर्मविघातजे, स्वार्थविघात-धर्मविघाताभ्यां जाते विग्रहे, एतदेव पूर्वोक्तं प्रशमनमिति सम्बन्धः। विषयध्वंसजे शत्रुकृतविषय-विनाशजनिते पुनर्विग्रहे, शत्रोर्विषयस्य प्रतिपीडनं तेनामर्षस्योपशमो भवतीति ॥ ७ ॥

यानापहारसम्भूते[6] ज्ञानशक्तिविघातजे।
समस्तदर्थत्यागेन[7] क्षान्त्या चोपेक्षणेन च[8] ॥ ८ ।

[6] ज्ञानापहार ; धनापहार [7] शमस्तदर्थत्यागेन [8] चोपेक्षणेन वा

8. War on the issue of causing damage to means of transport (*yānāpahāra*) or of carrying off the media of learning (i.e., *jnānāpahāra*, learned teachers) or of causing damage to (the fountains of) learning (or academic institutions) or of causing erosion of royal powers (by compelling drainage of money, *dhanāpahāra* by enticing away some of the principal state officers, may be stopped by show of forbearance and indifference and forsaking them calmly (i.e., by the assailed king) and restitution of them (by the assailant).

भित्रविषयकस्य विग्रहस्य प्रशमनोपायमाह—धनापहार इति (यानापहारेतिमूलम्)। धनापहार सम्भूते भूहिरण्याद्यर्थविघातजे। तथा ज्ञानशक्तिविघातजे—ज्ञानविघातजे शक्तिविघातजे च क्षमो विग्रहस्योपशमम् तदर्थत्यागेन उपाध्यायादि परित्यागेनार्पणेन वा। क्षान्त्यापहारादेः क्षमयानुज्ञानाद्युपेक्षणेन वा दोषानुद्भावनेन वा अनवधारणेन ॥ ८ ॥

अधर्मद्रोहसंयुक्ते मित्रजात[9] उपेक्षणम्।
आत्मवान्मित्रवर्गे[10] तु प्राणानपि परित्यजेत् ॥ ६ ।

---

[9] मित्रजातेऽप्युपेक्षणम् [10] आत्मवन्मित्रजाते

9. A ruler should be indifferent to any war launched by an unrighteous ally out of his own spitefulness. But an intimate ally in an identical circumstance must not be forsaken even at the risk of one's own life.

मित्रनिमित्तविग्रहे प्रशमोपायमाह—अधर्म इति। अधर्मद्रोहाभ्यां युक्तं मित्रमप्युपेक्षेत। तत् साहाय्यादानं विग्रहोपशमाय भवति। आत्मवन्मित्रजाते त्विति मित्रस्यात्मा प्रकृति तद्युक्तः तत्त्वं मित्रसम्पद्गुणसम्पन्नत्वम्। तथा च कौटिल्यः "पितृपैतामहं नित्यं च वश्यमद्वैध्यं महल्लघुसमुत्थानमिति।" (६।२।१२) एतद्गुणरूपो मित्रस्यात्मा, स विद्यते यस्य तदात्मवन्मित्रम्। तदर्थं जाते विग्रहे प्राणानपि परित्यजेत् न विग्रहमिति। एवंविध मित्ररक्षार्थं प्राणानपि परित्यजेदित्यर्थः ॥ ६ ॥

अपमानात्तु सम्भूतं मानेन प्रशमं नयेत्।
सामपूर्व उपायो वा प्रणामो वाभिमानजे ॥ १० ।

---

10. War caused by show of insult (insulting behaviour) is pacified by show of respect and that caused by pride and arrogance is pacified by conciliation and propitiation.

अवमानजनिते अभिमानसम्भूते च विग्रहे प्रशमनोपायमाह—अपमानादिति। तथा सामपूर्व उपाय इति साम प्रतिपादनं तत्पूर्व उपायो दानं भेदो वा। प्रणामोऽभिमानजे विग्रहे प्रशमार्थं विधेयः। "इन्द्राय स प्रणमति यो बलीयसे नमति" इत्याचार्य वचनात् ॥ १० ॥

रहस्येन प्रयोगेन रहस्यकरणेन वा ।*
विग्रहं नाशयेद्धीरो[11] बन्धुनाशसमुद्भवम् ॥ ११ ।

---

[11] शमयेद् धीरो

*इत्येतत् श्लोकपूर्वार्द्धं मू. पू. नास्ति।
This line is omitted in the B.I. text and has been restored from the *ṭīkā*. Hence the renumbering of the ślokas.

11. Hostility breaking out on the issue of assasination of an ally, (by an assailant ruler) may be minimised (not by pursuing open war but)

by the application of secret expedients (*rahasyena prayogeṇa*) or by employing spies and secret agents for exciting panic and confusion in the enemy dominion by demonstration of magical spells (*rahasyakaraṇena*) etc.

बन्धुनाशसमुद्भवं विग्रहे प्रशमोपायं तावदाह—रहस्येनेति। रहसि विजने भवो रहस्यः। यस्य बन्धुविनाशो विहितस्तस्य एकान्ते अविदित एव गत्वा आत्मनिवेदनपूर्वकं सामादीनां प्रयोगेण। एतच्च धर्मविजयिनि द्रष्टव्यम्। रहस्यकरणेन वा असुरविजयिनि। रहस्यानि क्रोधोपशमनमोहनमारणादीनि औपनिषदिकोक्तानि तेषां करणेन वा विग्रहं शमयेत् धीरो बन्धुनाश समुद्भवमिति प्रतीतम्॥ ११॥

येन पीड़ा न जायेत तादृशं तु विचक्षणः।
कुर्यादर्थ परित्यागमेकार्थाभिनिवेशजे॥ १२।

---

12. When war becomes inevitable due to movement of two contending rulers for acquisition of the same object (or status) it can be avoided if one of them withdraws from the contest, if of course his position is not much compromised (by the withdrawal).

एकविषयाभिनिवेशजनिते विग्रहे प्रशमनोपायमाह—येनेति। येनार्थ परित्यागेन शक्तीनां पीड़ा क्षीणत्वं न जायेत तादृशं तु विचक्षणः कुर्यादर्थ परित्यागमेकार्थाभिनिवेशजे तुल्यविषयवासनामूलके विग्रहे, तादृशं अर्थपरित्यागं न सर्वमिति तात्पर्यार्थम्॥ १२॥

धनापचारजाते तन्निरोधं न[12] समाचरेत्।
कदाचिद्विग्रहे पुंसां सर्वनाशस्तु[13] जायते॥ १३।
[14]तयोपन्यासयुक्तेन सम्प्रदानादिकेन च।*
महाजनसमुत्पन्नं भेदेन प्रशमं नयेत्॥ १४।

---

* इत्येतत् श्लोकार्द्धं मु. पु. नास्ति

This line is omitted in the B. I. text and has been restored from the *ṭikā*

[12] धनापहारजे जातु विरोधं न [13] नाशोऽपि

[14] तृष्णोपन्यास; दृष्टोपन्यास

13. In case of hostility caused by appropriation of a portion of wealth, it should not be prosecuted, for in that case, it (war) may lead to total loss of wealth and all resources.

14. A war with a strong power (*mahājana*) supported by other powers can be relieved by sowing dissension (*bheda*) among the parties through alluring offers, conciliatory gifts etc.

कोशापहारजनिते विग्रहे तदपहारसहनमेव शमनोपाय इत्याह—धनापहारजाते इति। धनस्य कोशस्यापहारेन जाते विग्रहे सति विरोधं न समाचरेत्। कस्मादित्याह—कदाचिदिति। तस्मात् धनांशापहारः[8] सोढव्य इति॥ १३॥

एभिरेव कारणैः, बहुभिः सह समुत्पन्ने विग्रहे प्रशममाह—महाजनेति। भेदेन, तृष्णोपन्यास[9]-युक्तेन प्रलोभनसहकृतेन सम्प्रदानादिकेन सामदानादिकेन च उपायविशेषेण प्रशमं शान्तिं नयेत् प्रापयेत्॥ १४॥

[8] धनापहारः [9] तथोपन्यास

भूतानुग्रहविच्छेदजाते[15] तत्र वदेत् प्रियम्।
दैवमेव तु दैवोत्थे शमनं साधुसम्मतम्॥ १५।

[15] जातस्यान्तं व्रजेद् वशी।

15. Hostility arising out of breach of assurance of favour and protection (to the internal or external elements) should be ended by the restitution of it with all restraint and by endearing speech, and that arising out of divine dispensations (i.e., like the outbreak of natural calamities) by prompt measures for the propitiation of Fate as prescribed by the wise.

भूतानुग्रहविच्छेदजे दैवजे च विग्रहे प्रशमनमाह—भूतानुग्रहेति। तथा भूतानुग्रहविच्छेदः अनन्तरोक्तस्तस्यान्तं शेषं वशी विजितेन्द्रियः व्रजेत् नान्यः। दैवमेवेत्यादि प्रतीतम्॥ १५॥

मण्डलक्षोभसम्भूतमुपायैः प्रशमं नयेत्।
सापत्न्यं[16] वास्तुजं स्त्रीजं [16a]वाक्जातमपराधजम्॥ १६।
वैरप्रभेदनिपुणैर्वैरं पञ्चविधं स्मृतम्।
जातं भूम्युपरोधेन तथा शक्तिविघातजम्॥ १७।
भूम्यनन्तरजातं तु मण्डलक्षोभजन् तथा।
चतुर्विधं वैरजातं [17]बहुदन्तीसुतोऽब्रवीत्॥ १८।

[16] सापत्नं [16a] वागजात

[17] वाहुदन्ति

16-18. In case of disaffection arising in the *maṇḍala* (the *prakṛti-maṇḍala* or internal elements of the state or the inter-statal circle of rulers), the ruler concerned should promptly remedy it by the application of political expedients (*upāyas-sāma, dāna, bheda* and *daṇḍa*). Experts in the science of war recognise five kinds of hostilities, (on the basis of their root causes), viz. *Sāpatnaṁ* (rivalry as between co-wives or contending foes), *Vāstujaṁ* (relating to land and properties), *Strījaṁ* (relating to women), *Vāgjātam* (arising out of offensive and insulting remarks) or alternatively (as found in the Commentary) *Cārajam* (caused by reports of spies) and *Aparādhajaṁ* (as sequel to commission of wrongs or transgression of law). In the opinion of Vāhudantīsuta (Indra, the son of the sage Vāhudantī, a political philosopher), hostilities are classified to be of four kinds, viz., arising out of appropriation of land or portion

of territory (by enemy action), acts prejudicial to the exercise of royal powers (*Śakti-prabhuśakti, mantraśakti* and *utsāhaśakti*), disputes with bordering states or boundary disputes and disaffection among the *maṇḍala* elements (internal or external).

मण्डलदूषणजे विग्रहे प्रशमनमाह—मण्डलक्षोभेति। मण्डलक्षोभ प्रकृतीनां विरागः विद्रोहः इति यावत्। उपायैः सामादीनां येन-केनचिदपि उपायेन इत्यर्थः। इदानीं वैरस्योत्पत्तिप्रकारमाह—सापत्नमित्यादि। सपत्नः शत्रुस्तज्जं, वास्तुजं, भूम्यादिस्तद्धरणादिजं, स्त्रीजमपराधजं, वचनजं (वागुजातं)[10] चेति वैरप्रभेदनिपुणैर्वैरं पञ्चविधं स्मृतमिति प्रतीतम्।

प्रकारान्तरै वैरं चतुर्विधमित्याह—जातमिति। बाहुदन्तीसुत इन्द्रश्चतुर्विधमेव वैरमित्य ब्रवीत्। वास्तुजमेव द्विविधं-भूम्यपरोधजं अनुपरोधेऽपि भूम्यनन्तरेण सह विरोधो भवतीति (भूम्यनुपरोधजं)। तथा शक्तीनां प्रभुमन्त्रोत्साहानां विघाताज्जातं, मण्डलक्षोभो द्वादशराजक (क्षोभः) एवं चतुर्विधं वैरजातं मन्यत इन्द्रः ॥ १६, १७, १८ ॥

[10] चारजं चारैरुत्पादितं

कुलापराधजे वैरे[18] मन्यन्ते द्वे च मानवाः।
किञ्चित्फलं निष्फलञ्च सन्दिग्धफलमेव च ॥ १९ ।
तदात्वे दोषजननमायत्याञ्चैव[19] निष्फलम्।
आयत्याञ्च तदात्वे च दोषस्य जननं तथा ॥ २० * ।
अपरिज्ञातवीर्येण दुष्टेन[19a] स्तम्भितोऽपि वा।
परार्थं स्त्रीनिमित्तञ्च दीर्घकालं द्विजोत्तमैः ॥ २१ ।
अकाले[20] दैवयुक्तेन बलोद्धृत सखेन[21] च।
तदात्वे फलसंयुक्तमायत्यां फलवर्जितम् ॥ २२ ।
आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा।
इतीमं षोडशविधं न कुर्यादेव विग्रहम् ॥ २३ ।

---

[18] प्राहुर्वैरे द्वे एव [19] मायत्यां चापि
[19a] परेण [20] अकालदैव
[21] बलोद्धृतसखेन

*इत्येतत् श्लोकस्योत्तरार्द्धं मुद्रित पुस्तके नास्ति।

This line does not appear in the B.I. Edition text, but has been restored from the *ṭīkā*

19-23. The Mānavas (the school of Manu) recognise only two kinds of hostilities. viz., *Kulaja* or that which is inherited from forefathers (continuing for generations, *sahaja* or natural enmity) and *Aparādhaja* caused by wrongs and transgressions i.e., *kṛtrima*). The types of hosti-

lities which should not be embarked upon or prosecuted have been enumerated to be of sixteen kinds—viz., such military expeditions as are of a little prospect, of no prospect and of doubtful prospect, such as are likely to produce immediate damages and infructuous in future too, hence causing damages both at present and in future, expedition against an adversary of unknown military strength, and that launched by a wicked or deceitful foe (imputing false allegations), one undertaken for the sake of others (however apparently laudable), or for the sake of women (as in the case of Rāvaṇa abducting Sītā), one that is long-drawn (as that is ultimately ruinous) or one against the venerable Brāhmaṇas (or their interests), one undertaken out of season (i.e., when troop movements are difficult due to climatic reasons), one against an adversary possessing divine grace or enjoying the support of powerful allies, an expedition immediately prospective but ultimately infructuous, or gainful in future but fruitless at present.

सामान्यतो वैरं पुनर्द्विविधमित्याह—कुलापराधजेति। कुलजं सपत्नजं निष्कारणकम्। शेषं तु यत्सकारणकं तदपराधजमेवेति। मानवा मन्यन्त इति। इदानीं विग्रहे अपवादमाह—(षोडशविधान् विग्रहान् न कुर्यादिति) किञ्चिदल्पतरं फलं यस्य विग्रहस्य तं तथा निष्फलं फलरहितं सन्दिग्धफलं संशयितफलमेव च ॥ १९ ॥

तदात्वेति। तदात्वे विग्रहकाले एव दोषजननं मित्रादिविरोधकारकम्। आयत्यामागामिनि काले परिणामे निष्फलम्। तथा आयत्यां च तदात्वे च कालद्वयेऽपि मित्रविरोधमण्डलक्षोभादिकरं तथैव विग्रहं न कुर्यादिति सम्बन्धः ॥ २० ॥

अपरिज्ञातेति। न परिज्ञातं वीर्यं सामर्थ्यं यस्य तेन च सह, विग्रहे परेणान्येन, हेतुना दुष्टेन क्षोभितो ग्राहित विग्रहमहावेशो वा, विग्रहं न कुर्यात्। परार्थं परस्यार्थः सम्पद्यतामिति। स्त्रीनिमित्तमेकार्थाभिनिवेशित्वम्। न च दीर्घकालं यस्मिन् दीर्घकालो लगति। द्विजोत्तमैरिति ब्राह्मणैर्महापातक[11]सम्बन्धत्वात् विग्रहं न कुर्यादिति सम्बन्धः ॥ २१ ॥

अकालेति। अकाले विग्रहायोग्यकाले वर्षादौ विग्रहं न कुर्यात्। दैवयुक्तेनारिणा दैवशक्ति सम्पन्नेन सह-दैवयुक्तात् परिभव एव भवति। बलोद्धतसखेन बलोद्धतः बलगर्वितः सखा मित्रादिर्यस्य तेन च सह। तदात्वे तत्काले फलजनकमपि उत्तरकाले फलविवर्जितमिति। अयं मध्यम एव ॥ २२ ॥

आयत्यामिति। उत्तरकाले फलजनकमपि आपाततो निष्फलं, विग्रहं न कुर्यादिति सम्बन्धः। अयमपि मध्यम एव। पूर्वोक्तं षोडशविधं वैरं नानुष्ठेयम् इत्याह—इतीममिति। प्रतीतम् ॥ २३ ॥

[11] महापावक

तदात्वायतिसंशुद्धमारभेत विचक्षणः।
तदात्वायतिशुद्धानि सर्वकर्माणि चिन्तयेत् ॥ २४ ।

तदात्वायतिसंशुद्धमातिष्ठन्नैव[22] वाच्यताम् ।
साधु लोकद्वयग्राहि विद्वान् कर्म समाचरेत् ॥ २५ ।
परित्यजेदमुं[23] लोकं नार्थलेशोपलोभितः ।
परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् ।
इत्यागमप्रमाणत्वात् साधुकल्याणमाचरेत् ॥ २६ ।

[22] नेति [23] दिमं लोकं

24-25. Hence a prudent king should embark upon such wars or expeditions as are prospective of immediate as well as future gains. He should carefully consider such undertakings only which may prove to be gainful in immediate and future times. It is only by adhering to ventures gainful in immediate and future times that a wise ruler earns encomiums in both the present and future times or in this world and the next).

26. A ruler should avoid taking action under the influence of lust for wealth or for material pleasures in this world or such as is likely to prejudice his spiritual benefit in the next world. This being the view of the Āgamas (the Śāstras), the wise ruler should always devote himself to acts for all-round welfare.

विग्रहकरणकालमाह—तदात्वायतीति । तदात्वायतिसंशुद्धं वर्तमानोत्तरोभयकाले श्रेयस्करम्, सर्वकर्माणि सन्ध्यादीनि लाभपालनादीनि च, विचक्षणः आरभेत विग्रहमिति शेषः ॥ २४ ॥

येन कर्मना तस्मिन् काले उत्तरकाले च श्रेयो भवेत् तदालम्बने न दोष इत्याह—तदात्वायतीति । तदात्वे आयत्याम् च फलजनकं कर्म आतिष्ठन् अनुतिष्ठन् नैव वाच्यताम् निन्दनीयतां यातीति वाक्यशेषः । उभयलोकाविरुद्धं कर्म कुर्वन् सर्वेषामेवानुरागभाजनं भवतीत्याह—साधु इति । साधु शोभनं लोकद्वयग्राहि इहलोकपरलोकसम्पादकं कर्म ॥ २५ ॥

सः अर्थलोभेन परलोको नोपेक्षणीय इत्याह—परित्यजेदिति । अर्थलेशोपलोभितः यत् किञ्चिदर्थलाभोपहतः परलोकविरुद्धं कर्म कुर्वन् सर्वेषामेवाविश्वासभूमिरित्याह परलोकविरुद्धानीति । अन्यमपि पुरुषं परलोकविरुद्धानि कुर्वाणं दूरस्त्यजेदिति प्रतीतम् । इत्युक्तेन क्रमेण कल्याणमाचरेत् । परलोकाभिगमे आगमसंज्ञं प्रमाणमस्तीति "वेदाः प्रमाणं स्मृतयः प्रमाणम्" इति प्रमाणबलात् सर्वदोभयलोकाविरुद्धमातिष्ठेदिति ॥ २६ ॥

यदा मन्येत मतिमान् हृष्टपुष्टं[24] स्वकं बलम् ।
परस्य विपरीतञ्च तदा विग्रहमाचरेत् ॥ २७ ।
स्फीतं चाप्यनुरक्तञ्च[25] यदा प्रकृतिमण्डलम् ।
परस्य विपरीतञ्च तदा विग्रहमाचरेत् ॥ २८ ।

[24] हृष्टं पुष्टं [25] यदानुरक्तञ्च भवेत्

उपनामि[26] यदा दैवं सुव्यक्तमुपलक्षितम् ।
परस्य विपरीतन्तु तदा विग्रहमाचरेत् ॥ २९ ।*
मित्रमाक्रन्द आसारो यदा स्युर्दृढभक्तयः ।
परस्य विपरीताश्च तदा विग्रहमाचरेत् ॥ ३० ।*

[26] नोपतापि यदा

27-30. When as intelligent ruler finds his own armed forces satisfied and strong, and that of his enemy just the reverse, he may launch upon war; so also when he finds his own statal elements (*prakṛti maṇḍala*) prosperous and loyal, and that of his enemy the reverse, as also when he finds that divine grace is patently in his favour or may be made favourable to him whereas that of his enemy in the reverse, and also when he finds that his ally (in front) and those in the rear (*ākranda* and *āsāra*) are strongly devoted to him and those of his enemy are not so, he may confidently launch upon war.

* Ślokas 29 and 30 are omitted in the B.I. text but are included in the Commentary

विग्रहस्यानुकूलं कालमभिधातुमाह—यदेति। मतिमान्-हिताहितविवेक-शक्तिमान् राजा, हृष्टं सम्मानादिभिः, पुष्टं भक्तवेतनादिभिः। स्वकं बलं सैन्यम्। परस्य विपरीतमहृष्टमपुष्टं च। तदा विग्रहमाचरेत्। जयस्यावश्यम्भावित्वात् ॥ २७ ॥

अपरं विग्रहकालमाह—स्फीतमित्यादि। प्रकृतिमण्डलं प्रजावर्गः ॥ २८ ॥

उपनामीत्यादि ॥ प्रतीतम् ॥ २९ ॥

मित्रमिति। मित्रमग्रतो यातव्यभूम्यनन्तरम्। आक्रन्दः पश्चात् पार्ष्णिग्राहभूम्यनन्तरः, पार्ष्णिग्राहं निषेद्धुं विजिगीषुणा आक्रन्द्यत[12] इति। आसारः आक्रन्दस्य पश्चादेव भूम्येकान्तरं मित्रं पीड्यमानमाक्रन्दमासरति इति[13]। एते त्रयोऽपि यदा विजिगीषौ दृढभक्तयो विचलानुरागा भवन्ति। परस्य यातव्यस्य विपरीता मित्राक्रन्दासाराश्च वीतभक्तयस्तदा विग्रहमाचरेति ॥ ३० ॥

[12] आश्रियते [13] मित्रमाक्रन्दमासरति इत्येते चादृढभक्तयः

भूमिर्मित्रं हिरण्यञ्च विग्रहस्य फलं त्रयम् ।
यदैतन्नियतं भावि तदा विग्रहमाचरेत् ॥ ३१ ।
गुरु वित्तं ततोमित्रं तस्माद् भूमिर्गरीयसी ।
भूमेर्विभूतयः सर्वास्ताभ्यो बन्धुसुहृद्गणाः ॥ ३२ ।

31. Territory, allies and wealth are the three likely gains in a war. So a ruler should embark upon a war when there is a clear prospect of these gains.

32. Gain of wealth is of course important, gain of an ally is more important than that, but the acquisition of territory is the most important of all gains, as all round prosperity as well as friends and allies are obtainable as a result of land or territorial aquisition.

विग्रहस्य फलविमर्शमभिधातुमाह—भूमिरिति। भूमिः मित्रं हिरण्यञ्च एतत् त्रयं विग्रहस्य फलम्। यदा एतद् भूहिरण्यादि नियतम् असंशयमेव भावि लभ्यं, तदा विग्रहमाचरेत् ॥ ३१ ॥

फलत्रये गुरुलाघवमाह—गुर्विति। वित्तं सुवर्णादि तद्गुरु तन्मूलत्वाद्व्यवहाराणाम्। ततोऽपि गुरु मित्रं मित्रसाध्यत्वाद्वित्तस्य। तस्मान्मित्रादपि भूमिर्गरीयसी। भूमेर्विभूतयः सर्वा वित्ताधिकाः। ताभ्यो बन्धुसुहृज्जनाः गुरवः विभूतिसाध्यत्वात्तेषामिति ॥ ३२ ॥

सर्वसम्पत्समे शत्रावुपायान् निक्षिपेद् बुधः।
उपायैरप्रतिव्यूढे[27] समे दण्डोऽपि शस्यते[28] ॥ ३३ ॥
आगतं विग्रहं विद्वानुपायैः प्रशमन्नयेत्।
विजयस्य ह्यनित्यताद् रभसेन न सम्पतेत् ॥ ३४ ॥

[27] व्यूढे [28] दण्डः प्रशस्यते

33. In a war with an adversary equal in all respects, the wise ruler should first apply the political expedients (*upāyān*), failing which, he may take up arms.

34. Even when a war is thrust upon him, the prudent king should try to pacify it by application of political expedients. As victory in war is always uncertain (*anitya*), it should not be launched upon without careful deliberation.

समेनापि विग्रहो विधेय इत्येतदेव समर्थयन्नाह—सर्वेति। प्रभुमन्त्रोत्साहादिभिः सम्पद्भिः समे शत्रौ उपायान् सामदानादीन् प्रयुञ्जीत। बुध इति नीतिपण्डितः। उपायैः सामादिभिरप्रतिव्यूढेरनिष्पादित कार्यैर्दण्डोऽपि शस्यते। गत्यन्तरभावादिति ॥ ३३ ॥

एतदेव सकर्थयन्नाह—आगतमिति। परतोऽप्यागतं विग्रहम् उपायैरनन्तरोक्तैः प्रशमं नयेत्। कुत इत्याह—विजयस्य ह्यनित्यतात् विग्रहे विजयो नित्यं न भवति। हीनैरपि ज्यायांसो विजिता दृश्यन्ते। तस्मात् रभसेन पर्यालोचनं विना न सम्पतेत्। यानगुणमालोचयेदिति ॥ ३४ ॥

समाक्रान्तो बलवता काङ्क्षन्नभ्युदयिनीं श्रियम्।
आश्रयेद्[29] वैतसीं वृत्तिं न भौजङ्गीं कथञ्चन[30] ॥ ३५ ॥
क्रमाद् वैतसवृत्तिः सन् प्राप्नोति विपुलां[31] श्रियम्।
भुजङ्गवृत्तिराप्नोति वधमेव तु केवलम् ॥ ३६ ॥
मत्तप्रमत्तवत् स्थित्वा प्रसेदुत्प्लुत्य[32] पण्डितः।
अपरिज्ञायमानं हि क्रमप्राप्ते मृगेन्द्रवत् ॥ ३७ ॥

[29] श्रयेत [30] कदाचन [31] महतीं [32] प्रसेतोत्प्लुत्य

35-36. Attacked from all sides by a powerful enemy, (finding himself in a helpless position) the ruler for his own security should adopt the policy of canes (*vaitasīvṛtti* i.e., to yield to him) and not that of snakes (that bites on the slightest provocation, *bhaujangī*). Because by adopting the conduct of canes one may hope to earn sufficient prosperity in time, whereas that of the snake may lead to his own death and destruction.

37. (Having adopted the policy of canes) the ruler should wait like a mad or intoxicated fellow (indifferent to his circumstances) for the opportune moment, and like a lion (the king of the beasts) pounce upon the strong enemy to crush him completely.

उपायैः परिहर्तुमशक्ये विग्रहे संशयवृत्तिं दर्शयन्नाह—समाक्रान्त इति। समाक्रान्तः सर्वतो निरुद्धचेष्टः, बलवता प्रबलेन शत्रुणा, काङ्क्षन् अभिलषण् अभ्रंशिनीमविनश्वराम् स्थिरां श्रियम्, वैतसीवृत्तिं अनुप्रवेशरूपां व्यवहारम् अवनतिम् इत्यर्थः आश्रयेत् गत्यन्तराभावात्। न तु भौजङ्गीं भुजङ्गसम्बन्धिनीं वृत्तिं औद्धत्यं कथञ्चन आश्रयेत्॥ ३५॥

वेतसभुजङ्गवृत्त्योः क्रमेण फलमाह—क्रमादिति। इति सुगमम्॥ ३६॥

संश्रयवृत्तिं दर्शयन्नाह—मत्तप्रमत्तवत् इति। मत्तः मदध्वस्तविवेकः। प्रमत्तः उन्मादरोगग्रस्तः। अनवधानः इव स्थित्वा छिद्रमन्विष्यन्। क्रमप्राप्ते क्रमेण उपयुक्तकाललाभे मृगेन्द्रवत् सिंह इव उत्प्लुत्य सहसा आक्रम्य अपरिभ्रश्यमानं अस्खलितं सामर्थ्यमपि ग्रसेत् ग्रासीकुर्यात् स्वायत्तं कुर्यात्॥ ३७॥

कौर्मं[33]सङ्कोचमास्थाय प्रहारमपि मर्षयेत्।
काले प्राप्ते तु मतिमानुत्तिष्ठेत् क्रूरसर्पवत्॥ ३८।
काले सहिष्णुर्गिरिवदसहिष्णुश्च वह्निवत्।
स्कन्धेनापि वहेच्छत्रून्[34] प्रियाणि समुदाहरन्॥ ३९।
सम्प्राप्ते चैव काले तु भिन्द्याद् घटमिवाश्मनि॥ ३९ क
नित्यं स्वार्थपरो लोकः स्वार्थसिद्धिर्यथा भवेत्।
तथा तस्य प्रतीकारं यथोक्तं समुपाचरेत्॥ ३९ ख

[33] कौर्मं [34] वहेत् काले

* Verses 39 A and 39 B do not appear in the B.I. edition text.

38. A ruler has to bear the attack from a strong assailant by adopting the policy of the tortoise (that withdraws its limbs within its shell) (i.e. the ruler should withdraw from battle and take shelter within his own fortifications). It is only when time is found to be opportune that an intelligent king should strike at his enemy like a furious snake.

39. Time determines when to show forbearance like a mountain or furiousness of fire. At times (when conditions are inopportune) the enemy·

may have to be carried on one's shoulder (i.e. shown humility) and treated with polite words.

39A. Again, when time becomes favourable the enemy may be crushed like a mud pitcher struck by a piece of stone (*ghaṭamivāśmani*).

39B. All men are selfish and they always strive for the success of their self interests. So in dealing with them instructions embodied above have to be followed carefully.

यदात्मानं हीनबलं पश्येत् तदा बलवतः शत्रोः सकाशात् आत्मरक्षामेव कुर्यात् नत्वभिषेणयेत्, प्राप्तेकाले छिद्रमासाद्य प्रहरेत् इत्याह—कौर्मसङ्कोचम् इति। कूर्मोहि प्रहारकाले पृष्ठास्थिरूप दुर्गान्तर्गता भवन्ति, सङ्कोचमास्थाय अवयवपञ्चकं कर्परान्तः कृत्वा। वज्रसमानकर्परेण प्रहारमपि मर्षयेत्। अन्यत् सुगमम् ॥ ३८ ॥

प्राप्तकालस्तु प्रहरेत् इत्याह—काले इति। काले यथासमयं कदाचित् गिरिवत् सहिष्णुः, कदाचित् वह्निवत् असहिष्णुश्च भवेत्। स्पष्टमन्यत् ॥ ३६ ॥

प्रसादवृत्त्या[35] हितलोकवृत्तया प्रविश्य शत्रोर्हृदयं निरन्तरम्।
नयाग्रहस्तेन हि काल[36] उच्छ्रितः प्रसह्य कुर्वीत कचग्रहं श्रियः ॥ ४० ॥

---

[35] वृत्त्याहित [36] कालमास्थितः

40. (Having submitted to the strong adversary) a ruler should cultivate intimate relation with him win his absolute confidence) by show of apparent satisfaction (*prasādavṛttyā*) for the trust reposed on him and eager for his welfare, and thus knowing the enemy's plans and policies strike him furiously at the opportune moment so as to be able to carry off the latter's Goddess of Fortune by holding her locks.

प्रीतिप्रदर्शनपूर्वकं कियत्कालं स्थित्वा शत्रोरभ्यन्तरं प्रविश्य प्राप्तकालस्तावदुत्पतेदित्याह—प्रसादवृत्त्या इति। प्रसादः प्रसन्नत्वं वाङ्मनोमुखचक्षुषाम्। तेन वर्तनं प्रसादवृत्तिः। तामाश्रितः शत्रोरशङ्कनीयो भवति। हितस्य प्रियकारिणो लोकस्य वृत्तमिव वृत्तं चरितं यस्या तया (आहितलोकवृत्तया आहितं न्यस्तं लोकवृत्तं यया)। लोकवृत्तं चात्रानुजीविवृत्तमेव संश्रितस्तेनाराधितस्तेनाराध्यत इति। तथा प्रविश्य शत्रोर्हृदयं पिशुनकृतान्तररहितं काले उच्छ्रित (उत्थित) उग्र को विजिगीषुर्नयाप्रहस्तेन नीतिर्नय एवाग्रहस्तस्तेन। प्रसह्य हठात् कचग्रहं केश कर्षणं श्रियः कुर्वीत बलात्तस्यैव संश्रितस्य श्रियं गृह्णीयादित्यर्थः ॥ ४० ॥

कुलोद्गतं सत्यमुदारविक्रमं स्थिरं कृतज्ञं[37] धृतिमन्तमूर्जितम्।
अतीव दातारमुपेतवत्सलं सुदुः प्रसाध्यं प्रवदन्ति विद्विषम् ॥ ४१ ॥

---

[37] मतिमन्त

41. It is said that a high born person who is truthful, and liberal, but brave, resolute, grateful, intelligent and ever-energetic, munificent and

affectionate makes an enemy invincible (extremely difficult to be won over).

विग्रहे (साध्या)साध्य विभागं यातव्यस्याभिधातुमाह—कुलेति। यः[12] कुलीनः स परिजनैर्न प्ररित्यज्यते (परित्याजत)। सत्यममृषावादिनं तस्य विश्वसन्ति। उदार उतकृष्टो विक्रमः शौर्यं यस्य स हि स्थिरलक्ष्मीको भवति। स्थिरश्चापलरहितः प्रतिष्ठितत्वादाश्रयणीयो भवति। कृतज्ञस्योपकारे सर्व एव प्रवर्तते। धृतिमन्तमविषादिनमूर्जितं च प्राणसमन्वितम्। अतीव दातारं विक्रमादित्यसमानम्। उपेतवत्सलं शरणागतवत्सलम्। इत्याद्याभिगामिकगुणयुतं सुदुःप्रसाधमसाध्यं प्रवदन्ति विद्विषम्। तेन सह विग्रहो न कार्य इति भावः॥ ४१॥

[12] योऽकुलीनः स परिजनेन परित्यजते

असत्यता निष्ठुरताऽकृतज्ञता भयं प्रमादोऽलसता विषादिता।
वृथाभिमानो[38] ह्यतिदीर्घसूत्रता तथाङ्गनाक्षादि विनाशनं श्रियः॥ ४२।

[38] वृथाभिमानोऽपि च दीर्घ

42. Whereas untruthfulness, cruelty, ingratitude, fearfulness (cowardice), carelessness, idleness, cheerlessness (pessimism), false pride, procrastination and addiction to passions of lust for women and gambling (on the part of a ruler) cause ruination of his prosperity (and he is easily defeated and destroyed).

विग्राह्यं रिपुमभिधातुमाह—असत्यतेति। असत्यता, निष्ठुरता, अकृतज्ञता, भयम्, प्रमाद इति शब्दादिष्विन्द्रियार्थेषु प्रसक्तिरत्र प्रमाद इष्यते। जलसता, विषादिता। वृथाभिमानोऽसत्याहङ्कारः। दीर्घसूत्रता जडता। तथाङ्गनाक्षादि च निरवशेषं व्यसनजातं विनाशनं श्रिय इत्यादि समुद्युक्तो रिपुः साध्यः सुविग्राह्य इति॥ ४२॥

इति स्म दोषान्वितमाशु विद्विषं त्रिशक्तियुक्तो विजिगीषया व्रजेत्।
अतोऽन्यथा साधुजनस्य[39] सम्मतं करोति[40]
विद्वानुपघातमात्मनः॥ ४३।

[39] साधुजनेष्वसम्मतः

[40] करोत्यविद्वानु

43. Observing these defects in an enemy the *Vijigīṣu* equipped with his three powers (*Śaktis,—Prabhuśakti, Mantraśakti* and *Utsāhaśakti*) promptly marches against him. As otherwise if he acts according to the dictates of dishonest people (counsellors) due to his lack of intelligence he will bring about his own destruction.

यानकालमाह—इति स्म इति। इत्यनन्तरं दोषान्वितमाशु विद्विषं शत्रुं त्रिशक्तियुक्तः। अतोन्यथोक्तप्रकारं विना असाधुजनेषु सुसम्मतः करोति अविद्वानुपघातमात्मनो विग्रहानुष्ठानादिति शेषः॥ ४३॥

समन्वितो राज्य पदोज्जिनीषया चरेक्षणैर्वीक्षित मण्डलक्रियः ।
इमं नृपो विग्रहमार्गमास्थितः स्थिरोद्यमः सम्प्रयतेत सिद्धये ॥ ४४ ।

इति विग्रहविकल्पोनाम पञ्चदशं प्रकरणम् ।
इति कामन्दकीये नीतिसारे विग्रह(वि)कल्पो नाम दशमः सर्गः ॥

---

44. Desirous of elevating the status of his already well organised state and keeping himself well-informed through the spies of the movements of his *mandala* (internal elements and external powers), a ruler (*vijigīṣu*) should wage war against his enemy with firm resolve and energy for achieving sure success.

उपसंहरन्नाह—समन्वित इति । राज्यपदोज्जिनीषया राज्यञ्च पदञ्च, तयोरुज्जिणीषया समुच्छित-करणेच्छा, तया समन्वितः युक्तः । चरेक्षणैः चारचक्षुषा वीक्षितमण्डलक्रियः वीक्षिता पर्यवेक्षिता मण्डलानां क्रिया चर्या येन सः । स्थिरोद्यमः दृढोद्योगः नृपः, इमं विग्रहमार्गं संग्रामपद्धतिं आस्थितः आश्रितः सन् सिद्धये स्वाभीष्टसाधनाय सम्प्रयतेता सम्यक्सिद्धये प्रयत्नं कुर्यादिति ॥ ४४ ॥

इति पञ्चदशं विग्रहविकल्पप्रकरणम् ॥

इति कामन्दकीय नीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां विग्रहविकल्पोनाम दशमः सर्गः ॥

एकादशः सर्गः

१६ । यानासनद्वैधीभावसंश्रयविकल्पप्रकरणम् ।

उत्कृष्टबलवीर्यस्य विजिगीषोर्जयैषिणः ।
गुणानुरक्तप्रकृतेर्यात्रा यानमिति स्मृतम् ॥ १ ।

Sarga—XI

Prakaraṇa 16.

Yānāsanadvaidhībhāvasaṁśrayavikalpa

[Varieties of Marching, Encamping, Dual movement and Political alliance or seeking protection of the stronger power]

1. Desirous of victory (*jayaiṣiṇah*) when a *Vijigīṣu* monarch equipped with a very strong and brave army and supported by his *prakṛtis* (internal elements of the state) loyally devoted to him for his excellent qualities, sets out on a march (against his enemy), it is called *Yāna* (marching).

विग्रहविकल्पमभिधाय षाड्गुण्ये यानगुणं प्रतिपादयितुमाह—उत्कृष्टेति । उत्कृष्टमत्यूत्तमं, बलं वीर्यं च यस्य विजेतुमेषणशीलस्य । जयैषिणः नैतत्पुनरुक्तं, विशेषप्रतिपादनार्थमेतत् । नेच्छामात्रेण जयमृच्छति किन्तु कर्मणा विजयसाधनानामनुष्ठानात्[1] । गुणानुरक्तप्रकृतिः गुणैः प्रकृतिसम्मदुक्तैराभिगामिकैश्चानुरक्ताः प्रकृतयो यस्य । यात्रा यातव्यं प्रति प्रस्थानं यानमिति स्मृतमन्यथा तु[2] गमनमात्रमेव फलाभावात् ॥ १ ॥

[1] विजयमाशासानामनुष्ठानात्   [2] अन्यथा

विगृह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः ।
उपेक्षा चेति निपुणैर्यानं पञ्चविधं स्मृतम् ॥ २ ।

---

2. According to experts there are five kinds (varieties) of *Yāna*, viz., *Vigṛhya, Sandhāya, Saṁbhūya, Prasaṁgata* and *Upekṣā*.

यानभेदानभिधातुमाह—विगृह्येति । विगृह्ययानं, सन्धाययानं, सम्भूययानं, प्रसङ्गयानं, उपेक्षायानं चेति यानं पञ्चविधम् ॥ २ ॥

विगृह्य याति हि यदा सर्वाञ्छत्रोर्गणान् बलात्[1] ।
विगृह्ययानं यानज्ञास्तदाचार्याः प्रचक्षते ॥ ३ ।

---

[1] सर्वाञ्छत्रुगुणान्बली

अरेर्मित्राणि[2] सर्वाणि स्वमित्रैः सर्वतो बलात् ।
विगृह्य [3]चाभिगमनं विगृह्यगमनं स्मृतम् ॥ ४ ।

[2] अरिमित्राणि [3] वारिगमनं

3. When the powerful *Vijigīṣu* undertakes a march against an enemy well equipped with necessary qualities (personal valour as well as the support of *prakṛtis*), it is designated as *Vigṛhya yāna* by experts in troop movements, *yānajñā* (i.e., masters in military science).

4. Marching furiously against all the allies of the enemy (*arermitrāṇi sarvāṇi*) along with one's own allies (*svamitraih*), is also known as *Vigṛhya-gamana* (synonymous with *yāna*).

विगृह्य यातीति। विगृह्य याति हि यदा सर्वान् शत्रुगुणान् शौर्यत्यागादीनाभिगामिकान्[8] स्वगुणैः। यदा ते आच्छादिता भवन्ति तदा ते विजिगीषुणा विशेषात् विजिता (गृहीताः) एव भवन्तीति विगृह्य याति हि यदा बली शक्तिभिरभ्युपचितः तदा विगृह्ययानं यानज्ञा आचार्याः प्रचक्षते ॥ ३ ॥

विगृह्ययानं द्वितीयं व्याख्यातुमाह—अरेर्मित्राणीति। इति प्रतीतम् ॥ ४ ॥

[8] शौर्य त्याग सत्यादीन्; शौर्यत्यागादीनि·· कानि···च्छादितादितानि···तदा

सन्धायान्यत्र [4]यात्रायां पार्ष्णिग्राहेण शत्रुणा ।
सन्धायगमनं प्रोक्तं तज्जिगीषोः फलार्थिनः ॥ ५ ।
[सन्धाय सार्धमरिभिश्चेष्टा संरोधकारिभिः ।
यदन्यत्र रिपौ यानं सन्धायगमनं हि तत् ॥]*

[4] या यात्रा

* This verse does not occur in the B.I. text, but restored from the Trivandrum and Anandasrama editions.

5. When the *vijigīṣu* aiming at sure results (*phalārthinah*) marches forward against the enemy after making an alliance (treaty) with the *pārṣṇigrāha* (his enemy on the rear, naturally a friend of the enemy, who has to be appeased so that while marching forward his territory would not be attacked from the rear), it is called *Sandhāya-gamana.*

[When a compact is formed with *ari* (the enemy in front) and march is undertaken against an enemy on the other direction it is *Sandhāya-gamana.*]

सन्धाययानमाह—सन्धायान्यत्र इति। अन्यत्र शत्र्वन्तरपराभवार्थायां यात्रायां पार्ष्णिग्राहेण पृष्ठवर्तिना शत्रुणा सह सन्धाय यत् यानम् इति शेषः। सन्धाय गमनं सन्धाययानम्। फलार्थिनः शत्र्वन्तर पराभवरूपफलमपेक्षमानस्य ॥ ५ ॥

एकीभूय यदेकत्र[5] सामन्तैः साम्परायिकैः[6] ।
[6a]शक्तिशौचयुतैर्यानं सम्भूयगमनं हि तत् ॥ ६ ।
उभयोरपि[7] यद्धयानं द्वयोः प्रकृतिनाशने ।
सम्भूययानं[8] तत्प्रोक्तं हनुमत्सूर्ययोरिव ॥ ७ ।
[उभयत्र तु या यात्रा द्वयो प्रकृतिनाशने ।
सम्भूययानं तत् प्रोक्तं रामसुग्रीवयोरिव ॥]
अल्पसारानुपादाय प्रतिज्ञाय फलोदयम् ।
गम्यते यत् परं[9] जेतुम् सम्भूयगमनं हि तत् ॥ ८ ।

---

[5] यदेकत्र [6] सामवायिकैः

[6a] शौर्यशक्तिगुणैर्या ; शक्तिकोशयुतैर्या ; गतैर्यानं

[7] उभयारौ तु वा यानं [8] सम्भूयगमनं प्रोक्तं

[9] परान्

6. When a collective march is undertaken by the *Vijigiṣu* consolidating the forces of his *sāmantas* (or subordinate chiefs and compatriots), known for their valour and integrity (*sakti-śauca-yuta*), it is *Saṁbhūyagamana*.

7. Again when a compact is formed between the *Vijigiṣu* and his enemy to march against a common enemy threatening to damage the *prakṛtis* (the state with its complements) of both (*dvayoḥ prakṛtināśane*) it is also called *Saṁbhūyagamana*, as was the case with Hanumat and Sūrya (forming a compact against Rāhu). The case of alliance between Rāma and Sugrīva is also taken to be an illustration of *Sambhūya-gamana*.

8. When the *Vijigiṣu* enlists the support of allies of weaker resources (*alpasārān*) assuring them of reward on success of the venture and marches with them to conquer the enemy it is another type of *Sambhūya-gamana*.

सम्भूययानमभिधातुमाह—एकीभूयेति । एकीभूयैकमतेन यद् यानमेकत्रैकस्मिन्यातव्ये । सामन्तैर्भूम्यनन्तरैः । सामवायिकैः समवायेन प्रत्यंशग्रहणेन चरन्ति ये तैः सह । शक्तिशौचयुतैर्यानं सम्भूय गमनं हि तदिति ॥ ६ ॥

द्वितीयं सम्भूययानमाह—उभयोरपीति । उभयोरप्यरिविजिगीष्वोररिरुभयारिस्तद्विषयं यानमुभयोरपि[4] प्रकृतिनाशने जाते सति । प्रकृतिरादित्यस्य मण्डलम्, हनुमतो मुखमण्डलम्, तन्नाशने सञ्जाते, ततः सूर्यो हनुमता सन्धाय राहुं जेतुं गत इत्युदाहरणं हनुमत्सूर्ययोरिति पौराणिकाः ॥ ७ ॥

तृतीयं सम्भूयानमाह—अल्पसारेति । अल्पं सारं शक्तीनां वीर्यं बिभ्रतः सामन्तानुपादाय । प्रतिज्ञाय जाते फले इदमित्युक्त्वा फलोदयं गम्यते यत्परं यातव्यं जेतुं सम्भूयगमनं हि तदिति ॥ ८ ॥

[4] यानन्तूभयोरपि

अन्यत्र प्रस्थितः सङ्गादन्यत्रैव च[9a] गच्छति ।
प्रसङ्गयानं तत्प्रोक्तमत्र शल्यो निदर्शनम् ॥ ९ ।

[9a] त्रैव हि ; वापि

9. Setting out for the achievement of a purpose, if (for some reason or other) the movement is directed towards another, it is known as *Prasaṁga-yāna*. The case of Śalya (the Madra ruler, who set out for joining the ranks of his nephew Yudhiṣṭhira in the Kurukṣetra, was pursuaded by Duryodhana to join the latter) is an apt illustration.

इदानीं प्रसङ्गतो यानमभिधातुमाह—अन्यत्रेति । अन्यत्र यातव्यमुद्दिश्य प्रस्थितोऽन्यत्र गच्छति । प्रसङ्गयानं तत्प्रोक्तम् । शल्यस्य दुर्योधनं यातव्यमुद्दिश्य प्रस्थितस्य दुर्योधनेनोपकारैरात्मसात्कृतस्य युधिष्ठिरो यातव्यः संवृत्त इति प्रसङ्गयानमिति ॥ ९ ॥

रिपुं[10] यातस्य बलिनः सम्प्राप्याविष्कृतं[10a] फलम् ।
उपेक्ष्य [10b]तन्मित्रयानमुपेक्षायानमुच्यते ॥ १० ।
निवातकवचान् हित्वा हिरण्यपुरवासिनः ।
उपेक्षायानमास्थाय निजघान धनञ्जयः ॥ ११ ।

---

[10] रिपोः [10a] सम्प्राप्यारिक्तं
[10b] ते हि तद् यान

10. The *Upekṣāyāna* (the expedient of indifference) is so called as the *Vijigīṣu* disregarding chance of his sure success against the assailed enemy, directs his movement against the latter's strong ally.

11. Dhanañjaya (Arjuna, the third Pāṇḍava) having defeated the Nivātakavacas (a clan of demons) adopted *upekṣāyāna* towards them (i.e., let them go scot free) and fell upon the dwellers of *Hiraṇyapura* (the Golden city, the abode of a powerful tribe of demons, allies of the said Nivātakavacas) and crushed them all.

उपेक्षायानमभिधातुमाह—रिपुमिति । रिपुं यातस्य बलिनः बलवतो विजिगीषोरित्यर्थः । आविष्कृतं प्रकटितफलं विजयरूपम् । सम्प्राप्य प्रतिलभ्य । उपेक्ष्य विजितं पलायमानम् आसन्नमपि शत्रुं हित्वा इत्यर्थः ॥ १० ॥

अत्र निदर्शनमाह—निवातकवचानिति । निवातकवचाः प्रचण्डदानवाः । तन्निग्रहणार्थमिन्द्राज्ञया धनञ्जय आसन्नानपि निवातकवचान् हित्वा परित्यज्यासाध्यांस्तन्मित्राणि हिरण्यपुरवासिनो[a] दानवा निजघान निपातिता इति पौराणिकी वार्ता । धनञ्जयोऽर्जुन इति ॥ ११ ॥

[a] पौलोमकालखञ्जान्

स्त्रियोऽथ पानं मृगया तथाऽक्षा दैवोपघातश्च बहुप्रकारः।
इति प्रदिष्टं व्यसनं ह्यनेन समन्वितो यो व्यसनी स गम्यः॥ १२।

12. Lust for women, drinking, hunting and gambling (dice play) as well as affliction by various natural calamities (that are ordained by Destiny, *Daivopaghāta*) are known as *vyasanas* (vices). He, who is under the influence of any one of these vices is a *vyasanī* and should be marched against.

यानभेदानभिधाय यातव्यलक्षणमाह—स्त्रिय इति। स्त्रिय इति स्त्रीव्यसनम्। पानं पानव्यसनम्। मृगया पापर्द्धिः। तथा अक्षा द्यूतानि। दैवोपघातश्च दुर्भिक्षमरकादिर्बहुप्रकारः। इत्येवंप्रकारमन्यदपि व्यसनं सम्प्रदिष्टम्। अनेन समन्वितोऽरिर्व्यसनी। स च गम्यो यातव्यो भवति सुखोच्छेद्यत्वात्॥ १२॥

परस्परस्य सामर्थ्याविघातादासनं स्मृतम्।
अरेश्च विजिगीषोश्च तत् पञ्चविधमुच्यते॥ १३।

[11] सामर्थ्यविघाता

13. When it is observed that the striking power (or the power to inflict damages) of both the *Vijigiṣu* and his enemy is identical, the former undertaking a march should take recourse to *āsana* (encampment or laying a siege). Āsanas (or the forms of it) are said to be of five kinds (viz., *Vigṛhyāsana, Sandhāyāsana, Sambhūyāsana, Prasaṁgāsana* and *Upekṣāsana*).

आसनमभिधातुमाह--परस्परस्येति। अरेश्च विजिगीषोश्च परस्परसामर्थ्यविघातादितरेणेतरस्य तदा या अवस्थितिः तदासनम्। तदपि पञ्चविधमेव; तद्यथा—विगृह्यासनं, सन्धायासनं सम्भूयासनं, प्रसङ्गासनमुपेक्षासनमिति॥ १३॥

अन्योन्याक्रान्तिकरणं विगृह्यासनमुच्यते।
अरिं विगृह्यावस्थानं[12] विगृह्यासनमुच्यते॥ १४।
यदा दुर्गस्थितः[13] शत्रुर्ग्रहीतुं नैव[13a] शक्यते।
विगृह्य नं तदासीत च्छित्वास्यासारवीवधान्[14]॥ १५।
विच्छिन्नवीवधासारं प्रक्षीणयवसेन्धनम्[15]।
विगृह्यमानः[16] प्रकृतिं कालेनैव वशंनयेत्॥ १६।

[12] विगृह्य वा स्थानं
[13] दुर्गगतः
[13a] न च
[14] हत्वास्यासारवीवधौ
[15] सेन्धनम्
[16] विरज्यमानप्रकृतिं

14. When both the *Vijigīṣu* and his enemy encamp their forces ready for attacking each other it is called *Vigṛhyāsana.* Encampment of the forces (laying a seige) after invading the enemy territory is another form of *Vigṛhyāsana.*

15. Finding it difficult to capture the enemy holding out from the secure shelter of his fort (*durgasthita*), the *Vijigīṣu* should lay seige around it so as to cut off the support of his allies (*āsāras*) by blockading the routes of supply to it (*vīvadha*).

16. Cut off from his *āsāras* (due to interception by the *Vijigīṣu*), and suffering from shortage of provisions (*yava-saindhavam*, grains and salt, due to blockade of supply routes) [the use of the term *hīnavegāśvam*, noticed in the communtary, does not seem to be appropriate], the besieged ruler, faced with the discomfiture of his *prakṛtis* (*vigṛhyamānaprakṛtiṁ*), ultimately (in course of time) is compelled to surrender.

तत्र विगृह्यासनमाह—अन्योन्येति । अरिविजिगीष्वोरन्योन्यं यदाक्रान्तिकरणं चेष्टाया विघातनं[6] तद् विगृह्यासनम् । विग्रहान्तःस्थयोरेव सामर्थ्यविघाते सति यदासनं तद् विगृह्यासनमेवारिं[7] विगृह्य कारणापेक्षया यत्स्थानं[8] तदपि विगृह्यासनमुच्यते ॥ १४ ॥

यदेति । यदा दुर्गस्थितः (दुर्गगतः) शत्रुः ग्रहीतुं नैव शक्यते तदा । आसारोमित्रबलमुच्यते । "स्वदेशादागच्छति वीवध" इति कौटिल्यः । मित्रादिप्रतिबलात् स्वदेशादनु पश्चाद् यद्भक्तवस्त्राद्या गच्छति । तच्छिन्नविच्छिन्नावासार[9]वीवधौ कृत्वा यदासीत तदपि विगृह्यासनमिति ॥ १५ ॥

दुर्गनिरोधे विधेयमाह—विच्छिन्नेति । प्रक्षीणयवसैन्धवं हीनवेगाश्वम् । अत्र सैन्धवपदं बलसामान्यस्य उपलक्षणम् । विभज्यमानप्रकृतिं (विरज्यमान प्रकृति वा) । विगृह्यमानप्रकृतिं इतिमूलम् । पृथग्भूतराज्यसाधनम् । स्पष्टमन्यत् ॥ १६ ॥

[6] विघात विधानं [7] विगृह्यासनमेकमरिं

[8] यदवस्थानं [9] तच्छिन्नविच्छिन्न आसार

अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः ।
सन्धाय यदवस्थानं[17] सन्धायासनमुच्यते ॥ १७ ।
निवातकवचैः सार्द्ध ' रावणः शत्रुरावणः ।
ब्रह्माणमन्तरा[18] कृत्वा सन्धायासनमास्थितः ॥ १८ ।

[17] समवस्थानं [18] मन्तरे

17. When both the *Vijigīṣu* and his enemy, suffering from identical losses in a war, call a truce and continue in an entrenched position, it is called *Sandhāyāsana.*

18. By way of illustration it is stated that Rāvaṇa, the vanquisher of his enemies, while fighting with the Nivātakavacas had to call a truce with Lord Brahmā as hostage and adopt *sandhyāyāsana.*

सन्धायासनमभिधातुमाह—अरेश्च इति। स्पष्टम्॥ १७॥

अस्योदाहरणमाह—निवातकवचैरिति। निवातकवचैः सह रावणस्य विग्रहे सति रावणस्तैराक्रान्तो ब्रह्माणं गोत्रगुरुमन्तरेण प्रतिभुवं कृत्वा शत्रुरावणोऽपि रावणः सन्धायासनमास्थितोऽन्यथा निवातकवचैर्विनाश्यते स्म इति एतदपि सन्धायासनम्॥ १८॥

उदासीने मध्यमे च समानप्रतिशङ्कया।
एकीभूय समुत्थानं[19] सम्भूयासानमुच्यते॥ १९।
उभयारिर्हि[20] वाञ्छेत विनाशमुभयोरपि।
सम्भूयेन[21] प्रतिव्यूहेदधिकं तत्त्वधर्मणा[22]॥ २०।

---

[19] व्यवस्थानं [20] उभयारिं हि वाञ्छन्तं
[21] सम्भूयेनं [22] सर्वसम्पदा; सङ्घधर्मणा

19. Apprehending hostile actions from both the *Madhyama* and *Udāsīna* rulers (apparently stronger than the *Vijigīṣu* and his enemy), when the *Vijigīṣu* and his enemy form a compact (*ekībhūya*) to resist it is called the *Sambhūyāsana.*

20. When the *Ubhayāri* (or the *Madhyama,* who is hostile to both the *Vijigīṣu* and his enemy) is desirous of (or designs a move for) crushing both of them, they should form an alliance with a power stronger than him (the *Madhyama*) and organise a united resistance (*sambhūyena prativyūhed*) pooling all resources.

सम्भूयासानमभिधातुमाह—उदासीने इति। उदासीनमध्यमौ कृतलक्षणौ। समान प्रतिशङ्कया यदि समानोऽपि कारणादभियोक्ता स्यात् तच्छङ्कया उदासीने मध्यमे विषयभूते व्यवस्थानं (समुत्थानम् इति मूलपाठम्) सम्भूयासनमुच्यत इति प्रतीतम्॥ १९॥

उभयारिर्हिति। यथा उभयारिरत्र मध्यमविशेषः। तं विशेषेण वाञ्छन्तमिच्छन्तं विनाशं उभयोरप्यरिविजिगीष्वोरुपचितशक्तित्वात् तदा बहुभिः सम्भूयेनमुभयारिं प्रति व्यूहेत् प्रतिबल्येत्। अधिकं बलवत्तरमिति। सङ्घधर्मणा सङ्घवृत्तोक्तन्यायेनेति॥ २०॥

यियासोरन्यमन्यत्र प्रसङ्गेनेह[22a] केनचित्[23]।
आसनं यत् तदर्थज्ञैः प्रसङ्गासनमुच्यते॥ २१।

[22a] प्रसङ्गेन हि [23] केवलम्

21. In course of marching against an enemy, if the *Vijigīṣu,* for some reason or other, halts and encamps at an intermediate station it is designated by experts (*arthajñaih,* in military science) as *Prasamgāsana.*

प्रसङ्गासनमभिधातुमाह—यियासोरिति। यियासोरन्यं यातुमिच्छोः प्रसङ्गेन कार्यान्तरेण अर्थलाभानर्थप्रतीकारादिना यदासनं तत्प्रसङ्गासनमुच्यते अर्थज्ञैः शास्त्रवेदिभिरिति॥ २१॥

आस्ते[24] प्रेक्ष्यारिमधिकमुपेक्षासनमुच्यते ।
उपेक्षां कृतवानिन्द्रः पारिजातग्रहं प्रति ॥ २२ ।
उपेक्षितस्य चान्यैस्तु[25] कारणेनेह केनचित् ।
आसनं रुक्मिण इव तदुपेक्षासनं[25a] स्मृतम् ॥ २३ ।

[24] अथोपेक्ष्यारिमधिक [25] चान्येन ; वान्यैस्तु कारणेनैव
[25a] तद्ध्युपेक्षासनं

22. The show of indifference to a more powerful rival is called the *Upekṣāsana*. Just as Indra (the Lord of Gods) displayed indifference to the carrying off of the *Pārijāta* flower (the celestial flower that blossoms in the *Nandana* grove of the Heavenly Domain).

23. When a ruler for some reason or other adopts indifferent attitude (remains inactive) to some apparently culpable action, as had been done by Rukmiṇ (the brother of Rukminī, at the time of her abduction by Kṛṣṇa) it is called *Upekṣāsana*.

उपेक्षासनमाह—आस्ते इति । अत्राभियुक्तोऽरिमधिकं दृष्ट्वा आस्ते उपेक्षां कृत्वा तदुपेक्षासनम् । यथा उपेक्षां कृतवानिन्द्रः पारिजातग्रहं प्रति । ततः प्रतियात-रुक्मिणी-सत्यभामासन्निधौ वासुदेवाग्रतो नारदः पारिजातमञ्जरीमढ्रश्यमानश्चिक्षेप, हरिकरस्थितायां च मञ्जर्यां समकालमेव भार्याद्वयेनाभ्यर्थितेन रुक्मिण्यै दत्तेति सत्यभामया, यस्येयं मञ्जरी तेन वृक्षेण विना मदन्तिकं नागन्तव्यमिति तदर्थं वासुदेवेन विध्वस्ते नन्दने इन्द्रेणोपेक्षणं कृतमिति ॥ २२ ॥

द्वितीयमुपेक्षासनमाह—उपेक्षितस्येति । अन्येन स्नेहादिना[10] कारणेन उपेक्षितस्य यदासनं तदुपेक्षासनं रुक्मिण इव, वासुदेवेन रुक्मिणीहरणे क्रियमाणे परिभवादिकमङ्गीकृत्य स्नेहात् रुक्मिणीभ्रात्रा उपेक्षासनं कृतमिति ॥ २३ ॥

[10] अन्येन अस्नेहादिना

बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्[26] ।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः ॥ २४ ।
यापयेद्वा यत्नमास्थाय सन्निकृष्टमरिन्तयोः[27] ।
उभयोरपि सम्पाते सेवेत बलवत्तरम् ॥ २५ ।
यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदः[28] ।
तदोपगच्छेत्[29] तच्छत्रुमधिकं वापि संश्रयेत्[29a] ॥ २६ ।

[26] समर्पयेत् [27] सन्निकृष्टतरस्तयोः, तरं तयोः
[28] संविदौ [29] तदोपसर्पस्तच्छ ; तदोपसर्पेत् तच्छ
[29a] वासमाश्रयेत्

24. When attacked by two powerful enemies from either side (finding his own means of resistance inadequate), a ruler submits to both with flattering words only (so as to deter them from open hostility) and remain stationed in his own fortifications (biding for an opportune moment), adopting (the *āsana* of) *dvaidhībhāva* or double dealing like the crow's eyeball (*kākākṣivad-alakṣita*, which moves between the right and left sockets as necessary) and of course keeping it undetected.

25. In case of imminent attacks from either direction, the assailant who advances to the nearest position should be made to desist from his move by offer of or promises for submission only (but adopting *dvaidhībhāva*). But when both of them launch simultaneous attacks, the ruler should submit himself to the stronger of the two.

26. When both the adversaries see through the game of the assailed ruler and convinced of his duplicity do not like to accept his overtures (of submission), the latter should seek alliance with some enemy of the assailants, failing which, he should submit himself to the stronger of the two (*saṁśrayet*).

द्वैधीभावं गुणमभिधातुमाह—बलिनोरिति। बलिनोः शक्तित्रयसम्पन्नयोः द्विषतोर्मध्ये वाचा वाङ्मात्रेणैवात्मानं समर्पयन् न कर्मणा, प्रत्येकमहं त्वदीयो यन्मम किञ्चित्त्वदीयमेवेति। वाच्ययं मित्रभावो हृदि तु शत्रुभाव इति द्विधाभवनम्—द्वैधीभावस्तेन वर्तेत आत्मरक्षार्थं काकाक्षिवदलक्षित इति। यथा काकाक्ष्येकं वामदक्षिणपार्श्वयोः समकालमेव परिदृश्यमानं न लक्ष्यते किमेकं द्वे वेति एवंभावं द्विरधिष्ठानं धारयेत् एको द्वैधीभाव इति ॥ २४ ॥

तत्र विधेयमाह—यापयेदिति। प्रयत्नेनालक्षितः, सन्निकृष्टतरं तयोर्द्विषतोर्यः सन्निकृष्टः तं, कालयापनया प्रतिपन्नश्चैव करोमीत्याशाप्रदर्शनेन कालं यापयेदित्यर्थः। उभयोरेपि विश्वासाभावात् सम्पाते बलवत्तरं त्राणार्थं सेवेतेति ॥ २५ ॥

यदेति। तथा यदा द्वावप्यरी जातसंविदौ वञ्चकोऽयमिति जातविश्वासौ[11] संश्लेषं सन्धि नेच्छेतां तदोपसर्पेत्तयोः शत्रुं परित्राणार्थं तदभावेऽप्यधिकमाश्रयं व्रजेदिति ॥ २६ ॥

[11] जाताविश्वासौ

द्वैधीभावो द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोः।
स्वतन्त्र उक्तो ह्यन्यस्तु यः स्यादुभयवेतनः ॥ २७ ॥

---

27. *Dvaidhībhāva* is described to be of two kinds, viz., *Svatantra* (the policy is adopted by one of his own volition) and *Paratantra* (i.e., adopted at other's guidance or direction). The *Svatantra* form has been described above, and the other form (i.e., the *Paratantra* form) is to be adopted on reports from the agents under the employ of both (the adversary and the ruler, *Ubhayavetanah*, a double agent).

द्वैधीभाव इति। द्वैधीभावोगुणः आचार्यैर्द्विधा प्रोक्तः। एकः स्वतन्त्रोऽपरः परतन्त्रः।

तयोः स्वतन्त्र-परतन्त्रयोर्मध्ये स्वतन्त्र उक्तो योऽनन्तरं स्ववशो यत्र रक्षा सम्पद्यते तत्रैव यातीति। अन्यस्त्विवति परतन्त्रः यः स्यादुभयवेतनो भृत्यादिः सोऽपि स्वामिद्वयवेतनं गृह्णन् एकस्मिन् गृहीत पुत्रदारे क्षियति, द्वितीयाय द्रुह्यतीति ॥ २७ ॥

उच्छिद्यमानो बलिना निरुपाय प्रतिक्रियः ।
कुलोद्भूतं[30] सत्यमार्यमाश्रयेत बलोत्कटम् ॥ २८ ।
तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता ।
तत्कारिता प्रश्रयिता वृत्तं संश्रयिणः[30a] स्मृतम् ॥ २९ ।

[अतःपरम एकादशसर्गस्य पञ्चदशश्लोका द्वादशसर्गस्य च सप्तश्लोका मुद्रितपुस्तके न लभ्यन्ते। ते टीकायामनुसारेण लिख्यन्ते ।]

विनीतवत् तत्र कालं गमयित्वा गुराविव ।
तत्सङ्गात्[31] परिपूर्णः[31a] सन् क्रमेण स्ववशो भवेत् ॥ ३० ।
ददद्[32]बलं वा कोशं वा भूमिं वा भूमिसम्भवम्[32a] ।
आश्रयेताभियोक्तारं[33] विसन्धिमनपाश्रयः[34] ॥ ३१ ।
सर्वाणि चैतान्यार्तः सन् दद्यात् प्राणार्थमात्मनः ।
युधिष्ठिर इवैत्यन्ते[35] पुनर्जीवन् वसुन्धराम् ॥ ३२ ।
कल्याणी बत गाथेयं लौकिकी प्रतिभासते ।
इति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ३२ क ।
त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे विचार्य पृथिवीं त्यजेत् ॥ ३२ ख ।

---

[30] कुलोद्गतं [30a] संश्रयिणां
[31] तत्प्रसङ्गात् समापूर्णः [31a] प्रतिपूर्णः
[32] दद्याद् [32a] भूति सम्भवाम्
[33] आश्रयेदभियोक्तारं [34] रनपाश्रयः [35] इवाप्नोति

28. Apprehending total destruction (as a result of invasion) by a powerful enemy, and finding himself absolutely helpless (in putting up any resistance), the (assailed) ruler should seek protection of a more powerful ruler of noble family (*kulodgatam*), who is truthful (who keeps his promises), an *Arya* (or a follower of vedic tradition and culture).

29. The duties of one taking recourse to *saṁśraya* or protection (of the stronger power) are, to be in worshipful attitude in his presence,

to be always united with him in his thoughts and designs (*nityaṁ tadbhāva-bhāvitā tatkāritā*), to render service to him and be courteous to him.

[Hereafter 15 ślokas of Sarga XI and 7 of Sarga XII are omitted in the B.I. edition. Those are however restored from the manuscript and the *ṭīkā* and given a continuous numbering 30-42 inclusive of 2 supplementaries (32A and 32B). According to the *ṭīkā* Sarga XI ends with śloka 42, which we have followed. The B.I. edition incorporates ślokas of Sarga XII including the 7 wanting ślokas in Sarga XI. We have separated Sarga XII indicating the original edition numbers within brackets after each śloka.]

30. The protected ruler should treat the protector as respectfully as one would do his *Guru* (the spiritual preceptor) and keep his company devotedly till such time as would enable him to get back control of his own self (to gain independence).

31. (Finding no other alternative) an assailed ruler should seek alliance with the very assailant by surrendering to him his army or treasury or land and its products, as it is injudicious to remain without a protector (*anapāśrayaḥ*).

32. Afflicted by perilous circumstances the ruler should forsake everything (i.e., all his resources) in order to save his own self (so that, if alive those may be regained under a favourable situation). King Yudhiṣṭhira (having lost everything to the Kauravas) later regained his kingdom.

32A. An inspiring popular verse (*laukiki*) says that a living man is likely to secure happiness even after the lapse of a hundred years (i.e., at a future date, as one's sufferings and joys move in a cyclic order).

32B. (It is also said that if such a contingency arises) a particular person (however near and dear) should be forsaken in the interest of the family (*kula*), the family should be forsaken in the interest of the village, and the village should be forsaken in the interest of the country (*janapada*). But for the larger interest of self-preservation he may even abandon his own life after careful deliberation.

संश्रयगुणमभिधातुमाह—'उच्छिद्यमान इति। बलिना अत्युपचितशक्तिना अभियोग उच्छिद्यमानः। निरुपायप्रतिक्रियस्तस्य च निरुपाया प्रतिक्रिया यदा स्यात् तदा संश्रयवृत्तिरिष्यते 'महादोषो हि विशिष्टबलसमागमो राज्ञामिति' वचनात्। उपायान्तरे विद्यमाने संश्रयो नेष्यत इति भावः। तदा कुलोद्भूतं, कुलीनस्य नाकार्ये मतिः प्रवर्तत इति। सत्यममृषावादिनमार्यमनतिसन्धायकं श्रयेत बलोत्कटमभियोक्त्रपेक्षया बलेनोत्कटमात्मरक्षार्थमिति ॥ २८ ॥

संश्रयिणो विधेयमाह—तदिति। तद्दर्शने आश्रितदर्शने साष्टाङ्गप्रणामपूर्वकाराधनशीलता[11]। नित्यं तद्भावभाविता तथा चोक्तम्—"यस्य यस्य हि यो भावस्तेन तेन हि तं नरः। अन्तः प्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥" इति। तत्कारिता प्रश्रयिता एतद्वृत्तं संश्रयिणः स्मृतमिति ॥ २९ ॥

विनीतवदिति। तत्र संश्रिते विनीतवत् न तु परमार्थतो विनीतः किञ्चित्कालं गमयित्वा गुरारिव तत्सङ्गात् संश्रितसम्बन्धात् परिपूर्णः शक्तिभिरभ्युच्छ्रितः सन् क्रमेण स्ववशो भवेत् तच्चित्त मेवाराध्येत्यर्थः ॥ ३० ॥

उक्तगुण संश्रयाभावे विधेयमाह—ददिति। आश्रयेत गत्यन्तराभावेऽभियोक्तारं विसन्धिरन-पाश्रय इति प्रतीतम् ॥ ३१ ॥

सर्वाणीति। सर्वाणि बलकोशदण्डादीनि, आर्तः सन् दद्यात् त्राणार्थमात्मनः। यत्रात्मा जीवन्नवशिष्यते। युधिष्ठिर इवेत्यादि प्रतीतम् ॥ ३२ ॥

तदेव प्रकारान्तरेणाह—कल्याणीति। स्पष्टम् ॥ ३२ क।

सर्वथा आत्मरक्षा कर्तव्येति प्रकारान्तरेण कथयति—त्यजेदिति। विचार्य आत्मनाश सम्भावनायां विविच्य उपायान्तराभावे पृथिवीं अपि त्यजेत्। प्रतीतम् अन्यत् ॥ ३२ ख ॥

11 पूर्विकाराधनशीलता

निष्पतेदात्मलाभे वा व्यसने वा रिपोः श्रितः[36] ।
प्रहरेद्वा[36a] बलीयस्या सैंह्या वृत्त्या बलं रिपुम्[36b] ॥ ३३ ।
नाकारणात् सङ्गमेयात्[37] ज्यायसा चेतरेण वा ।
क्षयव्ययकृतात् दोषात् विश्रम्भ[37a]द्रोहजादपि ॥ ३४ ।
संयोगहेतुना[38] गत्वा विश्वसेन्न पितर्यपि[38a] ।
विश्वासमागते[39] साधौ प्रायो द्रुह्यन्त्यसाधवः ॥ ३५ ।

---

[36] श्रियः [36a] वाऽबलीयस्या
[36b] वा काल उत्थितः [37] सङ्गमियाज्ज्यायसा चेतरेण वा
[37a] विस्रम्भ [38] संयोगं
[38a] पितर्यपि न विश्वसेत् [39] मागतं सन्तं

33. A ruler (having taken recourse to *saṁśraya*) gaining sufficient power and resources for himself or finding the enemy (i.e., to whom he has taken *saṁśraya* under force of circumstances) under the influence of vices (*vyasana*), should rise to the occasion and like a lion (*saiṁhyā vṛttyā*) pounce upon the latter (to crush him altogether).

34. Without sufficient reason no union (of the nature of *saṁśraya*) should be sought for with a stronger adversary or for the matter of that with any adversary, as that is likely to entail in unnecessary wastage of resources as well as in drainage of money (in satisfying the latter's demands) and after all it may lead to treacherous rivalry (*droha*).

35. For the purpose of union (i.e., in seeking shelter) a ruler should not trust even his own father (what to speak of others). Gaining confidence of the good-natured person, dishonest people often betray him.

प्रकारान्तरेणाह—निष्पतेदिति। आत्मलाभे आत्मोत्कर्षे सति निष्पतेत् तमभियोक्तारमाकामेत्। वा अथवा रिपोः व्यसने श्रितः, प्रहरेद्वा बलीयस्या संज्ञ्या वृत्त्या[12] बलिनं रिपुं काले प्रहर्तव्यकाले, उच्छिद्यत इति ॥ ३३ ॥

कारणं विना प्रतिद्वन्द्विभूपेन न संगन्तव्यम् इत्याह—नाकारणादिति। कारणाद्विना सङ्गमं नेयात् न गच्छेत् ज्यायसा विशिष्टबलेन च इतरेण दुर्बलेन वा समानबलेन वा। कस्मादित्याह—क्षयव्ययकृतात्, क्षयः पुरुषवाहनादेर्विनाशः शुष्ककलहादौ:, धान्यहिरण्यादेरौचित्यकरणे[13] व्ययस्तत्कृताद्दोषात्। विश्रम्भद्रोहजादपि दोषात् विश्रम्भमागतं द्रुह्यन्ति वा असाधव इति ॥ ३४ ॥

एतदेव समर्थयन्नाह—संयोगमिति। संयोगं हेतुना केनापि कारणेन गत्वा पितर्यपि न विश्वसेत् विश्वासं न कुर्यादिति ॥ ३५ ॥

[12] वृत्त्या काले प्रहर्तव्यः ; काले स एव संज्ञ्या वृत्त्या काले प्रहर्तव्यः

[13] रौचित्याकरणे अन्यायस्तत्कृतात्

इति षाड्गुण्यमन्ये तु द्वैगुण्यमिति[40] चक्षते।
यानासने विग्रहस्य रूपं[40a] सन्धेः परं स्मृतम् ॥ ३६ ।
[सन्धेस्तु सन्धिमार्गज्ञैर्द्वैधीभाव समाश्रयौ ।]
स हि[41] गच्छंश्च तिष्ठंश्च विग्रहं कुरुते यतः।
[42]अतो यानासनं प्राज्ञैः विग्रहः परिकीर्तितः[43] ॥ ३७ ।
असन्धाय यतो नास्ति द्वैधीभावः ससंश्रयः[44]।
ततो द्वावपि तौ प्राज्ञैः रूपं सन्धेरुदाहृतम्[45] ॥ ३८ ।
सन्धायेति च(हि) यत् प्रोक्तं तत् सन्धेरूपमिष्यते[46]।
विगृह्येति च यत् प्रोक्तं विग्रहस्य तदुच्यते ॥ ३९ ।

[40] मभिचक्षते
[40a] द्वयं सन्धेः ; रूपं सद्भिः प्रकीर्तितम्
[41] सोऽभिगच्छंश्च
[42] ततो यानासने
[43] परिकीर्त्यते
[44] समाश्रयः
[45] रुदाहृतौ
[46] रूपमुच्यते

36. This is *Sāḍguṇya* or the six expedients of politics and diplomacy. But some hold that there are two expedients (*dvaiguṇyaṁ*) only, (viz., *Sandhi* and *Vigraha*) as *yāna* and *āsana* (marching and encampment for seige) are mere forms of *vigraha* (war), and the rest (*dvaidhībhāva* and *saṁśraya*) of *sandhi*. (Experts in peace-making consider *dvaidhībhāva* and *saṁśraya* as belonging to the category of *sandhi*).

37. It is only when a ruler launches upon a war that he marches (towards his enemy) and lays seige (at his forts). So the experts describe *yāna* and *āsana* as different forms of *vigraha*.

38. As without concluding some sort of peace (however temporary), *dvaidhībhāva* and *saṁśraya* policies cannot be adopted so the wise take these two as varieties of *sandhi*.

39. Therefore whatever action is taken on the lines indicated above after concluding a peace comes under *sandhi*, and similarly whatever is done after launching a war comes under *vigraha*.

उपसंहरन्नाह—इतीति। इति षाड्गुण्यमिति सिद्धान्तः। अन्ये तु द्वैगुण्यमिति चक्षते व्याख्यां कुर्वन्ति ; यतो यानासने विग्रहस्य रूपं सन्धेः परं स्मृतम्। विग्रहे सति यानं, विगृह्यासनं तदशेष विग्रह-रूपमेव, संश्रयो द्वैधीभावश्च सन्धेरेव रूपं, अतो द्वैगुण्यमेव ॥ ३६ ॥

एतदेव व्याख्यातुमाह—स इति। स हि अभियोक्ता गच्छन् अभियानगुणमातिष्ठन्, तिष्ठन् आसनगुणमातिष्ठन् विग्रहं कुरुते यतस्ततो यानासने प्राज्ञैर्विग्रहः परिकीर्तित इति प्रतीतम् ॥ ३७ ॥

असन्धायेति। तथा सन्धिमकृत्वा द्वैधीभावः संश्रयसहितो नास्ति। "सन्धिविग्रहोपादानं द्वैधीभावः" इति कौटिल्यः" (७।१।११)। संश्रयस्तु न सन्धिं विनेति, ततो द्वावपीत्यादि प्रतीतम् ॥ ३८ ॥

सन्धायेति। सन्धाय शत्रुणा सह मिलित्वा यत्कार्यं प्रोक्तं करणीयमिति कथितं तत्सन्धे रूपमिष्यते। विगृह्य यत् कार्यं कर्तव्यमिति प्रोक्तं तत् विग्रहस्य रूपमुच्यते। रूपमिति वर्तत इति ॥ ३६ ॥

सन्धिश्च विग्रहश्चैव[47] द्वैगुण्यमिति चक्षते[47a] ।
एतौ च संश्रयश्चैव त्रैगुण्यमिति चापरे[48] ॥ ४० ॥
यस्मादन्यं संश्रयते[48a] बाध्यमानो बलीयसा ।
तत् सन्धिः[49] संश्रयो ह्यन्य इत्युवाच बृहस्पतिः ॥ ४१ ॥

---

[47] श्चेति [47a] कल्पते

[48] विचारे [48a] तस्मादन्यं संश्रयेत

[49] तत्सन्धेः

40. Thus though *sandhi* and *vigraha* are considered by some to be the two expedients only, others taking *saṁśraya* into account describe expedients to be three in number (*traiguṇyaṁ*).

40. *Saṁśraya* is that type of *sandhi* in which one (the assailed ruler) is compelled to seek refuge of a stronger power and Bṛhaspati holds that it is to be distinquished from the (formal) *sandhi*.

सन्धिश्चेति। एवं च सन्धिश्च विग्रहश्चेति द्वैगुण्यमिति चक्षत इति स्थितम्। द्वैगुण्यवादिनः संश्रयं सन्धेरेव रूपं कथयन्ति। त्रैगुण्यवादिनस्तु संश्रयः सन्धेः पृथक् कुर्वन्तीति मतद्वैविध्यम् ॥ ४० ॥

सन्धौ संश्रयो नान्तर्भविष्यतीति नियममाह[14]—यस्मादिति। यस्मात्कारणादन्यं बलवत्तरं संश्रयते बाध्यमानो बलीयसा। तप्तं तप्तेन सन्धत्त इति सन्धिस्वरूपम्। नात्र संश्रयस्य तापोऽस्तीति सन्धेरन्यः संश्रय इति। ततसन्धेः संश्रयो ह्यन्य इत्युवाच बृहस्पतिरिति प्रतीतम् ॥ ४१ ॥

[14] संश्रयानन्तरं भविष्यतीति नियम

न्याय्यो गुणो विग्रह[50] एव सन्ध्याऽदस्तदुत्थाः प्रभवास्ततोऽन्ये ।
अवस्थया भेदमुपागतं[51] सन् षाड्गुण्यमित्येव गुरोर्मतं नः ॥ ४२ ।

[50] विग्रह एक एव सन्ध्यादयोऽन्ये तु गुणास्तदुत्थाः ।

[51] गतः सन्

इति यानासनद्वैधीभावसंश्रयविकल्पो नाम षोडशं प्रकरणम् ।

इति श्रीकामन्दकीयनीतिसारे यानासनद्वैधीभावसंश्रयविकल्पो नाम एकादशः सर्गः ॥

42. On reasonable analysis *vigraha* stands out to be the one and only one political expedient (for a *Vijigiṣu*) and *sandhi* and other expedients arise out of it. It is the considered opinion of our Guru (the preceptor, i.e., Viṣṇugupta) that according to needs of political circumstances expedients are six in number (*Ṣādguṇyam*).

स्वगुरुमतदर्शनपूर्वकमुपसंहरन्नाह—नाय्य इति । न्यायेन विचार्यमाणे एको विग्रह एव गुणः । सन्ध्यादयोऽन्ये तु गुणास्तदुत्था विग्रहानन्तरं व्यपदिश्यन्ते ; यतो विग्रहोपतप्तः सन्धत्ते । संश्रय एव द्वैधीभावः । विग्रह एव यानं, कारणादासनं चेति षोढा प्रतिभिद्यमानोऽप्येक एव विग्रहो गुण इत्यस्मद्-गुरोर्विष्णुगुप्तस्य मतम् ॥ ४२ ॥

इति षोडशं प्रकरणम् ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां हस्तलिखितपुस्तकानुसारेण यानासनद्वैधीभावसंश्रयविकल्पो नाम एकादशः सर्गः ॥

द्वादशः सर्गः

[हस्तलिखित पुस्तकानुसारेण ; मुद्रितग्रन्थानुसारेण एकादशसर्गस्यान्तर्भुक्तः]

१७। मन्त्रविकल्प प्रकरणम्।

षाड्गुण्यनिश्चितमतिर्गुह्यं गूढ़ प्रचारवान्।
मन्त्रयेदिह[1] मन्त्रज्ञो मन्त्रज्ञैः सह मन्त्रिभिः ॥ १ ॥*

---

[1] मन्त्रयेतेह

* द्वादशसर्गस्य सप्तश्लोका मुद्रितपुस्तके न लभ्यन्त टीकायामनुसारेण लिख्यन्ते।

Sarga XII

(according to the manuscript).

[Sarga XI continued according to the B.I. edition text.]

Prakaraṇa—17

Mantravikalpa

(Varieties of policy decisions)

1. Well-grounded in the principles of *Sāḍguṇya* (the six political expedients) and well informed of conditions obtaining within his dominion and without through the network of spies, the ruler (*Vijigīṣu*), himself expert in counselling (*mantrajña*), should deliberate on secret state matters with ministers experienced in sound counselling.

[Ślokas 1-7 are not found in the B.I. edition text. But those have been restored from the *ṭīkā*.]

षाड्गुण्यस्यानन्तरं मन्त्राधिकारस्य सम्बन्धं दर्शयन्नाह—षाड्गुण्येति। षाड्गुण्ये अनन्तरोक्ते निश्चिता निःसन्दिग्धा मतिर्यस्य कृतषाड्गुण्यतत्त्वनिर्णय इत्यर्थः। गुह्यं गोपनीयं कार्यं मन्त्रयेदिति सम्बन्धः। गूढं प्रचरन्तीति गूढ़प्रचाराः संस्थासञ्चारभेदभिन्नाः ते विद्यन्तेऽस्येति गूढ़प्रचारवान्। मन्त्रज्ञ इति मन्त्रः—षण्णां गुणानां मध्ये कस्मिन् गुणे स्थितस्य मे वृद्धिरवृद्धिः परस्य इति तत्रावस्थित्यर्थः पर्यालोच्यो मन्त्रः। तत्र कौटिल्यः—"तेषां यस्मिन् वा गुणे स्थितः पश्येत् इह स्थितः शक्यामि दुर्ग-सेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्माणि आत्मनः प्रवर्तयितुं, परस्य चैतानि कर्माणि अपहन्तु-मिति सा वृद्धिः।" (७।१।२०-२१)। एतद्विषयं गुप्तभाषणं मन्त्रः, स्वकर्मप्रवर्तनं परकर्मोपघातश्च येरुपायैर्भवति तैस्तैश्च तत्कर्मप्रचारो[1] मन्त्रः, इत्यादिस्वरूपं जानातीति मन्त्रज्ञो विजिगीषुरेव। मन्त्रज्ञैरेव मन्त्रिभिः सहेति ॥ १ ॥

[1] ति ततश्चानेक मन्त्रप्रकारो मन्त्रप्रकोमन्त्रः ; ति तत्र यथानेकत्र मन्त्रप्रचारो मन्त्रः।

मन्त्रार्थकुशलो राजा सुखं भूतिं समश्नुते[2] ।
विपरीतस्तु विद्वद्भिः स्वतन्त्रोऽप्यवभूयते[3] ॥ २ ।
दुर्मन्त्रमेनं रिपवो यातुधाना इव क्रतुम् ।
समन्ततो विलुम्पन्ति तस्मान्मन्त्रपरो भवेत् ॥ ३ ।

[2] विजयमश्नुते [3] प्यवधूयते

2. A ruler, conversant with the nature of counselling and capable of interpreting them (*mantrārtha-kuśalo rājā*, i.e., in making policy decisions), easily acquires prosperity, while one who is of contrary nature, even if independent, loses his kingdom (*svatantropyavadhūyate*) at the hands of his learned adversary (learned in polity).

3. Just as the Rākṣasas (Yātudhānā) descerate (vedic) sacrifices (*kratuṁ*) associated with defective *mantras* (sacred hymns), so also enemies destroy the kingdom of a ruler whose *mantras* (policies) are defective. So it is essential for a king to be well-grounded with sound counsels.

मन्त्रज्ञानस्य फलमन्वयव्यतिरेकाभ्यां दर्शयन्नाह—मन्त्रार्थेति । वक्ष्यमाण पञ्चाङ्गस्य मन्त्रस्य योऽर्थः वृद्धिक्षयलक्षणस्तस्य सम्पादने कुशलो राजा प्रजारञ्जनात् सुखमक्लेशेन भूतिं श्रियमश्नुते आक्रम्य भुङ्क्ते । विपरीतस्तु मन्त्रार्थाकुशलः विद्वद्भिः पण्डितैः तत्र कुशलैः स्वतन्त्रोऽपि अवधूयते राज्यात् प्रच्याव्यते इति ॥ २ ॥

दुर्मन्त्रमिति । दुष्टो मन्त्रो मन्त्रणं यस्य । दुष्टत्वं च तस्य शास्त्रविरुद्धत्वम् । एनं रिपवो विलुम्पन्ति समन्ततो यातुधाना राक्षसा दुष्प्रयुक्तवैदिकमन्त्रं यज्ञमिव । तस्मात् तेषु मन्त्रपरो यथोक्तमन्त्रपर एव स्यादिति ॥ ३ ॥

मन्त्रयेतेह कार्याणि सहाप्तेन विपश्चिता ।
आप्तं मूर्खमनाप्तञ्च पण्डितं[4] वर्जयेदिह ॥ ४ ।

[4] मन्त्रिणं परिवर्जयेत् ; वर्जयेदिह पण्डितम्

4. All matters of state should be decided upon after deliberation with trustworthy ministers. Trustworthy fools and untrustworthy counsellors must be avoided.

मन्त्रलक्षणमभिधातुमाह—मन्त्रयेतेति । मन्त्रयेतेह कार्याणि सहाप्तेन यो हि षड्गुणैर्निरन्तरं व्याप्यते स तस्याप्त इत्युच्यत । आप्लृ व्याप्ताविति पाठात् । तस्य च व्यभिचारो न स्याद् यथा तथोक्तत्वात् । आप्तोऽपि भूत्वा यदि विपश्चित् नीतिशास्त्रपण्डितो भवति तेन सह मन्त्रयेत । एतद्गुणद्वयमेकत्र यस्मिन् विद्यते तेनेति । आप्तं मूर्खमनाप्तं च पण्डितमिह मन्त्रे वर्जयेदिति ॥ ४ ॥

मार्गं सन्मार्गगतिभिः सिद्धये सिद्धकर्मभिः ।
पूर्वैराचरितं सद्भिः शास्त्रीयं न परित्यजेत् ॥ ५ ।

5. In implementing counsels (or deciding upon policies) the ruler should follow for success the way of righteousness in line with those who achieved success in the past. He should not deviate from the tradition of the predecessors and of the wise or from the prescription of the Śāstras (on polity).

मन्त्रश्च शास्त्रोक्तक्रमेणैव कार्य इति दर्शयन्नाह—मार्गमिति। शास्त्रीयं मार्गं मन्त्रणे न परित्यजेदिति सम्बन्धः। पूर्वैः षोडशराजादिभिः बृहस्पत्यादिभिश्च सत्पुरुषैराचरितं सेवितं च। सिद्धये सिद्धयर्थम्, सिद्धकर्म्मभिः सद्भिः। सन्मार्गेणैव गतिर्येषां ते इति तथोक्तन्यायेनैव मार्गेण मन्त्रः कर्तव्य इत्यर्थः ॥५॥

उच्छास्त्र पदविन्यासः सहसैवाभिसम्पतन्[5] ।
शत्रुखड्गमुखग्रासमगत्वा न निवर्तते ॥ ६ ।

---

[5] सहसैव नृपः पतन्

6. If a ruler acts in a way repugnant to the Śāstras and all on a sudden (*sahasaiva* i.e., without due deliberation) falls upon an enemy, he can hardly get back without feeling the impact of the enemy's sword (i.e., without suffering severe losses including mortal wounds).

उक्तस्यान्यथात्वे दोषं दर्शयन्नाह—उच्छास्त्रेति। उद्गतशास्त्रं पदविन्यासः कार्येषु गमनं यस्य सः। पदविन्यासनिष्पाद्यं उच्छास्त्रं न कर्तव्यमित्यर्थः। सहसैव मन्त्रालोचनं विनैवाभिसम्पतन् अभिमुखं शत्रूणां गच्छन्, शत्रुखड्गमुखग्रासमगत्वा न निवर्तत इति। खड्गमुखं धारैव तद्ग्रासः खड्गधाराग्रासो मरणं तदप्राप्य न निवर्तते इत्यर्थः। अतो मन्त्रपूर्वं प्रवर्तितव्यमिति भावः ॥ ६ ॥

प्रभावोत्साहशक्तिभ्यां मन्त्रशक्तिः प्रशस्यते ।
प्रभावोत्साहवान् काव्यो जितो देवपुरोधसा ॥ ७ ।
[असुरान् मोहयामास शुक्ररूपी बृहस्पतिः ।
बृहस्पतिं तथा शुक्रः शशापानुपमद्युतिः ॥] ७ क ।

---

7. Of the three *śaktis* (sources of power) *mantra-śakti* (the power of good counsel) is of greater significance than either *prabhāva* (or *prabhu-śakti,* the power of the lord based on his treasury and army) or *utsāha-śakti* (energy). Kāvya or Śukra, the preceptor of the demons inspite of his accomplishment of *prabhāva* and *utsāha* was out-witted by the celestial priest (Bṛhaspati) (by virtue of his *mantraśakti*).

7A. Bṛhaspati in the guise of Śukra deceived the demons (through his *mantraśakti*) and for that Śukra cursed Bṛhaspati.

मन्त्रशक्तेः प्राधान्यं दर्शयन्नाह—प्रभावेति। कोशदण्डबलं हि प्रभुशक्तिः। शौर्यममर्षौदार्य्यं चोत्साहशक्तिः। ताभ्यां सकाशादत्र मन्त्रशक्तिरेव गरीयसीति। अत्रेतिहासं दर्शयति प्रभावोत्साह-

वान् काव्यः शुक्रो महाप्रभावकोशदण्डचण्डदैत्यपरिवृतो जितो देवपुरोधसा बृहस्पतिना मन्त्रशक्त्येति वाक्यशेषः। देवासुरसंग्रामे मृतानसुरान् शुक्रो मृतसञ्जीविन्या जीवयति। देवा मृता मृता एव। ततश्च प्रभावोत्साहसम्पन्नोऽभूत्। तदतिसन्धानार्थं[a] सुतः कचः शिष्यत्वेन प्रणिहितः। तेन च शुक्रस्य प्रियसुता वशीकृता। तदवेत्य च दैत्यैरतिसन्धानभयात् कचो विपक्षः शुक्राय भक्षितुं दत्तः। तत् सुतया देवयान्या प्रार्थितेन काव्येनोदरस्थ एव मृतसञ्जीविन्या पुनर्नवः कृतः। उदरस्थस्यैवोपदिष्टा मृतसञ्जीविनी कचस्य 'विदार्योदरं निर्गतस्त्वं मामनयैव जीवय' इति। तथा कृत्वा गते कचे समरे मृता दैत्या न जीवन्ति। तदनया मन्त्रशक्त्या सुरगुरुणा जितः काव्य इति ॥ ७ ॥

[a] अभिसन्धानार्थं

[Hereafter Śloka numbers of Sarga XI of the B.I. text are shown within brackets.].

अशिक्षितनयः सिंहो हन्तीमं केवलं बलात्।
तञ्च धीरो नरस्तेषां शतानि मतिमान् जयेत् ॥ ८ । (११।३०)

8. A lion, devoid of training in moral laws (*naya, nīti*), kills its prey by sheer brute force but a hundred of such lions are subjugated by a man by virtue of his intelligence and wisdom (i.e., *mantraśakti*).
[XI. 30]

एतदेव समर्थयन्नाह—अशिक्षितेति। अशिक्षितो नयो नीतिशास्त्रं येन स तथोक्तो मन्त्रशक्तिरहित इत्यर्थः। सिंहः केवलोत्साहशक्तिर्हन्ति इमं केवलं बलात् सामर्थ्यात्। तं चेति तमित्थं धीरो नरः तेषां च सिंहानां शतानि अनेकानि मतिमान् कूटकपटादिभिः स्थापयेन्मारयेद्वा ॥ ८ ॥

पश्यद्भिर्दूरतोऽपायान् सूपाय प्रतिपत्तिभिः।
भवन्ति हि[6] फलायैव विद्वद्भिश्चिन्तिताः[6a] क्रियाः ॥ ९ । (११।३१)
उपायपूर्वं लिप्सेत कालं वीक्ष्य समुत्पतेत्।
पश्चात्तापाय निर्दिष्टा[7] विक्रमैकरसज्ञता ॥ १० । (११।३२)

[6] भवन्तीह [6a] द्भिर्मन्त्रिताः ; विपश्चिता

[7] भवति

9. A ruler, anticipating future troubles or troubles brewing at a distance, should take adequate measures by exercising his own influence after due deliberation with his counsellors in order to get sure results.
[XI. 31]

10. Desirous of acquisition (of territory or wealth), a ruler should undertake a march (against his adversary) finding the opportune time for it only after applying necessary political expedients (*upāyas*, like conciliation etc). Too much reliance on military power alone (*vikramaikarasajñatā*, one who knows the taste of valour only) leads to repentance

(*paścāttāpa*). (Because valour is successful if aided by reasonable judgement or *mantraśakti*).

[XI. 32]

मन्त्रशक्तेः सामर्थ्यमभिधातुमाह—पश्यद्भिरिति। पश्यद्भिः प्रमाणबलात् प्रत्यक्षीकुर्वद्भिर्दूरतो देशव्यवधानात् कालव्यवधानाद्वा। अपायान्विनिपातान् सूपाय प्रतिपत्तिभिरिति शोभनसामाद्युपायैः प्रतिपत्तिर्ज्ञानपूर्विका फलप्राप्तिर्येषां ते तैः, विद्वद्भिश्चिन्तिताः सुपर्यालोचिता मन्त्राधिकारोक्त क्रिया अनुष्ठानानि फलायैव भवन्ति निश्चयेन फलन्ति इत्यर्थः ॥ ९ ॥

क्रियाचिन्तनमेव दर्शयन्नाह—उपायेति। उपायाः सामदानभेदा ये तेऽस्माभिमताः। दण्डेन तु लाभः सांशयिकः इति भावः। तत्पूर्वं लब्धुमिच्छेत् यानमात्रसाध्ये लाभे कालं यात्रानुरूपं वीक्ष्य निर्णीय समुत्पतेत् यायात्। कस्मादित्याह—विक्रमैकरसज्ञता यस्मात् पश्चात्तापाय भवति। विक्रमः परमोत्साहः शौर्यातिशयः स एवैकारस[8]स्तमेव जानाति न मन्त्रशक्तिरसम्। तद्दूरसाज्ञानात् देशकालादि-निरपेक्षस्य विपन्ने व्यवसाये विक्रमैकरसज्ञता पश्चात्तापाय भवति, किमित्यहं देशकालबलादिनिरपेक्षो व्यवसित इति। विक्रमोऽपि मन्त्रं सहायः फलतीति भावः ॥ १० ॥

[8] एकोरसः

शक्याशक्यपरिच्छेदं कुर्याद्बुद्ध्या प्रसन्नया।
केवलं दन्तभङ्गाय दन्तिनः शैलताडनम् ॥ ११ । (११।३३)
अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम्।
[8]भवन्ति परितापिन्यो व्यक्तं कर्मविपत्तयः ॥ १२ (११।३४)
नाग्निं पतङ्गवद्गच्छेत् स्पृश्यमेव तु संस्पृशेत्।
किमन्यत् स्यादृते दाहात् पतङ्गस्याग्निमृच्छतः ॥ १३ ।*
मोहात् प्रकुर्वतश्चेष्टां[9] दुःखलभ्येषु वस्तुषु।
भवन्ति परितापिन्यो व्यक्तं कर्मविपत्तयः ॥ १४ ।*

---

[8] आकाशमास्वादयतः कुतस्तु कवलग्रहः ॥

[9] प्रक्षिपतश्चेष्टां

11. A clear determination between what is attainable and what unattainable (*śakyāśakya*) has to be made by cool and intelligent deliberation (i.e., by application of *mantraśakti*). A rash (undeliberated) action leads only to one's own suffering like the elephant charging against a rock suffers only from broken tusks. [XI. 33]

12. Those who indulge in attempting for unattainable objects (or purposes) hardly get anything but suffering. What can a man expect to get if he desires to taste the sky ? [XI. 34]

* [Ślokas 13 and 14 do not occur in the B.I. text, but restored from the *ṭīkā*.]

13. A burning flame should not be approached like insects. That which can be touched safely should be touched. What else than thorough burning is achieved by an insect desiring contact with fire ?

14. Any body through illusion striving for an object (or purpose) difficult to acquire has to repent later for dangers associated with it.

मन्त्रसापेक्षतां दर्शयन्नाह (मन्त्रसामान्य[4]मभिधातुमाह)—शक्येति। आदावेव शक्यमिदमिदमशक्यं चेति परिच्छेदं कुर्यात् बुद्ध्या विशुद्धया अतिनिर्मलया। अशक्यमिति परिच्छिन्ने प्रवृत्तौ दोषं दर्शयन्नाह—केवलमिति। दन्तिनो दन्ताभ्यां शैलताडनं दन्तभङ्गायैव न पर्वतक्षतये। एवमशक्यारम्भणे क्षतिरनन्तेति[5]। तस्मान्मन्त्रपूर्वं समारभेतेति। ततश्च कारणात् यथापि फलाभावेऽपि यथाशास्त्रमेव प्रारब्धव्यम्। तेन पश्चात्तापो न स्यात् अन्यथा तु स्यादिति भावः ॥ ११ ॥

एतदेव द्रढयितुमाह—अशक्येति। अशक्यारम्भेणैव वृत्तिर्येषां तेषां क्लेशादृते क्लेशं विहाय नान्यत् फलं दृश्यते तद् यथा आकाशमास्वादयतः आकाशस्वादमनुभवामीति यः कवलग्रहमाकाशस्य करोति तस्य कुतः कवलग्रहः आकाशस्यामूर्तत्वात्। एवमशक्यारम्भिणोऽपि कुतः फलमिति ॥ १२ ॥

अशक्यारम्भो न केवलं निष्फलोऽपि तु विनाशाय च भवतीति च दर्शयन्नाह—नेति। पतङ्गवदग्निं न गच्छेत् स्पृशेत्। स्पृश्यमेव तु संस्पृशेत्। यः पतङ्गः पूर्वमेवापरिच्छिद्य अपर्यालोच्य दीपाग्निदर्शनसुखी, स्पर्शं सुन्दरमप्यनुभवामीति बुद्ध्या अग्निं गच्छेत् तस्य पतङ्गस्याग्निमृच्छतः गच्छतः दाहादृते किमन्यत् ? तथा मन्त्ररहितस्यापीति भावः ॥ १३ ॥

मोहादिति। मोहान्मन्त्रस्याज्ञातत्वात् कुर्वतश्चेष्टामुद्योगं दुःखलभ्येषु वस्तुषु भवन्ति परितापिन्यो व्यक्तमित्यादि प्रतीतम् ॥ १४ ॥

[4] सामर्थ्यम [5] रनन्तरितेति

बुद्ध्या बोध्या[10]नुगतया परीयात् सम्पदः पदम्।
सुविशुद्धपदन्यास[11] पर्वताग्रमिवोदितम्[12] ॥ १५ (११।३५)

[10] बोध्या [11] विशुद्धपदविन्यासः
[12] मिवोन्नतम्

15. One who proceeds with carefully calculated steps on the path of prudence after intelligent deliberations attains prosperity and position as high as the peak of a mountain. [XI. 35]

सम्यग्भूतेन मन्त्रेण फलावाप्तिरिति दर्शयन्नाह—बुद्ध्येति। बुद्ध्या बोध्यानुगतया, ज्ञानेन ज्ञेयानुयायिना, ज्ञानं साधनं, ज्ञेयं साध्यं, साधनं साध्यानुरूपं यदा भवति तदावश्यंभाविनी सिद्धिरिति भावः। तथा चोक्तम्—प्रत्यक्षादिप्रमाणत्रयनिर्णीतायां फलसिद्धौ यथासाध्यं साधनविनियोगलक्षणा क्रियानीतिरन्यथात्वनीतिः। एवं बुद्धिर्यदा बोध्यानुगता च भवति तदा परीयात् प्राप्नुयात्। सम्पदो लक्ष्म्याः पदमुन्नतमुत्कृष्टं पर्वताग्रमिव विशुद्धपदविन्यासः, विशुद्धोऽन्तरायरहितः पदविन्यासो यस्य स यथा पर्वताग्रमुन्नतं परीयादिति ॥ १५ ॥

दुरारोहं[13] पदं राज्ञां सर्वलोकनमस्कृतम् ।
[14]अल्पेनाप्यपचारेण ब्राह्मण्यमिव दुष्यति ॥ १६ (११।३६)

[13] दुरारूढं [14] स्वल्पे

16. The status of a king who is saluted (respected) by all, is indeed difficult to attain (and maintain), for, it may be stained with blame (*duṣyati*) due to the slightest of trangressions on his part, as in the case of the high position of the Brāhmaṇas. [XI. 36]

कस्मान्मन्त्रे महान् यत्न इत्याह—दुरारोहमिति । दुःखेन महता क्लेशेनारुह्यत इति दुरारोहं पदं राजत्वं राज्ञां सर्वलोकैर्नमस्कृतं माहेन्द्रसमानमप्राप्यत्वात् । स्वल्पेनाप्यपचारेण मन्त्रभेदादिकेन ब्राह्मण्यमिव सर्वलोकनमस्कृतमपि सन्ध्यावन्दनवर्ज्जनमात्रेणापि दुष्यति सदोषं भवतीति ॥ १६ ॥

प्रारब्धानि[15] यथाशास्त्रं कार्याण्यासन्नबुद्धिभिः[15a] ।
वनानीव मनोहारि प्रयच्छन्त्यचिरात् फलम् ॥ १७ । (११।३७)
सम्यगारभ्यमाणं हि कार्यं[16] यद्यपि निष्फलम् ।
न तत् तथा तापयति यथा मोहसमीहितम्[17] ॥ १८ । (११।३८)

[15] आरब्धानि [15a] कार्याण्यमलबुद्धिभिः
[16] कर्म [17] समीक्षितम्

17. Whenever actions are taken in accordance with injunctions of śāstras (texts on polity) and after deliberation with clear intelligence, promptly do they bear attractive fruits (yield desired results) as do well nurtured trees. [XI. 37]

18. If an action undertaken properly (in conformity with śāstric injunctions and due deliberation) bears no fruit (does not produce the desired result) even then it does not cause as much distress as one begun with indecision or wrong judgement. [XI. 38]

शास्त्रोक्तमन्त्रस्य फलं दर्शयन्नाह—प्रारब्धानीति (आरब्धानीति वा) । यथाशास्त्रं नीतिशास्त्रानतिक्रमेण । प्रारब्धितानि अनुष्ठितानि कार्याणि पृथ्वीलाभपालनादीनि । स्पष्टमन्यत् ॥ १७ ॥

अथ शास्त्रसमारब्धं निष्फलं* विमोहकृतं च विशिष्टफलं तयोर्विशेषमाह—सम्यगिति । सम्यक् नीतिशास्त्रानतिक्रमेण । मोहः अज्ञानं तेन समीक्षितं कृतम् । तापयति तापं जनयति । शेषं सुगमम् ॥ १८ ॥

* निष्फलं विपरीतं सफलं शास्त्रोक्तं मोहकृतं तयोः ; निष्फलं विमोहकृतं च विफलं तयो

यत्तु सम्यगुपक्रान्तं कार्यमेतत्[18] विपर्ययम् ।
पुमांस्तत्रानु[19]पालभ्यो दैवान्तरितपौरुषः ॥ १९ । (११।३९)

[18] कार्यमेति [19] स्तत्रानुपालभ्यो

19. If an action undertaken properly ends in failure no blame would lie with the performer as his *puruṣakāra* (manly efforts) is negatived by Fate. [XI. 39]

यदिति। तथा एतत् सुगममुक्तं च दैवपुरुषकारयोरानुकूल्ये फलसिद्धिरन्यथा नेति। तथा च—क्षेत्रे सुकृष्टे पृथ्व्यां च सुषिक्तायां प्ररोहति। दैवं पुरुषकारं च कौटिल्यो मन्यते द्वयम्॥ इति॥ १९

प्रयत्नस्तावदास्थेयः फलायामलबुद्धिना।
[20]अपर्वभङ्गनिपुणं शेषं दैवसमाश्रितम्[21]॥ २०। (११।४०)
आत्मानं च परांश्चैव[22] ज्ञात्वा धीरः समुत्पतेत्।
एतदेव हि विज्ञानं यदात्मपरवेदनम्॥ २१। (११।४१)
निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च।
न कर्म कुर्यान्मतिमान् महावैरानुबन्धि च॥ २२। (११।४२)

---

20 अथर्ववेदनिपुणं ; अपर्वभेदनिपुणं
21 दैवं समाश्रयेत् 22 परं चैव वीक्ष्य

20. Inspite of the predominance of Fate in order to gain success, one should put reliance on one's own exertions aided by clear intelligence, (failing which) recourse should be taken to measures for propitiation of Fate with the help of experts in sacrifices etc. [XI. 40]

21. A wise ruler should launch upon a war only after reviewing his own as well as that of his enemy's resources. Accurate knowledge of one's own and of enemy's resources is the essence of counselling. [XI. 41]

22. No venture should be undertaken that is likely to be infructuous or fraught with dangerous consequences or of doubtful results or which is likely to lead to serious hostilities. [XI. 42]

यद्यपि दैवपुरुषकारयोरानुकूल्ये फलसिद्धिस्तथापि पुरुषकार एव कर्तव्य इति दर्शयन्नाह—प्रयत्न इति। फलसिद्ध्यर्थं प्रयत्नः कर्तव्यः। अनुकूलं दैवं चेत्सफलत्वं भवति। प्रातिकूल्ये वैफल्यम्। तच्च दैवं प्रतिलोमं यदा भवति तदा। अपर्वणि अस्थाने एव भेदो भङ्गः फलविनाशः, तत्र निपुणं कुशलमिति॥ २०॥

मन्त्रतत्त्वमभिधातुमाह—आत्मानमिति। आत्मानं शक्तित्रयेणाभ्युपचितं देशकालबलमनुकूलशाकुननिमित्तग्रहं वीक्ष्य निर्णीय, परस्मै तद्विपरीतं निरूप्य, उत्पतेत् यात्रां कुर्यात्। धीरो धैर्यसम्पन्नो विजिगीषुः। एतदेव हि विज्ञानं मन्त्रे यदात्मपरवेदनम्। स्वपरबलाबल परिज्ञानमेव मन्त्रस्य तत्त्वम्॥ २१॥

निषिद्धानुष्ठानमभिधातुमाह—निष्फलमिति। मतिमान् नीतिज्ञः। सन्दिग्धफलम् अनिश्चितफलम्। महावैरम् अनुबध्नाति यत् तत् महावैरानुबन्धि। स्पष्टमन्यत्॥ २२॥

तदात्वायतिसंशुद्धं शुचि[23] शुद्धक्रमागतम् ।
हितानुबन्धि च सदा कर्म सद्भिः प्रशस्यते ॥ २३ । (११।४३)
हितानुबन्धि [24]यत्कार्यं गच्छेद्येन न वाच्यताम् ।
तस्मिन् कर्मणि सज्जेत तदात्वकटुकेऽपि हि ॥ २४ । (११।४४)

[23] सुविशुद्ध [24] तज्ज्ञातु

23. Actions, yeilding results beneficial for the present and for the future, which are pure (i.e., undertaken in conformity with Śāstric injunctions) and followed in proper manner (i.e., after due deliberations) and likely to produce welfare and benefit, are praised by the wise. [XI. 43]

24. An action likely to produce benefit should be pursued (in all seriousness) not by mere wordy phrases, even if it tastes bitter for the present (i.e., distressing or excessively costly at the start). [XI. 44]

कीदृक् कर्मकर्तव्यमित्याह—तदात्वेति । तदात्वं वर्तमानकालः । आयतिरागामिकालः । एतयोस्तदात्वायत्योर्यन्निदोषं तत्तदात्वायतिसंशुद्धमित्युच्यते । तथा शुचिना शुद्धेन क्रमेण मार्गेणागतं रक्षणादि, यथा भूतरक्षणादि क्षत्रियस्य । हितमुभयलोकहितमनुबध्नाति च यत्तत् । सद्भिः सदा कर्म प्रशस्यते ॥ २३ ॥

एतदेव समर्थयन्नाह—हितानुबन्धि इति । सुगमं सर्वम् । तदात्वे वर्तमाने कटुकेऽपि सौख्यरहितेऽपि ॥ २४ ॥

बुद्ध्यैवोपक्रमः श्रेयान् फलनिष्पत्तये सदा ।
क्वचित् कल्याणमित्रस्य शस्यते[25] सिंहवृत्तिता ॥ २५ । (११।४५)
सहसोत्प्लुत्य[26] दुष्टेभ्यो दुष्करं सम्पदर्जनम्[26a] ।
उपायेन पदं मूर्ध्नि न्यस्यते मत्तहस्तिनः ॥ २६ । (११।४६)

[25] दृश्यते [26] सहसोत्पत्य

[26a] सम्पदार्जनम्

25. In order to be sure of success it is always better to start a venture with intelligence (i.e., by application of political expedients). But sometimes one intent upon welfare and friendship may have to adopt the policy of a lion (*siṁhavṛtti* or violent means). [XI. 45]

26. To gain wealth (i.e., to achieve the desired result) from the clutches of wicked adversaries by sudden or unpremeditated assault (*sahasotplutya*) is always fraught with difficulties. It is only by application of political expedients that one can subjugate his violent enemy, as by tact and cleverness the driver plants his foot on the head of a rogue elephant. [XI. 46]

बुद्ध्यैवोपक्रमः इति । बुद्ध्यैव मन्त्रयुद्धेनैव प्रारम्भः श्रेयान् । कल्याणानि हितविधायीनि मित्र-

गुणसम्पन्नानि मित्राणि यस्य तस्यैव शस्यते। क्वचित् कदाचित् समयानुसारेणेत्यर्थः। सिंहवृत्तिता व्यायामवृत्तिता व्यायामयुद्धेनोपक्रमः फलनिष्पत्तये नान्यथा ॥ २५ ॥

एतदेव स्पष्टयन्नाह—सहसेति। सहसोत्प्लुत्य (सहसोत्पत्य) दुष्टेभ्यो यातव्येभ्यः[7] सकाशात्, दुष्करं कर्तुं न शक्यं, सम्पदर्जनं श्रियः समुपार्जनं दुष्टत्वात्तेषाम्। अत्र दृष्टान्तः—उपायेन शास्त्रोक्तेनोपदेशेन मत्तदन्तिनो मूर्ध्नि पदं न्यस्यते। न क्षान्त्यादिकर्मणा न पुनः सहसोत्पत्य मत्तदन्तिनो मूर्ध्नि पदन्यासः कर्तुं शक्यते। उपायाद्य मन्त्रेण निर्णीयन्त इति भावः ॥ २६ ॥

[7] यातव्येभ्यः सदैव हि नष्टात्मा दुष्करं

न किञ्चित् क्वचिदस्तीह वस्त्वसाध्यं विपश्चिताम्।
अयोऽभेद्यमुपायेन द्रवतामुपनीयते ॥ २७ । (११।४७)
वाह्यमानमयः खण्डं[27] स्कन्धेनैवापि[28] कृन्तति।
तदल्पमपि धारावद् भवतीप्सितसिद्धये ॥ २८ । (११।४८)

---

[27] पिण्डं

[28] महच्चापि न ; नचाण्वपि निकृन्तति ; तत्रापि च न कृन्तति।

27. There is nothing impossible to achieve by the wise (through mature deliberations). Iron (*ayas*), which cannot be pierced, is also melted by application of (relevant scientific) measures (*upāyena*). [XI. 47]

28. A lump (or a piece) of iron, carried on shoulder (however pressed) does not cut (due to its bluntness), but with a little sharpening (of its edges) it produces the desired result (i.e., it becomes an effective weapon to destroy the enemy). (The import of the verse is any action unaided by good counsel is ineffective and with good counsel it acquires the necessary force to achieve success). [XI. 48]

विपश्चितां तु नियमेन फलोपधानमाह—न किञ्चिदिति। विपश्चितां मन्त्राधिकार-पण्डितानां किञ्चिदपि दुर्लभतरमपि न क्वचिदपि देशकालेऽपि असाध्यमस्तीह। अयो लोहकनकादि अभेद्यमपि उपायेन तापादिकर्मणा द्रवतामुपनीयते। तद्वदसाध्यमपि विपश्चिता साध्यते मन्त्रेणैवेति भावः ॥ २७ ॥

वाह्यमानमिति। लोहशकलं वाह्यमानं छेदनक्रियां कर्तुं, उपायरहितमण्वपि न निकृन्तति। तदल्पमपि लोहखण्डं धारावत् तीक्ष्णं सत् कृतधारं शराग्रस्थितं, भवति ईप्सितसिद्धये शत्रुविनाशाय। स्यादेवमुपायैः कार्यप्रसिद्धिरिति ॥ २८ ॥

लोकप्रसिद्धमेवैतद् वारि वह्नेर्नियामकम्।
उपायोपगृहीतेन तेनैव[29] परिशोष्यते ॥ २९ । (११।४९)
विषं सुविषमाहारं केवलं मारणात्मकम्[30]।
तदेव द्रव्यसंयोगादौषधाय प्रकल्प्यते ॥ २९ क ।*

---

[29] तन् नैनैव विशोष्यते [30] मरणात्मकम्

*एष श्लोको मुद्रितपुस्तके नास्तीति। टीकानुसारेण लिख्यते।

* The śloka does not occur in the B.I. text but restored from the *ṭikā*.

29. It is wellknown that water extinguishes fire and again (under certain circumstances) by necessary means (*upāya*) water is dried up by fire. [XI. 49]

29A. Poison, taken as it is, leads to sure death, but the same poison mixed with other ingredients is turned into a medicine. (The idea is that even dangerous elements can be won over by relevant expedients or *upāya* and turned into beneficial uses).

उपायेन असाध्यसाधनपि भवति इति दृष्टान्तेन समर्थयन्नाह—लोकप्रसिद्धमिति। नियामकमुपशम-कारकम्। उपायोपगृहीतेन तेनैव वह्निना विशोष्यते स्थाल्यादिसंस्थितमधः प्रज्वलितेन। एवमत्र विनीतोपायानामसाध्यं किमपि नास्तीति भावः ॥ २९ ॥

अहितमपि मन्त्रबलेन हिताय कल्प्यते इति दृष्टान्तेन समर्थयन्नाह—विषमिति। सुविषमाहारं सुविषमाहारो यस्य तत, भोक्तुमशक्यं भुक्ते च महानिष्टकरमित्यर्थः। केवलं मारणात्मकं यत्पाने मृत्युव्यतिरिक्तमन्यत् फलं नास्तीत्यर्थः। तदेव विषमेव द्रव्यसंयोगात् मन्त्रबलेनेत्यर्थः। औषधाय प्रकल्प्यते पीडोपशमकारणं हितकरञ्च भवतीत्यर्थः ॥ २९क ॥

अविज्ञातस्य विज्ञानं विज्ञातस्य च [31]निश्चयः।
अर्थद्वैधस्य सन्देहछेदनं[31a] शेषदर्शनम् ॥ ३० ।(११।५०)
विदुषां शासने तिष्ठन् नावमन्येत कञ्चन[32]।
सर्वस्य चोक्तं[33] श्रृणुयात् सुभाषितजिघृक्षया ॥ ३१ ।(११।५१)

[31] विनिश्चयः [31a] सन्देहच्छेदनं

[32] कर्हिचित् [33] सर्वस्य चापि ; सर्वस्यैवोपश्रृणुयात्

30. To secure accurate information about matters unknown, to determine the pros and cons of information already gathered, to dispel doubts in dubious matters and to take final decisions keeping in view the ultimate results (are the duties of a good counsellor). [XI. 50]

31. A ruler should always abide by the counsels of the wise and never despise any of them. He should attentively listen to the learned sayings of all counsellors in order to understand their implications. [XI. 51]

मन्त्रिकर्माभिधातुमाह—अविज्ञातस्येति। अविज्ञातस्य विधेयकार्यादिविज्ञानम्। देशकाल-व्यवहितमपि कार्यं मन्त्रिणः पश्यन्ति। पट्टुतरं शास्त्रज्ञानं चक्षुस्तेषामिति। विज्ञातस्य राज्ञां मन्त्रि-मतसंवादात् निश्चयो° निर्णयो भवति। अर्थद्वैधस्य 'एवं वा कार्यं किमेवं वेति द्वैधस्य छेदनं संशय-विच्छित्तिः'। शेषदर्शनमित्येकदेशदृष्टस्य शेषोपलब्धिः। मन्त्रिकर्मेति वाक्यशेषः। तथा च कौटिल्यः—"अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयोऽनिश्चितस्य बलाधानमर्थद्वैधस्य संशयच्छेदनमेक-देशदृष्टस्य शेषोपलब्धिरिति।" (१।१५।२०)। मन्त्रिसाध्यमेतदिति त्रिभिश्चतुर्भिर्वा मन्त्रिभिर्मन्त्रयेते-तिभावः ॥ ३० ॥

विदुषामिति। विदुषां नीतिशास्त्रविशारदानां, शासनं शास्त्रानुसारिण्युपदेशे तिष्ठन्। कञ्चन हीनकुलोत्पन्नं निर्धनं मूर्खमपि न अवमन्येत। सुभाषितजिघृक्षया गुणवद्वाक्यग्रहणार्थम्। हंसः क्षीरमिवाम्भस इति भावः। शृणुयाद्वचनमिति तथा चोक्तं—"न कश्चिदवमन्येत सर्वस्य शृणुयान्मतम्। बालस्याप्यर्थवद्वाक्यमुपजीवति[9] पण्डितः॥" इति॥ ३१॥

[8] निश्चयोवधानमर्थद्वेषस्य [9] मुपयुञ्जीत

[34]अलब्धानान्तु यो लाभः लब्धानां परिरक्षणम्।
इयत्यो विजिगीषुणां वीर्यव्यायामभूमयः॥ ३१ क।*
शोभा हि कृतकृत्यस्य राज्ञो भोगविभूतयः।
अप्राप्तविजिगीषस्य[35] ता एव हि विडम्बनाः[36]॥ ३१ ख।*

[34] अलब्धलाभो लब्धार्थप्रसनं तस्य रक्षणम्; अलभ्यमानो लब्धार्थं प्रसनस्तस्य वेक्षणम्।

[35] अप्राप्तविजिगीषोश्च [36] विडम्बनः

* श्लोकद्वयं मुद्रितपुस्तके प्राचीन टीकायाञ्च न दृश्यते।

Ślokas 31 A and 31 B do not appear in the B.I. text, and have been restored from the *tīkā.*

31A. A *Vijigīṣu* should devote his energy and exertions (*vīrya-vyāyāma*) to both acquisition of things (or status) not acquired before (*alabdhānān*) and proper preservation of things (or status) already acquired (*labdhānān*).

31B. The magnificence and glamour of a successful *vijigīṣu* ruler appear (deservingly) beautiful; to an unsuccessful prince they are objects of derision.

विजिगीषोः कार्यमाह—अलब्धेति। अलब्धानां लाभः लब्धानां परिरक्षणञ्च एतद्द्वयमेव विजिगीषुणां वीर्यव्यायामयोः स्थानम् इति भावः। प्रतीतम्॥ ३१ क।

परान् विजेतुमशक्तस्य ऐश्वर्यं विडम्बनामात्रमित्याह—शोभेति। कृतकृत्यस्य समाप्तविजिगीषस्य राज्ञो भोगा विभूतयः च शोभामात्रम्। अप्राप्तविजिगीषस्य वा विजिगीषाविरहितस्य असमाप्त-विजिगीषस्य वा ता एव भोगा विभूतयश्चैव विडम्बनाः वृथैवेत्यर्थः॥ ३१ ख।

मदोद्धतः[37] क्रियामूढो योऽतिक्रामति मन्त्रिणम्[38]।
अचिरात् तं वृथामन्त्रमतिक्रामन्ति विद्विषः॥ ३२। (११।५२)
संरक्षेन् मन्त्रबीजं हि तद्बीजं हि महीभुजाम्[39]।
[40]यस्मिन् भिन्ने ध्रुवं[40a] भेदो गुप्ते गुप्तिरनुत्तमा॥ ३३। (११।५३)

[37] मदोद्वृत्तः [38] मन्त्रितम्

[39] महीभृताम् [40] तस्मिन्

[40a] ध्रुवो

32. An arrogant (*madoddhata*) but incompetent (*kriyāmūḍha*) ruler who disregards the counsel of his ministers, soon finds his own policy to be infructuous and he is subjugated by his enemies. [XI. 52]

33. Secrecy of the essence of policy decisions (*mantravījam*) must be carefully preserved like the seed, out of which grows the large tree (so secrecy of policy leads to enhancement of royalty). If the seed is destroyed every prospect is surely destroyed, while its preservation brings excellent results. (i.e., untimely disclosure of secret policy decision leads to inevitable ruin of the ruler, and careful maintenance of secrecy of plans and policies leads to excellent results). [XI. 53)

मन्त्रिवचनातिक्रमश्च दोषावह इति दर्शयन्नाह—मदोद्धत इति। अहमेव सर्वं जानामीति ज्ञानमदेनोद्धतः। क्रियामूढः किंकर्तव्यतामूढः। योऽतिक्रामति मन्त्रिणं तदुपदिष्टस्याकरणात् अचिरात् तं वृथामन्त्रं प्रभुं मन्त्राभासविप्रलब्धमतिक्रामन्ति अतीत्यातिसन्धाय तद्राज्यमाक्रम्य गृह्णन्तीत्यर्थः ॥ ३२ ॥

मन्त्रभेद निवारणार्थमाह—संरक्षेदिति। मन्त्रबीजं विधेयं कार्यं गोपनीयम्। सम्यग् रक्षेत् भेदद्वाराणामकरणात्। तन्मन्त्रबीजं (बीजं महीभुजां) तस्मात् सुरक्षितान् महीभुजः सम्भवन्तीति। तस्मिन् मन्त्रबीजे भिन्ने ध्रुवं निश्चयेन भेदो राज्ञ एव विनाशो। गुप्ते तु गुप्तिरनुत्तमा अत्युत्तमेत्यर्थः ॥ ३३ ॥

सिंहवच्चेष्टमानस्य काले कर्म विपश्चितः।
क्रियमाणं स्वकुल्यास्तु विदुरस्य[41] परे कृतम् ॥ ३४ । (११।५४)

[41] विद्युरस्य ; विद्युरस्याय

34. A ruler (*vijigīṣu*) should take action at the opportune moment like a lion (which suddenly springs upon its prey), of course, after due deliberation, but keeping his plan of action completely secret even from the members of his family, who may come to know it only when the action is in progress. Others may know it only when it is accomplished. [XI. 54]

मन्त्रगुप्तिं दर्शयन्नाह—सिंहवदिति। सिंहो हि सङ्कुचितसर्वावयवो बद्धक्रमः परैरलक्षितचेष्टो मार्जारवदकस्मात् ग्रसत इत्येवं सिंहवत् चेष्टमानस्य विजिगीषोः, काले चेष्टानुकूले विपश्चितो नीतिपण्डितस्य कर्मानुष्ठानमेवं नाम गुप्ततरं येन क्रियमाणं कुल्या बन्धवो विदुर्जानीयुः। परे अन्ये तु कृतं निष्पन्नं जानीयुरिति ॥ ३४ ॥

अपश्चात्तापकृत् सम्यगनुरक्ति[42]फलप्रदः।
अदीर्घकालोऽमोघश्च प्रशस्यो[43] मन्त्र इष्यते[44] ॥ ३५ । (११।५५)

[42] सम्यगनुबन्धिफलप्रदः [43] प्रशस्तो

[44] उच्यते

35. The counsel (or decision) which does not cause repentance in future, (on the other hand) which is followed by adequate benefits and

does not entail in long delay in achieving the desired result (*abhīṣṭa*), is considered commendable by the wise. [XI. 55]

गुणवन्तं मन्त्रमभिधातुमाह—अपश्चात्तापकृदिति। यो मन्त्रः समाप्तिं गतः पश्चात्तापं न करोति। अनुबन्धाः फलान्तराणि तानि विद्यन्ते यस्य मुख्यफलस्य तदनुबन्धिफलं तद्ददाति। अनुरक्तिफलप्रदः इति मूलपाठे तु प्रकृतिरञ्जनरूपफलदायकः इत्यर्थः। योऽदीर्घकालो भेदाभावात्। अभीष्टश्च लोकद्वयाविरोधात्। प्रशस्यः सद्भिर्मन्त्र इष्यत इति॥ ३५।

सहायाः साधनोपाया विभागो देशकालयोः।
विपत्तेश्च प्रतीकारो [45]मन्त्रः पञ्चाङ्ग उच्यते॥ ३६। (११।५६)
अनुतिष्ठेत् समारब्धमनारब्धं प्रयोजयेत्।
अनुष्ठितञ्च सद्वृत्त्या[46] विशेषेणोपपादयेत्॥ ३७। (११।५७)

---

[45] कारः सिद्धिः पञ्चाङ्ग इष्यते [46] संवृत्य ; संवृत्या

36. In undertaking any state matter, counsel (or deliberation) should be of five counts or *pañcāṅga* (i.e., considerations) : viz., state's own equipment, ways and means (*sādhanopāyā*), suitability of particular place and time, provision against unforeseen dangers and prospect for successful completion (*siddhi*). [XI. 56]

37. Counsels or deliberations should be aimed at completion of the work undertaken, of (new) projects not yet taken up (*anārabdham*), and ensuring perfection of accomplished works. [XI. 57]

मन्त्राङ्गान्यभिधातुमाह—सहाया इति। पुरुषद्रव्यसम्पदाख्यं समुद्भवं प्रथममङ्गम्[10]। साधनोपाया इति। कर्मणां साधने ये उपायाः कर्मणामारम्भोपायाख्यं द्वितीयमङ्गम्।[10a] विभागो देशकालयोरस्मिन्देशेऽस्मिन्काले सिद्ध्यतीति तृतीयमङ्गम्। विपत्तेर्विघ्नानां प्रतीकारो नाम चतुर्थमङ्गम्। सिद्धिः कार्यस्य पञ्चममङ्गम्। एवं मन्त्रः पञ्चाङ्ग इति। तथा च कौटिल्यः—"कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः।" (१।१५।४२)॥ ३६।

[10] सम्पदाख्यमङ्गम् [10a] पायाख्यमङ्गम्

मन्त्रिभिर्विधेयमाह—अनुतिष्ठेदिति। यदारब्धं दुःसाध्यादिकं[11] तदनुतिष्ठेत् भूयोभूयः प्रेरयेत् यथा सुसमाप्तिं याति। अनारब्धं च प्रेरयेत् यथा प्रारभ्यते। अनुष्ठितं च निष्पन्नं च सद्वृत्त्या शोभनवृत्तिकरणेन विशेषेण यथा न च्यवति तथोपपादयेत् निष्पादयेत्। तथा च कौटिल्यः "अकृतारम्भमारब्धानुष्ठानमनुष्ठितविशेषं नियोगसम्पदं च कर्मणां कुर्युः।" (१।१५।५२)। मन्त्रिण इत्यनुवर्तते॥ ३७॥

[11] दुर्गसाधनादिकं

प्रचारयेन्मन्त्रविदः कार्यद्वारेष्वनेकधा[47]।
तत्र[48] यच्चेतसां साम्यं तेन[49] शीघ्रं समुत्पतेत्॥ ३८। (११।५८)।

---

[47] अनेकशः ; पु नैकधा [48] यत्र तच्चेतसां [49] तेषु साधु ; तत्र साधु

यत्र मन्त्रिमनः साम्य[50] यत्र चेतो न शङ्कते।
यत्र[51] सन्तो न निन्दन्ति तत् परीयाच्चिकीर्षितम्॥ ३९। (११।५९)
धृतेऽपि मन्त्रे मन्त्रज्ञैः स्वयम्भूयो विचारयेत्।
तथा वर्तेत तत्त्वज्ञो[52] यथा स्वार्थेन्न पीड़येत्॥ ४०। (११।६०)

[50] मनस्साम्यं [51] यत्र ; यत्तु सन्तो
[52] मन्त्रज्ञो ; नीतिज्ञः

38. Whenever any state matter, which may be various kinds, (needs counselling) the wise ruler should inform his counsellors (experts in counselling, *mantravidah*) about it, and on their arriving at an agreed decision, (*sāmyam*) take it up in right earnest. [XI. 58]

39. Such actions should be undertaken about which counsellors are unanimous (do not express difference of opinion), about which there is no misgiving or doubt, and which are not repugnant to the pious. [XI. 59]

40. Even when any counsel (or decision) is conveyed by counsellors, the ruler should himself carefully deliberate on it (i.e., before accepting it). A ruler, conversant with state policies (*tattvajña, mantrajña*), in accepting a counsel must be sure that it would not be ultimately injurious to his own (i.e., state's) interests. [XI. 60]

मन्त्रप्रयोगमाह—प्रचारयेदिति। मन्त्रि-दूत-गूढपुरुषाश्च तया भवन्ति। मन्त्रितो मन्त्रो मन्त्रिदूतगूढपुरुषेषु यथा समर्प्यत इति तान्मन्त्रविदः त्रिविधानपि यथासम्भवं कार्यद्वारेषु—पृथिवीपालनादिकार्यमायाति यैर्द्वारैः शत्रुमित्रमध्यमोदासीनस्वरूपैस्तेषु, सञ्चारयेत् प्रणिदध्यादनेकशः। यत्र तच्चेतसां मन्त्रिदूतगूढपुरुषचित्तानामैकमत्यं साधु संश्लिष्टं यथा भवति तथा, तेन कार्यद्वारेण यानादिगुणमनुष्ठानं समुत्पतेत् आचरेदिति॥ ३८॥

एतदेव द्रढयितुमाह—यत्रेति। तथा यस्मिन् क्रियमाणे मन्त्रिमनस्साम्यम्। यत्र चेतो न शङ्कते कर्तुः। शारीराण्यपि निमित्तानि शुभान्युदयन्ति बाहुशीर्षाक्षिगुदाधरादीनि[12]। तत्र मनः शङ्कायां मध्यमा कार्यसिद्धिरिति शङ्कारहिते मनसि कार्यं विधेयम्। यत्र चिकीर्षितं कर्तुमीप्सितं सन्तो न निन्दन्ति। तत् परीयात् गच्छेत् कर्तुमिति शेषः॥ ३९।

उपधाशोधितेषु प्रणिहितगूढपुरुषेष्वपि मन्त्र्यादिषु व्यभिचारः सम्भवतीति सर्वथा न विश्वसनीयमिति वर्णयन्नाह—धृतेऽपीति। धृतेऽपि मन्त्रे मन्त्रज्ञैर्मन्त्राधिकृतैर्निर्णीय धृतेऽप्यवधारितेऽपि मन्त्रे स्वयं विजिगीषुर्भूयो विचारयेत्। तत्र मन्त्रज्ञो विजिगीषुर्वर्तेत यथा स्वार्थं न पीडयेत्। दीर्घविग्रहे स्वार्थपीडा सम्भवति। तथा वर्तेतेति यथा स्वार्थपीडा न भवति॥ ४०॥

[12] दाधारादीनि

मन्त्रिणः स्वार्थतात्पर्याद्धि दीर्घमिच्छन्ति विग्रहम्।
मन्त्रिणां[53] भोग्यतामेति दीर्घकार्याकुलो नृपः॥ ४१। (११।६१)

[53] तेषाञ्च

41. Ministers out of their self interest desire a prolongation of wars, and a ruler who (acting on their counsel) adopts prolongation of his actions, is played into their hands. [XI. 61]

एतदेव स्पष्टयन्नाह—मन्त्रिण इति। स्वार्थ एव तात्पर्यं कारणं तस्मात्। स्वार्थसिद्ध्यर्थं मन्त्रिणो दीर्घकालव्यापिनं विग्रहमभिलषन्ति इत्यर्थः। स्पष्टमन्यत्॥ ४१॥

मनःप्रसादः श्रद्धा च तथा करणपाटवम्।
[54]सस्वायोत्थानसम्पच्च कर्मणां सिद्धिलक्षणम्॥ ४२। (११।६२)
लघूत्थानान्यविघ्नानि सम्भवत्साधनानि च।
कथयन्ति पुरः[55] सिद्धिं कारणान्येव कर्मणाम्॥ ४३। (११।६३)

---

[54] सहायो [55] पुनः

42. Mental satisfaction (free from misgivings), devotion and earnestness (*śraddhā*), (physical and intellectual) ability to perform the projected work, availability of support of allies, one's own energetic approach (*utthāna*) and plenty of resources, are indications of sure success. [XI. 62]

43. Promptness in undertaking a work (*laghūtthāna*), free from drawbacks (i.e., undeterred) and aided by requisite ways and means for its pursuit, is also said to be a patent indication for success. [XI. 63]

मन्त्रनिर्णीतकार्यस्य सिद्धिलक्षणान्यभिधातुमाह—मन इति। मनः प्रसन्नता कालुष्याभावः[13]। श्रद्धा च कार्यसिद्धावत्याग्रहः। तथा करणानामिन्द्रियाणामेकादशानां पटुत्वम्। सहायोत्थानसम्पच्च कर्मणां सिद्धिलक्षणम्। एभिर्लिङ्गैः सिद्धिरवश्यम्भाविनीति लक्ष्यत इति॥ ४२॥

[13] कोपेर्ष्याभावः

एतदेव समर्थयन्नाह—लघूत्थानानीति। लघु शीघ्रमेवोत्थानमुद्योगो येषाम्। अविघ्नानि विघ्नरहितानि। सम्भवत्साधनानि सम्भवन्ति साधनानि सम्पत्सामग्रिकाणि। करणानि कार्याणामुत्पत्तिनिमित्तानि। पुरोऽग्रतो भाविनीं सिद्धिं कथयन्ति॥ ४३॥

आवर्तयेन्मुहुर्मन्त्रं धारयेच्च प्रयत्नवान्[56]।
अप्रयत्नधृतो मन्त्रः प्रचलन्नग्निवद्दहेत्॥ ४४॥
नावर्तयेन्मुहुर्मन्त्रं संरक्षेत् तत् परिस्तुवन्।
अरक्ष्यमाणं मन्त्रं हि भिनत्स्यात्मपरम्पराम्॥ ४५। (११।६४)
अप्राप्त[57]सन्ततिर्मन्त्रं संरक्ष्येत परस्परम्[57a]।
अरक्ष्यमाणं मन्त्रं हि भिनत्स्याप्तपरम्परा॥ ४५ क॥

---

[56] प्रयत्नतः [57] आप्तासन्ततेर्मन्त्रं; आप्तैस्तत् सन्तते; आप्ताप्तैः सततं मन्त्रः

[57a] संरक्षेत् तत्परस्तु सन्।

मदः प्रमादः कामश्च[58] सुप्तप्रलपितानि च।
भिन्दन्ति मन्त्रं प्रच्छन्नाः [58a]कामिन्यश्च मतास्तथा ॥ ४६ ।(११।६५)

[58] कोपश्च [58a] कामिन्योऽवमता

* Both the ślokas have been restored from the *ṭīkā*.

श्लोकद्वयं मुद्रितपुस्तके नास्तीति । टीकानुसारेण लिख्यते ।

44. *Mantra* or policy decision should be recapitulated again and again (so that its details are accurately remembered and not lost sight of) and carefully preserved (so that its secrecy is not divulged). Because a *mantra* for its careless preservation (i.e., if it is prematurely divulged) burns every thing like a moving fire (conflagration) (i.e., taking advantage of the disclosure of secret plans and designs enemies indulge in inflicting serious damages).

45 & 45A. Even when *mantra* is not repeated again and again strict secrecy should be observed about it even while discussing with the trusted ministers, lest it may pass on to their confidantes and relatives and so on, (*āptāptasantateh*), and ultimately reach the enemies. Unless the *mantra* is well guarded it may be divulged by friends and friends, friends, etc., (*āptaparamparā*). [XI. 64]

46. *Mantras* are divulged often unwillingly under the influence of intoxication, inadvertence, addiction to sensual pleasures and the habit of talking in sleep. It may also be divulged by secret agents (*pracchannāh*), favourite wife (who is confided upon), and by creatures, whose reproductive and repetitive faculties are belittled i.e., parrots etc. [XI. 65]

मन्त्रे निर्णयमाह—आवर्तयेदिति । मन्त्रं मुहुः वारंवारं आवर्तयेदालोचयेत् । प्रयत्नवान् भेदकरणविरोधादिति । प्रचलन्नग्निवद्दहेत् । यथा अग्निरग्न्यगारात् चलितः अग्न्यगारादिकं दग्ध्वा पुरमपि दहति तथा मन्त्रोऽपि । तथा च कौटिल्यः "मन्त्रभेदो ह्ययोगक्षेमावहो[14] राज्ञस्तथायुक्तपुरुषाणां चेति" (१।१५।१३) ॥ ४४ ॥

[14] योगक्षेमकरो

मन्त्ररक्षाप्रकारमाह—अप्राप्त इति । आप्ता मन्त्रिप्रभृतयः । तेषामप्याप्ता भवन्ति । तेषामपि । एवमाप्तपरम्परा भवति । तद्यं नाप्तः [15]कस्तत्सन्ततिरस्तीति । तस्या मन्त्रद्वारनिरोधो न शक्यते कर्तुमिति, तत्परस्तु सन् संरक्षेत् । आरक्ष्यमाणं हि मन्त्रं भिनत्त्याप्तपरम्परा । तथा च कौटिल्यः "मन्त्रिणामपि हि मन्त्रिणो भवन्ति, तेषामप्यन्ये । तेषां मन्त्रिपरम्परा मन्त्रं भिनत्ति" इति (१।१५।१५-१६) ॥ ४५ ॥ ४५ क ॥

[15] कश्चिन्नास्तीति तस्मादाप्तपरम्परा मन्त्रद्वार, आप्तः कस्तदास्तीति तस्मादा…

अन्यान्यपि मन्त्रभेदद्वाराण्यभिधातुमाह—मद इति । मदः सुराजनितः । तत्परवशो विस्मृत्य मन्त्रभेदं करोति । प्रमादः कार्यान्तरासक्तिस्तेनापि । कोपोऽप्यतिप्रवृद्धो मन्त्ररक्षा विस्मरणात् भेदकः । सुप्तप्रलपितानि तथैव भिन्दन्ति प्रकाशयन्ति मन्त्रम् । प्रच्छन्नाः कुड्यादितिरोहिताः कामिन्यो वशीकृतभर्तृकाः तच्चक्रु तमन्त्राः । अवमताः अवज्ञाताः किमेतेऽपि जानन्तीति शुकसारिकाबालबधिरायाः ।

तथा च कौटिल्यः—"श्रूयते हि शुकसारिकादिभिर्भिन्नो मन्त्रः पशुभि[16]रन्यैश्च तिर्यग्योनिभिरवमतैरि"ति (१।१५।४)। अपि च कौटिल्यः "तस्य च संवरणमायुक्तपुरुषरक्षणमाकार्यकालात्। तेषां हि प्रमाददमदसुप्तप्रलापकामादिभिरुत्सेक" (१।१५।१०-११) इति ॥ ४६ ॥

[16] श्वभि

निस्तम्भे निर्गवाक्षे च निर्भेद्यऽन्तर[59] संश्रये।
प्रासादोपर्यरण्ये[60] वा मन्त्रयेताविभावितः[61] ॥ ४७। (११।६६)
निश्छिद्रे निर्जनेऽशङ्के[61a] अनिरन्तरसङ्क्रमे।
निर्वातेऽशुचिर[62]स्तम्भे मन्त्रयेत महोदयः[63] ॥ ४७ क* ।

---

[59] निष्कुड्यान्तर ; निर्भित्त्यन्तर
[60] प्रासादाग्रे ह्यरण्ये
[61] मन्त्रयेदविभावितः
[61a] निर्जलेऽशङ्के
[62] निर्वातेऽसुषिर
[63] गृहे यथा

* श्लोकोऽयं मुद्रितपुस्तके न धृतः ; प्राचीन हस्तलिखित पुस्तकेऽपि नास्तीति।

The *śloka* does not occur in the B.I. text. Restored from the *ṭikā*.

47. For the purpose of secret deliberation the ruler should select either a chamber without pillars (which resound) and windows (which let out voices) as well as corners and crevices (where secret agents may hide themselves) or on the top of the palace (in the attic) or in the solitude of the wood, and that too unobserved by others. [XI. 66]

47A. A ruler should deliberate (on secret state matters) in a secluded and well guarded chamber having no hidden passages (*niśchidra*), where discussions may be conducted fearlessly (*aśaṅka*), which is not frequented by many (i.e., by persons other than counsellors), and in which there are no pillars, nor affected by strong breeze.

प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्तीति मन्त्रप्रदेशमभिधातुमाह—निस्तम्भ इति। स्तम्भरहिते भित्तिष्वेवोत्थापितोर्ध्वशरणत्वात्। निर्गवाक्षे वातायनरहिते शब्दानां बहिरनिःसरणार्थम्। निर्भित्त्यन्तरसंश्रये भित्त्यन्तरेषु प्रच्छन्नश्रोतणां संश्रयो यत्र नास्ति। प्रासादस्योपरि तथाविधे एवारण्ये वा निर्जने वा मन्त्रयेतान्यैरप्यविभावितोऽनवलोकितः। तथा च कौटिल्यः—"मन्त्रपूर्वाःसर्वारम्भास्तस्योद्देशः संवृतः कथानामनिःस्रावी पक्षिभिरप्यनालोक्यः स्यादिति"। (१।१५।२-३)। ४७ ॥

निश्छिद्रेति। छिद्ररहितगृहे, छिद्रेण हि शब्दनिर्गमसम्भवात्। निर्जने जनशून्यस्थाने, अशङ्के विपक्षसमागमशङ्कारहितप्रदेशे, अनिरन्तरसङ्क्रमे नास्ति निरन्तरः सङ्क्रमः जनसमागमो यत्र। निर्वाते प्रबल वायुना हि शब्दो दूरेऽपि नीयते। अस्तम्भे स्तम्भव्यवधानेन हि मन्त्रश्रवण सम्भवात्। ईदृशस्थाने महोदयः महान् उदयो यस्य सः। शुचिः शुद्धाचारः सन्। अशुचेर्मनसि जडता सम्पद्यते, शुचिर्हि प्रतिभावान् भवति इति दर्शनात्। मन्त्रयेत् मन्त्रिभिः सहेति वाक्यशेषः ॥ ४७ क ॥

द्वादशेति मनुः प्राह षोडशेति बृहस्पतिः ।
उशना विंशतिरिति मन्त्रिणां मन्त्रिमण्डलम् ॥ ४८ । (११।६७)
यथासम्भवमित्यन्ये[64] तत्प्रविश्य यथाविधि ।
मन्त्रयेताहितमनाः कार्यसिद्धि[65] विवृद्धये ॥ ४९ (११।६८)
एकत्र पञ्च सप्ताद्या[65a] वैषम्य क्रियया युताः ।
मन्त्रिणो भूभुजां कार्या इति कौणपदन्तकैः[66] ॥ ४९ क ।*

---

[64] मित्येके [65] कार्यं बुद्धि
[65a] सप्तापि [66] केचिद् वदन्ति वै

* श्लोकोऽयमपि मुद्रितेपुस्तके न धृतः इति)
The śloka is not included in the B.I. text. Restored from the *ṭikā*.

48. The Council of ministers (*mantrimaṇḍala*) should be composed of twelve ministers according to Manu, sixteen according to Bṛhaspati, and twenty according to Uśanas or Śukra. [XI. 67]

49. While others (including Kauṭilya) hold that deliberations should be held with as many ministers as considered necessary (*yathāsambhava*). They should be admitted or appointed formally according to rules, for consultation with whole-hearted attention (*āhitamanāh*) so that intelligence (in a particular matter) is increased or concentrated (i.e., a perfectly rational decision is arrived at for achieving success in the venture). [XI. 68]

49A. The school of Kauṇapadanti, however, holds that for particular purposes the king should deliberate with five, seven or more ministers severally or jointly.

त्रिचतुःसंख्यमहामन्त्रिव्यतिरिक्तं मन्त्रिमण्डलमभिधातुमाह—द्वादशेति । द्वादशमन्त्रिपरिकल्पितं मनुराह । विजिगीष्वरिमध्यमोदासीनसंज्ञक मण्डलचतुष्टये द्वौ द्वौ अन्यौ चिन्तायां योज्याविति भावः । षोडशमन्त्रिपरिकल्पितं बृहस्पतिराह । उक्तमण्डल चतुष्टये मन्त्रित्रयनियोगादिति भावः । उशनाः शुक्रो विंशतिरिति विंशतिमन्त्रिपरिकल्पितं मण्डलं कुर्यादुक्तमण्डलचतुष्टये मन्त्रिचतुष्टय[17] नियोगादित्यभिप्रायः ॥ ४८ ॥

यथेति । यदि मन्त्रिगुणसम्पन्ना बहवो मन्त्रिणः भवन्ति तेषां करणं पर्याप्तं तदा बहुकल्पितमेव मण्डलमिष्यते । तथा च कौटिल्यः—"इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रं सत्चक्षुस्तस्मादिन्द्रं[18] सहस्राक्षमाहुरिति ।" (१।१५।५५-५७)। तत्प्रविश्य तन्मन्त्रिमन्डलं प्रविश्य यथाविधि विध्यनतिक्रमेण मन्त्रयेत् । आहितमनास्सावधानः । कार्यं विधेयम् । बुद्धिविवृद्धये (कार्यसिद्धिविवृद्धये इति मूल पाठः), बहुमतव्युत्पत्त्या बुद्धिर्वर्धत इति ॥ ४९ ॥

मन्त्रिनियोगरीतिमाह—एकत्रेति । भूभुजा एकत्र एकस्मिन् कर्तव्ये देशविशेषस्य शासने वा विपक्ष विशेषेण सन्धिविग्रहादौ वा खनिजद्रव्यानुसन्धाने वा करसंग्रहे वा प्रजानां धनधान्यादिरक्षणे वा वैषम्यक्रियया युताः कार्याणामवान्तरभेदात् पृथक पृथक् कार्यचिन्तने नियुक्ता इत्यर्थः । पञ्च सप्तापि,

अपि शब्दात् अधिकः अपि मन्त्रिणः कार्याः एकैकस्मिन् कार्ये भिन्नभिन्नविषयेषु पृथक् पृथक् मन्त्रिणो नियोज्या इति भावः। कौनपदन्तकैराहुरिति इति केचित् वदन्ति वा ॥ ४६ क ॥

[17] मन्त्रित्वय [18] तस्मादिमं द्व्यक्षं

[66]अकथ्यानि तु कार्याणि सम्प्रधार्य[67] पुनः पुनः।
प्रविशेत्[67a] स्वहितान्वेषी मतमेषां पृथक् पृथक् ॥ ५० । (११।६६)
महापक्षो यथाशास्त्रं दृष्टकर्मा हितः सुधीः।
यद् ब्रूयाच्च[68] मतारूढस्तत्तत् साधु समाचरेत् ॥ ५१ । (११।७०)

---

[66] एकैकेनापि [67] प्रविचार्य ; सुविचार्य

[67a] प्रपृच्छेत् [68] यद्यद् ब्रूयात्

50. Deliberating (on a particular issue) severally with ministers the ruler for his own interest (or in the interest of the state, *svahitānveṣī*) should himself judge the merit of each of the opinions tendered. [XI. 69]

51. The opinion of a wise and experienced (*dṛṣṭakarmā*) counsellor possessing the majority support (*mahāpakṣa*), tendered in conformity with the Śāstra (on polity) in the interest of the ruler, should be adhered to firmly. [XI. 70]

मन्त्रक्रममभिधातुमाह—एकैकेनेति। (अकथ्यानि तु कार्याणि सुविचार्य इति मूलपाठः)। स्वहितान्वेषी आत्महिताकाङ्क्षी राजा एकैकेन प्रत्येकेन मन्त्रिणा सह कार्याणि कर्तव्यानि पुनः पुनः सुविचार्य यथाशास्त्रं विविच्य पृथक् पृथक् एषा मन्त्रिणां मतं प्रविशेत् प्रणिदध्यात्। तथा च कौटिल्यः "तानेकैकशः पृच्छेत् समस्तांश्च हेतुभिश्चैषां मतिप्रविवेकान् विद्यात्" इति (१।१५।४३-४४) ॥ ५० ॥

कीदृशस्य मन्त्रिणो वचनं कुर्यादिति दर्शयन्नाह—महेति। महाप्रमाणः पक्षो बन्धुवर्गो यस्य सः स्वपक्षार्थं नाहितमुपदिशतीति। शास्त्रानतिक्रमेण दृष्टकर्मा प्रागप्यनुष्ठितषाड्गुण्यः। हितः स्वामिहितः, सुधीरष्टगुणप्रज्ञासम्पन्नो यद् ब्रूयात् इतरमन्त्रिमतारूढस्तत्तत साधु समाचरेत् व्यभिचार सम्भवाभावात् ॥ ५१ ॥

नातीयात् कार्यकालं हि कृत्वा मन्त्रविनिश्चयम्।
अतिक्रान्तं[69] तु तं भूयो यथायोगं प्रकल्पयेत् ॥ ५२ । (११।७१)
न कार्यकालं मतिमानतिक्रामेत् कदाचन।
कथञ्चिदेव भवति कार्ये योगः[69a] सुदुर्लभः ॥ ५३ । (११।७२)
सतां मार्गेण मतिमान् काले कर्म समाचरेत्।
काले समाचरन् साधु रसवत् फलमश्नुते[70] ॥ ५४ । (११।७३)

---

[69] अतिक्रान्तेऽपि तं [69a] कार्ययोगः

[70] सम्पत्फलमुपाश्नुते

52. After deciding upon a *mantra* (policy for action) the proper

time for it (as decided) should not be allowed to lapse. If at all the right time for action lapses (for some reason or other) consultation should have to be held afresh with necessary formalities (*yathāyogaṁ prakalpayet*). [XI. 71]

53. An intelligent ruler should never allow the right (or opportune) moment for action to slip by, as a suitable opportunity for action is indeed rarely available. [XI. 72]

54. An intelligent ruler always acts in proper time following the path (or advice) of the wise (counsellors) and thereby (i.e., acting in time) he enjoys the fruits as delicious as sweet juice (*rasavat*) (success with immense benefits). [XI. 73]

मन्त्रानन्तरं कालातिक्रमे भेदसम्भावनेति तन्निवारणार्थमाह—नातीयादिति। तथा सुगममेतत् ॥ ५२ ॥

कार्यकालस्तु नातिक्रमणीय इति दर्शयन्नाह—न कार्यकालमिति। सुदुर्लभः कार्ये योगः। कार्यकालं मतिमान्नातिक्रामेत्। काले कर्म समाचरेत् ॥ ५३ ॥

सतामिति। तत्सिद्धये प्रयत्नं रसवत्फलमश्नुते ॥ ५४ ॥

इति चेति च सम्पश्यन् कालदेश[71]सहायवान्।
विशुद्धपार्ष्णिः[72] सन्नद्धस्तु समाक्रामेन्न चापलात् ॥ ५५ ॥ (११।७४)

[71] देशे काले [72] विशुद्धपार्श्वस्तद्धस्तु

55. Following the course indicated above the king should undertake an action in right earnest and not out of fickleness (*nacāpalāt*) or carelessness, after due assessment of the advantages of time and place as well as availability of support from the allies and arrangement for remedy of (unforeseen) drawbacks. [XI. 74]

आक्रमणकालमाह—इति चेति चेति। इति च इति च इति सम्पश्यन् एतत्करणे एतत् फलं भविष्यति, एतदकरणे च इयं हानिर्भविष्यति, इत्येवं पर्यालोचन्, अनुकूल देशकालसहायसम्पन्नः विशुद्धपार्ष्णिः विजिगीषुः सन्नद्धस्तु आत्महितकरं देशनगरादिकं समाक्रामेत, न तु असमये चापलात् आक्रामेत् इति शेषः ॥ ५५ ॥

अहिते हितबुद्धिरल्पधीरवमन्येत मतानि मन्त्रिणाम्।
चपलः सहसैव सम्पतन्नचिरं[73] वै व्यसनी प्रबुध्यते ॥ ५६ । (११।७५)
अविचार्य बलाबलं द्विषामहमित्येव समुद्धतो बलात्[74]।
चपलः स्वमतेन सम्पतन्निपतत्यल्पमना[75] न बुध्यते ॥ ५६ क*

[73] सम्पतन्नरिखड्गाभिहतः प्रबुध्यते।

[74] समुद्धतोऽनयात् [75] सम्पतन्ननिपत्यात्ममना

* श्लोकोऽयं मुद्रित पुस्तके न दृश्यते।
Restored from the *ṭīkā*, as the śloka does not appear in the B.I. text.

56. Out of foolishness (or lack of intelligence) when a fickle-minded or rash ruler, who takes evil for good, disregarding the sound advice of his ministers, suddenly (without due consideration) falls upon the enemy, soon suffers severe losses at the latter's hands. He is indeed a *vyasanī* (afflicted with *vyasana*). This is the opinion of the wise. [XI. 75]

56A. Without assesment of own forces as well as that of the enemy and arrogantly thinking himself to be the most powerful, the fickle-minded ruler who, relying on his own decision (i.e., disregarding the counsel of ministers), falls upon his enemy meets with total ruin as a result of his foolishness.

अविमृष्यकारितायां दोषं दर्शयन्नाह—अहिते हितबुद्धिरिति। प्रतीतमेतत्॥ ५६॥

अविचार्येत्यादि। द्विषां च बलमविचार्य अहमित्येवाहमेव बलवानिति समुद्धतो भवन्नसौ चपलः स्वमतेन सम्पतन् अनिपत्यात्यमना न बुध्यते, पतितः सन् बुध्यते॥ ५६ क॥

इति मन्त्रबलान् महीपतिर्महतो दुष्टभुजङ्गमानिव।
विनयेन्नयमार्गमास्थितो वशमुद्योगसमन्वितो रिपून्॥ ५७। (११।७६)

इति मन्त्रविकल्पो नाम सप्तदशं प्रकरणम्।

इति कामन्दकीये नीतिसारे मन्त्रविकल्पो नाम द्वादशः सर्गः। मुद्रितपुस्तकानुसारेण इति मन्त्रविकल्पोनामैकादशः सर्गः॥

58. It is only by virtue of possessing *mantrabala* (power generating from sound counsel) that a ruler following the track of *naya* (science of polity), becomes capable of subjugating the powerful enemies of the nature of vicious serpents.

इतीति। इत्येवमुक्तप्रकारो यो मन्त्रस्तद्बलात्महीपतिर्महतो रिपून दुष्टभुजङ्गमानिव यथा गरुडमन्त्रवित् विनयेद् वश्यान् कुर्यात् तथा विनयेत्, न मार्गमास्थितः स्ववशमिति बलादुद्योगसमन्वितो रिपूनिति॥ ५७॥

इति मन्त्रविकल्पो नाम सप्तदशं प्रकरणम्।

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षायां मन्त्रविकल्पो नाम द्वादशः सर्गः॥ मुद्रितपुस्तकानुसारेण एकादशः सर्गः समाप्तः॥

त्रयोदशः सर्गः

(मुद्रितपुस्तकानुसारेण द्वादशसर्गप्रारम्भः)

१८। दूतप्रचारप्रकरणम्।

कृतमन्त्रस्तु[1] मन्त्रज्ञो मन्त्रिणां[2] मन्त्रसम्मतम्।
यातव्याय प्रहिणुयात्तु दूतं दूत्याभिमानितम्॥ १।

[1] कृतमन्त्रः सुमन्त्रज्ञो [2] मन्त्रिणं मन्त्रिसम्मतम्

Sarga—XIII

[Sarga XII of the B.I. edition.]

Prakaraṇa—18. *Dūtapracāra* (Ambassadors and envoys)

1. A ruler, conversant with the technicalities of *mantra* (i.e., deliberation), having taken a decision in consultation with the ministers, should send a qualified ambassador approved by them to the enemy (against whom marching is contemplated, *yātavya*).

मन्त्रविकल्पानन्तरं दूतप्रचारं चरविकल्पं चाभिधातुमाह—कृतमन्त्र इति। कृतोऽभ्युपगतो मन्त्रिणां मन्त्रो येन स तथा। दूतं वक्ष्यमानलक्षणम्। दुनोति स्वाचारेण यातव्यमिति दूतः तम्। मन्त्रिसम्मतमभिप्रेतम्। स्वयं मन्त्रज्ञो राजा यातव्याय प्रतिणुयात् प्रेषयेदिति ॥ १ ॥

[1] कृतोऽभ्युपगमी

प्रगल्भः स्मृतिमान् वाग्मी शास्त्रे[3] चास्त्रे च निश्चितः[4]।
अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति॥ २।

---

[3] शस्त्रे शास्त्रे च [4] निष्ठितः; प्रतिष्ठितः

2. A royal ambassador should be an expert debater, with a good memory and eloquence, well versed in the use of arms (military science) as well as in the Śāstra (science of polity), and sufficiently experienced in ambassadorial functions.

[2]सत्यप्यमात्यगुणसम्पन्नत्वेऽवश्यंभाविनो दूतगुणानभिधातुमाह—प्रगल्भ इति। प्रगल्भो जितसभः स शत्रुपरिषदि गतसाध्वसो वक्ति। स्मृतिमान् स्वामिसन्दिष्टं न विस्मरतीति। वाग्मी प्रशस्तवाक् स्ववचनैः सभां रञ्जयति। शास्त्रे नीतिप्रतिपादके, अस्त्रे (शस्त्रे वा) धनुरादिके। प्रतिष्ठितः निष्ठां परां गतः। अभ्यस्तकर्मा शास्त्रप्रतिपादितं कर्माप्यभ्यस्तं येन तादृशी[2a] नृपतेर्दूतो भवितुमर्हति योग्यो भवति ॥ २ ॥

[2] सत्यपि मान्यगुण; सत्यप्यन्यगुण [2a] तादृक्

निसृष्टार्थो मितार्थश्च तथा शासनवाहकः[5] ।
सामर्थ्यात् पादतो हीनो दूतस्तु त्रिविधः स्मृतः ॥ ३ ।

[5] हारकः

3. Ambassadors are of three categories viz., (i) those with powers of taking decisions (of war or peace on the study of the situation), (ii) those with limited powers (i.e., as directed) and (iii) mere emissaries of errands *śāsanvāhakah* or *śāsanahārakah,* the succeeding one in consideration of abilities is lesser in rank by one stage than the preceding one.

मन्त्रिण इव दूतस्यापि त्रैविध्यं दर्शयन्नाह—निसृष्टेति। निःसृष्टो नियमरहितोऽर्थः सन्धि-विग्रहादिको यस्यासौ निसृष्टार्थः। यथा युधिष्ठिरेण वासुदेव एवमुक्त्वा प्रेषितः—"अस्मान्वेत्थ परान्वेत्थ वेत्थार्थानन्नुभाषितुम्। यद्यदस्मद् हितं कृष्ण तत्तद्वाच्यः सुयोधनः॥" इति। अत्र सन्धिरेव कर्तव्यो विग्रहो वेति न नियमः। मितार्थो मितो नियतो निर्दिष्टः सन्धिरेव, विग्रह एवेति त्वया विधेय इति वचनानां च नियमो यस्यासौ परिमितार्थः। तथा शासनहारक इति। शासनं स्वामिसन्देशो येन शत्रुः शास्यते। तच्च परिमितार्थं परिमितवचनमिति द्रष्टव्यं, तद्धारको दूतः। सामर्थ्यात्पादतो हीन इति। सामर्थ्यं हि अमात्यानां पञ्चविंशतिगुणरूपं तस्मात् पादतो हीन इति वीप्सा द्रष्टव्या। निःसृष्टार्थात् पादगुणहीनो मितार्थः, ततोऽपि पादगुण हीनः शासनहारक इति। एवं दूतस्त्रिविधः स्मृत इति॥ ३॥

स भर्तुः शासनाद् गच्छेद् गन्तव्यं [6]उत्तरोत्तरम्।
[7]स्वराष्ट्र परराष्ट्राणामिति चेति च चिन्तयन्[8] ॥ ४ ।
अन्तःपालांस्तु[9] कुर्वीत मित्राण्याटविकांस्तथा ।
जलस्थलानि[9a] मार्गांश्च विद्यात् स्वबलसिद्धये ॥ ५ ।

[6] ह्युत्तरोत्तरम् [7] स्ववाक्यपरवाक्यानामिति
[8] चिन्तयेत् [9] अन्तपालांश्च
[9a] जलस्थानानि

4. Under the commands of the ruler (*Vijigīṣu*) the ambassador would proceed to his destination (the enemy kingdom) and negotiate on the basis of his lord's message (terms), their replies and his counter-replies after careful judgement (of its implications).

5. He should cultivate friendship with frontier-guards (*antapālāh*) and foresters (dwellers of forests) (of the enemy kingdom) and apprise himself of river-routes and land-routes for the success of troop movements (of his lord).

दूतानामितिकर्तव्यतामाह—स इति। स त्रिविधोऽपि दूतो भर्तुर्विजिगीषोः। शासनादादेशात् गच्छेत्। गन्तव्यं यातव्यविषयम्। उत्तरोत्तरम् स्वराष्ट्रपरराष्ट्राणामिति (स्ववाक्य-परवाक्यानामिति

।) चेति च चिन्तयेत्। तथा च कौटिल्यः—"शासनमेवं वाच्यं, स वक्ष्यत्येवं, तस्येदं प्रतिवाक्यमेवं ।तिसन्धातव्यमिति अधीयमानो गच्छेदिति" (१।१६।६) ॥ ४ ॥

अन्तःपालानिति। स्वमण्डलपरमण्डलानामन्तान् पालयन्तीति तांश्च मित्राणि कुर्वीत, आटविकांश्च ग्रामदानादिभिः यात्रासौकर्यार्थम्। तथा जलस्थलानि जलमयप्रदेशान् स्थलमयप्रदेशांश्च मार्गान् स्वबलोपयोगीनि निराबाधान् विद्यात् स्वबलसिद्धये। तथा च कौटिल्यः—अटव्यन्तपालपरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत्। अनीकस्थान युद्धप्रतिग्रहापसारभूमीरात्मनः[8] परस्य चावेक्षेतेति" (१।१६।७) ॥ ५ ॥

[8] बुद्धीरात्मनः

नाविज्ञातः पुरं[10] शत्रोः प्रविशेच्च [11]न संसदि।
कालमीक्षेत[11a] कार्यार्थमनुज्ञातश्च निष्पतेत्॥ ६।

---

[10] पदं [11] प्रविशेच्च च संसदम्

[11a] कालं वीक्षेत

6. An ambassador should not enter the enemy's capital city (*puraṁ*) or his court (*saṁsadaṁ*) uninformed or unannounced (i.e., without sending prior intimation). Rather he should wait for the opportunity suitable for the success of his mission and enter with necessary permission (of the enemy ruler).

नाविज्ञातेति। शत्रुणा नाविज्ञातः पुरं प्रविशेत्। न च शत्रोः संसदं सभाम्। असूचित-प्रवेशः शङ्कनीयः स्यादिति। कालं वीक्षेत कालं याप्यमानं शत्रूणां वीक्षेत कार्यार्थं यदि विजिगीषोः कार्यानुगुणं याप्यमानं पश्येत् अनुज्ञातश्च शत्रुणा निःपतेत् नान्यथेति ॥ ६ ॥

सारवत्ताञ्च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च।
छिद्रं [12]शत्रोर्विजानीयात् कोशमित्रबलानि च॥ ७।

---

[12] छिद्रं च शत्रोर्जानीयात्

7. He should know (i.e., collect information) about the material resources of the territory (of the enemy), forts and secret defences as well as defects or weaknesses, and also about the strength of the treasury, military power and allies.

सारवत्तामिति। शत्रुराष्ट्रस्य सारवत्तां जानीयात् ग्रहीतुम। दुर्गं च ग्रहणार्थमेव। तद्गत-तद्गुप्तिं (दुर्गगुप्तिम्)। छिद्रं च शत्रोर्जानीयात् प्रहर्तुम्। कोशं च तदुचितप्रतिविधानार्थमेव। मित्रबलानि चेति ॥ ७ ॥

उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत्।
रागापरागौ जानीयात् [13]प्रकृतीनाञ्च भर्तरि॥ ८।

---

[13] दृष्टिवक्त्रविचेष्टितैः

8. He should convey the message as directed (by his lord) even if weapons are raised against him (i.e., even if he is threatened with dire consequences), and (while conveying the message) he should study reactions, favourable or unfavourable, (from the eyes and face) of the enemy king as well as of his ministers and courtiers (*prakṛtis*).

उद्यतेष्विति। यथोक्तं न भयादपलपेत्। शेषं सुगमम्॥ ८॥

[रागापरागौ जानीयात् प्रकृतीनाञ्च भर्तरि ।]
न ब्रूयात् प्रच्युतिं शत्रोः प्रकृतीनां स्वभर्तरि ।*
कृत्यपक्षस्य[14] चोपायं कुर्यादनुपलक्षितः[15] ॥ ९ ।

---

[14] कृत्यपक्षोपजापञ्च [15] दनभिलक्षित ; दनतिलक्षितः

9. Informing himself of the feelings, favourable or unfavourable, of the subjects (of the enemy) to their lord, the ambassador should create disaffection among them, himself remaining unobserved (i.e., from behind the screen by employing agents provocateurs).

* The line has been restored from the *ṭīkā*.

रागापरागाविति। शत्रोः प्रकृतीनां जनपदकोशदण्डादीनां स्वभर्तरि प्रच्युतिं हीनतां न ब्रूयात् न कस्यापि प्रकाशयेत्। शिष्टं सुगमम्॥ ९॥

पृच्छ्यमानोऽपि[16] न ब्रूयात् स्वस्वामिप्रकृतिच्युतिम् ।
ब्रूयात् प्रसृतया[17] वाचा सर्वं वेद भवानिति ॥ १० ।
फलेन[18] नाम्ना द्रव्येण कर्मणा च महीयसा[18a] ।
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ॥ ११ ।

---

[16] वध्यमानोऽपि [17] प्रश्रितया
[18] कुलेन [18a] गरीयसा

10. Even under the threat against life, or however closely questioned, he should never disclose the weak points of his own lord's *prakṛtis* or state elements. When pursuaded by questions he should say in polite terms like 'every thing is known to your Majesty' (presumably through spies).

11. (In order to appease the enemy king) the ambassador should praise him by comparing him favourably with his own lord in respect of nobility of lineage, extent of territory, material resources, and performance of glorious deeds.

पृच्छ्यमानोपीति। स्वस्वामिनः स्वप्रभोस्तत्[4] प्रकृतीनां च जनपदकोशदण्डादीनां च्युतिं हीनतां पृच्छ्यमानोऽपि न ब्रूयात्। तर्हि किं ब्रूयादित्याह—ब्रूयात् प्रसृतया वाचा "भवानेव सर्वं वेद, यस्माच्चारचक्षुषा प्रत्यक्षीकृतान्यमण्डलो भवानिति॥ १०॥

विस्तरज्ञनार्थं यदूनू यातस्वैवार्थमाह—कुलेनेति। विजिगीषुपक्षयातव्यपक्षयोः चतुर्विधं स्तोत्रं तद्यथा—कुलं विजिगीषोरभ्यर्हितं सीमान्वयायातम्। त्वदीयमपि तथैवादित्यसम्भवम्। नाम्ना विजिगीषुः श्लाघ्यतरः। नाम्ना त्वमपि तथैव। द्रव्येण विजिगीषुर्नवनवतिकोटीश्वरस्त्वमपि तथैव। कर्मणा च महीयसा विजिगीषुरुत्खाताशेषप्रतिपक्षाधिगतानेकमण्डलस्त्वमपि। इतिप्रकारं चतुर्विधं स्तोत्रं कुर्यात् मध्यस्थता ख्यापनार्थं च॥ ११॥ (कुलेन इत्यत्र फलेन इति मुद्रितपुस्तकपाठे कार्यसाधनेनेनेत्यर्थः)

[4] शत्रोस्तत्

विद्याशिल्पोपदेशेन संश्लिष्योभयवेतनैः।
कृत्यपक्षञ्च[19] जानीयात् तद्भर्तुश्च विचेष्टितम्॥ १२।

---

[19] कृत्यपक्षं विजानीयात्

12. Under the pretext of instructing in the different branches of learning and of arts and crafts the ambassador should keep contact with the treacherous elements (*ubhayavetana,* double agents, who accept remuneration from both sides), so that he may know (or identify) them whose allegiance (to their lord) is alienable, and incite them against their lord.

विद्येति। विद्या आन्वीक्षिक्याद्याः। शिल्पानि चित्रगीतादीनि। तदुपदेशापदेशेन तद्व्याजेन संश्लिष्य सम्बन्धं नीत्वा चोभयवेतनैर्मन्त्रिभिः करणभूतैः कृत्यपक्षं भेद्यपक्षं जानीयात्। तद्भर्तुर्यातव्यस्य विचेष्टितं बुध्येतेति॥ १२॥

तीर्थाश्रमाश्रयस्थाने[20] शास्त्रविज्ञान हेतुना।
तपस्विव्यञ्जनोपेतैः स्वचरैः[21] सह संवसेत्[22]॥ १३।

---

[20] तीर्थाश्रमसुरस्थाने [21] स्वचारैः

[22] सम्पतेत्; संवदेत्

13. An ambassador should secretly communicate with the spies (of his own lord) stationed in places of pilgrimage, hermitages and temples in the guise of hermits pretending to study the śāstras.

तीर्थेति। तीर्थानि वेणीसङ्गमप्रभृतीनि। आश्रमास्तपस्विनां तपोवनानि। सुराः सोमेश्वरभूतेश्वरस्थानानि। तेषां शास्त्रविज्ञानहेतुना (तत्छलेनेत्यर्थः) नियुक्तैस्तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवदेत् संवादं कुर्यात्। (संवसेत् इति मुद्रितपुस्तकपाठः)। "त्रयाणामेकवाक्ये सम्प्रत्ययः" इति कौटिल्यवचनात् (१।१२।१५)॥ १३॥

सन्तापं[23] कुलमैश्वर्यं त्यागमुत्थानसौष्ठवम्।
अक्षुद्रतां भद्रताञ्च[24] भर्तुर्भेद्येषु दर्शयेत्॥ १४।

---

[23] प्रतापं [24] दक्षताञ्च

14. The ambassador should incite the alienable section of the subjects of the enemy king by showing elaborately his own lord's comparative supremacy in political influences, nobility of family, prosperity, munificence, magnificent energy, generosity, and spirit of welfare.

कृत्यपक्षोपग्रहोपदेशं दर्शयन्नाह—प्रतापमिति। प्रतापं पौरुषम्। कुलमतिश्लाघ्यम्। ऐश्वर्यं विभूतेराधिक्यम्। त्यागं दानशक्तिम्। उत्थानसौष्ठवमुत्साहशक्तिप्रवणत्वम्। अक्षुद्रतामवञ्चकत्वम्। भद्रतां कल्याणबुद्धित्वम्। भर्तुर्विजिगीषोः भेद्येषु विषये दर्शयेत् दूतो भेद्यानात्मसात्कर्तुम्॥ १४॥ (प्रतापमित्यत्र सन्तापमिति मुद्रितपुस्तकस्य पाठः।)

सहेतानिष्टवचनं कामं क्रोधञ्च वर्जयेत्।
नान्यैः शयीत[25] भावं स्वं रक्षेद् विद्यात् परस्य च॥ १५।

[25] शयीत संरक्षेद् भावं विद्यात्

15. He should patiently bear with abusive words (of the enemy) and himself avoid sensual impulses and anger as well as of sleeping in the company of others. He should by all means maintain the secrecy of his own feelings (or plan of action). On the other hand he should ascertain the feelings (or reactions) of others.

सहेतेति। सहेतेति असहिष्णुतया कार्यं न नाशयेत्। कामं क्रोधं "कामादेरुत्सेको मन्त्रं भिनत्ति" इति कौटिल्यवचनात् (१।१५।११)। नान्यैः सह शयीत "स्त्रियः पानं च वर्जयेत, एकः शयीत" इत्यपि कौटिल्यवचनात् (१।१६।२१-२२)। स्वं भावं मन्त्रात्मकमभिप्रायं संरक्षेत्। विद्यात् परस्य भावमिति वर्तते॥ १५॥

भावमन्तर्गतं व्यक्तं सुप्तो मत्तश्च भाषते।
तस्मादेकः स्वपेन्नित्यं स्त्रियः[26] पानञ्च वर्जयेत्॥ १५ क *

[26] द्यूतं

* Restored from the *ṭikā*.

15A. Lest his intended purposes are disclosed by his somnambulist habit or under the influence of intoxicating drinks, an ambassador should always sleep alone and avoid the company of women (courtesans) as also addiction to wine.

भावमिति। अन्तर्गतं भावं हृद्गतं, कार्यं गोपनीयमपि सुप्तः स्वप्नापन्नः मत्तो मदविस्मृतसंवरणो भाषते। यतः तस्मादेकः स्वपेत्, नित्यं द्यूतं पानं च वर्जयेत् मन्त्रसंवरणार्थं दूत इति शेषः॥ १५क॥

काले व्रजति मेधावी न खिद्येतात्मसिद्धये[27]।
क्षिप्यमाणश्च[28] बुध्येत कालं नानार्थलोभनैः[29]॥ १६।

[27] तार्थसिद्धये [28] क्षिप्यमाणश्च ; रक्ष्यमाणं च ; भक्ष्यमाणं च [29] नानाविलोभनैः

16. An intelligent ambassador should move (or take action) only in proper time for the fulfilment of his mission and for that (waiting for the opportunity) he should not feel disgusted. He should rather during the period collect necessary information under the pretext of presenting various attractive offers.

काले इति। काले सम्प्रेषणकाले गच्छति दूतः न खिद्येत। यदि भर्तुरर्थसिद्धिं पश्यति। तदर्थं क्षिप्यमाणं[5] कालं शत्रुणा नानाप्रकारैः मिथ्याविलोभनैर्बुध्येत जानीयात्॥ १६॥

[5] रक्ष्यमाणं; भक्ष्यमाणं

एतेष्वहस्सु गच्छत्सु नः तत्र[30] पृथिवीपतेः।
पश्यति व्यसनं किञ्चित्[31] स्वयं वा कर्तुमिच्छति[32]॥ १७।
स्वान्तःप्रकोमथवा विनेतुं[33] नीतिवित्तमः।
सस्यादेः संग्रहं कर्तुं स्वदुर्गे[34] दुर्गसत्क्रियाम्॥ १८।

[30] किमस्मत्पृथिवी; किमस्य पृथिवी [31] किन्तु

[32] मीहते [33] मथवापनेतुं

[34] दुर्गं वा

17-18. During this period of waiting he should watch the movements of the ruler (enemy), who if finding no troubles to afflict his state, intends to take some action himself (without seeking for peace), such as, suppression of internal disorder (providing incitement to the *pārṣṇigrāha,* according to the Commentary) or pacification of the disaffected elements, collection of (surplus) foodgrains for stocking in his fort or repairs of his fortifications.

तान्येव कालक्षेपकारणानि दर्शयितुमाह—एतेष्विति। एतेषु कालक्षेपाहस्सु गच्छत्सु तत्र किमस्मत् पृथिवीपतेः विजिगीषोः न पश्यति व्यसनं प्रातिलोम्यादिकम्। नु वितर्कें। स्वयं वा कर्तुमीहते पार्ष्णिग्राहप्रोत्साहनादिकम्॥ १७॥

स्वयं किं कर्तुमीहते इत्याह—स्वान्त इति। स्वान्तःप्रकोपं विनेतुं[6] सस्यादेः स्वदुर्गे संग्रहं कर्तुं, दुर्गसत्क्रियां वा, नीतिवित्तमोऽरिरयं, कर्तुमीहते इति शेषः॥ १८॥

[6] प्रकोपमपनेतुं

स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते।
[35]तत्र यात्री स्वयं विषमाश्वास्येव समीहते॥ १९।
यात्राकालक्षयार्थी[36] वा तत्र चायं विलम्बते।
काले विक्षिप्यमाणे तु तर्कयेदिति पण्डितः॥ २०।

[35] उत यात्रां स्वयं दातुं येनास्माञ्ज समीहते; स्वयं कर्तुमस्मानेव समीहते।

[36] क्रियार्थी

19. The ambassador desirous of contributing (by his services) to the increase of prosperity of his own party (i.e., his lord and his allies) should carefully watch the advantages of time and place so that when the enemy king himself might undertake a march (against his lord), the latter is not outwitted (i.e., he may ably resist it).

20. Finding the enemy ruler (even after deciding upon action) deferring the march or delaying unnecessarily, the wise ambassador should deliberate himself if that is intended to catch his master unawares or to strike him at an inopportune moment.

तदा किं कर्तव्यमित्याह—स्वपक्षेति। स्वपक्षस्य विजिगीषुपक्षस्य अभ्युदयाकाङ्क्षी दूतः, देशकालौ प्रतीक्षते इति च तर्कयेत्। यातव्य इति शेषः। तत्र विजिगीषू राष्ट्रे स्वयं यात्री, यातव्यो यास्यतीति चित्तमाश्वास्य समीहते तदनुकूलं चेष्टते, यातव्य इति शेषः॥ १९॥

यात्रेति। यात्राकालस्य अस्मत्प्रभोरनुगुणस्य क्षयार्थी वा तत्र चायं यातव्यो विलम्बते। काले क्षिप्यमाणे तु तर्कयेत् पण्डितो दूत इति स्पष्टम्॥ २०॥

कार्यकालविपत्तिञ्च[37] व्यक्तां[38] ज्ञात्वा विनिष्पतेत्।
तिष्ठन् वार्ताविशेषार्थान्[39] भर्तुः सर्वान्निवेदयेत्[40]॥ २१।

[37] कालव्यपेतञ्च; कार्ये कालविपत्तिं च

[38] व्यक्तं [39] विशेषार्थी [40] भर्त्रे सर्वं निवेदयेत्

21. When time for action comes the ambassador should go back to his own country to report directly to his lord, or staying back (in the enemy kingdom) send special messages with full information and his own views to him (for necessary action).

कार्येति। तथा कार्यकालविपत्तिं भाविनीं प्रभोर्व्यक्तां दृष्ट्वा विनिःपतेत् अतिसृष्टोऽपि (अनतिसृष्टोऽपि ?) गच्छेदित्यर्थः स्वराष्ट्रे समागच्छेत्। अथवा तत्र तिष्ठन् वार्ताविशेषार्थी तन्मतादेव भर्तुः सर्वं निवेदयेत् सूचयेदिति॥ २१॥

रिपोः [41]शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम्।
दुर्गकोशबलज्ञानं कृत्यपक्षोपसंग्रहः॥ २२।
[42]राष्ट्राव्यपेतपालानामात्मसात् करणं तथा।
युद्धापसारभूज्ञानं दूतकर्मेति कथ्यते[43]॥ २३।

[41] शक्ति [42] राष्ट्राटव्यन्तपाला

[43] कीर्तितम्

22-23. The duties of an ambassador are said to be,—identification of enemies of the enemy, alienation of his friends and relatives, collection of information about the strength of his treasury and armed forces,

winning over of his disaffected officers, frontier guards and foresters, and accurate knowledge of the topography of the enemy territory for the purpose of troop movements of his master.

तथान्यदपि दूतकर्माभिधातुमाह—रिपोरिति। रिपोर्यातव्यस्य ये परमार्थतः शत्रवस्तत्-परिच्छेदस्तन्निर्णयः आत्मसात्करणार्थम्। सुहृदोऽपि मित्राणि, बान्धवामातुलादयस्तेषां विभेदनं भिन्नानामात्मसात्करणार्थम्। दुर्गकोशबलज्ञानमिति। कियन्ति दुर्गाणि, कियन्ति स्वरूपाणि, कियान् कोशः, किं बलं, किं स्वरूपज्ञानं कृत्यपक्षोपसंग्रहश्चेति दूतकर्म ॥ २२ ॥

राष्ट्रेति। चरणद्वयं स्पष्टार्थम्। स्वप्रभोररेश्च भूज्ञानमित्येवंप्रकारमन्यदपि कौटिल्येनोक्तम्। दूतेनैतद्विधेयमित्यर्थः ॥ २३ ॥

दूतेनैव[44] नरेन्द्रस्तु कुर्वीतारि विकर्षणम्[45] ।
स्वपक्षे च विजानीयात् परदूतविचेष्टितम् ॥ २४ ।

[44] दूतेनेति [45] कुर्यादरि विमर्शनम्; जानीयादरिचेष्टितम्

इति दूतप्रचारोनामाष्टादशं प्रकरणम्।

24. Thus a *vijigīṣu* by the deployment of his ambassadors to the enemy kingdom should put him always to worry and concern (necessitating serious consideration), and on his own part he should keep himself well informed of the movements of the ambassadors of his enemies.

उपसंहरन्नाह—दूतेनैवेति। इति प्रतीतम् ॥ २४ ॥

इति दूतप्रचारप्रकरणमष्टादशम् ॥

१९। चरविकल्पप्रकरणम्।

तर्केङ्गितज्ञः स्मृतिमान् मृदुर्लघुपरिक्रमः ।
क्लेशायाससहो दक्षश्चरः[46] स्यात् प्रतिपत्तिमान् ॥ २५ ।

[46] श्चारः

Prakaraṇa—19.

Caravikalpa (Varieties of Spies).

25. A spy (or secret agent) should be skilled in interpreting one's feelings expressed (covertly) through speech or gestures, possessing sharp memory, soft in speech and nimble-footed (prompt) in action, painstaking and hard-working as well as clever (in the discharge of duties).

चरलक्षणमाह—तर्केति। तर्क ऊहः प्रज्ञागुणो येन अनुक्तमप्यूह्यते। इङ्गितमन्यथावृत्तिः पूर्वं प्रवृत्तायाः क्रियायाः अन्यथात्वम्। इङ्गितमाकारस्याप्युपलक्षणार्थं, तज्जानातीति। स्मृतिमानविस्मरण-

शीलः। मृदुरनिष्ठुरवचनः। लघुपरिक्रमः शीघ्रगतिः। क्लेशायाससहः क्षुत्तृष्णादिकृताक्लेशान् तत्कृतायासं च सहते। दक्षः कुशलः शीघ्रकारी च। चारो गूढपुरुषः स्यात् प्रतिपत्तिमानुत्पन्नप्रतिभः अनालोचितोत्तरदानकुशल इत्यर्थः ॥ २५ ॥

तपस्विलिङ्गिनो[47] धुर्ताः पण्यशिल्पोपजीविकाः[48]।
चराश्चरेयुः परितः पिवन्तो जगतां मतम् ॥ २६ ।
निर्गच्छेयुर्विशेयुश्च सर्ववार्ताविदोऽन्वहम् ।
चराः सकाशान्[49] नृपतेश्चक्षुर्दूरतरं[50] हि ते ॥ २७ ।
सूक्ष्मं[51] सूत्रप्रचारेण पश्येयु वैरि विधिचेष्टितम्[52]।
स्वपन्नपि च जागर्ति चारचक्षुर्महीपतिः ॥ २८ ।

---

[47] व्यञ्जना [48] शिल्पपण्योपजीविनः
[49] सकाशं [50] दूरचरं
[51] सूक्ष्मसूत्र [52] वैरि विचेष्टितम्

26. Clever spies in the guise of mendicants, craftsmen and traders should move about (in the *maṇḍala*) collecting the views of all classes of men (within the state and without).

27. Spies should everyday go out and come into the presence of the ruler and convey to him all current information (developments, internal and external), for, they are the very eyes of him (the ruler) with distant vision (i.e., through the spies the ruler is apprised of developments in far and distant regions).

28. Spies by secret means (covertly) watch the movements of the enemy and report (to their lord). The ruler with spies as his eyes keeps awake even while asleep.

चाराणां वेशमभिधातुमाह—तपस्वीति। तपस्विव्यञ्जना इति तपस्विनः प्रव्रजितास्ते इव व्यज्यन्ते। धूर्ताः विदग्धाः (चतुराः वा)। शिल्पादीनि चित्रादीनि (कारुकर्माणि), पण्यानि क्रेयवस्तूनि तान्युपजीवन्तीति। इत्थम्भूताश्चरेयुर्गच्छेयुः। परितः समन्तात् द्वादशराजकमण्डले। जगतामिति जगन्निवासिन उपचर्यन्ते, तेषां मतं पिवन्तो हृदयस्थं कुर्वाणा विजिगीषवे सूचयितुम् ॥ २३ ।

निर्गच्छेयुरिति। निर्गच्छेयुः राजगृहं विशेयुश्च। सर्ववार्ताविदः सर्वेषां वार्ता प्रवर्तनं यत्र प्रवर्तन्त इति तद्विदोऽन्वहं प्रतिदिनम्। चरा नृपतेः प्रकाशं चक्षुर्दूरचरं दूरेऽपि व्यवहितेऽपि चरतीति। इतरचक्षुर्दूरचरं न भवति ॥ २७ ॥

सूक्ष्मेति। सूक्ष्मं परैरनुपलक्षितं, सूत्रं गूढतरं परवृत्तान्तानां सूचनं, तदर्थं प्रचरणं यद्गूढपुरुषाणां तेन। प्रश्येज्जानीयात् वैरिविचेष्टितं विजिगीषुः। हि यस्मात् स्वपन्नपि जागर्ति निद्रां गच्छन्नपि[6] जागर्ति चारचक्षुर्महीपतिः। चारचक्षुषा प्रत्यक्षीकृतजगद्वृत्तान्तत्वात् ॥ २८ ॥

[6] निद्राच्छन्नपि.

विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः ।
राजा [53]चरैर्जगत् कृत्स्नं व्याप्नुयाल्लोकसम्मतैः ॥ २९ ।
चारचक्षुर्नरेन्द्रः[54] स्यात् सम्पतेत् तेन भूयसा ।
अनेनासम्पतन् मौढ्यात्[55] पतत्यन्धः समेऽपि हि ॥ ३० ।
सर्वसम्पत् समुदयं सर्वावस्था विचेष्टितम् ।
[56]चरेण द्विषतां विद्यात् तद्देशप्रार्थनानि[57] च ॥ ३१ ।

[53] चारै [54] नरेन्द्रस्तु
[55] मार्गात्; मोहात्सम्पतन् [56] चारेण
[57] प्रार्थनादि च

29. The king (*Vijigiṣu*) should deploy all over his own and enemies' dominions spies full of energy like the sun and full of agility like the wind in their movements, and acceptable to the people of respective countries (i.e., where they would find congenial circumstances due to their knowledge of the use of local language etc).

30. A ruler having a sufficient number of spies as his eyes (i.e., well informed by the spies) moves about successfully, but without them he, like a blind man, falls down even on level grounds (i.e., in normal times, what to speak of an abnormal situation).

31. Through the medium of spies the king should apprise himself of all the resources position of the enemies, all their movements and efforts as well as of their designs and demands.

विवस्वानिवेत्यादि । स्पष्टम् ॥ २९ ॥

चारेति । चारा एव चक्षुर्यस्य सः नरेन्द्रः स्यात् । सम्पतेत् सञ्चरेत् तेन निर्णीय । चारमयेन चक्षुषा अनिर्णीय सम्पतन् गच्छन् मोहात् अज्ञानात् पतति राजा । अन्धश्चारमयचक्षुरहितत्वात् समेऽपि अविषमेऽपि पतति यस्मात् ततश्चारचक्षुषा भवितव्यमिति ॥ ३० ॥

सर्वेति । चारेण गूढपुरुषेण द्विषतां सर्वसम्पत्समुदयं कोशदण्डजनपदादीनां या सम्पत् तस्याः समुदयः उदयस्तं सर्वावस्थासु विचेष्टितं विद्यात् तद्देशप्रार्थनानि च जानीयात् ॥ ३१ ॥

प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत उच्यते ॥ ३२ ।
चरेण प्रचरेद् राजा[58] सुखेनर्त्विगिवाध्वरे ।
दूते सन्धानमायाते[59] चरचर्या प्रतिष्ठिता ॥ ३३ ।

[58] प्राज्ञः [59] मायत्तं चरे चर्या

32. Spies are of two classes, viz., known (public or official agents) and secret (agents). Secret agents are referred to above and the official agents are the *dūtas* or ambassadors.

33. As in a sacrifice priests are guided by the vedic sūtras (*mantra* hymns) so the king can undertake any action guided by the spies (i.e., on the basis of information gathered by them). Even the ambassadors, who have the power of concluding peace (or otherwise) have to base their decisions on the information supplied by the spies.

प्रसङ्गाद्दूतस्यापि चरत्वं (चारत्वं) स्थापयन्नाह—प्रकाश इति। प्रकाशः प्रकटः। अप्रकाशः प्रच्छन्नः। चारस्तु द्विविधः स्मृतः पूर्वाचार्यैः। अप्रकाशोऽयमनन्तरमुद्दिष्टः तपस्विव्यञ्जनाद्याच्छादित-राजपुरुषत्वः। प्रकाशो दूत उच्यते। दूतोऽपि सर्ववार्ताविद् भवति, चरति मण्डलान्तराणीति चारः ॥ ३२ ॥

चरेणेति। चरेण (चारेण) गूढपुरुषेण प्रचरेत् पृथ्वीलाभपालनार्थं व्यवहरेत्। सूत्रेण वेदोक्तवाक्येन ऋत्विगिवाध्वरे[7] सत्रे। दूते सन्धानमायत्तं दूतसाध्यत्वात्सन्धानस्य, चारे चर्या गत्यागमः प्रतिष्ठित इति ॥ ३३ ॥

[7] ध्वरे। शक्ते दूते

तीक्ष्णः प्रव्रजितश्चैव[60] सत्री[61] विषद(विशद)[62] एव च।
एते ज्ञेयास्तु[63] सञ्चाराः सर्वे नान्योन्यवेदिनः ॥ ३४ ॥
संस्थानवत्यः संस्थाश्च कार्याः कार्यप्रसिद्धये[64]।
तिष्ठेयुर्याश्च[65]सञ्चाराः परिचर्यापवादिनः[66] ॥ ३५ ॥
बालः[67] कृषीबलो लिङ्गी भिक्षुकोऽध्यापक[67a]स्तथा।
संस्थाः स्युश्चारसंस्थित्यै दत्तदायाः शुभाशयाः[68] ॥ ३६ ॥

---

[60] प्रव्रजिता चैव [61] शस्त्री
[62] रसद [63] प्रधानं
[64] कुर्यात् कार्यप्रसिद्धये ; कार्यसमृद्धये
[65] तिष्ठेयुर्यासु [66] परचर्योपवेदिनः ; चर्यापवाहिन ; चर्योपवाहिनः
[67] वणिक् [67a] भिक्षुरध्यापकस्तथा
[68] सुखाशयाः

34. Wandering spies (*Sañcārāh*) may be of reckless type (*tīkṣṇa*), mendicant or recluse type (*pravrajita*), sacrificer or black magician type (*satrī*) and poisoner type (*viṣada/rasada*) or in the guise of persons of noble character (*viśada*). But they should not be acquainted with one another (*nānyopavedinah*).

35. Secret agents should remain stationed in different guises in different regions (*saṁsthā*) for promotion of particular missions, so that the roving spies (*sañcārāh*) well informed of the enemy's state of affairs, may visit them (to convey their secret reports).

36. Spies in the guise of traders, cultivators, mendicants (or religious heads), monks (*bhikṣukas*) and teachers, stationed in particular regions are described as *Saṁsthā* or stationary spies. They should be provided with necessary remuneration and comfortable living conditions.

सञ्चारभेदानाह—तीक्ष्ण इति। तीक्ष्णः क्रूरकर्मा शस्त्रेण घातकः। प्रव्रजितो लिङ्गिव्यञ्जनः। सत्रीति सत्रं छद्म तद्विद्यते। लक्षणानि च सत्रिणः ये चास्य सम्बन्धिनो वश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमित्यधीयानाः। तीक्ष्णलक्षणं—ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः। ये च पुनर्बन्धुषु निःस्नेहाः क्रूराश्चालसास्ते रसदा विषदायिनः। एते ज्ञेयास्तु सञ्चाराः। सर्वे नान्योन्यवेदिन इति परस्परविज्ञाने एको विधृतस्त्वन्यान् ख्यापयतीति ॥ ३४ ॥

गूढपुरुषानेव संस्थासंज्ञकानभिधातुमाह—संस्थानवत्य इति। संस्थानमेकस्मिन्नेव प्रदेशेऽवस्थितिस्तद्वत्यः। तथा च कौटिल्यः "दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः। कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः" इति। (१।१२।२२)। संस्थाश्च कार्याः कार्यसंसिद्धये इत्यर्थः। तिष्ठेयुर्यत्र सञ्चाराः चराः यत्र च तिष्ठेयुरिति। तथा च कौटिल्यः—"प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः उदास्थितः। स वार्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वप्रव्रजितानां च ग्रासाच्छादनावसथान् प्रतिविदध्यात्। वृत्तिकामांश्चोपजापेत्। एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति" (१।११।४-७)। एवं चराणां यत् संस्थानं तद्वत्यस्तिष्ठेयुर्यासु सञ्चाराः परचर्यापवाहिन इति प्रतीतम् ॥ ३५ ॥

वणिगिति। वणिगिति वैदेहकव्यञ्जनः। कृषीवल इति कर्षकव्यञ्जनः[8]। लिङ्गीति मठपतिव्यञ्जनः। भिक्षुकः सिद्धतापसव्यञ्जनः। अध्यापकः उपाध्यायव्यञ्जनः। तथा च कौटिल्यः—"कापटिकोदास्थित-गृहपतिकवैदेहक-तापसव्यञ्जनाः प्रणिधय" (१।११।१) इति संस्थाः स्युश्चिरसंस्थित्यै दत्तदाया दत्तभक्तवेतनाः शुभाशयाः शुद्धचित्ताः स्वामिभक्ता इत्यर्थः ॥ ३६ ॥

[8] कर्षणव्यञ्जनः

स्वपक्षे परपक्षे च यावान् कश्चिद्व्यवस्थितः[69]।
सर्वस्मिंस्तत्र सञ्चारास्तिष्ठेयुश्चित्तवेदिनः ॥ ३७ ॥

---

[69] विवक्षितः ; विलक्षितः

37. Spies (of the wandering type, *Sañcārāh*) capable of reading the mind of others (i.e., of their evil designs) should be posted in all important administrative departments of one's own state as well as of his enemies.

स्वपक्षेति। स्वपक्षे स्वमण्डले। परपक्षे शत्रुमण्डले मित्रोदासीनमध्यमेषु। यावान् कश्चिद्विलक्षितः प्रधानभूतः सर्वस्मिन् तत्र सञ्चारास्तिष्ठेयुश्चित्तवेदिनः अभिप्रायज्ञानकुशलः इति प्रतीतम् ॥ ३७ ॥

स्वपक्षे परपक्षे च यो न वेद[70] चिकीर्षितम् ।
जाग्रन्नपि[71] सुषुप्तोऽसौ न भूयः प्रतिबुध्यते ॥ ३८ ।
कारणाकारणक्रुद्धान् बुध्येत स्वपरिग्रहे ।
पापानकारणक्रुद्धांस्तुष्णीं[72] दण्डेन साधयेत् ॥ ३९ ।
ये तु कारणतः क्रुद्धास्तान् वशीकृत्य संवसेत्[73] ।
शमयेद् दानमानाभ्यां छिद्रञ्च[74] परिपूरयेत् ॥ ४० ।
कण्टकान्[75] मुखभङ्गेन राज्यस्य प्रशमं नयेत् ।
उद्युक्तः सामदानाभ्यां छिद्रं च[76] परिपूरयेत् ॥ ४० क*

[70] वेत्ति [71] जाग्रत्स्वरिषु मुप्तोऽसौ
[72] तीक्ष्णदण्डेन [73] संविशेत्
[74] छिद्रमन्वप्यरेर्मुखम् [75] वञ्चकान्
[76] छिद्राणि परि

* Restored from the *ṭikā*.

38. A ruler, who does not keep himself well informed (through spies) of the movements in his own dominion and in his enemies, is like one asleep (complacent) when his adversaries are wide awake (alert, to find out his lapses and strike him down), and thus unable to offer any resistance.

39. (Through the medium of spies) the ruler should ascertain who in his own dominion are angry with him (i.e., disaffected) reasonably or unreasonably. Those wicked persons disaffected without (justifiable) reasons should be silenced by means of *daṇḍa* (which in such cases mean *upāṅgśudaṇḍa* or secret murder etc., through spies of *tīkṣṇa* type).

40. But those dissatisfied on reasonable grounds should be pacified with rewards and honours and won over, as they (by their knowledge of lapses and defects of the administration) hold the key to the doors for the entry of the enemy (i.e., may provide necessary information to the enemy to strike at).

40A. The ruler should establish law and order in the state by breaking the heads of thorns (i.e., by suppressing the anti-social elements with due punishments) and by repairing the loopholes (or lapses and defects) with alertness by means of conciliation and rewards (to his own men).

चारांणां संस्थानकरणे प्रयोजनमाह—स्वपक्षे इति । स्वपक्षे स्वमण्डले । परपक्षे परमण्डले । यो राजा न वेद न जानीयात् चिकीर्षितं कर्तुमीप्सितं विरुद्धमित्यर्थादापद्यते, जाग्रद् रिपुषु विनिद्रेषु सावधानेषु इत्यर्थः । सुप्तो राजा निरवधानो विरुद्धचिकीर्षितानभिज्ञो न भूयः प्रतिबुध्यते । दीर्घनिद्रां तत्कृतातिसन्धानैर्याति ॥ ३८ ॥

गूढ़पुरुषैर्विदितवृत्तान्तस्य विधेयमाह—कारणेति। कारणे प्रतिश्रुत्यार्थात् विप्रलब्धा इत्यादि-कैर्विप्रलब्धा अकृतार्थाः कृता इति कारणक्रुद्धान्। अकारणक्रुद्धान् जन्मान्तरशत्रुन्। बुद्‌ध्येत जानीयात्। स्वपरिग्रहे स्वकीयभृत्यवर्गे। पापान् दुष्टान् अकारणक्रुद्धान् जन्मान्तरायातवैरान् तूष्णीमुपांशुवधेन तीक्ष्णरसदादि विहितेन साधयेत्। अकारणक्रुद्धसम्भवोऽपि श्रूयते—"मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः। उत्पद्यन्ते त्रयः पक्षा मित्रोदासीन शत्रवः॥" इति वचनात्॥ ३९॥

ये तु इति। ये तु कारणतो राजदोषात् क्रुद्धास्तान्* दानमानाभ्यां शमयेत् उपशान्तक्रोधान् कुर्यात्, अनन्तरं तत्पक्षपरिग्रहणेन वशीकृत्य संवसेत् तैः सह संवासं कुर्यात्। नान्यथा कुत इत्यत आह—छिद्रमण्वपि परिजनस्य भर्तरि क्रोधलोभादि रन्ध्रमरेर्मूखं द्वारं तेन प्रविश्यारिरपकरोतीति॥ ४०॥

कण्टकानिति। कण्टका (वञ्चका) इव ते राज्यस्य राज्ञश्च पीड़ाकराः कारुकवैदेहकोपनिपाताः। सर्वेऽपि स्वामिद्रोहबुद्धयो राज्यकण्टकास्तान् मुखभङ्गेन, यथा कण्टको मुखभङ्गे कृते पीडां न करोति, एवं दण्डेन कण्टकत्वे त्याजिते कारुकवैदेहकादयोऽन्येपि दण्डभयात् कण्टकत्वं त्यजन्ति। एवं कण्टकान् प्रशमं नयेत्। उद्युक्तः कृतादरो विजिगीषुः सामदानाभ्यां छिद्रं रक्षाशैथिल्यं च पूरयेत्। अच्छिद्रं राज्यं च कुर्यात्॥ ४० क॥

* स्तान् वशीकृत्य दान

अणुनापि प्रविश्यारिं[77] छिद्रेण बलवत्तरम्।
निःशेषं मज्जयेत्[78] राष्ट्रं [78a]पानपात्रमिवोदकम्॥ ४१।

---

[77] रिश्छिद्रेण [78] मार्जयेद् राज्यं [78a] यानपात्र

41. Taking advantage of the slightest of weaknesses (loopholes), a stronger adversary sweeps in like flood water and submerges everything (under the volume of water) causing total destruction of the state (in all its elements).

छिद्रप्रतिपूरणे प्रयोजनमभिधातुमाह—अणुनेति। अणुनापि छिद्रेण रक्षाशैथिल्यादिना प्रविश्यारिरुदकमिव बलवत्तरं शक्तित्रयेणापि दुर्जयं, पानपात्र (यानपात्र)मपामिव बलवत्तरं निःशेष-मखिलं मज्जयेत्, आपदम्भाधौ निमग्नं कुर्याद्, विनाशयेदित्यर्थः, राज्यं स्वाभाविकं सप्ताङ्गमपि॥ ४१।

जड़मूकान्धबधिरच्छद्मानः [78b]पण्डकास्तथा।
किराता [79]वामनाः कुब्जास्तद्विधा ये च कारकाः[80]॥ ४२।
भिक्षुका[81]श्चारणा दास्यो नानाकार्य[82]कलाविदः।
अन्तःपुरगतां [83]वार्तामाहरेयुरलक्षिताः॥ ४३।
छत्रव्यजनभृङ्गारयानवाहनधारिणः।
महामात्र[84]बहिर्वार्तां विदुरन्ये च तद्विधाः॥ ४४।

[78b] षण्डका [79] किरातवामनाः
[80] कारवः [81] भिक्षुक्य
[82] मालाकाराः [83] वार्तां निर्हरेयु [84] महामात्रा

42-43. Spies pretending to be idiots, dumb, blind, deaf persons, as also eunuchs, *kirātas* (a mountain tribe acting as guards of the interior), dwarfs and hunchbacks and some petty craftsman (like carpenters etc.), mendicant beggars, minstrels, maid-servants, garland-makers and artists (singers, dancers etc.) and such visitors of the harem, should be employed to collect informations unobservedly (about possible movements and designs of the members of the interior parts of the palace).

44. The movements of *Mahāmātras* (high officials) and of others of similar rank, particularly of the messages they send out (to the enemy camp) should be watched through (spies in the guise of) their bearers of umbrella, fly whisk (or fan) and water pots, coachmen and grooms or horse-boys.

स्वपक्षे मुख्यतरेषु चिकीर्षितज्ञानार्थं गूढपुरुष प्रणिधानार्थमाह—जडेति। जडा मूकत्व-वधिरत्वाभ्यां युक्ताः। मूका वक्तुमनभिज्ञाः। वधिराः श्रवणशक्तिरहिताः। अन्धा दृक्शक्तिहीनाः। तच्छद्म विद्यते येषाम्। पण्डकाः ण्षडाः। अत्रापि छद्मशब्दो द्रष्टव्यः। किराता निर्गतपृष्ठाः। कुब्जा वक्रावयवाः। वामना असम्पूर्णावयवाः[10] ह्रस्वतराः। तद्विधा इति राजप्रयुक्ताः। कारवः सुवर्णकारादयः ॥ ४२ ॥

भिश्रुक इति। भिक्षुक्य इति विश्वासयोगात् भिक्षुक्ययङ्गनाः। भिक्षुक्यो वा अर्हद्बुद्ध परिव्राजिकाः। चारणा नग्ना (नाठ्या)चार्यादयः। दास्यो गृहगतां वार्तां प्रवृत्तिं निर्हरेयुः निःसारेयुः विजिगीषुं[11] प्रतिपादयितुमलक्षिताः केनाप्यविज्ञाता इति ॥ ४३ ॥

छत्रेति। छत्रमातपवारणम्। व्यजनं स्वेदाद्यपनयार्थो मयूरपिच्छादिकृतः। भृङ्गारो जल-पात्रम्। यानं शिविकादि। वाहनं हस्त्यश्वादि तद्धारिणः। महामात्राबहिर्वार्तां महती मात्रा प्रमाण-वृद्धिर्येषां ते महामात्रा मन्त्रिपुरोहितादयः तेषां वहिर्गतां वार्तां, विदुर्विजानीयुः। अन्येऽपि उक्त-व्यतिरिक्त स्तद्विधा इत्युभयनेतना इति ॥ ४४ ॥

[10] असरलसम्पूर्णावयवाः ; अशरीरसम्पूर्णाः

[11] विजिगीषौ समर्थयितुं

[85]सूदव्यञ्जन कर्तारस्तल्पका[86] व्ययकास्तथा[87] ।
प्रसाधका भोजकाश्च गात्रसंवाहका अपि ॥ ४५ ।
जलताम्बुलकुसुमगन्धभूषणदायकाः ।
कर्तव्याश्च[88] सदा ह्येते ये चान्येऽभ्यासवर्तिनः[89] ॥ ४६ ।

[85] अन्नव्यञ्जन कर्तारः [86] कल्पकाः

[87] स्नापकास्तथा [88] कर्तव्या रसदा

[89] ऽभ्याशवर्तिनः

45-46. Cooks (preparing rice and curries), barbers, hairdressers, valets, waiters, masseurs, and other attendants who serve water, betels,

flowers, perfumes and ornaments as well as others who keep near (the king) (should be closely espied upon), as they are likely to administer poison.

सूदेति। सूदाः पाचकाः। इति प्रतीतम् ॥ ४७ ॥

जलेति। रसशब्देन विषमभिधीयते, ये चान्ये समीपवर्तिनस्तेषां विषदानं सुकरमिति ॥ ४८ ॥

संज्ञाभिर्मूर्च्छितै[90] र्लेख्यैराकारैरिङ्गितैरपि ।
[91]सुसञ्चरेयुरव्यग्राश्चराश्चर्यां परस्परम् ॥ ४७ ।

[90] म्लेच्छितै ; मुद्रितैरक्षरै [91] सञ्चारयेयुरव्यग्राश्चारा

47. Wandering spies, should coolly and carefully study the secret communications conveyed by the officials through code words or tokens, or by signs and gestures or in course of dialogues between themselves.

वार्तायां लब्धायां युक्तिसम्पादनार्थमाह—संज्ञाभिरिति। संज्ञाभिः सङ्केतैरङ्गुलीभिर्वा अक्षरैरवयव संस्थादिभिः याः कृतास्ताभिः। आकारैः शरीराकारस्यान्यथात्वैः। इङ्गितैः क्रियाया अन्यथात्वैः। तथा च कौटिल्यः—"इङ्गितमन्यथावृत्तिराकृतिग्रहणमाकार" इति। अव्यग्रा अनाकुलाः। चरा गूढपुरुषाः। चर्यां महामात्रादीनामाचरणानि। परस्परमिति तीक्ष्णरसदाः सत्रिषु, सत्रिणः संस्थासु, संस्था[12] अन्तेवासिषु, अन्तेवासिनो राज्ञीति ॥ ४७ ॥

[12] संस्थानां

समापिबन्तो जगतां मतानि जलानि भूमेरिव सूर्यपादाः ।
अनेकशिल्पाध्ययनप्रवीणाश्चरा[92]श्चरेयुर्बहुलिङ्गरूपाः ॥ ४८ ।

[92] श्चारा

48. Just as the sun by its rays draws up moisture from the earth, so the expert spies, well versed in many arts moving about in various disguises collect actions and reactions of people within and without his master's dominion.

उपसंहरन्नाह—समापिबन्त इति। जगतामित्युपचारात् जगन्निवासिनामभिमतानि चेष्टितानि[13] समापिबन्तः आत्मस्थानि कुर्वन्तः सूर्यरश्मय इव चारा जलानीव जगतां मतानि सूर्य इव विजिगीषौ समर्पयितुं चरेयुरिति सम्बन्धः ॥ ४८ ॥

[13] समन्तात्

येन प्रकारेण परानुपेयात् परापरश्च[93] समृद्धिहेतोः ।
तमात्मनि स्वस्थमतिस्तु[94] तज्ज्ञैर्वियुज्यमानं[95] हि परेण विद्यात् ॥ ४९ ।

इति चरविकल्पो नामैकोनविंशं प्रकरणम् ।

इति कामन्दकीये नीतिसारे दूतप्रचारचरविकल्पो नाम त्रयोदशः सर्गः। (मुद्रित पुस्तकानुसारेण इति द्वादशः सर्गः।)

[93] पराकरः स्वसमृद्धि [94] मतिश्च [95] तज्ज्ञैः प्रयुज्यमानश्च

49. A *vijigīṣu,* conversant with the ways of his enemies and of others (i.e., his own men) (or, in other words, the laws of polity), should be cognisant of the fact that the measures he adopts (of deploying spies) to ascertain moves and designs of his enemies, are also adopted against him by his enemies equally intelligent, (by appointing spies within his state) and he should therefore be careful in apprising himself of their movements (so that those may be counteracted in time).

विजिगीषौ परप्रयुक्तगूढपुरुषातिसन्धानप्रतीकारार्थमाह—येनेति। येन प्रकारेण, परापरज्ञ—परं नीतिशास्त्रमपरमिति लोकवृत्तं तदुभयं जानातीति सः, येन प्रकारेण गूढ पुरुषादिप्रणिधानेन परान् शत्रून् उपेयादित्यतिसन्दध्यात् स्वसमृद्धिहेतोः। तं प्रकारमात्मनि परेण नियुज्यमानं ततस्तज्ज्ञैः गूढ-पुरुषैः स्वस्थमतिर्भूत्वा विद्यात् जानीयात् ज्ञात्वा प्रतिविदध्यादिति भावः ॥ ४९ ॥

इति चरविकल्पप्रकरणमेकोनत्रिंशम्।

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षायां दूतप्रचार-चरविकल्पौ नाम त्रयोदशः सर्गः ॥ मुद्रितपुस्तकानुसारेण द्वादशः सर्गः समाप्तः ॥

चतुर्दशः सर्गः

(मुद्रित पुस्तकानुसारेण त्रयोदशसर्गः प्रारम्भः ।)

२० । उत्साहप्रशंसा प्रकरणम् ।

अन्वहं चरचर्याभिर्विमल[1] दूतचेष्टितम् ।
यायाद् यथोक्तलाभस्तु[2] सूक्ष्मबुद्धिपुरःसरः[2a] ॥ १ ।

[1] विफले दूतचेष्टिते ; विफलं दूतचेष्टितम् [2] यानस्तु
[2a] बुद्धिः पुरःसरः

Sarga—XIV

Prakaraṇa—20.

Utsāhapraśaṁsā

(In praise of energy and initiative.)

1. A ruler, realising from the daily reports of his secret agents about the failure of the efforts of his ambassador (in concluding peace with the enemy), should undertake march against him in conformity with the rules already described and governed by his own keen intelligence (i.e., after intelligent deliberation).

अनन्तरोक्तदूतप्रचारचारविकल्पयोः सम्बन्धं दर्शयन् उत्साहप्रशंसा-प्रकृतिकर्म-प्रकृतिव्यसनानि च दर्शयन्नाह—अन्वहमिति । अन्वहं प्रतिदिनं चरचर्याभिर्गूढपुरुषगत्यागमैः विफले[1] दूतचेष्टिते निर्णीते इति वाक्यशेषः । दूतचेष्टितवैफल्यञ्च सन्धेरभावात् । तथा चानन्तरमेवोक्तम्—"दूते सन्धानमायत्तम्" इति । ततश्च यायात् विजिगीषुर्यथोक्तयानो यथा अत्रैवोक्तं यानं तद्विद्यते यस्य सः । तत् यानाख्यं गुणमातिष्ठेदित्यर्थः । सूक्ष्मबुद्धिपुरःसरः सूक्ष्मातिदुर्लक्ष्या सर्वत्राप्रतिहतप्रवेशाबुद्धिः पुरःसरा यस्य सः [2]मतिप्रधान इत्यर्थः ॥ १ ॥

[1] विफलं दूतचेष्टितं निर्णीयेति [2] भक्ति

सूक्ष्मया सत्त्वप्रयत्नाभ्यां [2]दृढा बुद्धिरधिष्ठिता ।
प्रसूते हि फलं श्रीमदरणीव हुताशनम् ॥ २ ।
धातोश्चामीकरमिव सर्पिर्निर्मथनादिव ।
बुद्धिप्रयत्नोपगताध्यवसायाद्[3] ध्रुवं फलम् ॥ ३ ।

[2] दृढं [3] प्रयत्नोपगताद् व्यवसायाद्

2. Resolute efforts guided by keen intelligence and equanimity produce the desired results (i.e., achievement of *Srī* or prosperity), as two pieces of *araṇis* (fire wood) produce fire (by friction).

3. Just as pure metals (like gold etc.) are extracted from ores, and clarified butter (*ghṛta*) by churning (curd), so sure success is obtained by sincere efforts blended with intelligence.

सूक्ष्माया बुद्धेः सामर्थ्यं दर्शयन्नाह—सूक्ष्मेति। सूक्ष्मा सत्त्वप्रयत्नाभ्यामिति। सूक्ष्मा अनन्तरोक्तबुद्धिः। सत्त्वप्रयत्नाभ्यामिति। सत्त्वं व्यसनेऽभ्युदये च यदविकारिता, व्यसने विषादमभ्युदये च हर्षं यन्न करोति तत् सत्त्वं नाम गुणः। येन प्रेरितः इन्द्रियग्रामः प्रवर्तते स प्रयत्नः। ताभ्यां दृढमत्यर्थं बुद्धिरनन्तरोक्ताधिष्ठिता व्याप्ता। प्रसूते निष्पादयति। हि स्फुटम्। फलं पृथिवीलाभपालनादिकम्। श्रीमदिति शोभान्वितम्। अरणीव शम्यादिकाष्ठं यत्राग्निर्निष्पद्यते सेव हुताशनं प्रसूते। तस्माद् बुद्ध्यर्थं प्रयतेतेति भावः ॥ २ ॥

एतदेव द्रढयितुमाह—धातोरिति। धातोरिव मृत्पाषाणादेश्चामीकरं सुवर्णमिव। सर्पिर्घृतं निर्मथनाद् दध्न इवेति वर्तते। बुद्धि प्रयत्नोपगतात् व्यवसायादिति। बुद्धि-प्रयत्नावुपसमीपं गतौ यस्य व्यवसायस्य तस्मात्। एवं बुद्धिप्रयत्नोपष्टम्भितात् व्यवसायात् ध्रुवं फलं तस्मान्निश्चितफलार्थिना पुरुषेण मन्त्रशक्त्युपष्टम्भितोत्साहशक्तिरनुष्ठेयेति भावः ॥ ३ ॥

श्रीमानुत्साह[4]सम्पन्नः प्रभुशक्त्या समन्वितः।
[4a]श्रियः स्यात् परमं पात्रमपामिव महार्णवः ॥ ४ ।
नलिनीवाम्बु सम्पत्त्या[5] बुद्ध्या श्रीः परिपाल्यते।
उत्थानव्यवसायाभ्यां[6] विस्तारमुपनीयते ॥ ५ ।
लक्ष्मीरुत्साहसम्पन्नान्[7] बुद्धिशुद्धं प्रसर्पतः।
नापैति कायाच्छायेव विस्तारं चोपगच्छति ॥ ६ ।
वीतव्यसनमश्रान्तं महोत्साहं महामतिम्।
प्रविशन्ति सदा लक्ष्म्यः[8] सरित्पतिमिवापगाः ॥ ७ ।

---

[4] सम्पन्नोऽध्यवसायसमन्वितः ; सम्पन्नः व्यवसायसमन्वितः

[4a] भाजनं परमं श्रीणामपामिव [5] सङ्गत्या

[6] उत्थानाध्यवसायाभ्यां [7] सम्पन्नाद्

[8] महालक्ष्म्यः

4. A wise ruler possessing (indomitable) energy and perseverance (i.e., equipped with three powers *mantraśakti*, *utsāhaśakti* and *prabhuśakti*) becomes the best resort of all prosperity, as the ocean is that of water.

5. Just as the lotus protected by water blossoms forth, so also energy supported by perseverance achieves wide expansion (of dominion).

6. Wealth or prosperity always moves towards a ruler possessing energy and pure intelligence (i.e., purified by his knowledge of the Śāstras) and clings to him like the shadow of the body. It never leaves him but increases all the more.

7. As rivers flow into the sea, so great prosperity comes to a ruler, free from all passions (*vītavyasana*) and endowed with (three powers, like) perseverance (never tiring in his efforts) high energy (*utsāhaśakti*) and sharp intelligence (*mantraśakti*).

अत्रैव तृतीयापि प्रभुशक्तिर्भवति चेदधिकं फलं दर्शयन्नाह—धीमानिति। धीमानित्यनेन मन्त्रशक्तिरुक्ता। उत्साहसम्पन्न इत्यनेनोत्साहशक्तिः। प्रभुशक्त्या समन्वित इति। त्रिशक्तिसम्पन्न इत्युक्तं भवति। श्रियां स्यात् परमं पात्रमपामिव महार्णव इति प्रतीतम् ॥ ४ ॥

तदेव दर्शयन्नाह—नलिनीति। नलिनीवाम्बुसन्नत्या बुद्ध्याः श्रीः परिपाल्यते रक्ष्यते उच्छेदादित्यर्थः[3]। उत्थानाध्यवसायाभ्यां[4] वातातपसमानाभ्यां विस्तारमुपनीयते न हि सर्वमपि बीजं जलसन्निधावपि वातातपवर्जिते विस्तारमुपयाति ॥ ५ ॥

एतदेव पुनरुच्यते आदरप्रदर्शनार्थम्—लक्ष्मीरिति। बुद्धिशुद्धं बुद्ध्यनुसारेण प्रसर्पतः वृद्धिं गच्छतः उत्साहसम्पन्नात् लक्ष्मीर्न अपैति। स्पष्टमन्यत् ॥ ६ ॥

वीतेति। वीतं विगतं व्यसनं गुणप्रातिलोम्यादि यस्य तम्। अश्रान्तं सततोद्योगेऽपि यस्य श्रमो नास्ति तम्। अत एव महोत्साहम्। महामतिं महती मन्त्रशक्तिर्यस्येति तम्। प्रविशन्ति सदा लक्ष्म्यः सरित्पतिमिवापगाः इति प्रतीतम् ॥ ७ ॥

[3] अनुच्छेदादित्यर्थः [4] उत्थानव्यवसायाभ्यां

सत्त्वबुद्ध्युपपन्नोऽपि व्यसनग्रस्तमानसः।
[9]स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते ॥ ८ ॥
उत्थानेनैधयेत् [10]सर्वमिन्धनेनेव पावकम्।
श्रियं[11] हि सततोत्थायी दुर्बलोऽपि समश्नुते ॥ ९ ॥

[9] श्रीभिः···स्त्रीभिरलसः [10] सत्त्व

[11] श्रियो हि

8. (On the other hand) a ruler who is intelligent but inactive under the influence of passions (*vyasanas*) to which he is addicted, loses all prosperity (or favours of the Goddess *Śrī*) as an impotent man is discarded by the women.

9. (Whereas) a ruler, though weak (in his powers or resources), succeeds in gaining prosperity by steady and constant energetic efforts, as fire fed by supply of fuel blazes forth.

सत्त्वबुद्ध्युपपन्नोऽपीति। सत्त्वबुद्ध्युपपन्नेनाव्यसनिना भवितव्यमिति उत्साहप्रशंसा। सत्त्वगुणसम्पन्न बुद्धियुक्तोऽपि यदि व्यसनासक्तमानसः अलसश्च उत्साहशक्तिविहीन इत्यर्थः, स्यात् तदा स्त्रीभिः षण्ढ इव श्रीभिः परिभूयत ॥ ८ ॥

तदेवाह—उत्थानेनेति। उत्थानेनोद्योगेनैधयेत् वृद्धिं नयेत् सत्त्वमुक्तलक्षणं व्यसनेऽभ्युदये च यदविकारि। इन्धनेनेव काष्ठादिना पावकं वैश्वानरमिव। सततोत्थायी सत्त्वाधिकस्तु श्रियं हि स्फुटं सदैवोद्युक्तो दुर्बलोऽपि प्रभुशक्ति सहितः समश्नुते प्राप्नोतीति॥ ९॥

भोक्तुं पुरुषकारेण [12]दुष्टस्त्रियमिव श्रियम्।
व्यवसायं सदैवेच्छेन्न हि क्लीबवदाचरेत्॥ १०।

[12] दुष्टां

10. A ruler desirous of enjoying prosperity (*Śrī*) should always strive with his manly powers (*Puruṣakāra*) as one would do to control his wicked (or unfaithful) wife and not behave like an impotent person.

एतदेव समर्थयन्नाह—भोक्तुमिति। श्रियं लक्ष्मीं भोक्तुं पुरुषकारेणैवेच्छेत्। न दैवापेक्षी स्यात्। तथा च कौटिल्यः—"दैवप्रमाणो मानुषहीनो निरुद्योगो विपद्यत" इति। दुष्टां स्त्रियमिव अविनीतां योषितमिव श्रियम्। व्यवसायमुद्योगं सदैवेच्छेत्। न हि क्लीबवदाचरेत् षण्डवन्ना-चरेदिति॥ १०॥

वशे श्रियं सदोत्साही[13] सैंहीं वृत्तिमुपाश्रितः[14]।
कचग्रहेण कुर्वीत दुर्विनीतामिव[15]स्त्रियम्॥ ११।
किरीटमणिचित्रेषु मूर्धसु[16] त्राणसारिषु[16a]।
नाकृत्वा विद्विषां पादं पुरुषो भद्रमश्नुते॥ १२।

[13] सदोत्थायी [14] वृत्तिं समाश्रितः
[15] दुर्वृत्तामिव योषितम् [16] सूत्तात्स्रश्मिषु
[16a] त्राणधारिषु

11. An ever-energetic ruler gains possession of prosperity or the Goddess *Śrī* by adopting the conduct of the lion (*saimhī vṛtti*) (which pounces upon its prey), just as a man deals with his wicked wife by dragging her by the hair.

12. Unless and until the *vijigīṣu* subjugates his enemy by planting his foot on the latter's head bedecked with crown and helmet set with gems and jewels, he cannot be sure of his own welfare.

वश इति। सदोत्साही (सदोत्थायी वा) सदोद्युक्तः सैंहीं वृत्तिं सिंहो हि अनपेक्षितदेशकाल-सहायबल उत्पत्य हन्तीत्येवंविधां वृत्तिं समाश्रितः कचग्रहेण केशाकर्षणेनेव वशे श्रियं दुर्वृत्तां पुंश्चलीं योषितमिव कुर्वीत। अयमापत्कल्पः कादाचित्को न्यायाभावे द्रष्टव्य इति॥ ११॥

भूयोऽप्युत्साहप्रशंसामेवाह—किरीटमणिचित्रेष्विति। रक्षार्थं शिरस्त्राणाश्रितेषु खड्‌गखड्‌ग-प्रहारैर्भूतलपातितेषु नाकृत्वा विद्विषां पादं पुरुषो भद्रमश्नुते। अपि तु कृत्वैव राज्यसौख्यं प्राप्नोतीत्यर्थः॥ १२॥

प्रयत्नप्रेर्यमाणेन महता चित्तहस्तिना ।
रूढवैरिद्रुमोत्खातमकृत्वैव[17] कुतः सुखम् ॥ १३ ।
हेलाकृष्टस्फुरत्कान्ति[18] खड्गांशुपरिपिञ्जरैः ।
श्रीमत्करिकराकारैराक्रीयन्ते[19] भुजैः श्रियः ॥ १४ ।

---

[17] मकृत्वेह [18] स्फुरत्तीक्ष्णखड्गांशु

[19] राह्रियन्ते

13. How can a *vijigiṣu* feel happy and contented unless he is able to uproot his enemy standing like a high tree by the disciplined efforts of his own self resembling a trained elephant ?

14. The strong arm, like the majestic trunk of an elephant, wielding easily (or quickly) the sharp sword with dazzling blade can capture all prosperity.

एतदेव समर्थयन्नाह—प्रयत्नेति । प्रयत्नो विहितलक्षण आत्मगुणः हस्तिपकसमस्तेन यः प्रेर्यमाणो महांश्चित्तहस्ती तेन करणभूतेन रूढः सुष्ठिंगतो यो वैरिद्रुमस्तस्योत्खातमुन्मूलनमकृत्वेह जगति कुतः सुखं ? वैरिद्रुमोत्खातं कृत्वैव सुखमित्यर्थः ॥ १३ ॥

हेलेति । तथा हेलया निराकुलत्वेनाकृष्टश्चासौ स्फुरद्दीप्तिः खड्गस्तदंशवः किरणास्तत्परिपिञ्जरैः श्रीमत्करिकराकारैराह्रियन्ते भुजैर्बाहुभिः श्रियो विभूतयः इति ॥ १४ ॥

उच्चैरुच्चैस्तरामिच्छन् पदान्यायच्छते महान् ।
नीचैर्नीचैस्तरां[20] याति निपातभयशङ्कया ॥ १५ ।
प्रमाणाभ्यधिकस्यापि महत् सत्त्वमधिष्ठितः ।
[21]पदं स धत्ते शिरसि करिणः केशरी यथा ॥ १६ ।

---

[20] नीचोनीचैस्तरां

[21] पदं तु ; करोत्येव पदं मूर्ध्नि केसरी मत्तहस्तिनः (मत्तदन्तिनः)

15. An ambitious *vijigiṣu* aspiring for higher and higher position plants his feet higher and higher up (i.e., ascends to higher position by constant efforts), whereas a lowly stationed ruler (weak and unambitious as he is) out of fear and apprehension of destruction sinks lower and lower.

16. A *vijigiṣu* endowed with energy and firmness of disposition often subjugates his enemy possessing richer resources like the lion planting his feet on the head of the elephant (of greater stature).

उच्चैरिति । महापुरुष उच्चैः पदमिच्छन् उच्चैस्तरां पदान्यायच्छते आददाति । अत्युच्छ्रिततरं पर्वतशिखरमारुरुक्षुरत्युन्नतर पदविन्यासादभिमतस्थानं प्राप्नोति नान्यथा । निपातभयशङ्कया तु नीचो नीचैः पदानि प्रयच्छन्नीचैस्तरां प्रति पततीत्यर्थः ॥ १५ ॥

एतदेव समर्थयन्नाह—प्रमाणेति । केशरी यथा करिणः शिरसि पदं विधत्ते । एवं महत्सत्त्वमधिष्ठितो यो भवति स लघीयानपि महान्तमप्यधः करोतीति भावः ॥ १६ ॥

गतभीर्भीतिजननं भोगं भोगीव दर्शयेत् ।
यथाबलं च कुर्वीत रिपोर्दण्डनिपातनम् ॥ १७ ।

इत्युत्साहप्रशंसा नाम विंशं प्रकरणम् ।

17. A *vijigiṣu* should fearlessly strike terror in the hearts of others by the display of his powers as the serpent does with its raised hood, and punish his enemies after a comparative assessment of strength (of his own and that of his enemies).

यद्यप्युत्साहप्रशंसापरैरेवमभिधीयते तथापि (स्व)परबलाबलविमर्शपूर्वकं विचेष्टितव्यमिति दर्शयन्नाह—गतेति । गतभीर्निर्भयो भूत्वा भोगीव सर्प इव भोगं फटाटोपं भीतिजननं दर्शयेत् । यथाबलं च स्वबलापेक्षया प्रकुर्वीत रिपोर्दण्डनिपातनं नान्यथेति ॥ १७ ॥

इति विंशमुत्साहप्रशंसा प्रकरणम् ।

२१ । प्रकृतिकर्म प्रकरणम् ।

प्रकृतिव्यसनं यस्मात्[22] तत् प्रशाम्य समुत्पतेत् ।
अनयापनयाभ्यां च जायते[23] दैवतोऽपि वा ॥ १८ ।

[22] यत्स्यात् [23] तज्जायते

Prakaraṇa—21.

Prakṛtikarma

(Functions of the constituent elements of the State)

18. Calamities (*Vyasanas*), Providential or otherwise, resulting from misfortune or wrongful actions, should be remedied first and then only the ruler should launch upon action against his enemy.

उत्साहप्रशंसामभिधाय प्रकृतिकर्म प्रकृतिव्यसनानि चाभिधातुं प्रकृतीनां कर्माणि[5] प्रस्तौति—प्रकृतीति । स्वाम्यादिप्रकृतीनां व्यसनं यस्मात् तस्मात् प्रशाम्य समुत्पतेत् यात्रां दद्यात् । व्यसनं च कुतो भवतीत्याह—अनयापनयाभ्यां तद्व्यसनं जायते । अनयापनयलक्षणं च कौटिल्योक्तं तद्यथा—मानुषं नयापनयौ । मानुषं विजिगीष्वादिमनुष्यकृतम् । तच्च दृष्टमित्युच्यते । तच्च द्विविधं नयापनयभेदात् । एवं षाड्गुण्यस्य यथावस्थानं (तस्मिन् योगक्षेमनिष्पत्तिः) नयः ; तद्विपर्ययोऽपनयः । दैवमयानयौ । अदृष्टकारितं तदुच्यते । तस्मिन्निष्टेन फलेन योगः अयः, अनिष्टेनानयः । एवमनयापनयाभ्यां व्यसनं जायते । दैवतोऽपि दैवादग्न्यादिदेवभयाद् वक्ष्यमाणात् ॥ १८ ॥

[5] अभिधातुं

यस्माद्[24] हि व्यसति श्रेयस्तस्माद् व्यसनमुच्यते ।
व्यसन्यधोऽधो[25] व्रजति तस्मात् तत् परिवर्जयेत् ॥ १९ ।

---

[24] यस्मात् तद्व्यस्यति [25] व्यसत्यधो वा

19. That which retards progress and welfare is known as *Vyasana*,. and under the influence of *vyasana* a ruler goes down and down (or suffer decline in position and in resources). Hence *vyasanas* should by all means be avoided.

व्यसनशब्दं व्याख्यातुमाह—यस्मादिति । हि स्फुटम् । अस्यति दूरं क्षिपति श्रेयः परमाभ्युदयं यस्मात् तस्माद् व्यसनमुच्यते । व्यसनी पुरुषः अधोधः श्रियः पदात् पतित्वा अधोधो व्रजति तावद् यावद् रसातलम् । तस्मात् तत् परिवर्जयेदिति ॥ १९ ॥

हुताशनो जलं व्याधिर्दुर्भिक्षो[26] मरकस्तथा ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥ २० ।
दैवं पुरुषकारेण शान्त्या च प्रशमन्नयेत् ।[26a] ।
उत्थायित्वेन नीत्या च मानुषं कार्यतत्त्ववित् ॥ २१ ।

---

[26] दुर्भिक्षं [26a] प्रशमं नयेत्

20. Providential calamities are of five kinds, viz., Fire, Flood, Diseases, Famine and Pestilence; the rest are caused by human actions (omissions and commissions).

21. Providential calamities should be alleviated by manly efforts (*puruṣakāra*) as well as by propitiatory rites (*śāntikarma*), and those arising from human actions (i.e., from actions of enemies or of his own disaffected men) should be remedied by the wise ruler (*tattvavid*) through his energetic measures and adoption of sound policies (i.e., of *sāma, dāna* etc).

यदुद्दिष्टं दैवमिति तद्भेदानाह—हुताशन इति । हुताशनो वैश्वानरः । कारणं विनैव यदुद्धतो ग्रामं दहति तदेकं दैवम् । तथैव वरुणो जलेन प्लावयति तत् द्वितीयं जलाख्यम् । व्याधी रोगः । दुर्भिक्षं सस्यानामनिष्पत्त्या तदिति । मरक इन्द्रयमकोपादिति । पञ्चविधमपि दैवम् । मानुषं परमिति यदपश्चिममनयापनयलक्षणं तन्मानुषम् । यदिह जन्मनि अपनयाख्यं कृतं तद् दृष्टं, यज्जन्मान्तरे कृतं तदपि मनुष्यकृतमिति द्विविधमपि मानुषमिति भावः ॥ २० ॥

व्यसनोपशममभिधातुमाह—दैवमिति । दैवं पञ्चविधमपि हुताशनादि पुरुषकारेण हुताशनादीनां जलादिभिरुपशमनलक्षणेन पुरुषकारेण शान्त्या च अथर्ववेदोक्तया प्रशमं नयेत् । तथा उत्थायित्वेनोत्साह-रूपया शौर्यामर्षदाक्ष्यलक्षणेन नीत्या च षाड्गुण्य यथोद्देशावस्थापनलक्षणया मानुषमनयापनयलक्षणम् । कार्यतत्त्ववित् विजिगीषुरिति ॥ २१ ॥

साम्यादिमित्रपर्यन्तं प्राकृतं मण्डलं हि तत्।
[27]तत्र कर्म प्रवक्ष्यामि व्यसनञ्च यथाक्रमम् ॥ २२ ।

[27] तस्य

22. Now shall be related the functions of the (seven) constituent elements of the state, from the king to the allies, known as the *prakṛti-maṇḍala* (the internal statal circle) as well as their lapses (*vyasanas*) in proper order.

स्वाम्यादिप्रकृतिसप्तकस्यानुष्ठानानि व्यसनानि चाभिधातुमाह—स्वामीति। इति प्रतीतम् ॥ २२ ॥

मन्त्रो मन्त्रफलावाप्तिः कार्यानुष्ठानमायतिः।
आयव्ययौ दण्डनीतिरमित्रप्रतिषेधनम् ॥ २३ ।
व्यसनस्य प्रतीकारो राजराज्याभिषेचनम्[28]।
इत्यमात्यस्य कर्मेदं हन्ति स[29] व्यसनान्वितः ॥ २४ ।
अमात्यैर्व्यसनोपेतैर्ह्रियमाणो महीपतिः[30]।
अशक्त एवोत्पतति[31] छिन्नपक्ष इवाण्डजः[32] ॥ २५ ।

[28] राज्याभिरक्षणम् [29] हन्ति तद्व्यसनान्वितः
[30] हि भूपतिः [31] पतितुं
[32] इव द्विजः

23-24. Functions of ministers include deliberations (*mantra* i.e., formulation of State policies), securing (anticipated) results of policy decisions (*mantraphala*), planning for work to be undertaken in future (*kāryānuṣṭhānamāyatiḥ*), supervision of income and expenditure (of the state), administration of justice, taking (adequate) remedial measures against enemies, alleviation of evil effects of *vyasanas* (lapses and draw-backs) and (alertness) in protecting the king and the kingdom. All these functions suffer (i.e., are jeopardised) if a minister is under the influence of *vyasana* (vices).

25. In the event of ministers falling under the grip of *vyasanas*, the king himself becomes inactive like a bird whose wings are clipped off and he suffers decline and defeat (at the hands of his enemy).

बहुवक्तव्यत्वात् स्वामिकर्मव्यसनं पश्चाद्वक्ष्यति। अमात्यकर्म व्यसनं चाभिधातुमाह—मन्त्र इति। अमात्यस्य मन्त्रः पञ्चाङ्गः। तस्योपलब्धिलक्षणं प्रयोगपर्यन्तं कर्म मन्त्रशब्देन गृह्यते। मन्त्रफलावाप्तिरिति पृथिवीलाभपालनलक्षणम्। कार्यानुष्ठानमेतदेव कार्यं क्रियतामिति अनवरतं प्रेरणम्। आयतिरागामिनि काले यद् भविष्यति तस्याप्युपपत्तिः। आयः कोषोत्पत्तेर्निरूपणम्। व्ययः इति

सद्व्ययकरणम्। दण्डनीतिर्दण्डस्य, बधः परिक्लेशोऽर्थहरणं दण्ड्यं प्रति यथाशास्त्रं नयनम्। अमित्राणां बुद्ध्यतिशयेनैव प्रतिषेधनं निग्रहस्थाजनम्॥ २३॥

व्यसनस्येति। व्यसनस्य सकलस्य प्रतीकार उपशमनम्। राजराज्ययोः बुद्ध्याभिरक्षणमित्यमात्यस्य कर्मेदं हन्ति स मन्त्री व्यसनेन वक्ष्यमाणलक्षणेनान्वितः॥ २४॥

अमात्यस्य व्यसनं स्वामिन एव व्यसनं भवतीति दर्शयन्नाह—अमात्य इति। अमात्ये मन्त्रिणि व्यसनोपेते धूर्तैररिभिः ह्रियमाणोऽतिसन्धीयमानो महीपतिः स्वामी अशक्त एवोत्पतितुं अतिसन्धान प्रतीकारं कर्तुं छिन्नपक्ष इवाण्डजः पक्षीव। "सहायसाध्यं राजत्वमिति" वचनादिति॥ २५॥

[कोशो दण्डश्च कुप्यञ्च [33]विष्टिर्वाहनमेव च]
हिरण्यधान्य[34]वस्त्राणि वाहनानि तथैव च।
तथान्ये द्रव्यनिचयाः प्रजातः सम्भवन्ति हि॥ २६।

---

[33] पिष्टवाहन [34] वस्त्रधान्यादि वाहनादि

26. Treasury, army, raw products, free labour and vehicles or means of transport (all arise from the *Janapada* or *rāṣṭra,* i.e., from the people of the kingdom). It also produces gold (valuables), grains, textiles, horses and elephants, and other essential goods.

राष्ट्रस्य कर्म व्यसनं चाभिधातुमाह—हिरण्येति। हिरण्यं सुवर्णादि। धान्यं पूर्वमध्यावरवापं शाल्यादि। वस्त्राणि चीनपट्टादीनि। वाहनानि हस्त्यश्वादीनि। तथान्ये द्रव्यनिचयाः कांस्यलोहताम्रादयः। प्रजातो राष्ट्रनिविष्टायाः सकाशाद् सम्भवन्ति नान्यत इति॥ २६॥

वार्तां प्रजा साधयति वार्ता वै लोकसंश्रयः[35]।
प्रजायां व्यसनस्थायां न किञ्चिदपि सिध्यति॥ २७।

---

[35] संश्रया

27. *Vārtā* (or economic vocations, agriculture, cattle rearing and trade) is the source of sustenance of the subjects ; it is they who promote it. So when the subjects are under the influence of *vyasanas* (vices or disaffection), (all economic activities are disturbed) nothing is produced.

एतदेव स्पष्टयन्नाह—वार्तामिति। वार्ता कृषि पाशुपाल्यवाणिज्यलक्षणाम्[6]। प्रजा साधयति। वार्ता वै लोकसंश्रयः तया विना लोको न वर्तेत इत्यर्थः। प्रजायां ब्राह्मणादि वर्णेषु व्यसनस्थायां विपन्नायां सत्यां किञ्चिदपि न सिध्यति, सर्वेषां वार्तामूलकत्वात् इत्यर्थः॥ २७॥

[6] लक्षणम्

प्रजानामापदि स्थानं[36] रक्षणं कोशदण्डयोः।
पौराश्चैवोपकुर्वन्ति संश्रयायेह दुर्गिणाम्॥ २८।

---

[36] त्राणं

तुष्णीयुद्धं जनत्राणं[37] मित्रामित्रपरिग्रहः ।
सामन्ताटविकाबाधानिरोधो दुर्गमुच्यते ॥[38] २९ ।
स्वपक्षैः परपक्षैश्च दुर्गस्थः पूज्यते नृपः ।
एतद्धि दुर्गव्यसनात् सर्वमेव न विद्यते[39] ॥ ३० ।

[37] बलत्राणं

[38] दुर्गसंश्रयात्   [39] विपद्यते

28. It is the fort that provides security to the subjects in difficulty (i.e., in times of aggression by the enemy) as well as to the treasury and the army. Citizens sheltered securely within the fortified townships provide the master of forts (*durgī* or king) with valuable assistance (i.e., rich presents).

29. It is from the secure shelter of the fort that intrigues and secret wars (*tuṣṇīyuddha*) are conducted, necessary steps for amelioration of people's distress are taken, friends and foes are accommodated and disturbances created by the (disaffected) feudatories and foresters are remedied. Hence it is called *Durga* (or an invincible bastion).

30. A ruler well entrenched in his castle is respected by his own as well as by his enemies partisans. But when the fort is in the grip of *vyasana* (due to disrepair and/or inadequate defensive arrangement) the whole state is involved in danger.

दुर्गस्य कर्म व्यसनं चाभिधातुमाह—प्रजानामिति । प्रजानां चातुर्वर्णानामापदि परकृतायां स्थानं रक्षानिमित्तव्यवस्थितिः । तथैव रक्षणं कोशदण्डयोः । पौराः पुरे भवाः स्वजनाः कोशादिभिरुपकुर्वन्ति संश्रयाय । दुर्गिणां संश्रिताः पौरा निराबाधा व्यवहरन्तीति । दुर्गं विद्यते यस्य विजिगीषोस्तमाश्रिताः पौराः कोशादिभिरुपकुर्वन्तीति ॥ २८ ॥

तूष्णीमिति । दुर्गे स्थित्वा परैरविज्ञातोऽयं सहसा परितः पतित्वा युद्धं करोति तत् तूष्णींयुद्धम् । जनानामापन्नानां त्राणम् । मित्रामित्रयोर्व्यापन्नयोर्ग्रहो दुर्गबलादेव । सामन्ताः संसक्तास्त आटविकाः प्रतीतास्तत्कृताबाधा निरोधौ दुर्गेणैव क्रियते । एतत्सर्वं दुर्गेणैव विधीयत इति उपचारात् दुर्गमुच्यते ॥ २९ ॥

स्वपक्षैरिति । स्वपक्षैः परपक्षैश्च दुर्गस्थो विजिगीषुः पूज्यते दुर्गबलेन निग्रहानुग्रहक्षम इति । एतदनन्तरोक्तं दुर्गव्यसनात् निचयसंस्काराद्यभावलक्षणात् सर्वमेव न विद्यते ॥ ३० ॥

भृत्यानां भरणं दानं भूषणं वाहनक्रयः[40] ।
स्थैर्यं परोपजापश्च दुर्गसंस्कार एव च ॥ ३१ ।
सेतुबन्धो वणिक्कर्म प्रजामित्रपरिग्रहः ।
धर्मकामार्थसिद्धिश्च कोशादेतत् प्रवर्तते ॥ ३२ ।

[40] क्रियाः

कोशमूलो हि राजेति प्रवादः सार्वलौकिकः ।
एतत् सर्वं जहातीह[41] कोशव्यसनवान् नृपः ॥ ३३ ।
क्षीणं बलं वर्द्धयति स्वतो गृह्णाति[42] च प्रजाः ।
कोशवान् पृथिवीपालः परैरप्युपजीव्यते ॥ ३४ ।

---

[41] जहात्याशु [42] स्वतः पुष्णाति च

31. Maintenance of dependents (by regular payments), provisions for their rewards (by promotion in rank or other forms of recognition), decorations and vehicles (horses etc) necessary for the performance of their duties, stability of law and order position in the state and fomenting disaffection in the enemy's dominion (*paropajāpa*) as well as of necessary repairs to own fortifications (depend on a solvent treasury).

32. So also construction of dams and reservoirs, promotion of trade and commerce, acquisition of subjects (by developing new settlements or rehabilitation of old ones) and of enemies (by gifts and bribes) and achievements of the three ends of life (*Dharma, Artha* and *Kāma*) are dependent on the financial strength (*Kośa*).

33. The well known proverb (good for all time) goes '*Kośa* is the root of the king'. Hence with the affliction of *kosa* by *vyasanas* (i.e., when the treasury is deflated as a result of any lapses from within or without) everything is lost for the king.

34. A ruler, with a rich treasury (*Kośavān*), replenishes his weakened armed forces (by utilising necessary funds for the purpose) and also wins the heart (goodwill) of his subjects (by spending for their welfare, and he is respected and relied upon by his enemies even.

कोशप्रकृतेः कर्मव्यसने आह—भृत्यानामिति । भृत्यानां चतुरङ्गबलादीनाम् भरणं सर्वेषामिति । भरणं भृतिः दानमिति कर्म कामाभिसम्बन्धिनाम् । भूषणमलङ्करणम् । वाहनानां हस्त्यश्वादीनां क्रयो मूल्येन ग्रहणम् । स्थैर्यं कोशबलात् स्थिरत्वम् । परोपजापश्च शत्रुबलानां सम्भेदनम् । कोशादानाशाप्रदर्शनपूर्वकोपजापात् । दुर्गसंस्कार एव च कोशव्ययसाध्यः ॥ ३१ ॥

सेतुबन्ध इति । सेतुबन्धोऽखिल* शाल्यादिधान्यनिष्पत्त्यै तडागखननम् । वणिक्कर्म वाणिज्या कोशमूलैव । प्रजामित्रपरिग्रहः क्षीणप्रजामित्राणि कोशेनैव परिगृह्यन्ते । धर्मकामार्थसिद्धिश्च त्रिवर्गनिष्पत्तिश्च कोशादेतत् प्रवर्तते ॥ ३२ ॥

कोशमूल इति । कोशस्यव्यसनं क्षीणत्वम् । राजा हि कोशमूलः ; कोशाभावे न राजत्वनिष्पत्तिः इत्यर्थः । इति प्रवादः जनश्रुतिः सार्वलौकिकः सर्वलोकप्रसिद्धः । कोशव्यसनवान् नृपतिरेतत् सर्वं पूर्वोक्तसमुदायं जहाति । कोशाभावे किमपि न सिध्यति इति भावः ॥ ३३ ॥

क्षीणमिति । कोशवान् प्रभूतधनसम्पन्नः पृथिवीपालः क्षीणं संग्रामादिना अपचीयमानं बलं वर्द्धयति । स्वतश्च प्रजाः क्षीणाक्षीणा गृह्णाति । परैरपि शत्रुभिरपि उपजीव्यते । धनलोभेन शत्रवोऽपि तस्य कार्यं साधयतीत्यर्थः ॥ ३४ ॥

* बन्धोऽखिल विघातनिष्पत्त्यै

मित्रामित्र हिरण्यानां भूमीनाञ्च प्रसारणम्[43] ।
दूरकार्याशुकारित्वं[44] लब्धस्य परिपालनम्[45] ॥ ३५ ।
परचक्राभिघातश्च[46] स्वदण्डस्य परिग्रहः ।
दण्डादेतत् प्रभवति याति तद्व्यसने क्षयम् ॥ ३६ ।
अरयोऽपि हि मित्रत्वं यान्ति दण्डवतो ध्रुवम् ।
दण्डप्रायो हि नृपतिर्भुनक्त्याक्रम्य मेदिनीम् ॥ ३७ ।

[43] प्रसाधनम् [44] कार्येषु कारित्वं
[45] प्रतिपालनम् [46] परचक्रं विघातश्च ; विनाशश्च

35-36. Acquisition of friends and enemies (the latter by winning over), and of gold (or wealth) and territories, quick accomplishment of works (*āśukāritvaṁ*) long deferred for the future and protection of what has already been acquired, as well as breaking the organisation of the partisans of the enemies (*paracakrābhighāta*) and strengthening of his own striking power, are all achieved by the army (*daṇḍa*), which when gripped by *vyasanas* (i.e., when weakness grows in the ranks of armed forces) leads to inevitable loss.

37. To a king endowed with a strong military power, enemies also seek friendship (overawed by his strength). So a ruler (*vijigīṣu*) possessing a large (and organised) army is in a position to conquer and enjoy (domination over) the world.

दण्डकर्मव्यसने चाभिधातुमाह—मित्रामित्रहिरण्यानामिति । मित्राणि बान्धवाः, अमित्राः शत्रवः, हिरण्यानि च भूमयश्च तासां सिद्धयो, यातव्यसाधनम् । दूरकार्येष्वाशुकारित्वं व्यवहितेष्वपि प्राप्यकारित्वं, लब्धस्य भूमाद्यर्थस्य परिपालनं दण्डसाध्यमेव ॥ ३५ ॥

परचक्रविघात इति । परचक्रविघातश्च परसम्बन्धिचतुरङ्गबलविनाशः । स्वदण्डस्य परेण पीड्यमानस्य परिग्रहो रक्षणम् । दण्डादेतदनन्तरोक्तं प्रकर्षेण भवति, तद्व्यसने क्षयं याति ॥ ३६ ॥

अरयोऽपीति । शत्रवोऽपि भयान्मित्रत्वं यान्ति दण्डवतो नृपतेर्ध्रुवं निश्चयेन । दण्डप्रायो हि नृपतिर्भुनक्त्याक्रम्य मेदिनीमिति प्रतीतम् ॥ ३७ ॥

संस्तम्भयति मित्राणि [46a]ह्यमित्रं नाशयत्यपि ।
भूकोशदण्डैर्भजति प्राणैश्चाप्युपकारिताम् ॥ ३८ ।
[47]ततः करोति सुहृदु मित्रं[48] स्नेहनिबन्धनम् ।
तस्मिन् व्यसनमापन्ने मित्रकर्म न विद्यते ॥ ३९ ।

[46a] शत्रूनुत्सादयत्यपि ; त्वमित्रान्नाशयत्यपि
[47] ततत् [48] त्रि च वहिर्मित्रं

उपकाराद्धृते ह्याशु[49] मित्रं श्रेयसि तिष्ठति ।
मित्रवान् साधयत्यर्थान्[50] दुःसाध्यानप्यनादरात् ॥ ४० ।

[49] उपकाराद्धृतेप्याशु [50] दुस्साध्या

38. Faithful allies (of the *vijigiṣu*) not only help in crushing the enemies but also risk their own dominion, wealth and army and even their lives for the benefit (of the *vijigiṣu*).

39. Such (favourable) services are rendered by an ally out of deep feelings of affection. But no friendly service would be available from an ally influenced by *vyasanas* (i.e., himself being in distress or disaffected against the *vijigiṣu*).

40. A faithful ally stands by the *vijigiṣu* in promoting his welfare without expecting any return. Hence a ruler supported by such allies succeeds in difficult ventures with ease.

मित्रप्रकृतेः कर्माभिधातुमाह—संस्तम्भयतीति । मित्राणि विचलन्ति संस्तम्भयति स्थिरत्वं हानिं करोति । अमित्रांस्तु विजिगीषोः[8] शत्रून्नाशयत्यपि । भूकोशदण्डैर्व्रजतीति प्रतीतम् ॥ ३८ ॥

तदिति । तत्तत् विजिगीषोर्हितं सुबहु तदभिलषितादेवाधिकं करोति । मित्रं स्नेहनिबन्धनं स्नेह एव मित्रस्य संश्लेषकृत् । तस्मिन्निति मित्रे व्यसनमापन्ने मित्रसाध्यं कर्म न विद्यत इति ॥ ३९ ॥

उपकारादिति । उपकारं विनापि मित्रभावेन यन्मित्रम् तत् श्रेयसि विजिगीषोस्तिष्ठति । श्रेयस्करं भवतीत्यर्थः । तथा मित्रवान् साधयत्यर्थान् इति प्रतीतम् ॥ ४० ॥

[8] विजिगीषुः

अन्वीक्षणञ्च विद्यानां [51]स्ववर्णाश्रम रक्षणम् ।
ग्रहणं शुद्धशस्त्राणां[52] युद्धमार्गेऽपि[53] शिक्षणम् ॥ ४१ ।
व्यायामः शस्त्रविज्ञानं कर्मणां[54] लक्षणानि च ।
गजाश्वरथपृष्ठेषु यथावत् सम्प्रवर्तनम् ॥ ४२ ।
नियुद्धकुशलं[55] माया परचित्तप्रवेशनम्[56] ।
धूर्तता शाठ्ययुक्तेषु सततं सद्व्रत[57]दर्शनम् ॥ ४३ ।
मन्त्रोद्योगोऽनुमन्तत्वं तद्रक्षा स्वास्थ्यमेव[58] च ।
उपेक्षा सामदानस्य[58a] भेदो दण्डस्य[59] साधनम् ॥ ४४ ।

[51] सद्वर्णाश्रम [52] शस्त्रशास्त्राणां
[53] युद्धमार्गोपशिक्षणम् [54] वर्मणां
[55] कौशलं [56] प्रवेदनम्
[57] सद्वृत्त [58] तात्स्थ्यमेव च
[58a] दानव [59] दण्डश्च साधनम्; दण्डप्रसाधनम्

प्रशास्त्रध्यक्षसेनानां[60] मन्त्र्यमात्यपुरोधसाम् ।
सम्यक् प्रचारविज्ञानं दुष्टानाञ्चावरोधनम्[61] ॥ ४५ ।

---

[60] प्रशास्तृसूतसेनानी [61] श्चापरोपणम् ; श्चावरोपणम्

41-42. Functions of the *Vijigiṣu* have been enumerated to be pursuit of learning (*Trayī, vārtā* and *daṇḍanīti*), protection of the *varṇas* and *āśramas* (maintenance of the social order), study of the science of using weapons and of modes of warfare (*yuddhamārga*), regular exercises in the technicalities of armaments production (*śastravijñānam*) including various defensive implements, *varmaṇāṁ* (like helmets, breastplates etc), and also in the proper methods of riding elephants, horses and chariots.

43. To be adept in the techniques of wrestling (*niyuddha*) and in using relevant tricks (*māyā*), to be able to read the minds (designs and intentions) of others, to be clever (in dealing) with deceptive people and to be honest with the honest.

44. To be always active in deliberations (with the counsellors) and and in taking decisions on the deliberated policies, as also maintenance of secrecy of the same and in adopting the relevant measures of overlooking or not taking action (*upeksā*), conciliation (*sāma*), gifts or bribes (*dāna*), dissension (*bheda*) and use of coercion (*daṇḍa*).

45. To be well informed of the activities and movements of the Superintendent of armaments (*praśāstṛ* or magistrates, according to some), charioteers (*sūta*, or ministrels according to some), commanders of the army, ministers and heads of administrative departments and priests, and to take disciplinary action (like dismissal etc.) against those acting against his (king's) interests.

स्वामिप्रकृतेः कर्माभिधातुमाह—अन्वीक्षणमिति । विद्यानां त्रयीवार्तादण्डनीतीनाम् अन्वीक्षणं प्रत्यक्षादिनेक्षितस्यानु पश्चादीक्षणमनुमानैः परामर्शः । किमेतत् प्रत्यक्षं प्रत्यक्षाभासो वा ? किमयमागमो विधिवादको विपरीतको वेति विचार्य न्यायवैशेषिकोक्तन्यायेन विद्यानामन्वीक्षणं विजिगीषो राज्ञः कर्म । सद्वर्णाश्रमरक्षणम् सन्तो ये सदाचारत्वात् वर्णाश्रमास्तद्रक्षणम् । शास्त्रविषये यानि शास्त्राणि धनुर्वेदादीनि (तेषां ग्रहणं) युद्धमार्गोपशिक्षणमिति युद्धानि प्रकाशकूटतूष्णीयुद्धादीनि तन्मार्गाणां तदनुष्ठानन्यासानामुपशिक्षणं क्षत्रियाणां प्रधानमिदं कर्मेति ॥ ४१ ॥

व्यायाम इति । व्यायामः शास्त्रोक्तन्यायेन आलीढप्रत्यालीढादिस्थानकरणादिष्वभ्यासः । शास्त्रविज्ञानं° लोहाकरपरिज्ञानादि । वर्मणां कवचावरणादीनां लक्षणानि । वर्मशब्देन फलकस्फुरकादिवाम-हस्तग्राह्यशरीरावरणं तल्लक्षणानि च । गजाश्वरथपृष्ठेषु यथावत् सम्प्रवर्तनं जितश्रमत्वापादनार्थम् ॥ ४२ ॥

नियुद्धेति । नियुद्धं मल्लयुद्धं तत्कौशलम् । माया कृतलवणादि रूप[10]परावर्तादिका । परचित्तप्रवेशनं परचित्तप्रवेशस्तद्भावभावित्वेन भवति । तथा चोक्तम्—"यस्य यस्य हि यो भावस्तेन तेनहि तं नरम् । अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ।" इति ॥ ४३ ॥

मन्त्र इति। मन्त्रे पञ्चाङ्गे सर्वदा उद्योगः। अनुमन्त्रत्वं मन्त्रिभिः कृते मन्त्रेऽनुपश्चात् मन्त्रत्वम्। तद्रक्षेति मन्त्ररक्षा। तात्स्थ्यमेव च मन्त्र एव सर्वदा स्थानम्। उपेक्षा साम दानं च भेदो दण्डश्च (तेषां) प्रसाधनम् ॥ ४४ ॥

प्रशास्त्रिति। प्रशास्ता सैन्यप्रसाधकः। अध्यक्षः उक्तव्यतिरोक्तो नियोगी। सेनानीः सेनापतिः। मन्त्र्यमात्यौ प्रसिद्धौ। पुरोधाः पुरोहितः। तेषां प्रशास्त्रादीनां यः प्रचारः सञ्चारः स्वामिहितः तद्विपरीतो वा। तस्य सम्यक् विज्ञानम्। दुष्टानामहितकारिणां वा अध्यक्षाणामपरोपणं नितोगादपनयनम् ॥ ४५ ॥

[9] शस्त्रविज्ञानं [10] कृतापलायादिरूप ; कृतकवर्णरूप ; कृतककायादिरूप

गतागतपरिज्ञानं दूतसम्प्रेषणानि च।
प्रकृतिव्यसनापोहः क्रुद्धप्रशमनानि च ॥ ४६ ।
गुरुणामनुवृत्तिश्च पूज्यानाञ्चाभिपूजनम्[62]।
धर्मासनप्रतिष्ठानं[63] राज्य कण्टकशोधनम् ॥ ४७ ।
भूताभूतपरिज्ञानं कृताकृतपरीक्षणम्।
तुष्टातुष्टविचारश्च सर्वेषामनुजीवनम्[64] ॥ ४८ ।
मध्योदासीनचरितज्ञानं तत्सिद्धिपालनम्[65]।
परिग्रहस्तु[66] मित्राणाममित्राणाञ्च निग्रहः ॥ ४९ ।
पुत्रदारादिभिर्गुप्ति[67]र्बन्धुवर्गपरिग्रहः।
स्ववृद्धिपवनादीनां[68] स्ववृत्तीनां प्रवर्तनम् ॥ ५० ।

---

[62] पूज्यानामनुपूजनम् ; नां चापि पूजनम्
[63] धर्मस्थसम्प्रतिष्ठानं [64] जीविनाम्
[65] सन्धिपालनम् [66] प्रतिग्रहश्च
[67] दारादिगुप्तिश्च बन्धु [68] खनिद्वीपवनादीनां

46. To be informed of the purposes of those who come to and go away from him (the ruler) (i.e., his visitors and messengers) and also about the deployment of envoys (or ambassadors), to take remedial measures against calamities afflicting the state elements (*prakṛtivyasana*) and to appease the angry or disaffected section of the subjects.

47. Obedience to (or acting upon the advice of) the elders (i.e., the wise), honouring those who deserve it, establishment of courts of law (for administration of justice) and suppression of anti-social elements (*kaṇṭaka-śodhana* or removal of thorns) of the state.

48. To be aware of the scales of remuneration for the different grades of employees, to assess the outturn of their work and the amount of work not done, and also to take cognisance of the nature of satisfaction or otherwise (i.e., grievances) of all employees.

49. To be well informed of the attitude of the *Madhyama* and *Udāsīna* powers (in the inter-statal circle) and to utilise them favourably for the purpose of his own success (by concluding suitable alliances with them), to provide support to friendly powers and to harass those who are hostile.

50. To arrange for necessary protection of his sons and wives (i.e., princes and queens), to maintain (cordial) relations with relatives (agnates and cognates), and to promote (economic activities),—the working of mines, development of deltaic regions and irrigated lands (*dvīpa*), forests and other sources of revenue *khanidvīpa-vanādīnām* and thus discharge his reasonable functions.

गतागतपरिज्ञानमिति। यः कारणादकारणाद्वा गतश्चागतश्च तस्य परिज्ञानम्। दूतसम्प्रेषणानि च प्रकृतिव्यसनापोहः। क्षुद्रानां प्रशमनानि महीपतेर्वृत्तमित्युत्तरेण सम्बन्धः ॥ ४६ ॥

गुरुणामिति। उपाध्यायादीनामनुवृत्तिरनुकूलत्वेन प्रवर्तनम्। पूज्यानामिष्टदेवतानां च पूजनम्। धर्मस्थैः सह विवादपदविचारार्थं सम्प्रतिष्ठानमास्थानोपवेशनम्। राज्यकण्टकाः दूष्यात्मानः चौर-पारदारिकादयः तच्छोधनं हिरण्यदण्डेन वा वधदण्डेन वा ॥ ४७ ॥

भूतेति। अस्य व्याख्यानं सुगमम् ॥ ४८ ॥

मध्येति। सुगममेतत् ॥ ४९ ॥

पुत्रेति। पुत्रदारादिगुप्तिः पारदारिकत्वादि निषेधार्थम्। राज्ञा स्ववृत्तीनां प्रवर्तनं कोशवृद्ध्यर्थं चेति ॥ ५० ॥

असतांश्च परिक्लेशः[69] सतांश्च परिगूहनम्।
[70]अहिंसा सर्वभूतानां अधर्माणाञ्च वर्जनम् ॥ ५१ ।
अकार्यप्रतिषेधश्च कार्याणाञ्च प्रवर्तनम्।
प्रदानञ्च प्रदेयानामदेयानाञ्च [71]संग्रहः ॥ ५२ ।
अदण्डनमदण्ड्यानां दण्ड्यानाञ्चापि दण्डनम्।
अग्राह्याग्रहणञ्चैव ग्राह्याणां ग्रहणं तथा ॥ ५३ ।
अर्थयुक्तस्य करणमनर्थस्य च वर्जनम्।
न्यायतश्च करादानं स्वयं वा[72] प्रतिमोक्षणम् ॥ ५४ ।
संवर्द्धनं[73] प्रधानानां निरस्यानाञ्च निर्हृतिः[74]।
वैषम्यानां प्रशमनं भृत्यानाञ्चाविरोधनम् ॥ ५५ ।

---

[69] परिक्षेपः

[70] अभूतानां च हिंसानामधर्माणाञ्च वर्जनम्

[71] मदेयानामसंग्रहः [72] स्वयञ्च

[73] समर्थनं [74] निरस्यानां निराकृतिः

अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः ।
आरम्भः कर्मणां शश्वदारब्धस्यान्तदर्शनम् ॥ ५६ ।
अलब्धलिप्सा न्यायेन लब्धस्य परिवर्द्धनम्[78] ।
परिवृद्धस्य विधिवत् पात्रे सम्प्रतिपादनम् ॥ ५७ ।

---

[78] च विवर्धनम्

51. To punish (or shun the company of) the dishonest and to provide support to the honest, to observe non-violence to all beings and to avoid acts repugnant to tradition (undertaken out of malice and against the injunctions of the Śāstras).

52. To abstain from useless (infructuous) acts and to pursue worthy ones, to give away (by way of gifts and rewards) such objects as are fit to be given and not those that are unfit for giving (i.e. heirlooms etc), which must be carefully preserved.

53. To abstain from awarding punishments to those exempted (*adaṇḍyānām*) and award punishments to those who deserve it, to refuse acceptance of unworthy objects and to accept only those that are acceptable.

54. Performance of profitable (likely to yield benefit) jobs and abstinence from unprofitable or infructuous ones or those likely to produce loss, realisation of taxes reasonably (at the normal rates) and remission (in deserving cases) after due consideration by himself.

55. Confirmation (of the actions) of the principal officers and dismissal of the inefficient ones, removal of disparities among officers of the same cadre (in matters of status as well as of emoluments) and also of causes for mutual acrimony and disputes among them.

56. To gain accurate knowledge of what is unknown and to be sure and well grounded about what has been known already, to start worthy ventures and to see the end of (successful completion of) works embarked upon.

57. Desire for acquisition by lawful means of what is still unacquired, development or multiplication of what has been achieved and employment of (the profits of) the developed acquisitions in deserving purposes (i.e., welfare of the state).

असतामिति । असतां दुर्वृत्तानां परिक्लेशः दण्डदानादिना क्लेशप्रदानम् । (पाठान्तरे परिक्षेपः परित्यागः)। सतां सत्पुरुषाणां परिगृहणं संवरणम् । अहिंसा सर्वभूतानामधर्माणाञ्चवर्जनम् (पाठान्तरे-अभूतानां शास्त्रनिषिद्धानाम् हिंसानामधर्माणां च वर्जनम्) ॥ ५१ ॥

अकार्येति । प्रदेयानां दानार्हाणाम् । अदेयानां कुलधनादीनाम् । शेषं प्रतीतम् ॥ ५२ ॥

अदण्डनमिति । अदण्ड्यानां निर्दोषाणाम् । अग्राह्याणां ब्रह्मदेयादीनां दण्डकरादि तदग्राह्यं, तस्याग्रहणम् । ग्राह्याणां सद्द्रव्यादीनां ग्रहणम् ॥ ५३ ॥

अर्थयुक्तस्येति। अर्थोऽत्र त्रिवर्गस्तद्युक्तो यस्तस्य करणं तथा अनर्थस्य निरर्थस्य। स्वयं वा अजाविकादेः[11]। प्रतीतम् ॥ ५४ ॥

संवर्द्धनमिति। प्रधानानां संवर्द्धनं पालनम्। (पाठान्तरे समर्थनमिति समर्थकरणम्)। निर्हृतिर्निर्धारणम्। वैषम्याणां देवमानुषकृतानां व्याधिदुर्भिक्षमरणादीनाम्[11a] ॥ ५५ ॥

अविज्ञातस्य। निश्चयस्तत्त्वाभिनिवेशः। तथा चोक्तं—शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहनिविष्टं विद्या विनयति, रमयति। कर्मणां पृथ्वीलाभपालनादीनामन्तदर्शनमसमाप्य नावस्थातव्यम् ॥ ५६ ॥

अलब्धेति। पात्रे सम्प्रतिपादनमिति ब्राह्मणादिषु धर्माभिसन्धिना, महामात्येष्वर्थाभिसन्धिना, सत्कलत्रादिषु कामाभिसन्धिना ॥ ५७ ॥

[11] अजावित्तादेः [11a] दुर्भिक्षपीड़नादीनाम्; दुर्भिक्षडमरादीनाम्

अधर्मप्रतिषेधश्च न्यायमार्गानुवर्तनम्[76]।
उपकार्योपकारित्वमिति वृत्तं महीपतेः ॥ ५८ ॥

---

[76] मार्गेण वर्तनम्

58. Abstinence from unrighteousness and pursuit of the path of justice, and (lastly), demonstrations of gratitude to one who rendered benefit by doing good to him in return; these are the salient duties of the ruler.

अधर्मेति। एतत् सर्वं महीपतेः राज्ञः वृत्तम् अवश्यमवलम्बणीयम्। उपकार्युपकारित्वं कृतमेतन्महीपतेरित्यत्र वृत्तम् ॥ ५८ ॥

एतत् सर्वममत्यादि राज्यं[77] नयपुरःसरः।
नयत्युन्नतिमुद्युक्तो व्यसनी क्षयमेव तु[77a] ॥ ५९ ॥
तस्मिन् धर्मार्थयोर्व्यग्रे तथा[78] चास्वस्थचेतसि।
सर्वमेतदशेषेण[79] मन्त्री सन्धातुमर्हति[80] ॥ ६० ॥

---

[77] राजा नयपुरस्परः [77a] च [78] तथैवास्वस्थ
[79] मेतद्विशेषेण [80] सन्नेतुमर्हति

इति प्रकृतिकर्म नामैकविंशं प्रकरणम् ॥

59. All the elements of state from the ministers onwards are led to prosperity by a righteous and energetic ruler, but if he is addicted to passions (*vyasanī*), the state in all its elements perishes.

60. If the king is excessively attached to religious performances or to acquisition of (personal) wealth (i.e., privy purse) or if he is mentally diseased (or suffering from the loss of mental balance), all these (state) functions ought to be discharged by the ministers possessing requisite qualities.

एतदिति। एतत्सर्वमनन्तरोक्तममात्यादि[12]राज्यं च नयपुरस्सरो राजा नयत्युन्नतिमुद्युक्तः सन्। व्यसनी तु क्षयमेव नयति ॥ ५६ ॥

तस्मिन्निति। राजनि धर्मोपार्जनार्थोपार्जनयोर्व्यग्रे तथाचास्वस्थचेतसि सर्वमेतदशेषं मन्त्री सन्नेतुमर्हति सम्यक् करोतीत्यर्थः ॥ ६० ॥

[12] रोक्तं यथायोग्यममात्यं राज्यं च

इति प्रकृतिकर्मनामैकविंशं प्रकरणम् ॥

२२। प्रकृतिव्यसनप्रकरणम्।

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च।
पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः ॥ ६१ ।

Prakaraṇa : 22

Prakṛtivyasana

(Vices or corruption of statal elements)

61. Use of harsh (or abusive) language, award of excessive punishments, abuses of wealth, addiction to wine, women, hunting and gambling are the *vyasanas* of the ruler (affecting normal administration).

एवं प्रकृतिसप्तकस्य प्रत्येकं कर्म प्रतिपादितं, व्यसनमिदानीं प्रतिपाद्यते—वागिति। वाक्पारुष्यं वचनैः परदुःखोत्पादम्। दण्डपारुष्यं तीक्ष्णदण्डता। अर्थदूषणमिति—"अदानमादानं विनाशः परित्यागो वार्थस्येत्यर्थदूषणम्" आह कौटिल्यः (८।३।२६)। अदानं पूर्वदत्तस्य पुनरदानं[13] तेन पूर्वदत्तोऽप्यर्थो विनष्टो भवति। आदानमिति दत्तस्य पुनराच्छेदनमपि तथैवानर्थाय भवति। नाशोऽपि चौरादिभिरपहारोऽपि। त्याग इत्युपनतस्यार्थस्य परित्यागः। इत्येवं दूषणमुच्यते। पानं मद्यपानम्, स्त्रीतदासक्तिः[14]। मृगया पापर्द्धिः। द्यूतमक्षक्रीडादि इत्यादिव्यसनं, पृथिवीपतेरिति। उपलक्षणमेतत् सामान्यजनस्यापि[15] तथा ॥ ६१ ॥

[13] पुनश्च यददानं [14] स्त्रीषु आसक्तिः, अक्षक्रीडादि

[15] मेतत् चामात्यजनस्यापि

आलस्यं स्तब्धता दर्पः प्रमादो वैरकारिता।
इति पूर्वोपदिष्टं हि[31] सचिवव्यसनं स्मृतम् ॥ ६२ ।

---

[31] पदिष्टश्च

62. Idleness (or procrastination), arrogance, conceit, inadvertence and ill feeling (with others) along with those stated already (in the case of the ruler) are known as the *vyasanas* of ministers.

मन्त्रादिपठितान्यपि व्यसनान्यभिधातुमाह— आलस्यमिति। आलस्यमनुद्योगः। स्तब्धता गुरुष्वप्रश्रयः। दर्पः शौर्याद्यहङ्कारः। प्रमादो गीतादिषु श्रोत्रेन्द्रियाद्यासक्तिः। वैरकारिता कारणं विनैव बहुभिः सह वैरकरणम्। अतिदेशमभिधातुमाह—इति पूर्वोपदिष्टमिति। इत्येतदालस्यादि पञ्चसंख्यं पूर्वोपदिष्टं च वाक्पारुष्यादि सप्तसंख्यं यथा महीपतेस्तथा सचिवस्यापि व्यसनमिति ॥ ६२ ॥

अतिवृष्टिरनावृष्टिः शलभाः मूषकाः[82] शुकाः।
असत्करश्च दण्डश्च परचक्राणि तस्कराः ॥ ६३ ।
राजानीकप्रियोत्सर्गो मरक[83] व्याधिपीडनम्।
पशूनां मरणं[84] रोगो राष्ट्रव्यसनमुच्यते ॥ ६४ ।

[82] वृष्टिर्मूषकाः (मूषिका) शलभादयः ; मूषकाः शलभाः शुकाः

[83] मारकं [84] व्यसनं

63-64. Excessive rains or drought, (damage of crops by) rats, locusts, birds and others, unjust (or exorbitant) levy of taxes, and imposition of punishments, enemy actions and depredation by thieves and others, as well as irregular collections by king's favourites, visitations of pestilence and epidemics and also cattle mortality and diseases, are said to be the *vyasanas* of the kingdom (or the country part, *rāṣṭra*).

राष्ट्रव्यसनमभिधातुमाह—अतिवृष्टिरिति। असत्करः असदुपायेन करसंग्रहः। परचक्राणि विपक्षभूपालादिकृताक्रमणावरोधविलुण्ठनादिकम्। तस्करा आटविकादयः। शेषं सुगमम् ॥ ६३ ॥

राजानीकेत्यादि। राजानीकानां स्वामिबलानां, प्रियाणां च स्वामिवल्लभानां राष्ट्रे उत्सर्गः स्वयंग्राहप्रवर्तनं[16] राष्ट्रव्यसनमुच्यते ॥ ६४ ॥

[16] ग्राहः राष्ट्र

विशीर्णयन्त्रप्राकारपरिखात्वमशस्त्रता।
[84a]क्षीणवासेन्धनात्वं दुर्गव्यसनमुच्यते ॥ ६५ ।

[84a] क्षीणघासे

65. Inadequacy of machinery of war, decay and disrepair of ramparts and moats surrounding the forts, shortage of munitions or weapons, and of fodder (for horses, elephants etc.) and fuels, are said to be the *vyasanas* of the fort (*durga*).

दुर्गव्यसनमभिधातुमाह—विशीर्णेति। यन्त्राणि बहुमुखसर्वतोभद्रजामदग्न्यादीनि। प्राकारपरिखे प्रतीते। तद्विशीर्णं भग्नं यत्र तत्त्वम्। अशस्त्रता धनुरादिशस्त्ररहितत्वम्। घासो हस्त्यादीनामाहारः। इन्धनाम्भे प्रतीते। तत्क्षीणत्वं दुर्गव्यसनमुच्यते ॥ ६५ ॥

व्ययीकृतः परिक्षिप्तो भक्षितोऽसञ्चितस्तथा।
मुषितो दूरसंस्थश्च कोशव्यसनमुच्यते ॥ ६६ ।

66. Extravagance, scattering of resources (in unproductive ventures), misappropriation (*bhakṣita* by dishonest employees) lack of savings (or balances in the treasury), losses by theft, robbery and remoteness of realisation of dues (or bad debts) are said to be *vyasanas* of the treasury (*kośa*).

कोशव्यसनमभिधातुमाह—व्ययीकृत इति। व्ययीकृतो भृत्यादिभ्यो दत्तः। परिक्षिप्तो बहुधा विक्षिप्तः। भक्षितो रक्षकादिभिः। असञ्चितस्तथा असंगृहीतः। मुषितश्चौरादिभिः। दूरसंस्थो व्यवहितः। प्रस्तावे कोशसाध्यस्य कार्यस्याकरणात् इत्येतत् कोशव्यसनम् ॥ ६६ ॥

उपरुद्धं परिक्षिप्तं विमानितममानितम्।
अमतं[85] व्याधितं श्रान्तं दूरायातं नवागतम् ॥ ६७ ।
परिक्षीणाग्ररहितं[86] प्रहताग्रजवं तथा।
आशानिर्वेदभूयिष्ठ[87] मनृतप्राप्तमेव च ॥ ६८ ।
कलत्रगर्भं [88]विक्षिप्तमन्तःशल्यं तथैव च।
भिन्नगर्भं ह्यपसृतमवियुक्तं[89] तथैव च ॥ ६९ ।
कुद्धमौला[90] विमिश्रश्च विशिष्टश्चापि[91] विद्विषा।
दूष्ययुक्तं [92]स्वविक्षिप्तं मित्रविक्षिप्तमेव च ॥ ७० ।
विच्छिन्नवीवधासारं शून्यमूलं[93] तथैव च।
अस्वामिसङ्गतश्चापि[94] भिन्नकूटं तथैव च ॥ ७१ ।
दुष्पार्ष्णिग्रहमन्धश्च[95] बलव्यसनमुच्यते।
अत्र किञ्चिदसाध्यञ्च[95a] किञ्चित्साध्यन् तदुच्यते ॥ ७२ ।

---

[85] अमृतं [86] परिक्षीणं प्रतिहतं

[87] निर्वेद्यभूमिष्ठ [88] कलत्रगर्भ्यतिक्षिप्त ; गर्भ्यधिक्षिप्त

[89] सृतमवमुक्तं ; सृतं परिकृष्टं (परिसृष्टं)

[90] मौलारिमिश्रम ; मौलारिमिश्रं च ; मौलं विमिश्रं च

[91] निविष्टं चापि [92] च विक्षिप्तं

[93] छिन्नमूलं [94] सङ्गतंचैव

[95] प्राहमन्धं च ; प्रहसम्बद्धं च [95a] दसाध्यं तु

67-72. The *vyasanas* of the army (*bala*) are said to be as follows : To be besieged (by the enemy forces) or to be surrounded on all sides, to be disgraced or (whose services are) not duly recognised, to be ill-paid (*abhṛtaṁ*, to be disaffected on that account), diseased, tired (or overworked) or returning from distant marches, and to be composed of new recruits (*navāgataṁ*, as such untrained) ; to be reduced in number (due to losses suffered in battles), or defeated (at the hands of the enemy),

when leaders of the regiments having been killed or when the ranks are leaderless (*prahatāgrajavaṁ*), to be excited with hopes or depressed with hopelessness, and suffering from inadequate supplies; to have women (in the camps) or spies (of the enemies) in the ranks (*antaḥśalyaṁ*), to be disorganised or un-coordinated (due to dissensions among leaders), or when sent out on long marches (to distant and inhospitable regions), or when captains of battalions are removed or dismissed (for alleged disaffection under the influence of enemy agents); or when a section of the permanent forces (*maula*) are angry or dissatisfied due to contradictory commands, to be faced with a strong enemy united with his allies (*arimitras*) in action against the ruler out of their feelings of hostility, whereas his own men as well as his own allies act against his interests guided by evil motive; when sources of supply of provisions as well as replenishments of troops from allies are disrupted (*vicchinna-vīvadhāsāraṁ*) or when the army is so placed as to feel hopeless of shelter or support (*śūnyamūlaṁ*), when any action is taken by soldiers without the consent and approval of the master, or when the army is in a confused state (*bhinna-kūṭaṁ*); and when it is ignorant of (the movements of) the wicked rearward enemy (*duṣparṣṇigrāha*), and blind to the situation of the theatre of war. Of these *vyasanas* (affecting the potentiality) of the army, some are irremediable and some may be remedied (with timely actions), it is said.

बलव्यसनोद्देशमभिधातुमाह—उपरुद्धमित्यादि। उपरुद्धं शत्रुसैन्येन कृतोपरोधमित्यर्थः। परिक्षिप्तं परि समन्तात् वेष्टितं विशृङ्खलतया नानाप्रदेशे विकीर्णं वा। विमानितं विगतमानम् अपमानितम् इत्यर्थः। अमानितम् असम्मानिम्। अमतमिति अनिष्टम् अप्रियमित्यर्थः। अभृतमिति पाठे अप्रदत्तवेतनम्। स्पष्टमन्यत्॥ ६७॥

परिक्षीणेति। परिक्षीणाग्ररहितं परिक्षीणं हतभूयिष्ठम्, अग्ररहितं हतमुख्यप्रवीरम्, अधिनायकहीनमित्यर्थः। अग्रे अवः, वेगो यस्य सः अग्रजवः, संग्रामे अग्रवर्तीम्। प्रहताग्रजवः अग्रवर्ती वीरो यस्य तत्। आशानिर्वेदभूयिष्ठं आशया निर्वेदेन च भूयिष्ठम्। बलवत्या आशया बलवता निर्वेदेन च अनायत्तचित्तमित्यर्थः॥ ६८॥

कलत्रगर्भमिति। कलत्रं कुलस्त्री गर्भे विद्यते यस्य तत्। विक्षिप्तं अनेकराज्ये विकीर्णं दूरदूरं प्रेषितं वा। अन्तःशल्यं अन्तर्गतामित्रशल्यम्। भिन्नगर्भं अन्योन्यमेव निर्भिन्नम्। अपसृतं स्वराज्य एव मण्डलान्तरव्यवहितम्। अतिक्षिप्तं कदापि न देशान्तरितम्॥ ६९॥

क्रुद्धमौलेति। क्रुद्धमौलाविमिश्रं, मौलं पितृपैतामहं सैन्यम्। क्रुद्धं मौलं यत्र तत्। अविमिश्रं विमिश्रमस्तम्। विश्लिष्टा विश्लिष्टं शत्रुणा एकत्र स्थितम्। दूष्ययुक्तं दूष्येन विपक्षेण युक्तं मिश्रितम्। स्वविक्षिप्तं स्वविषये विक्षिप्तं विस्तरत् वर्तमानम्। मित्रविक्षिप्तं मित्रकार्यार्थं क्षिप्तम्॥ ७०॥

विच्छिन्नवीवधासारमिति। वीवधो धान्यादेः प्राप्तिः। आसारः सुहृद्बलम्। विच्छिन्नौ यस्मि

वीवधासारौ यत्र तत्। शून्यमूलं शून्यं मूलं जनपदे धनकलत्रादिरक्षास्थानं यस्य तत्। अस्वामिसङ्गतं स्वामिनोऽनुमतिं विना यत् सङ्गतम्। भिन्नकूटं भिन्नं पृथक् पृथक् कूटं छलं यत्र तत्॥ ७१॥

दुष्पार्ष्णिग्राहमिति। दुष्पार्ष्णिग्रहमन्धं चेति बलव्यसनोद्देशः। बलव्यसनान्युद्दिश्य यथाक्रमं तत्संख्यां साध्यासाध्यतां च व्याख्यातुमाह—अत्र किञ्चिदसाध्यमित्यादि। अत्रैतेषां बलव्यसनानां मध्ये किञ्चिदसाध्यं तु किञ्चित् साध्यं तदुच्यते॥ ७२॥

अपरुद्ध[96] हि युध्येत निर्गत्यात्यन्तमूर्जितम्[97]।
परिक्षिप्तं तु निर्मार्गं सर्वतः परिवेष्टितम्॥ ७३।
अमानितं हि युध्येत कृतमानार्थसंग्रहम्।
न विमानितमत्यर्थं प्रदीप्तक्रोधपावकम्॥ ७४।
युध्येताभृतमत्यर्थं तदात्वे कृतवेतन।
न व्याधितमकर्मण्यं व्याधितं[98] परिभूयते॥ ७५।
परिश्रान्तं हि युध्येत विश्रान्तं सुविधानतः।
दूरायातं हतप्राणं न शस्त्रग्रहणक्षमम्[98a]॥ ७६।
नवागतं हि [99]तद्देशैरमिश्रं युध्येत तन्नयात्।
हतमुख्यमवीरं[100] तु परिक्षीणं न युध्यते॥ ७७।
युध्येतेह[101] प्रतिहतं प्रवीरैः सह सङ्गतम्।
हताग्रजमनासक्तं[102] प्रमाथितपुरःसरम्॥ ७८।

---

[96] उपरुद्धं तु
[97] निर्गत्यान्यत ऊर्जितम्
[98] व्याप्तं च परि
[98a] शस्त्रग्रहणे क्षमम्
[99] युध्येत तद्देश्यैर्मिश्रितं नयात्
[100] हतमुख्यप्रवीरं
[101] युध्यते हि
[102] हताग्रवेगं शक्तं न

73. A besieged force, extricated from it, fights with greater energy, but one surrounded (by enemy forces) on all sides unable to pierce through the barricade (*nirmārgaṁ*) does not find any scope to fight.

74. Soldiers, not receiving due recognition earlier, will surely fight if given their due honour and rewards, but not so the disgraced ones for its burning fire of indignation.

75. Soldiers, ill-paid, will of course fight if payments are made to them up to date, but not those who are diseased, rather a diseased army is (easily) defeated.

76. An army, tired and fatigued will fight again after rest and recreation, but the one returning from distant campaigns with flagging energy (*hataprāṇaṁ*) will not soon be able to face campaigns (take up weapons).

77. Fresh recruits may fight if mixed with (put in companies of) trained soldiers of the realm, but not the troops whose front-rank officers have been killed (in action) or those reduced in number.

78. A defeated army, revitalised by brave warriors, fights again, but the army whose leaders are slain and the vanguard crushed will not be able to face the battle again.

बलव्यसनेषु किं साध्यं किमसाध्यमित्याह—उपरुद्धमिति। अपरुद्धं (उपरुद्धं वा) शत्रुणा कृतोपरोधम्। निर्गत्यान्यायनादिना[11] यदूर्जितं बलवद्भवति तदा युध्येत। परिक्षिप्तं नेति परि समन्तात् वेष्टितं, सर्वतः निर्मार्गं, न युध्येत ॥ ७३ ॥

अमानितमिति। कृतो मानार्थाभ्यां संग्रहो यस्य। न विमानितमिति विगतमानं न युध्येत; यतः प्रदीप्तक्रोधपावकम् ॥ ७४ ॥

युध्येतेति। युध्येताभृतमिति अकृतभरणं तत्कालकृतात्यर्थवेतनं युध्येत। न व्याधितं व्याधि-पीडितं युध्येत। अकर्मण्यं यतो यतो युद्धायोग्यं भवति यथा अरिभिर्व्याप्तं परिभूयते ॥ ७५ ॥

परिश्रान्तमिति। अध्वनि परिश्रमगतं युध्येत। विश्रान्तं सुविधानतः स्नानभोजनादिना प्रहत-श्रमम्। दूरायातमिति दूरात् मित्रकार्यप्रसिद्धायातम्। हतप्राणं निष्प्राणम्। न शस्त्रग्रहणक्षमं यतः ॥ ७६ ॥

नवागतमिति। नवागतमिति अभिनवागतम्। तद्देश्यैस्तद्देशभवैः बलैर्मिश्रं युध्येत तज्जयात् तद्देशोपदेशात्। हतमुख्यप्रवीरं त्विति हता मारिता मुख्यप्रवीरा युद्धधुरन्धरा यस्य तत्परिक्षीणं न युध्यते ॥ ७७ ॥

युध्येतेति। प्रतिहतमन्यैर्वीरैर्भग्नम्। सहसङ्गतः प्रवीरैः मिलितमिति। (हताग्रवेगं।) हताग्रजवं न शक्तं योद्धुं प्रतिविद्धपुरस्सरं यस्मात् ॥ ७८ ॥

[11] त्यान्यायादिना

आशानिर्वेदलब्धार्थं[103] पूर्णाशत्वात्[104] युध्यते।
नाभूयिष्ठप्रसारे तु[105] निरुद्धेऽल्पतया भुवः ॥ ७९ ॥
[106]युध्येतावृतसम्प्राप्तमपूर्वायुधवाहनम्।
कलत्रगर्भादुन्नीतकलत्रं[107] सत्त्वरक्षमम्[108] ॥ ८० ॥
अनेकराज्यान्तरितमतिक्षिप्तमयुध्यते[109]।
अन्तर्गतामित्रशल्यमन्तःशल्यं हि न क्षमम्[110] ॥ ८१ ॥

---

103 आशानिर्वेद्य ; आशानिर्वेदि लब्धा तु शुध्यते न तु युध्यते
104 पूर्णाशत्वात्तु
105 अभूमिष्ठं प्रसारे न
106 युद्धेनानृतसम्प्राप्तं यथार्हायुध
107 कलत्रगर्भि चोन्नीतकलत्रं
108 समरक्षमम्
109 मतिक्षीणं न युध्यते
110 च तत् सम

अन्योन्यमेव निर्भिन्नं[111] भिन्नगर्भं न युध्यते ।
तथा[112] चापसृतञ्चैव तथा राज्यान्तरीकृतम् ॥ ८२ ।
अधियुक्तं[113] ह्यपक्रान्तं योद्धुं न्तत्र क्षमं युधि ।
पितृपैतामहं मौलं तद् क्रुद्धं सान्त्वितं क्षमम्[114] ॥ ८३ ।
मित्रं[115] शत्रुभिरेकस्थं तदाक्रान्ततयाऽक्षमम् ।
शत्रोरुपनिविष्टं चासामर्थ्यान्न [116]क्षमं युधि ॥ ८४ ।*

---

[111] अन्योन्यस्माद्विनिर्भिन्नं ; अन्योन्य कोपनिर्भिन्नं

[112] तथैवापसृतं शक्तं नैकराज्या

[113] अवमुक्तमपक्रान्तमूल्यं तत्र ; परिसृष्टं ह्युपक्रान्तं ; परिसृष्टमतिक्रान्तं ; परिसृष्टम्

[114] बलम्   [115] मित्रं

[116] सत् सामर्थ्यान् न

* This line does not occur in the B.I. text. Restored from the *ṭīkā*.

79. An army does not fight when its hopes are realised and causes of diappointment are removed. An army confined in a narrow field, unable to operate freely, desists from battle.

80. An army suffering from inadequate supply of equipments, will surely fight when provided with adequate weapons and mounts (horses and carriers), so also the army with women in its camps on removal of them (the women) becomes capable of fighting.

81. An army sent out to distant lands (beyond many kingdoms) or on long marches do not fight (due to over-exhaustion) nor also the army in the ranks of which enemy agents (like thorns on its sides) are active.

82. An army with dissensions in its ranks, or the captains of which are removed, or transferred to fight outside the realm, lose their ability to fight (up to the standard) like a compact and co-ordinated army.

83. An army whose chiefs (or leaders) are removed no longer retains its fighting power (as it depends on leadership primarily), but an army in which a section of the hereditary soldiers (*pitṛ-paitāmahaṁ maulaṁ*) are disaffected can be restored to health (or made capable to fight heartily) by appeasement (or removal of their grievances).

84. An army of the ally confined in one place by the enemy forces is incapacitated when charged by the latter, so also the army camping close to the enemy's cannot fight according to their abilities.

आशेति । आशानिर्वेदकार्याणां आशानां निर्वेदे च विक्षोभकं कारणं पूर्णं न युध्यते, युद्धप्रवृत्तिकारणापगमादिति भावः । निरुद्धे अवरुद्धे सति अप्रवृत्तिकारे, अवकाशरहितत्वात् क्षुब्धोऽल्पतया न युध्येत इति शेषः ॥ ७९ ॥

युध्येतेति । सत्वानुरूपसम्पादितायुधवाहनं युध्येत । कलत्रगर्भमिति कलत्रं कुलस्त्री गर्भे विद्यते यस्य बलस्य तत् उन्नीतकलत्रं सङ्गरक्षमं समरसमर्थं भवति ॥ ८० ॥

अनेकेति । अनेकराज्यान्तरितमिति मित्रादिसाहाय्यार्थं प्रेषितमनेकैराज्यैरन्तरितं भूत्वा यदायातम् । अतिक्षिप्तं सुदूरं प्रेषितं न युध्यते, अत्यर्थं श्रान्तत्वात् । अन्तर्गतामित्रशल्यमन्तःशल्यमुच्यते तदुपकाराक्षमं[12] युद्धस्य ॥ ८१ ॥

अन्योन्येति । भिन्नगर्भं न युध्यते । नैकराज्यान्तरीकृतमिति । एकमण्डलेनान्तरित स्वमण्डलव्यवहितं तदपसृतमुच्यते । स्वभूमेरपध्यासृतत्वात्[13] ॥ ८२ ॥

अवियुक्तमिति । अवियुक्तं न देशान्तरगतम् । देशान्तरगमनाभावात् संग्रामदक्षताभावः । अपक्रान्तं पलायितं युधि योद्धुं न क्षमम् अनार्यत्वात्[14] । परिसृष्टं त्वपक्रान्तमिति पाठे अशिक्षितमित्यर्थः । परिकृष्टमपक्रान्तमुख्यमुच्यते । तच्च क्षमं युद्धे । पितृपैतामहं मौलमित्युच्यते, यच्चेतत् क्रुद्धं स्वामिनि तत्सान्त्वितमपनीतक्रोधं क्षमं युध्यते ॥ ८३ ॥

मिश्रमिति । [15]शत्रुभिरेवास्थं तदाक्रान्ततया शत्रुभिनिरुद्धायामतया युद्धस्याक्षमम् । शत्रोरुपनिविष्टं समीपकृतशिविरनिवेशं सामर्थ्याभावात् तदप्यक्षमम् ॥ ८४ ॥

[12] तदपकारक्षमम् [13] रपघातः ; रपेतत्वात्
[14] युद्धेनाप्रकृतत्वात् [15] मित्रं शत्रुभि

दूष्ययुक्तं[118] न युध्येत युध्येतोद्धृतकण्टकम् ।
प्रधानयोधसंयुक्तं[119] दूष्ययुक्तं समुन्नयेत्[120] ॥ ८५ ।
स्वविक्षिप्तं सुविषयाक्षिप्त[121]मापद्युदाहृतम् ।
प्रकृष्ट देशकालस्वाम्मिन्नक्षिप्तामयौगिकम् ॥।८६ ।

---

[118] दूष्ययुक्तं तदुद्धारात् [119] संगुप्तं
[120] समुत्पतेत् [121] स्वविषये क्षिप्त

85: An army infested with wicked elements can not fight (seriously), but they may be made to fight by removal of them who are like thorns on its sides, and when led by brave chiefs of staff the very corrupt (*dūṣyayuktaṁ*), army would actively fight (for the ruler).

86. An army deployed in different parts within the realm can be collected together in times of danger (and made to fight), but the army lent out to an ally will not be so available due to considerations of the distance of their stations and the time involved (in their recall).

दूष्ययुक्तमिति । दूष्ययुक्तं शिबिरैर्युक्तं बलं न युध्येत । तदेवोद्धृतकण्टकमपनीतदूष्यं युध्येत । पक्षान्तरमाह—प्रधानयोधसंगुप्तं दूष्ययुक्तमपि युद्धार्थं समुत्पतेत् ॥ ८५ ॥

स्वविक्षिप्तमिति । स्वविषये क्षिप्तं यदाऽऽपत्कर्षणात् हृतमाहृतं तदुत्सम्पतेत् युद्धायेत्यनुवर्तते । प्रकृष्टदेशकालत्वात् मित्रकार्यप्रसाधनार्थमुत्क्षिप्तमयौगिकं युद्धयोगाय न भवति ॥ ८६ ॥

धान्यादेर्वीवधा[122] प्राप्तिरासारस्तु सुहृद्बलम् ।
विच्छिन्नवीवधासारं सैन्यं[123] युद्धाय नेष्यते[124] ॥ ८७ ।
पितृपैतामहं मौलं तेन शून्यं न तत् क्षमम्[125] ।*
कृतजानपदारक्ष्यं शून्यमूलं युधि क्षमम् ॥ ८८ ।
युध्यते शून्यमूलं हि यत्नान्मौलेन पालितम् ।*
अस्वामिसंहृतश्चैव[126] स्वामिना यद्विनाकृतम ॥ ८९ ।

---

[122] वीवधः [123] बलं
[124] नेक्षते, नेक्ष्यते [125] हि न क्षमम् ; तदक्षमम्
[126] सङ्गतं नैव
* Restored from the ṭikā. Omitted in the B.I. text.

87. Collection of grains and provisions for the army, and availability of support (by supply of troops etc) from the allies, are sources of strength, *suhṛdbalaṁ,* for the army. If the supply lines both for grains and provisions and for allies' support, are cut off (or disrupted) by enemy action, the army cannot fight.

88. Soldiers, hopeless of shelter (to support their families), may revive their fighting power, when provided with shelter within the country, but the hereditary soldiers in similar conditions lose all their ability to fight.

89. Even such destitute soldiers, when carefully maintained by the ruler, fight (heartily). But those who act without the sanction of the lord do not fight (in proper time) unless their lapses are condoned.

धान्यादेरित्यादि । आदिग्रहणात् स्नेहवस्त्रादिकं सर्वं स्कन्धावारोपयोगि गृह्यते । तस्य प्राप्तिर्वीवध उच्यते । आसारः सुहृद्बलम् । विच्छिन्नवीवधासारं सैन्यं युद्धाय नेष्यते (नेक्ष्यते) । आहारप्रतिबलाभावात् ॥ ८७ ॥

पितृपैतामहमिति । मौलं शून्यमूलं कलत्रादिरक्षास्थानच्युतं न क्षमं न युद्धे समर्थमित्यर्थः । कृतजानपदारक्षं शून्यमूलं, जानपदैः कृता मूलस्य बलकलत्रादिस्थानस्य रक्षा यस्य तत् युधि क्षमं भवति ॥ ८८ ॥

युध्यत इति । स्वामिना यद्विनाकृतं तदापि युद्धाक्षमं भवति ॥ ८९ ॥

न युध्येत भिन्नकूटं भिन्नकूटमनायकम् ।
पश्चात्कोपाभितप्त'[127] तु दुःपार्ष्णिग्राहमक्षमम् ॥ ९० ।
अदेशिकं स्मृतं युद्ध'[128] मूलत्वाच्च[129] क्रियाक्षमम् ।
बल'[130] व्यसनमित्यादि तत्समीक्ष्य समुत्पतेत् ॥ ९१ ।

---

[127] पश्चात्कोपातिसन्तप्तं [128] स्मृतं ह्यन्धं
[129] तन्मूलत्वात् क्रियांऽक्षमम [130] बलव्यसन

90. A leaderless army (disorganised in the absence of a capable commander) does not fight (energetically and in proper formation), and an army afflicted by troubles from the rear side, by the evil designer rear-ward enemy (*pārṣṇigrāha*) is also rendered incapable of fight (or marching forward).

91. An army, blind to (or ignorant of) the situation of the theatre of war, cannot fight due to its own foolishness. A war should be launched upon only after careful assessment of military power (of the enemy) and the *vyasanas* it is susceptible to.

न युध्यत इति। न युध्यते भिन्नकूटमस्यैव व्याख्या भिन्नकूटमनायकम्। बलसहस्राधिष्ठाता नायक उच्यते, तद्रहितमपि न युद्धक्षमम्। पश्चात्कोपाभिसन्तप्तं दुष्पार्ष्णिग्राहं तदप्यक्षमम् ॥ ९० ॥

अदेशिकमिति। देशानभिज्ञं तदन्धं स्मृतं ; तन्मूलत्वाद् युद्धक्रियाया अक्षमम्। उपसंहरन्नाह —बलव्यसनमित्यादीति। अत्र बलग्रहणादन्यान्यपि द्यूतस्त्रीपानादीनि गृह्यन्ते। तत्समीक्षणं प्रतीकार पर्यवसानं द्रष्टव्यम्। पश्चाद् युद्धार्थं समुत्पतेदिति ॥ ९१ ॥

[131]दैवोपपीडितं मित्रं[132] ग्रस्तं शत्रुबलेन च।
कामक्रोधसमुत्थैश्च दोषैः सम्परिकीर्तितैः ॥ ९२ ।

[131] दैवेन पीड़ितं [132] ग्रस्तं मित्रं

92. Affliction of the allies' dominion by providential calamities (famine, flood, pestilence etc), (or) invasion by the enemy forces, and when deterioration of political condition consequent upon addiction by allies to sensual pleasures (lust for women, drinking, hunting and gambling) and their proneness to anger (expressed in harsh words, severe punishments, etc) are the reprehensible *vyasanas* of the allies (*mitra*).

मित्रव्यसनमभिधातुमाह—दैवेति। दैवान्युपपीडनानि उक्तप्रकाराणि व्याधिमरकादीनि तैर्ग्रस्तमाक्रान्तं मित्रं, शत्रुबलेन चाक्रान्तं तथा कामक्रोधादिसमुत्थैश्च दोषैः—मृगयाक्षाः स्त्रियः पानमिति कामजश्चतुर्वर्गः वाक्पारुष्यं दण्डपारुष्यमर्थदूषणमिति क्रोधजस्त्रिवर्गः एभिर्दोषैरनन्तरं सम्परिकीर्तितैर्ग्रस्तं इति मित्रव्यसनमुच्यते इति भावः ॥ ९२ ॥

नरेन्द्राद्याः प्रकृतयः सप्त याः परिकीर्तिताः।
पूर्वं पूर्वं गुरुतरं तासां व्यसनमुच्यते ॥ ९३ ।
इत्यादि सर्वं प्रकृतं[133] यथावद् बुध्येत राजा व्यसनं प्रयत्नात्।
बुध्या (बुद्ध्वा) च शक्त्या व्यसनस्य कुर्यादकालहीनं
व्यपरोपणं हि[134] ॥ ९४ ।

[133] प्रकृतेर्यथावद् [134] व्यपरोपणं सः

93. It is said that the seriousness of the *vyasanas* afflicting the well-known seven *prakrtis* of the state, beginning with the king, is of greater

proportion according to the order of priority (i.e., the danger resulting from the *vyasana* of each of the preceding one is more serious than that of the following.

94. Hence the ruler should always know (or keep himself well informed) of the *vyasanas* afflicting each of the *prakṛtis* of his state and promptly (without delay) exercise his powers and intelligence in remedying them.

नरेन्द्रेति। आचार्यैः इति शेषः। मित्रव्यसनाद्दण्डव्यसनं ततोऽपि कोशव्यसनं ततोऽपि दुर्गव्यसनं ततोऽप्यमात्यव्यसनममात्यव्यसनात् स्वामिव्यसनं गरीयो भवति ॥ ९३ ॥

इतीति। इत्यनन्तरोक्तक्रमेण प्रकृतं प्रस्तुतं सर्वं वाग्दण्डयोश्च पारुष्यमित्यादिबलव्यसनपर्यन्तं यथावत्स्वतो बुध्येत जानीयात् राजा प्रजारञ्जनप्रवणः व्यसनं प्रयत्नात्। बुद्ध्या च शक्त्या व्यसनस्य कुर्यादकालहीनं व्यपरोपणमपनयनम्। कालात्यये हि व्याधिरिवासाध्यं स्यादिति ॥ ९४ ॥

प्रकृति व्यसनानि भूतिकामः समुपेक्षेत न हि प्रमाददर्पात्।
प्रकृतिव्यसनान्युपेक्षते यो न चिरात्तं रिपवः पराभवन्ति[125] ॥ ९५ ।
इदमिदमिति सम्यक् कर्मणा योजनीयं नियतमिति विचिन्त्य
प्रापयेदीहमानः।
सुनयपिहितरन्ध्रः प्राकृतो यस्य वर्गः क्षितिपतिरुपभुङ्क्ते स
त्रिवर्गं चिराय ॥ ९६ ।

[125] पराजयन्ते

इति प्रकृतिव्यसनं नाम द्वाविंशं प्रकरणम् ॥

इति कामन्दकीये नीतिसारे उत्साहप्रशंसा प्रकृतिकर्म-प्रकृतिव्यसनानि नाम चतुर्दशः सर्गः ॥ (मुद्रित पुस्तकानुसारेण इति त्रयोदशः सर्गः ॥)

95. A ruler, desirous of expansion of his dominion and of prosperity, should by no means be neglectful of *vyasanas* afflicting his *prakṛtis* out of his own inadvertence or arrogance. He who neglects the *vyasanas* of his *prakṛtis* is very soon defeated by his enemies.

96. In this way (according to prescriptions outlined above) the ruler, who always after due deliberations employs his *prakṛtis* to their respective functions, sees the end of them (i.e., achieves success). By remedying the ill effects (like holes and fissures, *randhra*) of *vyasanas* afflicting the *prakṛtis* by his wise policy, the ruler enjoys the fruits of *trivarga* (*Dharma*, *Artha* and *Kāma*) for all time to come.

व्यसनोपेक्षेण दोषं दर्शयन्नाह—प्रकृतीति। इन्द्रियार्थेषु गीतवाद्यादिषु प्रसक्तिः प्रमादोऽभिधीयते। दर्पः पौरुषादिजनितः। तस्मात् प्रकृतिव्यसनान्युपेक्षते यो राजा न चिरात्तं रिपवः पराभवन्तीति प्रतीतम् ॥ ९५ ॥

इदमिति। इदं चेदं कार्यं स्वविषये दुर्गादिकं परविषये सन्ध्यादिकं विचिन्त्य मन्त्रपूर्वकं निश्चित्य कर्मणा योजनीयम्। मन्त्रपूर्वकत्वादनुष्ठानस्य। नियतं निश्चयेन प्रापयेत् समाप्तिमिति वाक्यशेषः। सुनयेन शास्त्रानुष्ठानेन पिहितं रन्ध्रं व्यसनं यस्य प्रकृतीनां साम्यादीनां वर्गः समूहो यस्य क्षितिपतेः सोऽत्र भुङ्क्ते त्रिवर्गं धर्मार्थकामाख्यं चिराय चिरकालम् ॥ ६६ ॥

इति द्वाविंशं प्रकृतिव्यसनं प्रकरणम्।

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्याम् उत्साहप्रशंसा-प्रकृति-कर्म-प्रकृतिव्यसनानि नाम चतुर्दशः सर्गः॥

पञ्चदशः सर्गः

(मुद्रित पुस्तकानुसारेण चतुर्दशसर्गप्रारम्भः ।)

२३ । सप्तव्यसनवर्गप्रकरणम् ।

अमात्याद्या प्रकृतयो मित्रान्ता राज्यमुच्यते ।
अशेष[1]राज्यव्यसनात् पार्थिवव्यसनं गुरु ॥ १ ।
राजा त्वव्यसनी राज्यव्यसनापोहनक्षमः ।
न राज्यव्यसनापोहसमर्थं राज्यमूर्जितम् ॥ २ ।
आत्मामात्यप्रजादुर्गकोशानां दण्डमित्रयोः ।
व्यसनेभ्यः समुन्नेता राजा यः स त्रिवर्गभाक् ॥ २क* ।

---

[1] अनेक

* Restored from the *ṭīkā*

Sarga—XV.

Prakaraṇa 23.

Saptavyasanavarga

(A comparative estimate of lapses of the seven component elements of State).

1. The kingdom is composed of component elements beginning with the ministers and ending with the allies. The *vyasana* afflicting the ruler (*pārthiva*) is much more serious than the *vyasanas* of these component elements of the kingdom.

2. A ruler, who is himself free from all *vyasanas*, is capable of remedying the *vyasanas* of (the component elements of) the state. But the *vyasanas* of the king cannot be remedied even by the thriving state (elements).

2A. A ruler who can rescue himself, his ministers, subjects, forts, treasury, armed forces and allies from the grip of *vyasanas*, becomes entitled to the enjoyment of the fruits of *trivarga* (three ends of life).

व्यसनसमस्तदोषाद् राजराज्ययोर्दोषपरमार्थमभिधातुमाह—अमात्येति । अमात्यः आद्यौ यासां ताः सप्तापि मित्रान्ता राज्यमुच्यते । शेषं प्रतीतम् ॥ १ ।

एतदेव समर्थयन्नाह—राजेति । अव्यसनी राजा राज्यव्यसनापोहन क्षमः सकल राज्यव्यसनस्य निराकरणे समर्थः । ऊर्जितं बलवदपि राज्यं न राज्यव्यसनापोहसमर्थं न राज्ञोव्यसनदूरीकरणे समर्थं भवति ॥ २ ॥

आत्मेति। आत्मनः अमात्यानां प्रजाया दुर्गस्य कोशस्य दण्डमित्रयोश्च व्यसनेभ्यः समुन्नेता वियोजको राजा यः स त्रिवर्गभाक् धर्मार्थकामभाजनं भवति, नेतर इति ॥ २क ॥

अशास्त्रचक्षुर्नृपतिरन्ध इत्यभिधीयते।
वरमन्धो न चक्षुष्मान् मदादाक्षिप्तसत्पथः ॥ ३ ।
मन्त्रिभिर्मन्त्रकुशलैरन्धः सन्तार्यते[1a] नृपः।
चक्षुष्मांश्च[2] मदान्धः सन्नात्मानं हन्त्यशेषतः ॥ ४ ।
शास्त्रचक्षुर्नृपस्तस्मान्महामात्यमते[3] स्थितः।
धर्मार्थप्रतिघातीनि व्यसनानि परित्यजेत् ॥ ५ ।

[1a] सञ्चार्यते ; पथि निवेश्यते [2] चक्षुष्मांस्तु

[3] महामात्रमते ; महामन्त्रिमते

3. A ruler is said to be blind if he does not possess the eye (knowledge) of the Śāstras (on polity). But even such a blind ruler is preferable to one endowed with eyesight but transgressing the course of righteousness out of vanity.

4. A blind ruler can be rescued by the ministers and wise counsellors, but not the ruler blinded by his vanity, who succumbs to total ruin ultimately.

5. Hence the ruler who possesses the vision (or knowledge) of the Śāstras follows steadily the (deliberated) policies of the ministers and discards the *vyasanas* obstructing his achievement of *Dharma* and *Artha* (religious and material benefits).

अशास्त्रचक्षुरिति। शास्त्रं नीतिशास्त्रं चक्षुर्यस्य स तथा न शास्त्रचक्षुरशास्त्रचक्षुः सोऽन्धः इत्यभिधीयते। वरमन्धो लोचनरहितः न चक्षुष्मान् सलोचनो मदाद्गर्वादाक्षिप्तः परित्यक्तः सत्पथः सन्मार्गः येन ॥ ३ ।

मन्त्रिभिरिति। अशेषतः सराज्यमपीत्यर्थः ॥ ४ ॥

शास्त्रचक्षुरिति। धर्मार्थौ प्रतिघ्नन्ति यानि तानि धर्मार्थप्रतिघातीनि धर्मार्थविध्वंसकानि व्यसनानि परित्यजेत् ॥ ५ ॥

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च।
स्मृतं व्यसनतत्त्वज्ञैः क्रोधजं व्यसनत्रयम् ॥ ६ ।
कामजं मृगया द्यूतं स्त्रियः पानं तथैव च।
व्यसनं व्यसनार्थज्ञैश्चतुर्विधमुदाहृतम् ॥ ७ ।

---

6. *Vyasanas* emanating from anger (*krodhaja*), in the opinion of expert theoreticians, are three in number, harshness of speech, severity of punishment and injustice in financial dealings.

7. *Vyasanas* emanating from attachment to sensual pleasures (*kāmaja*), according to those conversant with its implications, are four in number,—addiction to hunting, gambling, women and wine.

व्यसनविभागमभिधातुमाह—वाग्दण्डयोश्च पारुष्यं अर्थदूषणं चेति व्यसनत्रयं क्रोधजं स्मृतम् ॥ ६ ॥

कामजमिति। कामजं व्यसनं चतुर्विधम्। इति प्रतीतम् ॥ ७ ॥

वाक्पारुष्यपरं[4] लोक उद्वेजनमनर्थकम्[5] ।
न कुर्यात् प्रियया[6] वाचा प्रकुर्याज्जगदात्मताम्[7] ॥ ८ ।
अकस्मादेव यः कोपादभीक्ष्णं[8] बहु भाषते ।
तस्मादुद्विजते लोकः सस्फुलिङ्गादिवानलात् ॥ ९ ।
[9]हृदये वागसिस्तीक्ष्णो मर्मच्छिद्धि पतन्मुहुः[10] ।
तेन च्छिन्नो नरपतिः[11] स दीप्तो याति वैरिताम् ॥ १० ।
नोद्वेजयेज्जगद्वाचा रुक्षया प्रियवाग् भवेत् ।
प्रायेण प्रियकर्मा[12] यो कृपणोऽपि हि सेव्यते ॥ ११ ।

[4] पारुष्यं परं [5] मनर्थकृत्
[6] कुर्याद् विप्रियां वाचं [7] प्रकुर्याजनमात्मसात्
[8] कोपात् परुषं ; तीक्ष्णं [9] निपतन् वागसिस्तीक्ष्णो हृदये मर्महा मुहुः
[10] च्छिन्नपतन् [11] तेजस्विनं दीपयति
[12] प्रियवाक्कर्मा कृपणोऽपि ; प्रियवाग् लोके कृ

8. Harsh words create much excitement among the people (to whom those are applied) and those are harmful too. So undesirable words should not be used, rather the people should be won over (by graceful speech).

9. He, who all on a sudden bursts forth in anger using excessively rough words, causes excitement to the people as a spark ignites fire.

10. Uncharitable words like the sharpened blade of the sword pierces the heart of the person (to whom it is used), and by that a courageous person is infuriated (*tejasvinām dīpayati*) and he turns hostile.

11. Hence a ruler should not foment excitement (or irritation) among the people by using rough (or harsh) speech. He should rather be sweet-spoken (agreeable in speech). One who is sweet-spoken, even if miserly (or ungenerous) receives service from others (his dependents).

वाक्पारुष्यमिति। वाचां पारुष्यं तीक्ष्णत्वं अतएवोद्वेजनमनर्थकृत् अनर्थमपायं करोतीति। तस्मात्तन्न कुर्यात् इति। केवलं प्रियया वाचा कुर्वीत जगदात्मसादिति (जनमात्मसादिति) प्रतीतम् ॥ ८ ॥

अकस्मादिति। इति प्रतीतम् ॥ ९ ॥

हृदय इति । हृदये हृदयस्थित इत्यर्थः । मर्मच्छित् मर्मभेदी तीक्ष्णो वागसिः तेजस्विनं जनं दीपयति । दीप्त उद्दीप्तश्च स वैरितां याति ॥ १० ॥

नोद्वेजयेदिति । कृपणो लुब्ध उच्यते ॥ ११ ॥

असिद्धसाधनं षड्भिः[13] शासनं[14] दण्डमुच्यते ।
[15]तद्युक्तेऽपनये दण्ड्ये युक्तदण्डः प्रशस्यते ॥ १२ ।
उद्वेजयति भूतानि दण्डपारुष्यवान् नृपः ।
भूतान्युद्वेज[15a]मानानि द्विषतां यान्ति संश्रयम् ॥ १३ ।
आश्रिताश्चैव लोकस्य [16]विवृद्धिं यान्ति विद्विषः ।
विवृद्धाश्च[17] विनाशाय तस्मान्नोद्वेजयेत् प्रजाः ॥ १४ ।
लोकानुग्रहकर्तारः प्रवर्द्धन्ते[18] महीभुजः ।
लोकवृद्ध्या नरेन्द्राणां वृद्धिस्तत् संक्षये क्षयः ॥ १५ ।
महत्स्वप्यपराधेषु दण्डं प्राणान्तिकं त्यजेत् ।
ऋते राज्यापहारात्तु युक्तदण्डः[19] प्रशस्यते ॥ १६ ।

[13] सद्भिः [14] साधनं
[15] तं युक्तयेत्र नयेद्दण्डं [15a] न्युद्वेज्य
[16] लोकेन समृद्धिं [17] समृद्धाश्च
[18] प्रवर्तन्ते [19] तत्र दण्डः

12. Performance of unfulfilled acts (pertaining to royal duties relating to adversaries) as well as administration (maintenance of law and order) is described by the wise as *Danda* (the coercive power of the ruler). When the ruler blends *danda* with *naya* (legal procedure) in dealing with the accused (*dandya*) he is praised for being a *yuktadanda* or the right user of *danda*.

13. Harshness or severity of punishments by the ruler creates excitement (or worry) among the people, and thus worried they seek the protection of the enemy (of the ruler).

14. By providing shelter to the worried people (of the rival kingdom), the enemy grows in prosperity (or becomes more powerful) and a powerful enemy becomes the cause of destruction of the ruler concerned. Hence a ruler should be careful in not irritating his subjects.

15. A ruler who is generous to his people in distributing favours, thrives in prosperity, because the prosperity of the ruler is dependent upon the prosperity of his people and (conversely) the loss of it for the people leads to loss for the ruler.

16. Even for the gravest offence, capital punishment (death sentence *dandam prāṇāntikam*) should be avoided, except, of course, for

spoliation of the kingdom (or treason). In such a case however the (capital) punishment is commendable.

दण्डपारुष्यमभिधातुमाह—असिद्धेति। दण्डोद्विविधः असिद्धस्य प्रतिपक्षादेर्दण्डनक्रियया साधनं दण्डः तथा शासनं शिक्षणमपि दण्ड उच्यते सद्भिः। (मुद्रितपुस्तके 'षड्भिः' पाठम् न सुप्रयुक्तमिति)। तथा च कौटिल्यः—"वधः परिक्लेशोऽर्थहरणं च दण्डः" इति। तं युक्त्यैव शास्त्रोक्त प्रमाणेन नयेत्। दण्ड्ये शासनीये जने। युक्तदण्डः प्रशस्यते 'तत्र क्ऽपनये दण्ड्ये' इत्यपि मुद्रितपुस्तकपाठं न समीचिनमिति ॥ १२ ॥

उद्वेजयतीति। इति सुगमम् ॥ १३ ॥

आश्रिता इति। इति प्रतीतम् ॥ १४ ॥

[संश्रयाच्चैव लोकस्य विवृद्धिं यान्ति विद्विषः। विवृद्धिस्तु विनाशाय तस्मान्नोद्वेजयेत् प्रजाः ॥ इति पाठान्तरम्।]

लोकेति। अत्र व्याख्या सुगमा ॥ १५ ॥

महत्स्विति। तत्र राज्यापहारे प्राणान्तिको दण्डः प्रशस्यते। अन्यत्र विगर्हितः ॥ इति प्रतीतम् ॥ १६ ॥

दूष्यस्यादूषणार्थञ्च[20] परित्यागो महीयसः।
अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते ॥ १७ ॥
तदकस्मात् समाविष्टः कोपेनातिबलीयसा।
नित्यमात्महिताकाङ्क्षी न कुर्यादर्थदूषणम् ॥ १८ ॥

---

[20] दूष्यस्य दूषणार्थं हि

17-18. Unnecessarily excessive expenditure in order to prosecute corrupt officers indulging in abuses of financial powers (i.e., non realisation or excess realisation, infructuous expenditure or wastage and unjustified remissions), is itself an abuse of financial power, as held by financial theorists. For, in that case such corrupt officers, furiously enraged, may indulge in more abuses of wealth. Hence the ruler desirous of welfare of his own self (or of the state) should avoid abuses of financial powers.

अर्थदूषणमभिधातुमाह—दूष्यस्येति। दूष्यस्य शङ्कितापराधस्य दोषयुक्तस्य वा दूषणार्थं दोषनिरूपणार्थं वधार्थं वा महीयसो बहुसंख्यस्य अर्थस्य परित्यागः व्ययः, नीतिशास्त्रज्ञैः अर्थदूषणम् उच्यते। दूष्यस्यादूष्यणार्थं इति पाठे निर्दोषिताख्यापनार्थं इत्यर्थः। कौटिल्येनाप्युक्तम्—"अदानमादानं विनाशस्त्याग" इति (८।३।२१)। तदपि कोपेनैव यत्र दीयते तत्कृतार्थदूषणमुच्यते। कोपेनैव यदादीयते तत्कृतार्थक्षतिर्विनाशोऽपि कोपेनैवोपलक्षितार्थस्य त्यागो विदूष्य वधार्थं यद्बहु दीयते ; इत्येकमेव तत्कौटिल्यशिष्ययोर्मतम् ॥ १७ ॥

तदीति। तत् तस्मात् नित्यमात्महिताकाङ्क्षी राजा अकस्मात् अतिबलीयसा कोपेन समाविष्टः सन् अर्थदूषणं न कुर्यात् ॥ १८ ॥

यानक्षोभो यानवतो[21] यानाभिहरणं तथा ।
क्षुत्पिपासाश्रमायास[22] शीतवातोष्णपीड़नम् ॥ १९ ।
अभियानस्य सम्पत्त्या यानव्यसनजं महत् ।
दुःखं प्रतप्तसिकताकुशकण्टकभूमयः ॥ २० ।
वृक्षसङ्कटजा दोषा[23] लताकण्टकपाटनम् ।
शैलपादलताजाल[24]स्थाणुवल्मीकपीड़नम् ॥ २१ ।
प्रच्छन्नोपगतैः[25] शैलसरिद्विपिनकुक्षिषु ।
बधबन्धपरिक्लेशैः[26] सामन्ताटविकादिभिः ॥ २२ ।

---

[21] यानपातो · [22] मायासाः
[23] देशा [24] शैलपातशिलाजाल
[25] प्रच्छन्नोपहितैः [26] क्लेश आसन्नाटवि

19-21. Physical strain in prolonged riding (through inhospitable regions), accidental fall (or injuries) in course of riding, damage or breakdown of horses or chariots (or loss of them due to enemy action), and sufferings caused by hunger, thirst, exhaustion, severity of cold, storm or heat and wastage of resources (meant for launching campaigns) result from *yāna-vyasanas* (addiction to game hunting). Such expeditions cause much distress while travelling through regions, excessively hot, sandy or full of thorns, or dense forests infested with thorny creepers and shrubs, or hill tracts with likely dangers from fall of boulders, or from unevenness of track due to stones, earthen mounds and ant hills.

22. Further, such expeditions may be involved in dangers from lurking enemies hidden among rocks, rivers or forests, as well as from sudden capture or death by the hostile chiefs, foresters and other inimical people.

मृगयाव्यसनदोषानभिधातुमाह—यानक्षोभ इति । यानमत्राश्वाद्यभिधीयते । यानवतः यानेन रथादिना अरण्यं प्रविशतः यानक्षोभः बन्धुर प्रदेशे यान प्रतिघात इत्यर्थः । शेषं प्रतीतम् ॥ १९ ॥

अभियानस्येति । एतत् प्रतीतम् ॥ २० ॥

वृक्षेति । अत्रापि सुगमम् ॥ २१ ॥

प्रच्छन्नेति । प्रच्छन्नोपगतैर्निभृतायातैः । सामन्ताटविकादिभिः कृता बधबन्धपरिक्लेशाः सम्भवन्ति ॥ २२ ॥

स्वसैन्यैश्च स्वकल्पैश्च[27] परभिन्नैश्च मारणम् ।
ऋक्षाजगरमातङ्गसिंहव्याघ्रभयानि[27a] च ॥ २३ ।

---

[27] स्वकुलैश्च [27a] भयादि

दवाग्निधूमसंरोधो दिङ्मोहो भ्रमणानि च ।
इत्यादि पृथिवीन्द्राणां मृगयाऽव्यसनं[28] स्मृतम् ॥ २४ ।

[28] व्यसने

23-24. The ruler also runs the risk of being attacked by his own followers or relatives, or won over (captured) by enemies, or of being mauled by bears, pythons, wild elephants, lions and tigers or he may have to wander about having lost direction of the route due to enveloping smoke arising from forest fires. These are the different kinds of *mṛgayā-vyasanas* (dangers of hunting) to which the rulers are often addicted.

स्वसैन्यैरिति । परभिन्नैः परेण शत्रुणा भिन्नैः भेदमापादितैः आयत्तीकृतैरित्यर्थः । स्वकल्पैः आत्मसदृशैः स्वसैन्यैः मारणं गुप्तहत्येतिभावः । स्पष्टमण्यत् ॥ २३ ॥

दवाग्नीति । दिङ्मोहो दिग्भ्रमः । भ्रमणानि दिग्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि । इत्यादि दोषजातमिति वाक्यशेषः ॥ २४ ॥

जितश्रमत्वं व्यायाम आममेदकफक्षयः ।
चरस्थिरेषु[29] लक्ष्येषु वाणसिद्धिरनुत्तमा ॥ २५ ।
मृगयायां गुणानेतानाहुरन्ये[29a] न तत् क्षमम् ।
दोषाः प्राणहराः[30] प्रायस्तस्मात् तत्[31] व्यसनं महत् ॥ २६ ।

[29] चलस्थिरेषु [29a] गुणानेतानन्ये प्राहुर्न तत्

[30] प्राणहरप्राय [31] तत् परिवर्जयेत्

25. Physical exercise (in hunting expeditions) produces power of endurance (or strains) and immunity from indigestion, heaviness (due to growth of fat) and susceptibility to catching cold, whereas hunting develops excellence in successfully hitting stationary or moving targets with darts.

26. These are said to be the benefits to be derived from hunting, which, of course are not acceptable to us (the school of Kāmandaka). For its inherent evil of killing (of animals) as such, it is a great *vyasana* (and should be shunned or forsaken).

अपरोल्लिखित मृगयागुणानभिधाय तत्खण्डनमाह—जितश्रमत्वमिति । अनुत्तमेति यस्या अन्या उत्तमा नास्तीति । स्पष्टमन्यत् ॥ २५ ॥

मृगयाया इति । अन्ये अपरे मृगयायाम् एतान् गुणान् आहुः । तत् एवंविधं न क्षमं न युक्तिसङ्गतम् । महत् महादोषकरमित्यर्थः । शेषं स्पष्टम् ॥ २६ ॥

आमाद्यो हि जीर्यन्ते[31a] योग्ययैव दिवानिशम् ।
चरेषु[32] यत्र लक्ष्येषु वाणसिद्धिश्च[33] जायते ॥ २७ ।

[31a] जीर्णन्ति [32] चलेषु यन्त्रलक्ष्येषु [33] स्तु

अथ चेन्मृगयाक्रीडां[34]वाञ्छेत नगरान्तिके ।
कारयेन्मृगयारण्यं क्रीडाहेतोर्मनोरमम्[35] ॥ २८ ।
परिक्षिप्तं परिखया मृगाणामप्यगम्यया[36] ।
आयामपरिणाहाभ्यामर्द्धयोजनसम्मितम् ॥ २९ ।
गिरेरुपान्ते नद्या वा पर्याप्तजलशाद्वलम् ।
अकण्टकलतागुल्मं विषपादपवर्जितम् ॥ ३० ।
पादपैः पुष्पफलदैः विज्ञाते[37]श्चित्तहारिभिः ।
स्निग्धशीत[37a] घनच्छायैर्विटपैरुप[37b]शोभितम् ॥ ३१ ।
[38]पांशुपूरितनिश्छिद्रं [39]शुभ्रप्रदरकन्दरम् ।
दलितस्थाणुवल्मीकपाषाणं [40]समभूतलम् ॥ ३२ ।

---

[34] क्रीडावाञ्छा तन्नगरान्त्रिके

[35] हेतोर्मनोहरम् [36] दुर्गया मृगगम्यया

[37] प्रज्ञाते [37a] स्निग्ध नील

[37b] विरले [38] पांसु

[39] श्वभ्र [40] पाषाणसम

27. Indigestion and other maladies can be remedied by constant (regular) physical exercises (like riding etc) and sure aim in throwing arrows may be acquired by hitting at artificial targets, (*yantra lakṣyeṣu*).

28. For one ardently fond of hunting, an attractive reserved forest (game sanctuary, *mṛgayāraṇyaṁ*) may be laid on the outskirts of the town (capital) for the pleasures of sport only.

29. It (the reserved game sanctuary) should be surrounded by a ditch and ramparts, so that (the preserved) games may not escape and it should extend over half a *yojana* in length and breadth.

30. It should be located at the foot of a hill or by the side of a river and should abound in sufficient (sources of) water and grass, but devoid of thorny creepers and shrubs as well as of poisonous plants.

31. It should be attractively laid with well known trees bearing flowers and fruits and providing pleasing, cool and thick shades. It should be solitary, not frequented by others.

32. Crevices, holes and cavities in it should be filled up with earth and gravel and the ground should be levelled by removal of stumps of trees, mounds of earth and (projecting) rocks.

मृगयोक्तगुणा अन्यथा सम्पद्यन्ते इति दर्शयन्नाह—आमादय इति । आममेदः कफादयः योग्यया शस्त्रवाहनाभ्यास योग्यतमेव क्षीयन्ते । अहर्निशं चलेषु यन्त्रलक्ष्येषु धावत्कृतकमृगादिषु बाण-सिद्धिश्च जायते ॥ २७ ॥

पक्षान्तरमाह—अथ चेदित्यादि । व्याख्या सुगमा ॥ २८ ॥

परिक्षिप्तमिति । परिक्षिप्तं वेष्टितं, परिखया खातिकया, परिखाप्राकारमप्यपेक्षते रक्षणार्थम्[1] । मृगाणामप्यगम्यया, अन्यथा मृगा निस्सरन्तीति । आयाम परिणाहाभ्यामर्द्धयोजनं द्विगव्यूतिप्रमाणमित्यर्थ ॥ २९ ॥

गिरेरित्यादि । इति सुगमम् ॥ ३० ॥

पादपैरिति । पांशुपूरितेत्यादि । स्पष्टम् ॥ ३१ ॥ ३२ ॥

[1] प्राकारसुपरिरक्षणार्थम् ; प्राकारोपेक्षणार्थम्

शोधितग्राहसलिलं[41] सम्भूतजलद्राशयम् ।
नानापुष्पसमाकीर्णं नानाविहगसङ्कुलम्[42] ॥ ३३ ।
मृगसंघातसम्पूर्णं[43] हस्तिनीकलभान्वितम् ।
भग्नदन्तनखव्याघ्रं[44] छिन्नश्रृङ्गविषाणि च ॥ ३४ ।
सुखसंसेव्यलतया पुष्पवल्लीपिनद्धया[45] ।
वनराज्या परिक्षिप्तं परिखातटजातया ॥ ३५ ।
बहिर्द्दूरान्तराभोगनिर्वृक्षसम[46]भूतलम् ।
अगम्यं रिपुसैन्यानां मनः प्रीतिविवर्द्धनम् ॥ ३६ ।

---

[41] सलिलमगम्भीरजलाशयम् ; मगभीर

[42] विहगसेवितम् ; शोभितम्

[43] सुपात्यमृगसम्पूर्णं

[44] भग्नद्रंष्ट्रनखव्यालं

[45] पुष्पपर्णावनद्धया

[46] निर्वृक्षस्तम्भ

33. Pools (for swimming) should not be deep and must be cleared of ferocious aquatic animals (crocodiles etc). It (the pool) should abound in various kinds of flowers (lotus etc) and birds of different species.

34. The sanctuary should have animals, comfortable to hunt, like she-elephants and their young ones, tigers and other big games with their teeth and nails removed, and such horned animals whose horns have been broken.

35. It should be made agreeable with beautiful creepers (non-poisonous) full of flowers and leaves within as well as on the sides of the ditch surrounding the game forest.

36. A long space outside the sanctuary should be cleared of (tall) trees and pillars and the ground levelled so that it becomes inaccessible to enemy forces (being visible from a distance) and enhances the feelings of comfort (of the ruler).

शोधितेत्यादि । शोधिता निःसारिताग्राहाः कुम्भीरादयो येभ्यः । नानाविहगशोभितं सङ्कुलमिति ॥ ३३ ॥

मृगसंघातसम्पूर्णमिति । छिन्नानि श्रृङ्गाणि येषां ते छिन्नश्रृङ्गाः, तादृशा विषाणिनः श्रृङ्गिणो यत्र तत् । स्पष्टमन्यत् ॥ ३४ ॥

सुखसंसेव्येति। पुष्पवल्लीपिनद्धया कुसुमश्रेणीयुक्तया सुखेन संसेव्या लता यत्र तथा परिखायास्तटे जाता समुत्पन्ना तया वनराज्या परिक्षिप्तं समन्तात् परिवेष्टितम् ॥ ३५ ॥

बहिर्दूरान्तराभोगमिति। बहिः वनाद्बहिः बाह्यप्रदेशे इत्यर्थः। दूरान्तरस्य य आभोग परिसरः तत्र निर्वृक्षं समं समतलं भूतलं यत्र तत्। निर्वृक्षः निःक्षुप क्षुपेण ह्रस्वशाख वृक्षेणेत्यर्थः शेषं सुगमम् ॥ ३६ ॥

तद्वने चर[47]चित्तज्ञैः क्लेशायाससहैर्दृढैः।
रक्षितं रक्षिभिः स्वाप्तैर्भूभुजां [47a]भूरिभूतये ॥ ३७ ॥
तत्कर्माप्तो नरेन्द्रस्य जनो जितपरिश्रमः।
क्रीडनायास्य[48] विविधा मृगजातीः प्रवेशयेत् ॥ ३८ ॥
[49]अन्यकार्याविरोधेन प्रातश्चङ्क्रमणक्षमः[49a]।
[50]क्रीडनायाविशेद्राजा तदाप्तैः सहितो मतैः[51] ॥ ३९ ॥
यदा च प्रविशेद् राजा क्रीडनार्थं तदा बहिः।
सन्नद्धं यत्नतस्तिष्ठेत् सैन्यं दूरान्तगोचरम् ॥ ४० ॥

---

[47] तद्वनेचर ; पर् चित्तज्ञैः [47a] जामभिवृद्धये

[48] क्रीडनायास्य [49] धर्मार्थाद्यविरोधेन

[49a] मणे क्षमम् [50] क्रीडनाय विशेद्

[51] मितैः

37. The pleasure of the ruler increases manifold when the game sanctuary is guarded by trusted foresters (forest tribes), resolute, hardy and painstaking and conversant with the moods of wild animals (*tadvanecaracittajñaih*).

38. King's own men (devoted followers), experienced in hunting and of tireless energy, may introduce various wild animals into the sanctuary to provide sport (of game hunting) to the king.

39. Without detriment to his other duties (royal functions), the king, capable of undergoing the strain of morning walk, may enter the reserved forest for sport with a small select group of trusted attendants.

40. When the king enters the reserved forest for sport, fully armed soldiers should carefully stand guard outside it watching over distant regions.

तद्वनेचरचित्तज्ञैरिति। वने मृगयावने। शेषं सुगमम् ॥ ३७ ॥

तत्कर्माप्त इति। तत्कर्माप्तः तस्मिन् मृगयाकर्मणि आप्तः। शेषं सुगमम् ॥ ३८ ॥

अन्यकार्याविरोधेनेति (धर्मार्थाद्यविरोधेनेति, पाठान्तरम्)। प्रातरिति न भुक्तोत्तरकालम्। चङ्क्रमणक्षमः अश्वाद्यभावेऽपि धावनादिसमर्थः। तदिति मृगयारण्यम् आविशेत् प्रविशेत्। मितैः परिमितैरिति ॥ ३९ ॥

यदा चेति। दूरान्तगोचरं दूरस्य दूरवर्तिनः अन्तस्य मृगयारण्यप्रान्तभागस्य गोचरम् ॥ ४० ॥

सद्भिर्ये[52] मृगयायामे गुणाः[53] साधु प्रकीर्त्तिताः।
क्रीड़ाप्रीतो[54] नरपतिस्तांस्तत्र समवाप्नुयात्॥ ४१।
विधिरेष समुद्दिष्टो मृगयाक्रीड़ने वरः[55]।
न गच्छेदन्यथा राजा मृगयायां[55a] मृगा यथा॥ ४२।

[52] सद्भिर्यो [53] गुणः…प्रकीर्तितः

[54] प्रीतिर्नरपतिस्तं तत्र स्वयमाप्नुयात्; स्तत्र सर्वमवाप्नुयात्; धृति

[55] परः [55a] मृगयां मृगयुर्यथा

41. Benefits derivable from hunting described by the wise may be realised by the ruler himself with pleasure if he takes to it as a sport (and not get addicted to it, as in that case it will turn out to be *vyasana*).

42. The rules for hunting (*mṛgayā-krīḍā*) have thus been described. The ruler should not deviate from these, but go out hunting for hunting's sake (not like a hunting addict or a professional hunter).

सद्भिरिति। अर्थः सुगमः॥ ४१॥

विधिरेष इति। अन्यथा कृतकमृगयारण्यादिकं विना मृगयुर्यथा व्याध इव राजा मृगयां न गच्छेत्॥ ४२॥

महता[56] रक्षणेनापि धनस्य द्रागविमुक्तता।
निःसत्यता निष्ठुरता क्रोधो वाक्शस्त्रखण्डनम्॥ ४३।
लोभो धर्मक्रियालोपः कर्मणामप्रवर्तनम्।
सत्समागमविच्छित्तिरसद्भिः सह वर्तनम्॥ ४४।
अर्थनाशक्रियावश्यं नित्यं वैरानुबन्धिता।
सत्यप्यर्थे निराशत्वमसत्यपि च रागिता[57]॥ ४५।
प्रतिक्षणं क्रोधहर्षौ[57a] सन्तापश्च प्रतिक्षणम्।
प्रतिक्षणं च संक्लेशः साक्षिप्रश्नः प्रतिक्षणम्॥ ४६।
स्नानादिगात्रसंस्कारपरिभोगेष्वनादरः।
अव्यायामोऽङ्गदौर्बल्यं शास्त्रार्थाप्रत्यवेक्षणम्[58]॥ ४७।
गूहनं[59] मूत्रशकृतोः क्षुत्पिपासोपपीडनम्[59a]।
इत्यादींस्तत्र निपुणा[60] द्यूतदोषान् प्रचक्षते॥ ४८।

[56] महतोऽपि क्षणान्नाशो धनस्य ह्रीविमुक्तता [57] साशता

[57a] क्षोभहर्षौ [58] शास्त्रार्थप्रत्युपेक्षणम्

[59] वहनं [59a] क्षुत्पिपासादिपीडनम्

[60] सम्प्रयुक्तका

43. (The wrongs or adverse results arising from the passion of gambling (*dyūta*) are)—great loss of time and money as well as of gracefulness (*hrī-vimuktatā*), breach of promises, cruelty (unsympathetic attitude), anger, exchange of harsh words (wordy duels).

44. Greed, neglect of religious ceremonies, lack of initiative for work, separation from the company of honest people and association with the dishonest;

45. Sure loss of money (for stakes in the game) always and resultant enmity with the rivals, feeling of hopelessness (about recovery) of money (staked) and cherishing false hopes for gain of money (and putting more money in the game);

46. Anger or joy or remorse afflicting the mind at every turn of the game (in victory and in defeat), worries at every count and calling up witnesses (to settle doubtful results);

47. Neglect of essential cleansing of the body by bathing and washing, and of relaxation (by diversionary comforts), absence of physical exercise and consequent weakness of limbs, and also disregard for injunctions of the Śāstras;

48. Suppression of the calls of nature, as well as of hunger and thirst (being engrossed in the game) and others are the evils resulting from gambling (*dyūta-doṣān*) according to the opinion of experts in the science of polity.

द्यूतव्यसनदोषानभिधातुमाह—महत इति। ह्रीनिर्मुक्तता वसने हारिते नग्नो दीव्यतीति। निःसत्यता सत्यरहितत्वं पराजयभयात्। निष्ठुरता मातर्यपि मृतायां दीव्यतीति। क्रोधः हारितः पार्श्ववर्तिनामपि क्रुद्ध्यतीति। वाक्शस्त्रखण्डनं क्रोधान्धो वाक्पारुष्यं करोतीति ॥ ४३ ॥

लोभ इति। हारिते लोभात् चौर्ये बुद्धिः। द्यूतादरात् धर्मक्रियालोपः। प्रारब्धकर्मणामप्रवर्तनम्। द्यूतासक्तं सन्तः परिहरन्तीति। असन्तः कितवाः तैः सह वर्तनम् ॥ ४४ ॥

अर्थनाशक्रियेति। अवश्यमर्थनाशक्रिया जितोऽर्थमनुबध्नातीति। हारितवित्तो वैरी भवति। सत्यप्यर्थे निराशत्वं वित्तनाशात्। प्रतिक्षणं जयः पराजयो वा भविष्यतीति विचित्तानुकूलो[a] भावः ॥ ४५ ॥

प्रतिक्षणमिति। साक्षिप्रश्नः सन्दिग्धे अक्षपातने साक्षिग्रहणम् ॥ ४६ ॥

स्नानादीति। अप्रत्यवेक्षणमनालोचनम् ॥ ४७ ॥

गूहनमिति। गूहनं प्रच्छादनं मूत्रशकृतोः द्यूतान्तरायो मा भवत्विति। क्षुत्पिपासोपपीडनमिति द्यूतासक्तया भवतीति। इत्यादीन् नीतिशास्त्रप्रवीणा द्यूतदोषान् प्रचक्षते ॥ ४८ ॥

[a] विचित्तानुकूलो

पाण्डवो धर्मराजस्तु लोकपाल इवापरः ।
[61]द्यूतेन ह्रसता विद्वान् कलत्राण्यपि हारितः ॥ ४९ ॥

---

[61] द्यूतव्यसनमापन्नः कलत्राण्यपि ; दीव्यन् कलत्राण्यपहारितः

नलश्च राजा द्यूतेन हृते राज्ये महोदये ।
धर्मदारान् वने त्यक्त्वा परकर्माकरोत्[62] प्रभुः ॥ ५० ।
तुल्यो भुवीन्द्रतुल्यस्य यस्य नास्ति धनुर्द्धरः ।
स रुक्मी रुक्मतुल्याभो[63] द्यूतदोषाद्गतः क्षयम् ॥ ५१ ।
राजा कौशिकरूषाणां[64] दन्तवक्त्रोऽपि मन्दधीः ।
तीव्रद्यूत[65] कृतदोषाद् दन्तभङ्गमवाप्तवान् ॥ ५२ ।
द्यूतादनर्थसंरम्भो द्यूतात् स्नेहक्षयो महान् ।
पक्षाणां [66]सहितानाञ्च द्यूताद्भेदः प्रवर्तते ॥ ५३ ।
इति केवलदोषं हि द्यूतं राजा परित्यजेत्[67] ।
समाह्वयं हि मेधावी दर्पिणां विनिवारयेत् ॥ ५४ ।

---

[62] परकर्मकरोऽभवत्
[63] रुक्मशैलाभो
[64] काशिकरूशानां
[65] तीव्राद् द्यूतकृताद् दोषाद्
[66] चापि महतां
[67] राजा द्यूतं विवर्जयेत्

49. Even the wise Dharmarāja (Yudhiṣṭhira) the Pāṇḍava who was like a *Lokapāla* (the Divine Regent of the quarters) lost his lawful wife (Draupadī) and others in a deceitful game of dice.

50. King Nala, having lost his prosperous kingdom in gambling (dice play, with his brother Jayasena) had to retire to forest abandoning his lawful wife (Damayantī) and take up the job of a menial (kitchen servant at king Ṛtuparṇa's).

51. Prince Rukmin (the brother of Rukmiṇī) of the complexion of *Rukma* hill or the dazzling Mount *Meru*, who was equal to Indra (in prowess) and a bowman unequalled in the world, suffered defeat and destruction (at the hands of Balabhadra) through the evils of gambling.

52. Dantavaktra, the king of Kāśi-Karūśa out of foolishness got involved in quarrels arising from the game of dice play (with Balabhadra) and really got his teeth broken through the evils of gambling.

53. Gambling leads to misfortune (*anartha*), loss of feelings of love and affection and to hostility with rivals, however powerful.

54. As gambling thus always brings evils in its train, a ruler should avoid it. Moreover, an intelligent ruler should dissuade other arrogant challengers, inviting him (to the game).

पाण्डव इति । पाण्डवः पाण्डुपुत्रो युधिष्ठिरः साक्षाद् धर्मराजः तदवतारत्वात्, लोकपाल इवापरः इन्द्र इव द्वितीयः द्यूतेन हि असता अशोभनेन स्वयं विद्वानपि कलत्राणि धर्मदारानपि द्रौपदीं हारितः ॥ ४९ ॥

नल इति । ऋतुपर्णगृहे परिवर्तितरूपो महानसकर्मकरोऽभवदिति ॥ ५० ॥

तुल्य इति। इन्द्रतुल्यस्स यस्य तुल्यो भुवि धनुर्धरो नास्ति स रुक्मी रुक्मिणीभ्राता रुक्मशैलाभः मेरुपर्वताभो द्यूतदोषात् बलभद्रेण जर्जरीकृताङ्गः पश्चात् क्षयं गतः ॥ ५१ ॥

राजेति। बलभद्रेण द्यूतकाले फलकाहतो दन्तभङ्गं प्राप्तवान् काशिकरूशजनपदाधिपो दन्तवक्त्रोऽपि ॥ ५२ ॥

द्यूतादिति। संरम्भः अमर्षः। पक्षाणां महतां पाण्डवकौरवसमानानामपि ॥ ५३ ॥

इतीति। केवलं दोषा एव, गुणलेशोऽपि न विद्यत इति द्यूतं राजा परित्यजेत्। समाहृयं च मेधावी राजा अन्येषां दर्पिणामपि विनिवारयेत् ॥ ५४ ॥

कालातिपातः कार्याणां धर्मार्थपरिपीडनम्।
नित्याभ्यन्तरवर्तित्वात् साधु[68]प्रकृतिकोपनम् ॥ ५५ ।
रहस्यभेदस्तत् पश्चादकार्येषु प्रवर्तनम्।
ईर्षामर्षस्तथा क्रोधोऽनुरोधः[69] साहसं तथा ॥ ५६ ।
इत्यादि च स्त्रीव्यसनं पूर्वं[70] यच्च प्रकीर्तितम्।
तस्मात् स्त्रीव्यसनं राजा राज्यकामः परित्यजेत् ॥ ५७ ।
स्त्रीमुखालोकनतया व्यग्राणामल्पचेतसाम्।
ईहितानि[71] हि गच्छन्ति यौवनेन सह क्षयम् ॥ ५८ ।

---

68 सर्वप्रकृति 69 क्रोधो निरोधः साहसानि च ; विरोधः
70 यच्च पूर्वं 71 ईहितानीह

55. (Evils of *strīvyasanas* are enumerated as follows). Failure in the discharge of (royal) duties in due time, disregard of religious duties, wastage of money, and growth of disaffection among the law-abiding (*sādhu*) *prakṛtis* or all the state elements (*sarva prakṛtikopanaṁ*) due to king's prolonged stay within the harem (i.e., absence from the court);

56. Divulgence of secrets by them (the women, inadvertently confided upon), commitment of wrongful acts (indeed by them), jealousy and repentance, anger and hostility, and also rashness in actions.

57. In addition to the evils of other *vyasanas* these are said to be evils resulting from lust for women (*strīvyasanas*). Hence a ruler desirous of expanding his dominion should forsake *strīvyasanas*.

58. The foolish (prince) eager to enjoy the beauty of women by staring at their faces, loses all initiative to work as their youth passes away.

स्त्रीदोषानभिधातुमाह—कालातिपात इति। कार्याणां सकलकरणीयानां स्त्रीव्यसनासक्तस्य कालातिपातो भवति। धर्मार्थयोः प्रधानपुरुषार्थयोः पीडनं धर्मस्यासेवया अर्थस्य कामोपभोगव्ययेन। नित्याभ्यन्तरवर्तित्वात् सर्वप्रकृतिकोपनं मन्त्र्यादिप्रकृतयः कुप्यन्ति ॥ ५५ ।

रहस्यभेद इति। रहस्यभेदः स्त्रीपक्षतः। अकार्येषु परदारादिगमनेषु। ईर्षा स्त्रीविषये।

अमर्षेव जनविषये। ततः क्रोधः। ततो हिंसा। ततः प्रकृतिकोपः। विरोधश्च स्त्रीनिमित्तो रावणेन रामस्येव। तत्र साहसानि च बलात्कारे प्रवृत्तयश्च ॥।५६ ॥

इत्यादीति। पूर्वं यच्चेति मृगयाद्यूतमद्यादि। उपदंशार्थं मृगया। विनोदार्थं द्यूतम्। विषयार्थं मद्यमिति। शेषं प्रतीतम्॥ ५७ ॥

स्त्रीति। इति सुगमम्॥ ५८ ॥

गमनं[72] विह्वलत्वञ्च संज्ञानाशो विवस्त्रता।
असम्बन्ध प्रलापित्व[73]मकस्माद् व्यसनं मुहुः ॥ ५९ ।
प्राणग्लानिः सुहृन्नाशः प्रज्ञाश्रुति[74]मतिभ्रमः।
सद्भिर्वियोगोऽसद्भिश्च सङ्गोऽनर्थेन[75] सङ्गमः ॥ ६० ।
स्खलनं वेपथुस्तन्द्रा[76] नितान्तस्त्रीनिषेवणम्।
इत्यादि पानव्यसनमत्यन्तं सद्भिर्गर्हितम्॥ ६१ ।
श्रुतशीलबलोपेताः [77]पानदोषेण भूयसा।
क्षयमक्षीणनामानो जग्मुरन्धकवृष्णयः ॥ ६२ ।
योगीश्वरश्च[78] भगवान् भार्गवो भृगुतुल्यधीः।
शुक्रः पानमदात् तीव्राद् बुभुजे शिष्यमौरसम्॥ ६३ ।

[72] वमनं [73] बद्धवबद्धप्रलापित्व
[74] श्रुत [75] संयोगोऽनर्थ्ये
[76] स्तन्द्री नितान्तं स्त्री [77] भूपा दोषेण [78] स्तु

59. Now about the evils of addiction to wine (*madyavyasana*). Vomiting, bewilderment of senses, loss of consciousness, loss of self-control, incoherent and delirious talking and sudden fits of excitement.

60. Sufferings (mental and physical), loss of friends (or well-wishers), loss of intellect and learning due to mental perversion, separation from the honest and association with the dishonest for participation in unfortunate acts (i.e., drinking bouts),

61. Tripping (stumbling even on plain grounds), nervous shaking (of the body), giddiness and urge for sexual enjoyment, these and other such reprehensible (repugnant to the wise) acts result from too much addiction to wine (*pānavyasana*).

62. The Andhakas and Vṛṣṇis (the Yādavas) inspite of their learning, good conduct and strength, lost their prestige and honour, and met with destruction due to their excessive indulgence in drinking (wine).

63. The illustrious master ascetic (*yogīśvara*), Śukra of lineage of Bhṛgu (Bhārgava) who was equal to Bhṛgu in intellect (or wisdom) ate up (the cooked flesh of) his own favourite disciple (Kacha) under the influence of intoxicating wine.

मद्यव्यसनदोषानभिधातुमाह—वमनमिति। (गमनमिति पाठे गमनं यथा तथा सञ्चरणमिति)। प्रतीतम् ॥ ५९ ॥

प्राणग्लानिरिति। बलहानिः निःसत्त्वता। शेषं सुगमम् ॥ ६० ॥

स्खलनमिति। स्पष्टम् ॥ ६१ ॥

पुनरपि सोदाहरणं पानदोषमाह—श्रुतेति। अक्षीणनामानः वासुदेवबलभद्रादयस्ते अन्धकवृष्णयः भूयसा पानदोषेण क्षयं जग्मुः उच्छेदं प्रापुः ॥ ६२ ॥

योगीश्वर इति। भक्षितवान् शिष्यमौरसमात्मीयं आप्ततरं कचाख्यम्। कचः पिष्टः शुक्रात् मृतसञ्जीवनीं विद्यामपजहारेति। स गत्वा शुक्रदुहित्रा सख्यमकरोत्। तद्द्वारेण शुक्रस्याप्ततरो बभूव। तज्ज्ञात्वा दैत्यैः बहुशो व्यापादितोऽपि कचो दुहित्रनुरोधान्मृतसञ्जीवन्या यावत् पुनर्नवः क्रियते तावद् दैत्यैः कचं व्यापाद्य तन्मांसानि बहुधा पक्वानि कृत्वा मद्येन सह शुक्रस्य प्रेषितानि। ततो ब्राह्मणानां मद्यपानं निषिद्धमिति ज्ञात्वापि मद्येन सह शुक्रेण कचो भक्षित इति। तदुच्यते शुक्रः पानमदान्धो बुभुजे शिष्यमौरसमिति ॥ ६३ ॥

पानक्षितो[79] हि पुरुषो यत्र तत्र[80] प्रवर्तते।
यात्यसंव्यवहार्यत्वं[81] यत्र तत्र प्रवर्तनात् ॥ ६४ ॥
कामं स्त्रियं[82] निषेवेत पानं वा साधुमात्रया।
न द्यूतमृगये विद्वानात्यन्तव्यसने[83] हि ते ॥ ६५ ॥

---

[79] पानाक्षिप्तो [80] यत्र यत्र
[81] व्यवहारित्वं तत्र तत्राप्रवर्तनात् [82] स्त्रियो
[83] विद्वानत्यन्त

64. A man under the influence of wine moves about indiscriminately, even in prohibited quarters and mixes with them (i.e. the despised castes and accepts food and drink from them), and for such actions he is excommunicated from the society.

65. An intelligent ruler may take to enjoyment of women with moderation and drinking wine in a measured dose (*sādhu mātrayā*), but not to gambling and hunting as these entail in great dangers of (*vyasana*).

पानक्षिप्त (पानाक्षिप्त) इति। पानासक्तो मद्यपानेनाक्षिप्तो यत्र यत्र प्रवर्तते शास्त्रनिषेधस्यास्मरणात्। चण्डालगृहादिष्वपि। ततश्च याति असंव्यवहारित्वं[a] शिष्टसंव्यवहारयोग्यो न भवति यत्र तत्र प्रवर्तनादिति ॥ ६४ ॥

यद्यपि कामजं व्यसनं चतुर्वर्गमात्रसेवकं तथापि धर्मार्थयोः फलत्वात् स्त्रीपानयोरस्तित्वमभिधातुमाह—काममिति। कामं निश्चितं यदा सर्वथा स्त्रियं त्यक्तुं न शक्नोति तदा स्त्रियं निषेवेत। पानं वा साधुमात्रया प्रमाणेन। प्रमाणं—धर्मार्थसेवाविघ्नकृत् यथा न भवति। शेषं सुगमम् ॥ ६५ ॥

[a] असंव्यवहार्यत्वं

तदपनयविधिज्ञैः श्रेयसां विघ्नकारि
व्यसनमिदमुदारं सप्त धेवोपदिष्टम्[84] ।
जनयति हि निसर्गादेकमप्याशु[85] नाशं
किमु न भवति हन्ता यौगपद्योदयेन ॥ ६६ ।

घटयति[86] परिभोगप्राहितामिन्द्रियाणां
श्रुतमपि विनिहन्ति श्रेष्ठतां श्रेष्ठताञ्च[87] ।
चलयति च विभूतिं भूयसीमप्यनीचे-
रपि विबुधमतीनां सप्तकोऽयं दुरन्तः ॥ ६७ ।

अरिगणा नियतं व्यसने स्थितं[88]
परिभवन्ति भवन्ति च दुश्छिदः ।
अपगतव्यसनाश्च[89] बुधा रिपून्
परिभवन्ति भवन्ति च दुश्छिदः ॥ ६८ ।

इति सप्तव्यसनवर्गो नाम त्रयोविंशं प्रकरणम् ।

इति कामन्दकीये नीतिसारे सप्तव्यसनवर्गो नाम पञ्चदशः सर्गः ॥ (मुद्रित पुस्तकानुसारेण इति चतुर्दशः सर्गः ॥)

---

[84] सप्तधेहोपदिष्टम् [85] निषङ्गादेकमेवाशु

[86] पटयति [87] प्रष्ठताञ्च

[88] स्थितान् [89] स्तु

66. Experts conversant with implications of wrong policies mark out these seven principal *vyasanas* as retarding the material prosperity. Each one of them by itself is capable of bringing about ruination, what to speak of their combination (*yaugapadyodayena*).

67. These seven kinds of *vyasanas* are so dangerous as to increase longing of the sense organs for the enjoyment of sensual pleasures, destroy wisdom, excellence and power of leadership as well as of growing prosperity, even of those who are learned and endowed with divine qualities.

68. A king, afflicted with *vyasanas*, is defeated by his enemies who themselves become invincible (*duśchidah*) ; whereas a wise ruler, devoid of *vyasanas* defeats the enemies and himself becomes invincible.

उपसंहरन्नाह—तदिति । यस्माद् व्यस्यत्येनं श्रेयस इति तस्मादपनयार्त्रिविधिज्ञैरपनयस्य शास्त्रविरुद्धाचरणस्य विधिमनिष्टलक्षणं जानन्ति इत्यपनयविधिज्ञाः, तैराचार्यैर्व्यसनमिदमुदारं यथा भवति तथा उपदिष्टम् । श्रेयसां विघ्नकारीति सप्तधा सप्तप्रकारमेतेषां मध्ये निषङ्गात् निश्चितसङ्गादेकमप्याशु नाशं जनयति । किमु न भवति हन्ता व्यसनसप्तकोऽयं दुरन्त इति वक्ष्यमाणेन यौगपद्योदयेन इति ॥ ६६ ॥

घटयतीति (पटयतीति)। इन्द्रियाणां चक्षुः श्रोत्रत्वग्-जिह्वाघ्राणानां विषयपरिभोगग्रहणे पाटवं करोति। श्रुतमपि शास्त्रं विनिहन्ति नाशयति। श्रेष्ठतामुत्कमत्वम्। प्रष्ठतामग्रगामित्वम्। चलयति च विसूतिं श्रियं निश्चलामपि भूयसीं महाप्रमाणामपि। अनीचैरत्यर्थमेव। अपि विबुधमतीनां देवसमानबुद्धीनामपि सप्तकोऽयं व्यसनानां दुरन्तः दुष्टपरिपाक इति ॥ ६७ ॥

अरीति। अरिगणाः शत्रुगणाः। नियतं निश्चयेन। अपगतव्यसना एव नृपाः परिभवन्ति रिपून्। भवन्ति च दुश्चिदः ॥ ६८ ॥

इति त्रयोविंशं सप्तव्यसनवर्गप्रकरणम्।

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्याम् सप्तव्यसनवर्गो नाम चतुर्दशः सर्गः ॥

षोडशः सर्गः

(मुद्रित पुस्तकानुसारेण पञ्चदशसर्गः प्रारम्भः)

२४। यात्राभियोक्तृप्रदर्शनप्रकरणम्।

नानाप्रकारैर्व्यसनैर्विमुक्तः[1]
शक्तित्रयेणाप्रतिमेन युक्तः।
परं दुरन्तव्यसनोपपन्नं
यायान्नरेन्द्रो विजयाभिकाङ्क्षी ॥ १ ।

प्रायेण सन्तो व्यसने रिपूणां
यातव्यमित्येव [2]समादिशन्ति।
तथैव[3] पक्षो व्यसने[3a] हि नित्यं
क्षमस्तु सन्नभ्युदितोऽभियायात् ॥ २ ।

[1] वियुक्तः [2] मित्येवमुपादिशन्ति
[3] तत्रैष [3a] व्यसनं ह्यनित्यं

Sarga—XVI

Prakaraṇa 24.

Yātrābhiyoktṛpradarśana

(Circumstances suitable for expeditions).

1. Free from the different kinds of *vyasanas* and fully equipped with the three royal powers (*prabhuśakti, mantraśakti* and *utsāhaśakti*) in matchless form a ruler, desirous of victory (*vijayābhikāṅkṣī*) should set out on expedition against an enemy, afflicted with *vyasanas,* (as in such circumstances he may expect sure victory).

2. Wise men generally advise marching against an enemy afflicted with *vyasanas.* But the ruler who feels himself capable (of launching expeditions) due to his prosperous resources should set out against the enemy even if the *vyasanas* of the enemy are of a fleeting nature (i.e. who is not sorely afflicted).

निर्व्यसनस्याभिजातस्य कर्माभिधातुमाह—नानाप्रकारैरिति। नानाप्रकारैरुक्तस्वरूपैः। शक्तित्रयेणाप्रतिमेन प्रभुमन्त्रोत्साह लक्षणेनानन्यसमेन। परं यातव्यम्। दुरन्तेत्यादि निःप्रतिविधेयव्यसनगतम्। एवं सति[1]नरेन्द्रो विजयं प्राप्नोतीत्यर्थः ॥ १ ॥

प्रायेणेति। रिपूणां व्यसनेऽपि यद्यात्मना शक्तस्तर्हि यायान्नान्यथेत्यर्थः। क्षमः समर्थश्चेत् अभ्युदितः अभ्युदययुक्तः सन् अभियायात् शत्रोर्व्यसनाभावेऽपीति शेषः ॥ २ ॥

[1] एवंभूतो

यदा क्षमस्तु प्रशमं[4] निहन्तुं
परात्क्रमादूर्जितमप्यमित्रम्।
तदा[5] हि यायाद्विहितानि[6] कुर्वन्
परस्य वा कर्षण[7] पीडनानि ॥ ३ ।
सम्पन्नसस्यं विषयं परस्य
यायात्प्रमृद्य[8] विजयाय राजा ।
सस्योपघातेन परस्य वृत्ति-
च्छेदः[9] स्वसैन्योपचयश्च साधु ॥ ४ ।

[4] प्रसभं [5] तदापि ; तदाभि
[6] यायाद्विहितानि कर्तुम् ; यायात्स्वहितानि
[7] कर्शन [8] प्रमृद्नन्
[9] वृत्तेश्छेदः ; वृत्तिः छेदश्चसैन्यापचयश्च साधुः

3. When the ruler (*vijigiṣu*) feels confident of his ability to destroy by force the enemy, though powerful and prosperous, he should launch upon an expedition after taking necessary measures (i.e., organising his forces), and start with causing damage and destruction (of enemy territories, *karṣaṇa-pīḍanāni*).

4. The ruler should direct his march to conquer that part of the enemy territory which is rich in grains (i.e., considered as its granary). for loss of the grainstock will entail in loss of sustenance (by food supply for the enemy) and acquisition of (additional) resources for his own army.

यदेति । यदा ऊर्जितं प्रबलं अमित्रं शत्रुं पराक्रमात् बलेन प्रसभं निहन्तुं क्षमः समर्थः । तदा परस्य यातव्यस्य पीडनकर्षणानि पीडनं प्रपीडनं कर्षणं धनधान्यादीनामाकर्षणम् इत्यादीनि अहितानि अनिष्टाचरणानि कुर्वन् यायात् अभिगच्छेत् ॥ ३ ॥

सम्पन्नसस्यमिति । राजा विजयाय सम्पन्नसस्यं परिपक्वानेकसस्यं प्रमृद्य यानयोग्यं परस्य यातव्यस्य विषयं राज्यं यायात् आक्रामेत् । यतः सस्योपघातेन सस्यनिर्लुण्ठनेन परस्य वृत्तिच्छेदः स्वसैन्यानामुपचयः पुष्टिश्च साधु यथा तथा भवेदिति शेषः ॥ ४ ॥

विशुद्धपृष्ठः पुरतो विचिन्वन्
भयप्रदेशान् परकर्मवेदी ।
[10]सुवीवधासारविशुद्धमार्गो[11]
विशेद्धु धरित्रीं द्विषतोऽप्रमत्तः ॥ ५ ।

[10] स्ववीवधा [11] मार्गौ

5. The *Vijigīṣu,* confident of the security of his rear (i.e., apprehending no attack from the *pārṣṇigrāha,* who might have already been restrained), should proceed towards the enemy in the front very carefully (*apramattaḥ*), avoiding regions potential of dangers (i.e., where there might be fear of strong resistance), but alert and informed of movements of the enemy, and ensuring the safety of the routes of supply of provisions and replenishment of the army by his allies. (*svavivadhāsāra-viśuddhamārga*).

विशुद्धपृष्ठ इति। पार्ष्णिग्राह (प्रति)विधानाद्विशुद्धपश्चाद्भागः। विचिन्वन् निरूपयन्। [a]सुवीवधासारविशुद्धमार्गः वीवधः धान्यादेः प्राप्तिः आसारः सुहृद्बलं विशुद्धमार्गश्च यस्य सः। अप्रमत्तः सावधानः इति ॥ ५ ॥

[a] स्ववीवधा

समे प्रवेशो विषमे च भूमे-
निम्ने स्थले वा [12]सुमुखेन यायात्।
अनातुरः सन्नभयो[13] हि विद्वान्
सन्नद्धगुल्मो[14] विहितान्नपानः[15] ॥ ६ ।
ग्रीष्मे प्रभूताम्बुवनेन याया-
न्निर्वासनार्थं[16] करिणां यथा तु[17] ।
ऋतेऽम्भसो[18] ग्रीष्मकृतात् प्रतापाद्
भवन्ति कुष्ठानि मतङ्गजानाम् ॥ ७ ।
स्वल्पक्रियाणामपि कुञ्जराणा-
मुष्मा शरीरेष्वभिजाज्वलीति[19] ।
आयासयोगेन [20]हि सम्प्रवृद्धः
प्रसह्य हन्ति द्विरदान् प्रतापः ॥ ८ ।
सर्वाणि सत्त्वानि[21] बलूष्मकाले[22]
विनाम्बुना यान्ति परामवस्थाम्।
[22a]अत्यर्थमुष्णप्रवितप्तकायाः
प्रयान्ति सद्यः करिणोऽपिबन्तः ॥ ९ ।

---

[12] स्वमुखेन ; सुमुखेन [13] सन् विभवेषु विद्वान्
[14] सैन्यो [15] तोयः [16] निर्वापणार्थं
[17] पथा तु ; तथा तु ; यथाम्बु [18] विनाम्बुना
[19] शरीरेषु हि वाज्वलीति [20] च [21] भूतानि
[22] बहूष्मकाले [22a] अत्यर्थमुष्णप्रतितप्त ; अन्यत्वम् ऊष्णत्वम्

6. A wise *vijigiṣu*, indomitable and fearless, should equip his armed forces with (sufficient) rations and drinking water so that they can march forward through plains or rough land, low or high land equally vigorously.

7. If march is undertaken in summer the route should be so determined as to lie through woods abounding in water, to enable the elephants of the army to take bath (to counteract the climatic heat). Without water (for bathing) the great elephants are afflicted with leprosy owing to the severe heat of summer.

8. Even while discharging comfortable jobs (or while taking regular bath) the body heat of the elephant becomes acute, and it increases manifold with strenuous exertions, so much so that they lose their vigour.

9. During the scorching summer all creatures suffer from hardship for want of water. More so the elephants of (normally) heated bodies, who without getting water to drink die or become blind.

सम इति। समे प्रदेशे विषमे च भूमेर्निम्ने स्थले जलरहिते। विहितान्नपानः (तोयः) स्वसैन्य-पर्याप्तप्रतिविहिताहारोदकः। शेषं सुगमम् ॥ ६ ॥

ग्रीष्म इति। ग्रीष्मे करिणां निर्वापणार्थं श्रेयोविधानार्थं प्रभुताम्बुवनेन मार्गेणेति शेषः। अम्भस ऋते जलाभावेन ग्रीष्मप्रभावात् हस्तिनां कुष्ठानिश्वित्ररोगा भवन्ति, इति हस्तिचिकित्सा-सम्मतम् ॥ ७ ॥

स्वस्थक्रियाणामपीति। स्वस्थक्रियाणामपि कुञ्जराणां शरीरेषु उष्मा उत्तापः अभिजाज्वलीति देदीप्यते। आयासयोगेन गमनायासयोगेन सम्प्रवृद्धः उत्तेजितः सन् द्विरदान्, तानेव कुञ्जरान् प्रसह्य सहसा हन्ति विनाशयति ॥ ८ ॥

सर्वाणीति। परामवस्थां मरणावस्थाम्। शेषं सुगमम् ॥ ९ ॥

सुगन्धिदानच्युतशीकरेषु[23]
दन्ताभिघातस्फुटितोपलेषु।
गजेषु नीलाभ्रसमप्रभेषु
राज्यं निबद्धं पृथिवीपतीनाम् ॥ १० ॥

सुकल्पितः संयुगदृष्टमार्गः[24]
स्वधिष्ठितो धीरतरेण[25] पुंसा।
तुरङ्गमानां[26] परिकल्पितानां-
मेको गजः षष्टिशतानि हन्ति ॥ ११ ॥

---

[23] स्रुतिशीकरेषु ; स्युतशाकिरेषु
[24] संयति दृष्टमार्गः
[25] वीरतमेन
[26] माणामपि कल्पितानामेको

स्थले[27] जले च द्रुमसङ्कटे च
साधारणे[28] चापि समेऽसमे च।
प्राकारहर्म्याद्रिविदारणे[29] च
ध्रुवं जयो नागवतां बलानाम् ॥ १२ ।
तस्माद्यतो भूरिजलस्य[30] पन्था
[31]घनोदपानोपचितो विशङ्कः।
[32]तेनाभियायाज्जनयन् प्रतापं
शनैः शनैरश्रमयन्[33] बलानि ॥ १३ ।

---

[27] जले स्थले ; साधारणे च द्रुमसङ्कटे च जलेस्थले साधु सुसङ्कटे च

[28] समेऽसमे साधु चलेऽचले च ; चलेऽचले साधु समेऽसमे च

[29] हर्म्याट्टविदारणे च

[30] स्तु

[31] यतोऽन्नपानोपचयोऽविशङ्कः

[32] ततो हि जायाज्जनयन् ; ततोऽभि

[33] शनैर्विश्रमयन्

10. The great rutting elephants (from whose temples flow fragrant ichor), capable of rending rocks with their tusks, with bodies effulgent like the blue clouds, constitute a stable support for the kingdoms or rulers.

11. Arranged in battle formation and well trained, each elephant mounted by an expert driver, is capable of destroying (killing) a cavalry of six hundred horses.

12. An army supported by elephant forces (contingents) is sure of success (in battles) whether in a water-logged field or on high lands, in a forested defile or plains or in a rough (uneven) region, whether there is (passable) road or not, and also in breaking through ramparts or mansions (i.e., castles).

13. Hence (i.e., when the elephant forces constitute the principal striking power), care should be taken to conduct the march fearlessly through regions abounding in sufficient water and adequate supply of provisions, and slowly (or in short stages) so as to consolidate the (growing) power (of the *vijigīṣu*) and also to allow forces to rest and recuperate (for a more vigorous charge in the next round).

सुगन्धीति। सुगन्धिदानच्युतसीकरेषु सुरभिमदक्षरणसमजलबिन्दुवत्सु। दन्ताभिघातेन स्फुरिता उत्पन्ना येषां तेषु। तडित्साम्यमेतत्। शेषं सुगमम् ॥ १० ॥

एतदेव प्रकटयितुमाह—सुकल्पित इति। इति स्पष्टम्। अतएव गजेषु राज्यं राज्ञां निबद्धमिति ॥ ११ ॥

स्थल इत्यादि। जले नदीसरस्तडागाद्युत्तारे, महाप्रमाणत्वात्। स्थले च द्रुमसङ्कटे द्रुमभङ्गसमर्थत्वात्। साधारणे च जलस्थलमिश्रे चापि। समेऽसमे* पाषाण स्थाणुवल्मीकादिभिः। प्राकारो

नगरादीनाम्। हर्म्याणि धवलगृहाणि। अट्टा अट्टालकाः। तद्विदारणेन च जयो ध्रुवं निश्चयेन नागवतां हस्तियुक्तानाम् ॥ १२ ॥

तस्मादिति। यस्मान्नागवतां बलानां जयस्तस्माद् यतो भूरिजलस्तु[30] पन्थाः यतोऽन्नपानाभ्यामुपचितः पुष्टः, अविशङ्क्यो यत्र शङ्काभावादविशङ्क्यः तत्राभियायाज्जनयन् प्रतापं जनजानपदप्रजाविषये दाहविलोपादिभिः प्रतापो भवतीति। अश्रमयन् बलानि बलानां यथा श्रमो न भवतीति ॥ १३ ॥

[3] समेऽध्रुवे पाषाण [30] जलोऽस्ति पन्था

अभ्युन्नतानामणुरप्युदारं
पश्चात्प्रकोपं जनयेदरीणाम्।
[34]तं चाप्रमत्तः प्रसमीक्ष्य याया-
न्न नाशयेद् दृष्टमदृष्टहेतोः ॥ १४ ।

[34] स्वं चा, स्वं चाप्रमत्तः

14. Enemies, however small in stature, if endowed with power and resources, may cause serious danger to the *vijigīṣu* from the rear (*paścāt-prakopaṁ*). Therefore a cool headed and accurate assessment of the (political) situation must precede launching of an expedition. No risk should be taken in staking what is seen (i.e., the territory under possession) for that what is unseen (i.e., uncertain of acquisition, *dṛṣṭama-dṛṣṭahetoḥ*).

पश्चात्प्रकोपचिन्तामभिधातुमाह—अभ्युन्नतानामिति। अभ्युन्नतानामप्यरीणां शक्तित्रयसम्पन्नानामपि स्वयमणुरपि हीनशक्तिरपि पश्चात्प्रकोपमुदारमुत्कृष्टं जनयेत्। तं[4] पश्चात्प्रकोपमप्रमत्तः प्रमादरहितः समीक्ष्येति प्रतिविधाय यायात्। कस्मादित्याह—न नाशयेदिति। अदृष्टस्य यानफलस्य हेतोर्दृष्टं पूर्वोपार्जितं[4a] राज्यं न नाशयेत्। पश्चात्प्रकोपः सर्वनाशं करोतीति भावः ॥ १४ ॥

[4] तम [4a] दृष्टं राज्यं

पश्चात्प्रकोपः पुरतः फलञ्च
पश्चात्प्रकोपश्च[35] तयोर्गरीयान्।
रन्ध्रं हि तद्विप्रकृता महत्त्वं
नयन्ति तस्मात् प्रसमीक्ष्य[36] यायात् ॥ १५ ।
पुरश्च पश्चाच्च यदा समर्थ-
स्तदाभियायान् महते फलाय।
पुनः[37] प्रसर्पन्नविशुद्धपृष्ठः
प्राप्नोति तीव्रं खलु पार्ष्णिमेवम् ॥ १६ ।

[35] स्तु [36] प्रविधाय [37] पुरः; पुरः समर्थो न विशुद्ध

15. Between the potential dangers at the rear and chance of success at the front, the former (i.e., dangerous potentiality behind) is of greater proportion. Because it is like a hole (*randhra*) in administration that seriously affects the elements of state (and stability of the kingdom). Hence proper review and remedy of it must precede an expedition (frontward) (*prasamikṣya yāyāt*).

16. When the *vijigīṣu* is confident of his strength both frontward and rearward (i.e., about subjugating his enemy in front and also in the rear), he should set out on expedition. Otherwise inspite of his strength in successfully meeting the enemy in the front, if the rearside is left unprotected, serious damage may befall from hostile action by the enemy at the rear.

पश्चात्प्रकोप इति। पश्चात् स्थानीयादौ प्रकोपः बाह्यैराभ्यन्तरैर्वा अर्थक्षोभादिकः, पुरतो यातव्यसिद्धेः फलं च, तत्र किं गरीय इति परामर्शे पश्चात्प्रकोपस्तु तयोर्गरीयान्। रन्ध्रं हि तत् पश्चात्-प्रकोपलक्षणं विहृता ये विरोधिनो[5] महत्त्वं नयन्ति। तस्मात् प्रविधाय प्रतिविधानं कृत्वा यायान्नान्यथेति ॥ १५ ॥

पुरश्चेति। पुरोऽग्रतो यातव्यं सन्धापयितुं पश्चाच्च प्रकोपं शमयितुं समर्थः स्यात् स्फीतबलविभवेन तदाभियायान् महते फलाय। पुरः समर्थो न विशुद्धपृष्ठः अप्रतिविहित-पार्ष्णिग्राहादिः पार्ष्णिग्राहादि-जनितं[5a] महाभयं प्राप्नोतीत्यर्थः ॥ १६ ॥

[5] विरोधिताः [5a] ग्राहात् जनितं

यास्यन् पुरो[38] रक्ष्यमनेकवर्गं-
मनेकमुख्यं च बलं निदध्यात्।
अनेकमुख्यस्य हि चैकमत्य-[39]
मनैकमत्यं द्विषतामभेद्यम् ॥ १७ ।
अवश्ययातव्यतयोद्यतः सन्
पश्चात्प्रकोपाहितया न शङ्का[40] ।
सेनापतिं वाप्यथ[41] वा कुमारं
बलैकदेशेन पुरो निदध्यात् ॥ १८ ।

---

[38] परो

[39] नैकमत्यमनैकमत्यं ; मनेकमुख्यं

[40] हितयानशङ्कः [41] वाप्यथवा

17. While setting out on an expedition necessary security measures should be taken over wide areas and the vanguard of the army should be composed of leaders of different contingents united in action. Because unity among the army chiefs, and not disunity, makes the army invincible to the enemy forces.

18. When marching against an enemy is considered essential, the ruler, apprehending danger of hostile action of the rearward enemy (should himself stay behind in order to deal with any untoward development and) send out the commander in chief and/or the crown prince with a part of the armed forces (keeping the rest for possible internal contingency).

यास्यन्निति। विजिगीषुर्गन्तुमिच्छन् पुरो रक्ष्यं स्थानीयं रक्षकमनेकवर्गमिति अष्टवर्गैकादश-वर्गिकादयो वर्गा यस्मिन् तत् अनेकवर्गं हस्त्यश्वाद्यनेकप्रधानं बलं विदध्यात्। कस्मादित्याह—अनेक-मुख्यस्य हि नैकमत्यं[6] अभिन्नमतं अनैक्यमत्यं द्विषतामभेद्यं भवतीति ॥ १७ ॥

अवश्येत्यादि। अवश्ययातव्यतया यानस्य उद्यतः उद्युक्तः सन्। पश्चात्प्रकोपाहित यानशङ्कश्चेत् पश्चात्प्रकोपेण आहिता उपस्थिता यानशङ्का यस्य तादृशश्चेत् तदा सेनापतिं सेनानीं अथवा कुमारं बलैकदेशेन बलस्यांशेन सहः पुरः शङ्कास्थानस्याग्रे निदध्यात् रक्षार्थं स्थापयेत् ॥ १८ ॥

[6] नैकमत्यं भिन्नमतं

अभ्यन्तराद्[42] बाह्यकृताच्च [43]दोषा-
दाभ्यन्तरस्त्वेव तयोर्गरीयान्।
आदाय गच्छेद्बहिः प्रचारान्
बाह्यांश्च कृत्वा विहितानुकल्पान्[44] ॥ १९ ॥

पुरोहितामात्यकुमारकुल्याः
सेनाभिगोतार[45] इमे प्रधानाः।
एषां हि [46]मन्वोद्यतमप्रकोप-
[47]मन्तःप्रकोपं समुपादिशन्ति ॥ २० ॥

[48]राष्ट्रान्तपालाटविकाभिसीम्नां[49]
बाह्यप्रकोपोऽन्यतमः प्रकोपः।
[50]उत्पद्यमानो निपुणप्रचारै-
स्तं मन्त्रिभिः[51] सम्यगुपाददीत ॥ २१ ॥

---

[42] आभ्यन्तराद् [43] कोपादा

[44] विहितार्थकल्यान्; तार्थमानान्

[45] सेनाधिगोप्तार

[46] मध्येऽन्यतम प्रकोपं; सन्तोऽन्यतम; तेषां हि सह्वेऽन्यतम

[47] कोपादन्तः [48] राज्या

[49] विकामतानां; कान्त्यजानां; कामव्रानां; काभिसत्रिनां

[50] उत्पाद्यमानं निपुणं प्रचारै

[51] सत्रिभिः

सामादिभिः संशमयेत् प्रकोपं
परस्परावग्रहभेदनैश्च ।
तथापि[52] धीरः शमयेत्प्रकोपं[53]
यथा भजेरन्न परान् प्रसक्ताः ॥ २२ ॥

---

[52] तथा च [53] शमयेद्विकारं

19. About comparative seriousness of internal and external dangers (i.e., arising out of disaffection of internal elements and of external elements), the internal dangers are considered more potential of harm. Hence before marching out, the causes of internal disturbances should be properly remedied (by conciliation, rewards, etc) and also of external factors by contributing to their welfare.

20. It is advised (by experts) that disaffection among the priests, ministers, princes, members of the royal family, commanders and chiefs of army contingents, stationed as they are within the capital, generate internal disturbances (*antahprakopam*).

21. Disaffection among provincial governors, frontier guards (wardens of the marches), foresters (i.e., chiefs of forest tribes) and those compelled to surrender (to the ruler) leads to another kind of disturbances, viz, external disturbances (*bāhyaprakopam*). On the report of the break out of any such disturbance, the ruler should take prompt measures to remedy it through the expert services of his ministers (or spies).

22. By conciliation and other relevant means (reward or punishment) as well as by creating mutual disunion and dissension among them the disaffected parties, both internal and external, should be appeased (or subjugated), so that they (the disaffected parties) may not resort to the enemy.

बाह्याभ्यन्तरकोपयोर्गुरुलाघवमभिधातुमाह—अभ्यन्तरादिति । आभ्यन्तरात् पुरोहितादिकृताद् बाह्याद् अन्तपालाटविकादिभिः कृताच्च कोपादाभ्यन्तरस्तयोर्गरीयान् । अहेरिवाभ्यन्तरात् कोपाद् भयं भवतीति भावः । तस्मादाभ्यन्तरकोपशङ्कायामबहिःप्रचाराणामाभ्यन्तराणामित्यर्थः । तानादाय पुरस्कृत्य गच्छेत् । बाह्यांस्तु वक्ष्यमाणप्रकारान् राष्ट्रान्तपालादीन् विहितार्थमानान् कृत्वा गच्छेदिति सम्बन्धः ॥ १९ ॥

बाह्याभ्यन्तरकोपप्रतिपत्तिमभिधातुमाह—पुरोहितामात्येत्यादि । पुरोहितामात्यकुमाराः प्रतीताः । कुल्या विजिगीषुकुलसम्भवाः । सेनाधिपो सारस्यतुच्छकाधिकारिणः । इमे प्रधानाः । एषां हि मध्येऽन्यतमप्रकोपमन्तःप्रकोपं समुपादिशन्तीति प्रतीतम् ॥ २० ॥

बाह्यप्रकोपमभिधातुमाह—राष्ट्रेत्यादि । राष्ट्रपालाः समाहर्तृप्रभृतयो राष्ट्रमुख्याः[*] । अन्तपालाः विषयसन्धिरक्षणनियुक्ताः दुर्गपालकाः । आटविकाः अटवीभोक्तारः । अवरुद्धाः मोक्षप्रमुखा राष्ट्रमुख्याः ।

[*] अमात्यप्रमुखा राष्ट्रमुख्याः

तेषां मध्ये अन्यतमप्रकोपो बाह्यप्रकोपः। उत्पद्यमानं द्विविधमपि कोपं निपुणप्रचारैर्मन्त्रिभिरुत्पादयीत जानीयात् प्रतीकारार्थम् ॥ २१ ॥

सामादिभिरित्यादि। सामादिभिरुपायैर्द्विप्रकारं कोपं शमयेत्। परस्परावग्रहैः[8] संरोधैर्भेदनैर्विश्लेषणैश्च तथा धीरो विजिगीषुः शमयेद् विकारं, यथा भजेरन् परान् प्रतप्ताः। तथा च कोपं शमयेत् ॥ २२ ॥

[8] परावग्रहैः संरोधनैर्भेदनैः श्लेषणैश्च

मनुष्ययुग्यापचयः क्षयो हि
हिरण्यधान्यापचयो व्ययस्तु।
तस्मादिमां नैव विदग्धबुद्धिः
क्षयव्ययायासकरीमुपेयात् ॥ २३ ।
अवश्यनिष्पत्तिमहाफलाढ्या-
मदीर्घसूत्रां परिणामकल्पाम्[84]।
कामं व्ययायासकरीमुपेया-
न्न त्वेव जातु क्षयदोषयुक्ताम् ॥ २४ ।

[84] कल्याम्

23. Loss of personnel (soldiers and non-combatants) and of transport animals (or means of transport, *yugyā*) is destruction or wastage (of resources)—*kṣaya*, and loss of gold (or money), grains and provisions constitute drain (of economic wealth) or *vyaya*. Hence an expedition likely to involve in both *kṣaya* and *vyaya* should not be embarked upon.

24. Inspite of drainage of money (*vyaya*) an expedition likely to produce decisive gain and rich benefits within a (reasonably) short time (i.e., not prolonged) and likely to be conducive to the interests in future too, may be undertaken, but an expedition likely to involve in destruction (of men and animals) or *kṣaya* must never be attempted.

कीदृशीं यात्रां न यायादित्याह—मनुष्येत्यादि। क्षयव्ययायासकरीं न यायादिति सम्बन्धः। क्षयव्ययायासलक्षणमभिधातुमाह—मनुष्याः पुरुषगुणोपेताः। युग्यानि युगे साधूनि[9] वाहनानि। तेषामपचयो यः स क्षय इत्युच्यते। हिरण्यं सुवर्णादि। धान्यानि पूर्वमध्यापरवापानि। तेषामपचयो यः स व्यय उच्यते। आयासः अध्वस्वेदादिः। तस्माद्विदग्धबुद्धिर्विजिगीषुरेवंविधां यात्रां न यायादिति ॥ २३ ॥

[9] साधनानि

यातव्या च यादृशी तादृशीमभिधातुमाह—अवश्यनिष्पत्तीत्यादि। अवश्यम्भाविनी निष्पत्ति-र्यस्य महाफलस्य तेनाढ्यां सम्पन्नाम्। अदीर्घसूत्रामप्यदीर्घकालाम्। प्रसमाप्तपरिणामां निर्दोषाम्।

परिणामकल्यां परिणतफलोन्मुखीम्। काममिति वरम्। वरशब्दश्चात्र शोभायां वर्तते। वरं व्यथायासकरीमुपेयात्। न त्वेव जातु नैव कदाचित् क्षयदोषयुक्तां मनुष्यमुख्यविनाशयुक्ताम्। यतस्तत् क्षयात् यात्राफलमेव न सम्पद्यते ॥ २४ ॥

वस्तुष्वशक्येषु समुद्यमश्चे-[55]
स्वशक्येषु मोहादसमुद्यमश्च।
शक्येषु[56]काले न समुद्यमश्च
त्रिधैव कार्यव्यसनं वदन्ति ॥ २५।

[55] समुद्यमश्च शक्येषु

[56] शक्येष्वकालेषु समुद्यमश्च ; शक्येषुचाकाल ; शक्येष्वकार्येषु

25. Attempts to achieve (things or purposes) that are unattainable, not attempting attainable purposes or things out of ignorance and attempting for attainable objects untimely, are the three kinds of lapses of performance (*kāryavyasana*) according to the *ācāryas*.

कार्यव्यसनमभिधातुमाह—वस्तुष्वित्यादि। वस्तुषु कार्येषु त्रिवर्गफलेषु, अशक्येष्वसाध्येषु समुद्यमः परमभियोगः। शक्येषु साध्येषु मोहादज्ञानादसमुद्यमोऽभियोगाभावः। शक्येष्वकालेषु समुद्यमश्च। चकारादवेशेषु एवंविधस्यैव कार्य्यस्य व्यसनं वदन्त्याचार्याः। व्यसत्येनं श्रेयस इति व्यसनलक्षणम्। कार्यस्य फलं श्रेयस्तद्व्यस्यतीति कार्यासिद्धिस्तस्माद्व्यसनम् ॥ २५ ॥

कामोऽक्षमादक्षिणतानुकम्पा
ह्रीः साध्वसं क्रौर्यमनार्यता च।
[57]दम्भोऽभिमानोऽप्यतिधार्मिकत्वं
दैन्यं स्वयुथस्य[58] विमाननञ्च ॥ २६।
द्रोहो भयं शत्रुपेक्षणञ्च
शीतोष्णवर्षाप्रसहिष्णुता च[59]।
एतानि [60]काले समुपाहितानि[61]
कुर्वन्त्यवश्यं खलु सिद्धिविघ्नम्[62] ॥ २७।

[57] दम्भोतिमा ; दम्भोऽभिमानोऽथ च धार्मिकत्वं

[58] स्वयूथ्य य

[59] वर्षांस्वसहिष्णुता च

[60] एतान्यकाले

[61] समुपार्जितानि

[62] कामविघ्नम्

26. Lust (for sensual pleasures), anger (*akṣamā*), (excessive) charity and sympathy (or lack of charity and sympathy, *adakṣiṇatā*), (too much) modesty, lack of promptness in taking initiative, crookedness,

dishonesty, arrogance, conceit, (too much) piousness, inferiority complex (*dainyaṁ*) and non-recognition (or neglect) of the services of one's own men (soldiers and allies),

27. malice, terror (cowardice), negligence of one's own interests, and incapability of bearing the inclemencies of weather in the cold, summer and rainy seasons. Such omissions and commissions at the moment of actions are definite hindrances to success (*siddhivighnaṁ* or *lābhavighnaṁ*).

अन्यान्यपि कार्यव्यसनान्यमभिधातुमाह—काम इत्यादि । कामः श्रोत्रत्वगादीन्द्रियाणां शब्दादिष्वासक्तिः स्त्रीजने च द्यूतमृगयादिषु च । अक्षमा कोपः, तज्जव्यसनत्रयम्—वाक्पारुष्यं दण्डपारुष्यमर्थदूषणमिति । एवमक्षमापि लाभविघ्नम् । दक्षिणता[10]सानुक्रोशता । तत्पक्षानुरोधादनैष्ठुर्यम् । अनुकम्पा कारुण्यम्—कार्ये साधितेऽस्य विपत्तिः स्यादिति । ह्रीरिति लज्जा, तद्वशाद् यथोचितानामकरणात् लाभविघ्नम् । साध्वसमप्रागल्भ्यम—अप्रागल्भ्यात् कार्यं नाशयतीति । क्रौर्यं—क्रूरो ह्यनाश्रयणीयो भवतीति कार्यं न साधयति । अनार्यता चेति । आर्याः शिष्टास्तद्विपर्यया ये अशिष्टा अनार्याः सत्कार्याकरणाल्लाभविघ्नम् । मानो गर्वः—गर्वितो ह्यनाश्रयणीयो भवतीति लाभविघ्नम् । धार्मिकत्वम् परलोकापेक्षया भीरुत्वम्—तस्य परातिसन्धानं न सम्भवतीति लाभविघ्नम् । दम्भः परवञ्चकत्वम्—तस्याविश्वसनीयत्वाल्लाभविघ्नम् । अभिमानो मान एव । मानाश्च केवलं लाभविघ्नं क्षयहेतुत्वाद् हानिरेवेति । तथा च कौटिल्यः "मानाद् रावणः परदारानप्रयच्छन्, दुर्योधनो राष्ट्राणि, क्षयमवाप ।" दैन्यमत्यल्पेच्छता । अल्पेच्छस्य हि महारम्भाणामप्रवृत्तेर्लाभविघ्नम् । स्वयूथ्यस्य विमाननमिति । सामुदायिकानां विमाननं मानाकरणम् ॥ २६ ॥

द्रोह इत्यादि । द्रोहो मित्रद्रोहादिकं लाभविघ्नम् । भयमिति भीरुता । सक्रोशाधर्मानर्थभीरुर्भयेनेति कौटिल्यः । भयमपि (लाभविघ्नम्) भयात् साध्यमपि न साधयति । शस्त्रवदुपेक्षणं चेति । सिद्धानामप्यर्थानामन्यायाद्य् पल्लवोपेक्षणमिति । शीतोष्णवर्षास्वसहिष्णुता च । असहिष्णुः कथं कार्यं साधयतीति लाभविघ्नम् । एतान्यन्यान्यपि काले[10a] देशे चेत्यर्थात् उपार्जितानि कुर्वन्त्यवश्यं खलु सिद्धिविघ्न लाभविघ्नश्चेति ॥ २७ ॥

[10] अदक्षिणता पाठे अदाक्षिण्यम् । दाक्षिण्याभावे अनुजीविनां भक्तिह्रासेन कार्यविध्वंसः ।

[10a] अकालेऽदेशेचेत्यर्थात्

मित्रोऽथ मैत्रश्च समाश्रितश्च
सम्बन्धजः कार्यसमुद्भवश्च ।
भृतो[62a] गृहीतो विविधोपचारैः
पक्षं बुधाः सप्तविधं वदन्ति ॥ २८ ।

[62a] भृत्यो

सदानुवृत्त्या[63] गुणकीर्तनेन
निन्दासहत्वेन च [64]रन्ध्रगुप्त्या ।
तदर्थशौर्योद्यम[65] सत्कथाभिः
पक्षोऽनुरागी स [66]हि वेदितव्यः ॥ २९ ।

कुलीनमार्यं श्रुतवद्विनीतं
[67]मानोन्नतं सभ्यमहार्यबुद्धिम् ।
कृतज्ञतोर्जा मतिसत्त्वयुक्तं
सद्वृत्तपक्षं खलु तत्र[68]विद्यात् ॥ ३० ।

---

[63] सदानुवृत्त्या [64] चरित्रगुप्त्या

[65] शौचोद्यम [66] रागीति स

[67] नीतमलोलुपं सत्यमहार्यमन्यैः [68] तं हि ; मित्रमिच्छेत्

28. Wise men say that there are seven kinds of parties (associated with a ruler), viz., his own men (dependents and friends), those of his allies (lent to him), those who have taken refuge (with him), those who are related to him (agnates and cognates as well as those related by marriage), those who are associated for some specific purposes or actions, his servants (employees) and those who have been won over by various services and gifts.

29. The devotion of such parties may be ascertained from their obedience (to the ruler) under all circumstances, singing praise of his merits, toleration of uncharitable remarks about them (if made by the ruler), non-disclosure of holes (*randhra-guptyā*) or weaknesses (of the ruler), and always speaking (to others) eulogising the richness (or prowess) and energy (of the ruler).

30. A well-merited loyal party may be recognised from his noble ancestry, Ārya-like conduct (i.e., polished behaviour), knowledge of the Vedas (i.e., learning), politeness, meritoriousness, (averseness to lust *alolupam*), cultured bearing (*sabhya*) (truthfulness), straight-forwardness (i.e., not prone to deceitfulness) in dealings with others, gratefulness, energy, intellect and firmness (in allegiance).

साहाय्यार्थं सप्तविधं पक्षमभिधातुमाह—निजोऽथेति । निज इति सुभगबन्धुवर्गः । मैत्र इति निर्निमित्तपक्षः । समाश्रितः इति प्रतिपक्षभयादाश्रयं गतः । सम्बन्धज इति यौनमौख-स्रौवोदितः । यौनः कन्यादानग्रहणकृतः । मौखः मुखकृतश्च व्याख्यानादिभिः शिष्योपाध्यायकृतः । स्रौव इति यज्ञोपकरणं स्रुगित्युच्यते । तथा होमेन दीक्षोत्तरकालं गुरुशिष्य सम्बन्धः (ऋत्विग्यजमानयोः) स्रौव इत्यभिधीयते । कार्यसमुद्भवश्च कार्यार्थं समुदिते तेन[11] समुत्पन्नसम्बन्धः । भृत इति भरणेनात्मसात्कृत इति । गृहीतो विविधोपचारैरिति भोजनाच्छादनादिभिः एवं पक्षं सहायवर्गं बुधाः सप्तविधं वदन्तीति प्रतीतम् ॥ २८ ॥

पक्षस्य विजिगीष्वनुरागलिङ्गान्यभिधातुमाह—सदेति। सदा सर्वदैवानुवृत्त्यानुसरणेन। गुणकीर्तनेन विजिगीषुगुणानां ख्यापनेन। निन्दासहत्वेन च, रन्ध्रगुप्त्या छिद्रगोपनेन। तदर्थं शौर्योद्यमश्च तथार्थसङ्ख्याश्चेताभिः पक्षः सप्तविधोऽप्यनुरागीति वेदितव्यः ॥ २९ ॥

पक्षस्य गुणानभिधातुमाह—कुलीनमित्यादि। कुलीनमुभयकुलविशुद्धम्। आर्यं कृतलक्षणम्। श्रुतं शास्त्रं श्रवणं च तद्विषये यस्यासौ श्रुतवांस्तासां विनीतश्चेति तम्। मानोन्नतं मानेन सम्मानेन उन्नतं महान्तम्। अलोलुपमितिपाठे परस्त्रीधनादिष्वलम्पटम्। सभ्यं साधारण रीतिनीतिज्ञम्। सत्यमितिपाठे अमृषावादिनम्। आहार्यमन्यैः प्रतिपक्षादिभिरनभिहरणीयम्। कृतज्ञता, ऊर्जा बलं[11a] मतिः प्रज्ञा, सत्त्वं व्यसनेऽभ्युदये च यदविकारि, तैर्युक्तं ; सद्वृत्तपक्षं सदाचार पक्षं[11b] खलु तं हि विद्यात् ॥ ३० ॥

[11] समुदितेन [11a] ओजो बलं

[11b] सदादर पक्षं

उद्योगमेधाधृतिसत्त्वसत्य
त्यागानुरागस्थिति गौरवाणि।
जितेन्द्रियत्वं प्रसहिष्णुता ह्रीः
प्रागल्भ्यमित्यात्मगुणान्[69] वदन्ति ॥ ३१ ॥

---

[69] गुणप्रवेकः

31. The qualities of the king himself (*ātmaguṇa*) are—energy, intellect, composure (*dhṛti*), firmness (in decisions), truthfulness, liberality, affection (for the subjects and dependents), power of maintenance of law and order (*sthiti*), glory, self-control, endurance, dignity of bearing (*hṛī*), and eloquence (*prāgalbhya*).

उक्तापि विजिगीषोरात्मसम्पद् मानप्रसङ्गात् पुनरुच्यते अत्यादरार्थम्। आह—उद्योगेत्यादि। उद्योगः उत्साहः मेधा प्रज्ञा। धृतिरविषादिता। सत्यसत्त्वे कृतलक्षणे। त्यागः पात्रेषु दानम्। अनुरागो गुणेष्विति प्रसन्नम्। स्थितिरविचलत्वम्। गौरवं महिमा। एतानि, जितेन्द्रियत्वं कृतलक्षणम्। प्रसहिष्णुता च क्लेशायासादीनाम्। ह्रीर्लज्जा, प्रागल्भ्यं जितसभत्वम्। इति प्रकारः आत्मगुणप्रवेकः आत्मसम्पद्युक्तगुणानामेतेषां मध्ये एते गुणा विशिष्टा इत्यर्थः ॥ ३१ ॥

मन्त्रस्य शक्तिं सुनयोपचारं[70]
सुकोशदण्डौ[70a] प्रभुशक्तिमाहुः।
उत्साहशक्तिं बलवद्विचेष्टां[71]
त्रिशक्तियुक्तो भवतीह जेता ॥ ३२ ॥

---

[70] सुनयप्रचारं [70a] स्वकोशदण्डौ

[71] बलवृद्धिचेष्टां

शैघ्र्यं सुदाक्ष्यं व्यसनेष्वदैन्य-
मुत्साहसम्पत्स्वतिधीरता च[72] ।
आत्यन्तिकी[73] शास्त्रसमुद्भवा च
सांसर्गिकी धीः परिणामिनी च ॥ ३३ ।
उत्साहसत्त्वाध्यवसाय[74]चेष्टा-
दाढ्यं च कर्मस्वति[75]पौरुषञ्च ।
अरोगता कर्मफलोपपत्ति-
र्दैवानुकूल्यं हि निराधिता च ॥ ३४ ।

---

[72] सम्पद्युधि धीरता च [73] औत्पादिकी
[74] सत्त्वव्यवसाय [75] कर्मस्विह

32. Administration in conformity with the rules of polity depends on *mantraśakti* (effective counselling) ; proper uses of *kośa* and *daṇḍa* (treasury and army) depend on *prabhuśakti* (personal ability of the ruler) and *utsāhaśakti* (energy) generates initiative and forceful exertion. One who is endowed with the three powers (*triśaktiyukta*) becomes a victor.

33. Promptness and expedition (in action), skilfulness (in execution of works undertaken), capability of repelling calamities and courageousness in warfare are the wealth (benefits) derived from *utsāhaśakti* (power of energy). Wisdom derived from the study of the *Śāstras* yields current benefits, and that from the association with the wise yields future benefits (i.e., in the life beyond).

34. Energy, firmness, industriousness, endurance in exertions and devotedness to duties are identified as manly efforts (*pauruṣa*). Healthiness (free from diseases), achievement of success in (or completion) of any venture or undertaking, and absence of sorrow or distress (*ādhi*) are considered as favours of Providence (*daivānukūlyaṁ*).

शक्तित्रयस्वरूपमभिधातुमाह—मन्त्रस्य शक्तिमित्यादि । मन्त्रस्य शक्तिं सुनयस्य उपचारं प्रयोगमिति, सुनयप्रचारमिति पाठान्तरम्, यस्य "षाड्गुण्यस्य यथोद्देशावस्थानं नयः" इति कौटिल्यः । सुकोशदण्डौ शोभनकोशदण्डौ प्रभुशक्तिमाहुः । तथा च कौटिल्यः—"कोशदण्डबलं हि प्रभुशक्तिरिति" । उत्साहशक्तिं बलवतो विजिगीषोर्विचेष्टामाहुराचार्याः । त्रिशक्तियुक्तो भवतीह राजा । शक्तिरहितस्तु राजैव न भवति ॥ ३२ ॥

उत्साहगुणानाह—शैघ्र्यमित्यादि । शैघ्र्यमाशुकार्यनिष्पादकत्वम् । सुदाक्ष्यं सुकौशल्यम् । व्यसनेष्वापत्सु अदैन्यमक्लैब्यम् । युधि संग्रामे धीरता चाभीरुत्वम् च इत्यत्र अतिधीरता च मुद्रित पाठः । एतत् सर्वमुत्साहसम्पत् उत्साहगुणसमूहः । तथा च कौटिल्यः "शौर्यममर्षो दाक्ष्यं चोत्साह-गुणा" इति । मेधाविशेषानभिधातुमाह[1]—औत्पादिकीति । उत्पाद उत्पादनं तत्र भवा औत्पादिकी या नाम प्रतिभेत्युच्यते, ययानालोचित एवार्थ प्रतिभाति । आत्यन्तिकीति पाठे बहुला

शास्त्रसमुद्भवा शास्त्रसंस्काराद् या बुद्धिरुत्पद्यते। "श्रुताद्धि प्रज्ञोपजायत" इति वचनात्। सांसर्गिकी बुद्धिर्महाजनसमागमाद्या समुत्पद्यते। धीर्बुद्धिः परिणामिनी उक्तकारणव्यतिरेकेणैव परिणामात्-परिपाकादन्वयव्यतिरेकाभ्यां विचार्यमाणे या परिणमत् इति चतुर्विधा बुद्धिरिति ॥ ३३ ॥

भूयोऽपि यानगुणानुष्ठाने विजिगीषोः सामग्रीमभिधातुमाह—उत्साहेत्यादि। उत्साहः कृत-लक्षणो मानस उद्योगः। सत्त्वमपि कृतलक्षणम्। अध्यवसायोऽधिकतरोऽव्यवसायः। तज्जनिता करणानां चेष्टा चलनस्पन्दनादिका[13]। तत्र दार्ढ्यं दृढत्वं च। कर्मसु युद्धादिषु, अतिपौरुषमति-शौर्यम्। अरोगता व्याधिरहितत्वम्। कर्मफलोपपत्तिः कर्मफलेन सहयोगेन या उपपत्तिर्भुक्तिः सा च यदा विद्यते दैवानुलोम्यं दैवस्य दृष्टफलसाधकस्यानुकूलता। निराधिता—मानस दुःखमाधेस्तस्मान्निर्गतो निराधिस्तस्य भावः ॥ ३४ ॥

[12] मेधागुणमभिधातु [13] चलस्यन्दनादिकाः वलनस्पन्दनादिकाः

पक्षादिदानेन[76] गृहीतकोशः
पक्षादिहीनं रिपुमभ्युपेयात्।
इति प्रसर्पन् नियतं समुद्र-
प्रक्षालितां[76a] तां लभते धरित्रीम् ॥ ३५।

---

[76] नानेन [76a] तान्तां

35. Pooling of resources of the loyal supporters (*pakṣas* of seven types, *vide* v. 28) and arranging for sufficient funds, a *vijigīṣu* should march against the enemy, (when the latter is) disunited (cut off) from his supporters, *pakṣādihīnaṁ*. Acting always in this manner he acquires dominion over the earth washed by the ocean (i.e., becomes the *cakra-varti*, emperor).

पक्षादिनेति। पक्षः सप्तविधोऽप्यनन्तरोक्तः। आदिग्रहणादौत्साहिकादिबलयुक्तः[14]। गृहीत कोशः "कोशाधीनो राजेति" वचनात्। पक्षादिहीनं रिपुमभ्युपेयात्। जयस्य निःसन्दिग्धत्वात्। इत्येवमुक्तप्रकारेण प्रसर्पन् विजिगीषुः समुद्रप्रक्षालितान्तां चतुस्समुद्रमेखलां लभते धरित्रीं पृथिवीमिति ॥ ३५ ॥

[14] ग्रहणादौत्साहिकादिबल

कालो गजानां सजलाभ्रजालो
यातुं तदन्यश्च तुरङ्गमाणाम्।
नात्युष्ण[77]वर्षोष्ण[78]तुषारयुक्तः
सम्पन्नशस्यस्त्वतिकालसम्पत् ॥ ३६।

---

[77] नात्यर्थ [78] वर्षोष्म

रात्रावुलूको[79] विनिहन्ति काकं[80]
काकोऽप्युलूकं रजनीव्यपाये ।
इति स्म कालं प्रसमीक्ष्य[81] यायात्
काले भवन्तीह[82] समीहितानि ॥ ३७ ।

---

[79] उलूकोपि निहन्ति [80] काकान् काकोऽप्युलूकान्
[81] समुदीक्ष्य [82] फलन्तीह

36. The propitious time (i.e., in consideration of benefits of different seasons or *kālasampad*) for marching with elephant forces, is when the sky is overcast with rainbearing clouds (i.e., in the rainy season), and with cavalry forces in other seasons (in summer, autumn or spring), and for marching with army the season should not be too rainy or hot or cold (being snow-clad), rather it should be the time for harvesting (when the land is full of ripe grains i.e., autumn).

37. The owl kills the crow during the night and the crow kills the owl when the night passes away (i.e., in day time). In the same way the *vijigiṣu* should undertake a march (against the enemy) having reviewed favourable time only leads to fruitful results (i.e., gain of dominion).

कालदेशावभिधातुमाह—काल इति। सजलाभ्रजालः सजलजलदपटलयुक्तः कालः गजानां, तदन्य वर्षातिरिक्तः कालः तुरङ्गमाणामश्वानां यातुं प्रयातुं प्रशस्त इति शेषः। अतएव नात्युष्णवर्षोऽपि तुषारयुक्त शीत समन्वितः न भवति यः। सम्पन्नसस्यस्त्विति। कालसम्पत् कालगुणसमूहोऽयमिति ॥ ३६ ॥

अनुकूलप्रतिकूलकालयोर्गुणदोषानभिधातुमाह—रात्रावित्यादि। उलूकः पेचकः रात्रौ काकं वायसं विनिहन्ति विनाशयति रजनीव्यपाये दिवसे काकोऽपि उलूकं विनिहन्ति। इति हेतोः लब्धकालबलात् सर्वं साधनीयमिति ज्ञात्वा आत्मबलानुकूलं कालं समीक्ष्य यायात् विजिगीषुः। समीहितानीति पृथ्वीलाभपालनादीनि ॥ ३७ ॥

श्वा नक्रमाकर्षति कूलसंस्थं
श्वानञ्च नक्रः सलिलाभ्युपेतम् ।
व्यायच्छमानो भुवमभ्युपेति
देशस्थितः कर्मफलोपभोगम्[83] ॥ ३८ ।

---

[83] फलोपभोगम

38. Dogs attack (overpower) the crocodile while on the beach (i.e., on land) and the crocodile (overpowers) the dog while in water. So the *vijigiṣu*, who takes advantage of the land favourable for marching, achieves sure success.

देशबलाबलमभिधातुमाह—श्वा नक्रमित्यादि। श्वा कुक्कुरः कूलसंस्थं तीरस्थित नक्रं कुम्भीरं आकर्षति आक्रामति। नक्रश्च सलिलाभ्युपेतं जलेऽवतीर्णं श्वानं आकर्षति। एवं देशस्थितः अनुकूल-स्थानस्थः व्यायच्छमान उद्योगं कुर्वाणः। शेषं स्पष्टम् ॥ ३८ ॥

समं तुरङ्गैर्विषमं च नागै-
स्तथा जलाढ्यं समहीधरं[84] च।
नागावृतं[85] पक्षबलानुपेतै-[85a]
र्यथाबलञ्च प्रसमीक्ष्य मिश्रम् ॥ ३९ ॥
मरुप्रगाढं पतति स्म तोये[86]
ग्रीष्मेऽप्यनूपोदककक्षदुर्गम्[86a]।
मिश्रञ्च संवीक्ष्य यथासुखञ्च[87]
गच्छेन्नरेन्द्रो विजयाय देशम् ॥ ४० ॥

---

[84] समहीरुहच [85] नावान्तृतं ; नावादितः ; नानान्तृतं

[85a] पत्तिबलानुयाते ; बलानुयातो

[86] पततीह तोये ; पतताभ्रकाले ; वर्षति पर्जन्ये

[86a] त्वनूपोदक ; प्रभूतोदक कक्ष ; [87] सुखं हि

39. (About the suitability of the different wings of the army *vis-à-vis* the route it is stated thus). Cavalry is suitable for the plains and elephants for uneven or rocky regions as well as for water-logged areas, in the latter case accompanied by the fleet of boats (*nāvāvṛtaṁ*). For operation in mixed areas (i.e., where some portions are plain, some rocky and some marshy) the army in requisite contingents should be employed after careful assessment of the situation.

40. March through desert regions should be undertaken when rains fall (i.e., in the rainy season), and for the capture of a fort surrounded by water (i.e., an island fort) in summer, and through a mixed region (i.e., some portions of which are deserts and some water-logged) the ruler should march as found convenient on a proper assessment of the situation, in order to achieve victory.

समविषममिश्रमार्गे यानक्रमभिधातुमाह—समं तुरङ्गैरित्यादि। समं देशं तुरङ्गैर्गच्छेत्। विषमं च देशं नागैः। तथा च जलाढ्यं समहीधरं नागैर्गच्छेत्। [15]नावावृतमद्भिः जलाढ्यं देशं गच्छेत्। मिश्रमिति समविषमजलपर्वतोपेतं यथाबलं प्रसमीक्ष्य निर्णयं कृत्वा, इति गन्तुं शक्यत इति, पत्तिबलानुयातैश्च गच्छेत् ॥ ३९ ॥

मरुप्रगाढमिति। मरुप्रगाढं निर्जलं देशम्। पतति स्म तोये वर्षति पर्जन्ये, जलसौकर्यार्थम्। ग्रीष्मे त्वनूपोदक-कक्षदुर्गमिति—अनुगता आपो यस्मिन् असावनूपः खञ्जनोदक इत्यर्थः। अनूपैरुदकैः

कक्षैस्तृणगुल्मैश्च दुःखेन गम्यत इति अनूपोदककक्षदुर्गत्वम्। मिश्रमिति मरुप्रगाढ़त्वानूपोदककक्षदुर्गत्व-युक्तं संवीक्ष्य यथासुखं सुखानतिक्रमेण गच्छेन्नरेन्द्रो विजयाय देशमिति प्रतीतम् ॥ ४० ॥

[15] नावाक्रान्तं च यथापत्ति निर्णयं कृत्वेति मरुद्भिर्बलानुयातैश्च जलाढ्यं ; नावाकृतैश्चापत्तिनिर्णयं कृत्वेति मरुद्भि···

न चातितोयं न च तोयहीनं
युक्तं च सम्यग्यवसेन्धनेन।
उपेत्य मार्गं बहुतज्ज्ञयुक्तः[88]
सुख[89]प्रयाणै रिपुमभ्युपेयात् ॥ ४१ ।

[88] तज्ज्ञयुक्तं [89] सुखं प्रयाणे ; स्वप्रयाणे

41. Avoiding an overflooded route and also that devoid of water, a ruler should march through such tracts as abound in ample fodder and fuel (for the army), as advised by road experts, so that it (the army) may move comfortably and defeat the enemy.

एतदेव द्रढयितुमाह—न चातितोयमित्यादि। न चातितोयं बहुजलं गमनविघ्नहेतुत्वात्। न च तोयहीनं पिपासाबाधभयात्। युक्तं च सम्यग्यवसेन्धनेनेति—यवसं सस्यानां पलालादि चतुष्पदो-पयोगि, इन्धनं पाकोपयोगि, ताभ्यां युक्तमुपेत्य प्राप्य मार्गं बहुतज्ज्ञयुक्तं मार्गं जानन्तीति तज्ज्ञास्तैर्बहुभिर्युक्तमसंमोहार्थं सुखप्रयाणैः क्लेशाभावाददीर्घैरित्यर्थः। रिपुं यातव्यमभ्युपेयात् गच्छेदिति ॥ ४१ ॥

[90]सुवीवधासारमुपेततोयं
विश्वासिभिः[91] क्रान्तजलं विशुद्धम्।
तन्मात्रमेव[92] द्विषतामुपेयाद्
यस्मान्न कुर्यादपयानमार्तः ॥ ४२ ।

[90] स्ववीवधा [91] विश्वासिताक्रान्तजनं
[92] तन्मार्गमेव

42. In covering the distance in course of the march (embarked upon) the *vijigiṣu* must be careful in maintaining the line of communication for the supply of provisions as well as of support from the allies, and also in securing water resources (i.e., about the availability of water in the region). He should also arrange for restoration of allegiance (i.e., of confidence in the powers of the ruler) of the people, which might have been shaken (for some reason or other). The *vijigiṣu* should confine his march into the enemy country upto that extent (i.e., where facilities indicated above, are undisturbed), otherwise he may be involved in serious troubles from enemy quarters leading to failure of his mission.

यानप्रमाणमभिधातुमाह—सुवीवधेत्यादि। शोभनौ वीवधासारौ यत्र "स्वदेशादन्वायतिर्वीवधः, आसारो मित्रबलमिति कौटिल्यः (१०।२।६-७)। अनु पश्चादायतिरागमनं भक्ताच्छादनादेर्वीवधः, आसारो मित्रबलं, तावविच्छिन्नौ पश्चादनवरतं प्रविशन्तौ यस्मिन्। उपेततोयमिति जल्युक्तम्। विश्वासिभिः विश्वस्तैः क्रान्तजलं आयत्तीकृत जलं यत्र तम्। विश्वासिताक्रान्तजनं पाठे दाहलोपादि-निवारणादभयप्रदानेन विश्वासितः कृतविश्वासः आक्रान्तजनो यस्मिन् तम्। विशुद्धमिति चारादिभिः कृतप्रयुक्तशोधनम्। तन्मात्रं तावत्प्रमाणमेव मार्गं द्विषतामुपेयाद् गच्छेत्, यस्मान्न कुर्यादपयानं निवर्तनमार्तः (मार्गं) शत्रुकृतोपद्रवापन्नः इति ॥ ४२ ॥

ये दूरयात्रां[93] सहसा विशन्ति
मूढा रिपूणामविचार्य भूमिम्।
ते यान्ति तेषामचिरेण खड्ग-
धारापरिष्वङ्गमयत्नसाध्याः[94] ॥ ४३ ।

[93] मार्गं ; मात्रां. [94] साध्यः ; साध्यम्

43. Those foolish rulers, who without properly assessing the condition of land suddenly proceed far (i.e., beyond the favourable region which maintain their supply line in tact) into the enemy territory, soon fall under the fire of enemy action (i.e., are entrapped by the enemy forces) and are easily beaten.

मार्गातिक्रमे दोषं दर्शयन्नाह—ये दूरमार्गमिति। येऽभियोक्तारो दूरमार्गमभिहित-प्रमाणाधिकां भूमिं सहसा शीघ्रमेव विशन्ति मूढाः परामर्शरहिताः रिपूणामविचार्य विचारमकृत्वा ते यान्ति तेषामरीणामचिरेण खड्गधारा परिष्वङ्गमालिङ्गनं तदालिङ्गनान्मृत्युं प्राप्नुवन्तीत्यर्थः। ये दूरयात्रामिति पाठे दूरतर प्रदेशे यात्रां विशन्ति आश्रयन्ति। अयत्नसाध्याः सुखसाध्या एव ॥ ४३ ॥

मार्गे च दुर्गे[95] विनिविष्टसैन्यो
विधाय रक्षां विधिवद् विधिज्ञः।
सन्नद्धपार्श्वस्थितवीरयोधः
सेवेत साध्वीं सुख[96]योगनिद्राम् ॥ ४४ ।

भ्रमत्तुरङ्गद्विरदेन्द्रहेषा
घण्टास्वनासादित[97] कर्णरन्ध्रः।
तदन्तरा[98] च प्रतियोधवृत्तां[99]
के आप्रतीत्यादर[100]माद्रियेत ॥ ४५ ।

[95] दुर्गोपनिविष्ट [96] निशि योग
[97] पूरित ; स्वादित [98] तदन्तरान्त ; तदन्तराल
[99] प्रतिबोधवर्ती ; प्रतिबोधवृत्तं ; प्रतियोधवृत्तं
[100] स्याहित आद्रियेत ; राजा गृहीत्वा व्रतमाद्रियेत

44. While resting during the night in course of the march, in encampments (*mārge ca durge*) the *vijigīṣu* should take necessary protective measures as advised by experts and (for the security of his own person) should have by his side fully armed brave warriors and should sleep like a *yogī* (i.e., alert even in sleep).

45. The *vijigīṣu* should (be so alert even while asleep as to) wake up at the slightest sound of movements of horses and elephants outside by the neigh of horses and tingling of bells (round the neck) of elephants reaching his ears, and promptly raise an alarm enquiring who are awake (to keep guard at this hour).

मार्गे निशि योगिनिद्रां वहतः[16] प्रयाणे दुर्गेऽपि शयनकल्पमभिधातुमाह—मार्गे चेत्यादि। वहन् प्रयाणके दुर्गोपनिविष्टसैन्यः जलपर्वतवनादिभिर्यो दुर्गप्रदेशः तत्रोपनिविष्टं सैन्यं यस्य स तथा विधाय रक्षां विधिवदिति यथा परावस्कन्दा न प्रभवन्ति। विधिज्ञ इति रक्षाविधिज्ञः। सन्नद्धपार्श्वः स्थितशूरयोध इति सुगमम्। सेवेत निशि साध्वीमिति निर्दिष्टरात्रियाममात्रां न न्यूनां नाधिकां साध्वीमित्यर्थः। योगिनिद्रामिति योगीव निद्रासेवावसरेऽपि सचेतन एवेत्यर्थः॥ ४४॥

भ्रमत्तुरङ्गेति। निशि राजावासपार्श्वतो भ्रमन्तो ये तुरङ्गा द्विरदेन्द्राश्च तेषां यथाक्रमं हेषा अश्वहेषितं घण्टास्वनाश्च तैरास्वादिते प्राप्ते कर्णरन्ध्रे यस्य विजिगीषोः स तथा। तदन्तराले च तेषां हेषाघण्टास्वनानां अन्तराले मध्ये प्रतिबोधवर्ती निद्राच्छेदवर्ती "के जाग्रतीति," के यामनियुक्तपुरुषा जाग्रतीति बोधवर्तिनो वर्तन्त? एवंविध प्रश्नपूर्वकमादरमाद्रियेत भूयोभूयः पृच्छेदित्यर्थः॥ ४५॥

[16] वहन्

ततः प्रबुद्धः शुचिरिष्टदेवः
श्रीमद्विभूषोज्ज्वलितः प्रहृष्टः।
सेव्येत मन्त्रिप्रवरैर्यथावत्
पुरोहितामात्यसुहृद्गणैश्च॥ ४६।
कर्तव्यतां तैः सह संविचार्य[101]
यानं समास्थाय[102] विचित्रयानः।
कुलोद्गतैः शस्त्रिभिरिष्टतुल्यै-[103]
र्बहिर्विनिरीयात् परिवारितः सन्॥ ४७।

---

[101] सम्प्रधार्य [102] समारुह्य
[103] रात्मकल्पै; रात्मतुल्यै

46. Waking up (in the morning) the ruler, after usual purification (ablutions) and worship of deities (*iṣṭadeva*), should appear dressed in regal dresses and ornaments with a cheerful mien and dignified bearing to grant audience to counsellors, chiefs of staff, priests, ministers and well-wishers to enable them to do him homage.

47. Deciding upon the performance of (royal) duties in consultation with them (counsellors) the ruler should set out riding gaily decorated vehicles (*vicitrayāna*), escorted by armed soldiers of known families (i.e., hereditarily in service) and as trustworthy as his own self.

तत इति। एवं निशां गमयित्वा। प्रबुद्धो गतनिद्रः। शुचिरिति कृतावश्यकरणीयः। इष्टदेवः पूजितेष्टदैवतः। श्रीमद्विभूषोज्ज्वलितः श्रीमती या विभूषा तयोज्ज्वलितः भास्वरतां नीतः। प्रहृष्टः सर्वदा प्रहर्षवता विजिगीषुणा भवितव्यमिति। सेव्येत मन्त्रिप्रवरैर्यथावत् पुरोहितामात्यसुहृद्गणैश्चेति प्रतीतम् ॥ ४६ ॥

कर्तव्यतामिति। तैर्मन्त्रिभिः परिवारादिभिः सह कर्तव्यतां करणीयं यत्कार्यं तत्सम्प्रधार्यालोच्य यानं यात्रां समस्थाय प्रारभ्य विचित्रयानं विचित्राणि यानानि युग्यवाहनादीनि यस्मिन् कुलोद्गतैरभिजातैः शस्त्रिभिर्धनुरादिशस्त्रयुक्तैरात्मतुल्यैर्विश्वासेनात्मसदृशैः परिवारितो बहिर्निरीयात् निर्गच्छेत् ॥ ४७ ॥

पश्येन्नृपो हस्तिरथाश्वचर्यां[104]

सामूहिकं योधगणं पृथक् च।

विवक्षितांश्च द्विरदेन्द्र[105]मुख्यां-

स्तुरङ्गमांश्चापि[106]विधानयुक्तान् ॥ ४८ ॥

---

[104] श्ववर्यान्; [105] द्विरदान् द्विरहस्तुरङ्ग

[106] श्चैव

48. The king should personally inspect the exercise (*caryām*) or parade of the contingents of elephants, chariots, cavalry and infantry in group formations (*sāmūhikam*) as well as severally (unit by unit). He should also inspect twice a day (*dvirahna*, in the morning and evening) the arrangement of distribution of prescribed food and drink to the elephants and horses (of the army).

पश्येदित्यादि। पश्येत् निरूपयेत् ततः हस्तिरथाश्ववर्यान्[17] संवरणानि व्यूहविनियोगार्थं सामुहिकं समूहेन संसृष्टं योधगणं, पृथक् प्रत्येकं च विवक्षितांश्च द्विरदान् गण्यमानानन्तर्गतान्[18] द्विरह्नो दिवसस्य भागद्वये सायं प्रातश्च। तुरङ्गमांश्च द्विरह्नो विधानयुक्तान्, विधानं[19] खादनभोजने ॥ ४८ ॥

[17] रथाश्ववर्गान्   [18] गण्यमानान्तर्जालात्

[19] विधिना खादभोजनेन

सुखोपगम्यः स्मितपूर्वभाषी

प्रियं वदेत्[107]वृत्त्यधिकं च दद्यात्।

प्रियेण दानेन च संगृहीताम्[107a]

त्यजन्ति भर्तर्यपि जीवितानि ॥ ४९ ॥

---

[107] वदो; वदन्   [107a] तास्त्यजन्ति

49. The ruler should be easily accessible (*sukhopagamya*) to all and receive them with a smile and sweet words. In addition he should pay his dependents over and above their dues (i.e., he should be generous in payments). Because when payments are blended with sweet words, *priyena dānena*) (the dependents become so much gratified that) they even (do not hesitate to) lay down their lives for the master.

सुखोपगम्य इति। सुखेनैव सेवार्थमुपगम्यत इति। स्मितपूर्वं भाषितुं शीलमस्येति। तथा प्रियं वदन् सर्वदा सर्वत्र वृत्त्यधिकं दद्यात् कार्यकाले। किमर्थमित्याह—प्रियेण दानेन च संगृहीता भृत्या भर्तरि विषये जीवितान्यपि त्यजन्ति ॥ ४९ ॥

रथाश्वनौकुञ्जरयानयोग्यो
नित्यक्रियः स्याद्‌ धनुषि[108] प्रगल्भः।
सुमेधसां कर्मणि दुष्करेऽपि
नित्यक्रिया कौशलमादधाति ॥ ५० ।

[108] धनुषः

50. Regular exercises (by soldiers) in the use of chariots, horses, boats and elephants and even bows and arrows develop efficiency. By sharpening their intellect by regular practice one attains mastery in jobs however difficult they may be.

रथाश्वेत्यादि। नित्यक्रिय आरोहणावतरणतः[20] परिशुद्धिस्थैर्यापादनार्थम्। धनुषि धनुर्वेदे प्रगल्भः प्रौढः स्यात्। नित्यक्रिय एव कस्मादित्याह—सुमेधसां सुप्रज्ञानां कर्मणि दुष्करेऽपि नित्य क्रिया कौशलं प्रवीणत्वं आदधाति करोति। तथा चोक्तम्—अभ्यासः कर्मणां [21]सत्यमुत्पादयति कौशलम्। विधिना तावदभ्यस्तं यावत्सृष्टा मृगेक्षणा ॥ ५० ॥

[20] आरोहणाभिरतः परे शुद्धिसौर्यापाद [21] सम्यगुत्पादयति

सन्नद्धमुच्चैर्द्विपमास्थितः सन्
सन्नद्धसैन्यानुगतोऽविकुर्वन्[109]।
सामन्तदूतेन हि साधुमन्त्रः[110]
प्रवीरयोधान्तरितेन यायात् ॥ ५१ ।

[109] नुगतः प्रकुर्वन् [110] मन्त्रं

51. Riding an elephant and well armed and escorted by trusted armed soldiers, the ruler should set out on an expedition after consultations with the ambassadors of the feudatory princes, and keeping himself behind the contingent of brave heroes (i.e., the brave heroes would be the vanguard of the army).

सन्नद्धमुच्चैरित्यादि। सन्नद्धं सुसज्जितं उच्चैः महान्तं द्विपमास्थितः आरूढः। ततः सन्नद्ध-सैन्यानुगतः सन्नद्धैः सैन्यैः अनुगतः अनुयातः। अविकुर्वन् विकारपरिवर्जितः। सामान्यालापने मन्त्र-

शब्दप्रयोगो दृश्यते। अरिदूतेन गुप्तभाषणस्यासम्भवात्। प्रवीरयोधान्तरितेन, विश्वासाभावात्। इत्येवं यायात्। बलसौष्ठवं परदूतस्य दर्शयितुमिति ॥ ५१ ॥

आलोकयेद् बुद्धिगुणोपपन्नै-
चरैश्च[111] दान्तैश्च परापचारम्[111a]।
एतैर्विमुक्तो[112] भवति क्षितीन्द्रो
जनैरनेकैश्च समानधर्मा ॥ ५२।

---

[111] चारैर्दूतैश्च ; चरैश्च दूतैश्च [111a] परप्रचारम्
[112] वियुक्तो

52. The ruler should focus his attention on the (lapses of) administration of the enemy by information supplied by his intelligent corps of spies and ambassadors. Without their help the ruler would be like those who are destitute of eyesight (i.e., blind).

याने विधेयमाह—आलोकयेदित्यादि। अष्टौ बुद्धिगुणाः शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोह-तत्त्वाभिनिवेशलक्षणाः। समानधर्मा समानगुणः। धर्मशब्दो गुणेऽपि वर्तत इति। यस्य राज्ञः सम्यग् ज्ञानसम्पन्नाश्चरा दूताश्च न विद्यन्ते सोऽन्धः एवेत्यर्थः ॥ ५२ ॥

विलोभयन् किञ्चिदपि प्रयच्छन्
कुर्वीत मित्रं द्विषतो न पानम्[113]।
राष्ट्रादभीक्ष्णं द्विषतः प्रपण्यं[114]
पण्यैर्हितन्नालिकयाऽददीत[115] ॥ ५३।

---

[113] द्विषतोऽन्तपालम् [114] प्रपण्यैं
[115] पणैर्हितं ; पण्यं हितं ; नाकिकयाददीत ; नाधिकया

53. *Antapālas* or frontier guards of the enemy should be befriended by some tempting offers, and the disaffected elements of the enemy state by supply of some useful commodities through serpentine routes (like the stalk of the lotus, i.e., smuggled into the enemy state through the medium of wandering spies or secret agents).

विलोभयन्निति। द्विषतो हि यातव्यस्यान्तपालं विषयान्तपालननियुक्तं[22], दण्डने नियुक्तं दण्डनायकं विलोभयन् बहुविधं दास्यति स्वामीत्याशाजननेन, किञ्चिदेव मूल्यमात्रं प्रयच्छन्, बहुदानेन शत्रुबुद्धिर्मा भवत्विति, कुर्वीत मित्रं द्विषतोऽन्तपालम्। किमर्थमित्याह—राष्ट्रादभीक्ष्णं द्विषतः सकाशात् प्रपण्यं स्वकीयैरसारपण्यैस्तन्नालिकया तद्द्वारेण यथा कश्चित् पद्मनालेन जलमादत्ते तद्वदिति ॥ ५३ ॥

[22] विषयासक्तमपि याननिर्मुक्तं

उपक्रमं वाञ्छितमाशु कुर्यात्
दूतोपयानात् क्रियमाणसन्धिः ।
स चेद् विसन्धिर्न[116] हि तत्र भेदः
कृतो भवत्यात्मसमुच्छ्रयाय ॥ ५४ ।

[116] विसन्धिः स तु तत्र चैकः ; स तु तस्य भेदः

54. (An expedition, if launched), the desired objective should be accomplished as early as possible. But if the enemy (marched against) desires to enter into a treaty, it should be promptly completed by sending ambassadors. On the other hand, if the enemy does not like to come to terms (*visandhih*), steps should be taken to sow dissension in the latter's ranks, in order to gain his own prosperity.

उपक्रममित्यादि । वाञ्छितमुपक्रमेत्, क्रियमाणः सन्धिर्येन विजिगीषुणा असौ प्रारब्ध-निष्पत्तिमाशु शीघ्रं कुर्यात् दूतोपयानात् दूतप्रेषणात् । स चेदिति स यातव्यो यदि विसन्धिः सन्धिं नेति तदा स तादृग्विधो भेदः कृतो भवति यातव्यस्य स्ववशः । क्षयव्ययाय सर्वं भवतीति ॥ ५४ ॥

दौर्गान् पथिष्वाटविकान्तपालान्
संश्लेषयेद् दानवता[117] च साम्ना ।
विरुद्धदेशेषु हि तन्निरोधे[118]
ते चाऽस्य[119] मार्गोपदिशो भवन्ति ॥ ५५ ।

[117] दानवतापि ; हि [118] सन्निरोधे [119] ह्यस्य ; तेऽस्य

55. (While on a march into the enemy territory) governors of castles *en route*, foresters and frontier guards should be won over by means of gifts and conciliation. Because in difficult tracts, when besieged by troops, they might be helpful in guiding routes for exit.

दौर्गानित्यादि । पथिषु दौर्गान् दुर्गपालान्, आटविकानटवीपतीन् । अन्तपालाननुकूल-लक्षणान् संश्लेषयेत् आत्मनि विजिगीषुः । केनेत्याह—दानवता साम्नेत्युपायद्वयेन । कस्मादित्याह—विरुद्धदेशेष्वेकायनमार्गादिषु तन्निरोधे यातव्यकृतनिरोधे त एव संश्लेषितदुर्गपालादयो मार्गोपदेशदातारो भवन्ति ॥ ५५ ॥

अकारणादेव हि कारणाद्वा
य एव[120] कश्चित् पुरुषोऽरिसेवी[121] ।
निजश्च विश्लिष्ट उपैत्यमुत्र[122]
आयाति यस्तस्य गतिं प्रपश्येत्[122a] ॥ ५६ ।

[120] य एति [121] सेवाम्
[122] उपेत्य ह्यनुमायाति [122a] विपश्येत्

56. When any one of the enemy's camp (dependents of the enemy) with or without satisfactory reasons, comes over to the *vijigiṣu*, and also when any one of his own camp under similar circumstances (i.e., with or without reasons) having earlier gone over to the enemy's, comes back to him, movements of such a fellow, should be carefully watched.

अकारणादिति। अकारणात् परित्यागकारणं विनैव। कारणाद्वाक्रोधलोभादिनैव एति कश्चिद्विजिगीषुं प्रति अरिसेवां[88] (विहाय) पुरुषो, निजश्च यः पुरुषो विश्लिष्टः कारणादकारणाद्वा शत्रुमुपेत्य शत्रुं गत्वा य आयाति तस्य गतिं प्रपश्येत् प्रकारेण निरूपयेत्, कल्याणबुद्धीनां संग्रहार्थं विपरीतानां परित्यागार्थमिति ॥ ५६ ॥

[88] अरेः सेवापुरुषः

आरिप्सुना मन्त्रबलान्वितेन
प्रागेव कार्यो निपुणं विचारः[123] ।
दोष्णां[124] बलान्मन्त्रबलं गरीयः
शक्रोऽसुरान्[125] मन्त्रबलाद् विजिग्ये ॥ ५७ ।

---

[123] प्रचारः [124] दोष्णोबलं
[125] शुक्रः सुरान्

57. A *vijigiṣu* desiring to take action against the enemy should be equipped with *mantrabala* (firm decision on the basis of wise counselling) preceded by accurate assessment of the situation (about his own internal elements and of that of the enemy through spies). Because *mantrabala* is superior to armed forces as is evident from the case of Indra who overpowered the *asuras* by *mantrabala* (or of Śukra, who overpowered the *suras* by *mantrabala*).

आरिप्सुनेत्यादि। आरिप्सुना कार्यमारब्धुं कृतेच्छुना मन्त्रबलान्वितेन यथोक्तमन्त्रबलयुक्तेन प्रागेव निपुणं कार्यं यथा भवति तथा प्रचारः प्रकटप्रच्छन्नचराणां प्रकृष्टचारो गत्यागमो यातव्यादिषु। कस्मादित्याह—दोर्दण्डानां बलात् मन्त्रबलं गरीयः। तथा च कौटिल्यः—एकं हन्यान्नवा हन्याद्विषुर्मुक्तो धनुष्मता। प्राज्ञेन तु मतिः क्षिप्ता हन्याद्गर्भगतानपि ॥ इति। तथा च शुक्रो दैत्यगुरुः सुरान्मन्त्रबलाद्विजिग्ये मृतसञ्जीविन्येति स्वबलं मृतमपि जीवयत्यौपनिषद्या देवान् मारयतीत्यतः सुरान् शुक्रो जितवानिति ॥ ५७ ॥

मनीषया निर्मलया विलोकितं[126]
फलाय कर्मोद्यममाश्रितः परम्।
[127]अकालहीनं नयवित् समाचरेत्
फलं ह्यकाले[128] नियतं व्युदस्यति ॥ ५८ ।

---

[126] निरूपितं [127] न काल
[128] हि काले

58. A wise ruler, conversant with the science of Polity (*nayavit*), should undertake action (against the enemy) guided by his pure intellect avoiding unfavourable time (i.e., in proper time) and putting forth the best of his energy in order to gain the results (desired). An action in an unfavourable or inopportune moment is sure to be disastrous.

सम्यक्क्रियमाणमपि कार्यं काल एव सिध्यतीति दर्शयन्नाह—मनीषया निर्मलयेति। विलोकितं निर्णीतं फलनिमित्तं कर्मणि परमुत्कृष्टमुद्योगमास्थितः नीतिशास्त्रवित् कुत इत्याह—फलं हि पृथ्वीलाभ-पालनादि यस्मादकालोऽनवसरो निश्चयेन विशेषेण परित्यजतीति ॥ ५८ ॥

प्रभावितानां श्रुतशौर्यशालिनां
यथावदालोकित[129]मार्गचारिणाम्।
निकाम[130]देवोद्युतिरुन्नतात्मनां
भुजङ्गदीर्घेषु भुजेषु लम्बते ॥ ५९ ।

[129] यथावदालोचित ; यथाबलालोचित [130] चिराय

59. The majesty of the rulers, learned and valorous, who always follow the way (or principles) discussed above (or are illuminated by wisdom) is blessed with divine light (or glory) for ever. High-souled and prosperous, the arms (or the dominions) of them (those rulers) go on stretching like the limbs of serpents.

उपसंहरन्नाह—प्रभावितानामिति। प्रभावः प्रतापस्तं प्राप्तानां, श्रुतं विद्याचतुष्टयश्रवणं, शौर्यं निर्व्याजं पौरुषं ताभ्यां शालितं शीलं येषां ते तेषां यथावदालोकितः शास्त्रे यो मार्गस्तेन चरणशीलानां चिरतरं[24] देवानां द्युतिः प्रभा सर्पवदायतेषु भुजेषून्नतात्मनां लम्बते सम्बध्यते। एवंभूता विजिगीषवो देवसमाना भवन्तीत्यर्थः ॥ ५९ ॥

[24] निरन्तरं

समुचितनरसम्पद्भूरिसम्पन्नसस्ये
विगतसलिलपङ्के काल उद्युक्तवृत्तिः[131]।
कुसुमितसहकारश्रीउज्वलत्कानने वा
नरपतिररिभूमिं साधु गच्छेज्जयाय ॥ ६० ।

इति नरपतिराहितादरः सन्
परमभियोक्तुमनाः समुत्पतेत्।
इति हृत[132]विषयोपसेवमानो
नियतमरोतिरुपैति गोचरं स्वम्[133] ॥ ६१ ।

[131] उद्युक्तवृत्तिः [132] विविधविषयोपसेवनाज्ञि
[133] गोचरम् ॥

60. When men (subjects) are contented and prosperous with rich harvests (in the autumn); when the rains pass off and the land is dried up, and when orchards brighten up with blossoming mango trees (in the spring), the *vijigiṣu* may set out with his forces comfortably for the enemy territory for the purpose of gaining sure victory.

61. In this way (on lines indicated above) concentrating his mind on the attack the *vijigiṣu* should fall upon his enemy, and acquiring the possessions of the enemy always succeeds in bringing him (the enemy) down to submission.

इति यात्राभियोक्तृप्रदर्शनं नाम चतुर्विंशं प्रकरणम् ॥

इति कामन्दकीये नीतिसारे षोडशः सर्गः ॥ (मुद्रितपुस्तकानुसारेण पञ्चदशः सर्गः समाप्तः ।)

यात्राकालमभिधातुमाह—समुदित्येत्यादि । समुदिता सम्यगुक्ता नराणां शूरयोधानां सम्पत् सम्पत्तिः यस्य विजिगीषोः स तथा । भूरिसम्पन्नसस्ये शरदीत्यर्थः । विगतमेघविभ्रष्टपङ्के वेति काल ईरितो यात्रायामित्यर्थः । कुसुमितसहकारश्रिया ज्वलन्ति भास्वराणि भवन्ति काननानि यस्मिंस्तत्र वासन्तिकीं यात्रामित्यर्थः । एष्वेव कालेषु नरपतिर्विजिगीषुररिभूमिं साधु यथा भवति तथा गच्छेज्जयनिमित्तम् ॥ ६० ॥

इतीत्यादि । इति अनेन प्रकारेण, आहितादरः सन् कृतप्रयत्नः सन्, परं शत्रुं अभियोक्तुमनाः अभिभवितुं मनो यस्य तादृशः सन्, समुत्पतेत् यायात् । इति विधिविषयोपसेवनेन एवं विधानां विधीनां विषयाणां उपसेवनेन पालनेन अराति शत्रुः नियतं निश्चयमेव गोचरं वश्यताम् उपैति यातव्यः सिद्ध्यतीत्यर्थः ॥ ६१ ॥

इति चतुर्विंशं यात्राभियोक्तृप्रदर्शनप्रकरणम् ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां यात्राभियोक्तृप्रदर्शनं नाम षोडशः सर्गः ॥

सप्तदशः सर्ग

(मुद्रितपुस्तकानुसारेण षोडशसर्गप्रारम्भः ।)

२५ । स्कन्धावारनिवेशनप्रकरणम् ।

[1]यायाद्वैरिपुराभ्यासं भूभागे साधुसम्मते ।
स्कन्धावारनिवेशज्ञैः[2] स्कन्धावारं निवेशयेत् ॥ १ ॥

---

[1] यात्वा वैरिपुराभ्याशं ; पुराभ्याशे ; गत्वा वैरि [2] निवेशज्ञैः

Sarga XVII

Prakaraṇa 25.

Skandhāvāraniveśana

(Establishment of encampments)

1. In course of a march reaching the outskirts of the capital of the enemy, the wise *vijigīṣu* should set up encampment on a location approved by experts on encamping.

यानानन्तरं सांग्रामिकमभियोगमभिधातुं स्कन्धावारनिवेशमाह—यायादिति । वैरिपुराभ्यासं यातव्यशिविरसमीपं यायात् विजिगीषुरिति शेषः । भूभागे साधूनां वास्तुविद्याविदां सम्मतेऽभिप्रेते, स्कन्धावारनिवेशज्ञैः स्कन्धावारस्य सेनासन्निवेशस्य, निवेशज्ञैः निर्माणकुशलैः स्कन्धावारं निवेशयेत् ॥ १ ।

चतुरस्रं चतुर्द्वारं नातिविस्तारसङ्कटम् ।
महाप्रतोली[3]प्राकारं महापरिखयावृतम्[4] ॥ २ ।
शृङ्गाटमर्द्धचन्द्रं[5] वा मण्डलं दीर्घमेव च ।
भूमिप्रदेश सामर्थ्यादागार[6]मुपकल्पयेत् ॥ ३ ।

---

[3] साट्टप्रतोली ; सौधप्रतोलीं [4] महाखातसमावृतम् ; समन्वितम्
[5] शृङ्गाटकार्द्धचन्द्रं [6] दगार

2. It (the camp area) should be of square shape and provided with four gates, neither too wide nor too narrow and surrounded by a parapet equipped with lofty towers and a deep moat.

3. (Other than quadrangular), it (the camp) should be designed as triangular (*śṛṅgāṭaka*), crescent shaped (*ardhacandra*), circular or longish (rectangular) according to the advantages (elevation) of the land.

स्कन्धावारनिवेशप्रणालीमाह—चतुरस्रमिति । तं चतुरस्रं समायामविस्तारं, चतुर्द्वारं दिक्चतुष्टये द्वारचतुष्टयभूषितमित्यर्थः । नातिविस्तारसङ्कटमसम्बाधम् । अभ्युपायः फल्गानित्याह—

साटैरट्टालकैः महाप्रतोलीप्राकारं प्रतोलीभिरन्वितो यः प्राकारो महाखातानि च परिखा इत्यर्थः। तत्समन्वितमिति ॥ २ ।

चतुरस्रस्याभावे यथालाभमपि स्कन्धावारनिवेशः कर्तव्य इति दर्शयन्नाह—शृङ्गाटमिति। शृङ्गाटकं त्रिकोणं, अर्द्धचन्द्रं तदाकारं, दीर्घं वा मण्डलं तथा भूमिप्रदेश सामर्थ्यात् यथाकारं[1] चतुरस्रादि परिकल्पयेत् ॥ ३ ।

[1] सामर्थ्यादाकारं

विविक्तैश्च[7] विभक्तैश्च शृङ्गैरन्वित[8]मायतैः।
गुप्तकक्षं[9] पटाकारैर्महामार्गसमावृतम्[10] ॥ ४ ।

---

[7] विभक्तैश्च विविक्तैश्च ; विभक्तैश्चाविवि [8] पार्श्वैरन्वित

[9] गुप्तं कक्षपुटाकारं ; भटाकारं ; पटागारं [10] समन्वितम्

4. On the (internal) side (of the parapet), the camp area should be divided into different sectors each of rectangular shape and separated from one another by wide roads and equipped with secret chambers (i.e., hidden from public view, for the posting of guards).

विविक्तैरित्यादि। विविक्तैः विरलैः असङ्कीर्णैश्च। शृङ्गैः शिखरैः पटमण्डपैरित्यर्थः। भवन-पार्श्वैरन्वितमायतैर्दीर्घैर्गुप्तकेक्षं पटागारं[2] (पटाकारैः वस्त्रमयैः) गुप्ता रक्षिताः कक्षाः निवेशान्तरालानि यस्य स्कन्धावारस्य तं तथा महामार्गसमन्वितमिति चतुर्द्वारत्वात् द्वाभ्यामेवेति एकः[3] प्राचीन एक उदीचीन इति। दुर्गं (त्रयः) स्कन्धावारेत्येक[4] एव ॥ ४ ।

[2] पुटाकारं [3] त्रयः प्राचीनास्त्रय उदीचीना इति दुर्गं

[4] स्कन्धावारस्त्वेक एव।

तस्य मध्ये मनोहादि [11]महामौलबलावृत्तम्[11a]।
अन्तः कोशगृहोपेतं कारयेद् राजमन्दिरम् ॥ ५ ।
मौलभुक्तं[12] श्रेणि सुहृद् द्विषदाटविकं बलम्।
राजहर्म्यं समावृत्य[13] क्रमेण विनिवेशयेत् ॥ ६ ।

---

[11] महन्मौल [11a] बलान्वितं

[12] मौलं भृतं [13] समावृत्य

5. In the centre (of the camp area) the attractive royal pavilion with the treasury located within it, and guarded by mighty and veteran soldiers (i.e., those who are in service hereditarily) should be set up.

6. Round the royal pavilion should be set up camps for the veteran soldiers, attendants (or those under regular service), artisans (necessary for different jobs within the camp, carpenters etc), friends and allies, those of the enemy camp already won over and (chief) foresters in successive order.

राजगृह सन्निवेशमाह—तस्य मध्ये मनोह्लादीति। मौलबलावृतमिति बलानां निवेशक्रमेणावृतं[5] तदावासैर्वेष्टितं अन्तः कोशगृहेणोपेतं, "कोशाधीनो हि राजेति", व्यवहितः कोशो न विधेय इति। एवंविधं कारयेद् राजमन्दिरमिति ॥ ५ ।

[5] क्रमणनावृतं

बलानां निवेशक्रममभिधातुमाह[6]—मौलमित्यादि। मौलं पितृपैतामहम्। भृत्यं (भृतं) भक्तवेतनोपगृहीतम्। श्रेणिबलं कुविन्दपट्टिकाकारादिबलम्। सुहृद्बलं मित्रबलम्। द्विषद्बलं दण्डोपनत सामन्तबलम्। आटविकं बलं अटवीपतीनां राजकर्मणां बलम्। एवं षडपि बलानि राजहर्म्यं समावृत्य वेष्टयित्वा क्रमेणौत्कपरिपाट्या निवेशयेत् प्रतिस्कन्धावारनिवेशम् ॥ ६ ।

[6] सन्निधानमाह

[14]अन्ते चागणितान् क्रूरान् लुब्धकान् दुष्टकर्मणः[15] ।
पर्याप्तवेतनान्[16] स्वाप्तान् मण्डलेन निवेशयेत् ॥ ७ ।

---

[14] अन्तःस्ववर्गिणः क्रूरानलुब्धान्दृष्टकर्मणः; अन्तःस्थवर्गिणः; अन्तःस्ववर्गसहितान्; अन्तेस्वगणिनः [15] दृष्टकर्मणः

[16] वेतनानाप्तान् मन्त

7. Outside (round the camp area) should be settled numerous rough people, hunters and bad characters (*duṣṭakarmaṇah*) (or released convicts of known antecedents, *dṛṣṭakarmaṇah*) by winning them over by payment of sufficient emoluments.

अन्ते चेति। अन्ते च स्कन्धावारप्रान्तभागे च सर्वदिक्षु इत्यर्थः। अगणितान क्रूरान् लुब्धकान् दुष्टकर्मणः (दृष्टकर्मणः) पर्याप्तवेतनान् स्वाप्तान् कृत्वा। अन्यथा तेऽपि कृत्याः स्युरिति। मण्डलेन मण्डलाकारेण विनिवेशयेत् ॥ ७ ॥

हस्तिनो लब्धनामानस्तुरङ्गास्तु[17] मनोजवाः ।
गृहोपकण्ठे नृपतेर्वसेयुः स्वाप्तरक्षिताः ॥ ८ ।
यामवृत्त्या सुसन्नद्धं रात्रिन्दिवमुदायुधम् ।
अन्तर्वंशिकसैन्यञ्च तिष्ठेद् राजाभिगुप्तये ॥ ९ ।
युद्धयोग्यो महादन्ती सन्नद्धः साध्वधिष्ठितः ।
तिष्ठेन्नरपतेर्द्वारि[18] वेगवांश्च तुरङ्गमः ॥ १० ।

---

[17] श्च [18] पतिद्वारे

8. Elephants worthy of their names (i.e., of proved might) and horses as fleet as mind, under the command of trusted men (*svāptarakṣitā*) should mount guard outside the royal pavilion.

9. For the security of the ruler armed guards of the interior (*antarvaṁśika sainya*) should keep watch day and night with drawn swords.

10. Mighty tuskers, trained for warfare and horses of fast speed, mounted by trusted armed riders, should be stationed at the gate of the royal camp.

हस्तिनो लब्धनामान इत्यादि। प्रतीतम् ॥ ८ ॥

यामवृत्त्येति। यामोऽहोरात्राष्टमभागः। तत्र सावधानत्वेनावस्थितिर्यामवृत्तिस्तत्पर्यायेणेत्यर्थः। सुसन्नद्धं कृतसन्नाहम्। रात्रिन्दिवमहोरात्रमुदायुधं उद्गीर्णशस्त्रमन्तर्वंशिकसैन्यमन्तर्वंशो राज्ञः पुत्रदारं तत्र नियुक्तोऽन्तर्वंशिकः अन्तःपुरामात्यस्तत्प्रतिबद्धं सैन्यमुक्तप्रकारेण राजाभिगुप्तये तिष्ठेदिति ॥ ९ ॥

युद्धयोग्य इति। प्रतीतम् ॥ १० ।

सैन्यैकदेशः सन्नद्धः सेनापतिपुरःसरः।
प्रपन्नवान्[19] परिपतेन्मण्डलेन[20] बहिर्निशि ॥ ११ ।
परसैन्यप्रचारश्च[21] सन्नद्धाः शीघ्रपातिनः[22] ।
वाताश्विका[23] विजानीयुर्दूरसीमान्तपातिनः[24] ॥ १२ ।

[19] प्रयत्नवान् [20] परिचरेन् मण्डलं तद् बहिः

[21] प्रचारांश्च सत्त्वाढ्याः [22] गामिनः

[23] वाताश्विका [24] दूरसीमान्तचारिणः ; युः पुरसीमान्तवासिनः

11 A portion of the army ready with weapons led by the commander (or the captain of the battalion) should move round the camp area during the night (lest the enemy attempts a surprise attack).

12. To collect information about the movements of the enemy forces trusted and determined (lieutenants) should be sent out on swift running horses, as fast as the wind (*vātāśvikā*), to meet the watchmen of distant boundaries and gather reports from them.

सैन्यैकदेश इति। सैन्यैकदेशः बलैकभागः। इत्यपि प्रतीतम् ॥ ११ ।

परसैन्य प्रचारं चेत्यादि। यातव्यसैन्यप्रचारमवस्कन्दनादिकं सत्त्वाढ्या महाशयाः शीघ्रपातिनः शीघ्रगतयः[7] वाताश्विकाः वातसमानवेगोपलक्षिता अश्वाः तैश्चरन्तीति वाताश्विकाः। विजानीयुर्दूरसीमान्ते पतन्तीति ते ॥ १२ ।

[7] शीघ्रपातयः

तोरणाबद्धमाल्येषु यन्त्रवत्सु पताकिषु।
द्वारेषु परमां गुप्तिं कारयेदाप्तकारिभिः ॥ १३ ।
निर्गच्छेच्च[25] विशेच्चापि सर्व एवोपलक्षितः।
तिष्ठेयुः परदूताश्च राजशासनगोचराः ॥ १४ ।
वृथाकोलाहलाद्धास्याद् द्यूतात् पानाच्च वारितः।
सज्जोपकरणः [26]सन्तिष्ठेत् सर्वकार्योन्मुखो[27] जनः ॥ १५ ।

[25] निर्गच्छेत् प्रविशेच्चैव [26] करणस्तिष्ठेत् [27] सर्वः

13. The main gates (in the four quarters) of the encampment, decorated with garlands and flags, should be equipped with mortar throwing machines (catapults) hidden from view (camouflaged) and manned by trusted soldiers.

14. Strict watch should be kept over all incoming and outgoing persons (to and from the camp area), but envoys from the enemy should however he detained till the matter is brought to the notice of the ruler (i.e., till permission is obtained from the ruler).

15. (Inmates of the camp) are prevented from making unnecessary noises or bursting out in loud laughters, gambling and drinking. On the other hand they should always be ready to discharge their duties and equipped with necessary implements.

तोरणाबद्धेत्यादि। कारयेदाप्तकारिभिः आप्तं हितं कर्तुं शीलं येषां ते तैः। स्पष्टमन्यत् ॥ १३ ।

निर्गच्छेदित्यादि। तिष्ठेयुः परदूताश्च राजशासनगोचराः राजादेश्यावकाशा[8] इत्यर्थः। शेषम् प्रतीतम् ॥ १४ ।

वृथा कोलाहलादित्यादि। वृथाकोलाहलात् निष्कारणकलकलात्, हास्यात् द्यूतात्पानाच्चवारितः। सज्जोपकरणः सन्[9] विहितशस्त्रावरणस्तिष्ठेत् सर्वः स्कन्धावारनिवासी जनोऽवस्कन्दप्रतीकारकार्योन्मुख इति ॥ १५ ।

[8] राजादेशावकीर्णा [9] सन्निहितशस्त्रा

बहिःखातात्[28] स्वसिज्ञानां मुक्त्वा सञ्चारमायतम् ।[28a] ।
परसैन्यविनाशार्थं[29] सर्वां भूमिं विनाशयेत् ॥ १६ ।
क्वचित् कण्टकशाखाभिः क्वचित् कीलैरयोमुखैः[30] ।
भूषयेत्[31] परितो भूमिं प्रच्छन्नप्रदरैरपि[32] ॥ १७ ।

---

[28] बहिः खातात् सैन्यानां ; स्वसैन्यानां

[28a] सञ्चारमात्मनः

[29] विघातार्थं [30] क्वचिच्छूलैरयोमुखैः

[31] दूषयेत् [32] प्रच्छन्नैः प्रदरैरपि ; प्रच्छन्नश्वदरैरपि ; प्रच्छन्नप्रदरै

16. Beyond the (surrounding) moat, all lands (i.e., a wide area) should be cleared (of trees and fencings), in order that the attacking enemy forces are (viewed from a distance and) crushed, leaving of course space enough for the movement of own troops, particularly expert swordsmen (*svasijñānām*).

17. The land outside should be damaged by setting up thorny (poisonous) shrubs at some places and pointed iron-tippec pegs (*kīlairayomukhaih*) at others or with camouflaged pits and ho!es (*pracchanna-pradaraih*) (in order that enemy movements are handicapped).

बहिःखाताविति। परिखायाः बहिः बाह्यप्रदेशे स्वसिद्धानां शोभनखड्गायुधानां योधपुरुषाणां आयतं विस्तृतं सद्वारं प्रचारभूमिं मुक्त्वा विहाय परसैन्यविनाशार्थं सर्वां भूमिं विनाशयेत् कण्टकशाखादिभिरिति शेषः। शेषं प्रतीतम् ॥ १६।

तमेव भूमिविनाशमाह[10]—क्वचिदित्यादि। क्वचित्कण्टकशाखाभिः क्वचिच्छूलैः (कीलैर्वा), सारदारुमयैरयोमुखैरग्रेनिहितायोमुखाग्रैर्दूषयेत् परितो भूमिं प्रच्छन्नैः प्रदरैः[11] खातैरभिहितशूलगर्भैः प्रच्छादितैरिति ॥ १७।

[10] भूमिनिवेशमाह [11] प्रदरैररवखातैः; खपातैः

निर्वृक्षक्षुपपाषाणस्थाणुवल्मीकनिर्दरैः[33]।
कारयेत् कारणैश्छिन्नैः सैन्यव्यायाममन्वहम् ॥ १८।

---

[33] निर्दरे

18. (Within the camp area) sufficient land should be cleared of trees, shrubs, stones, mounds, stumps of trees and pits and decently levelled by workers (i.e., sappers and miners) for the daily exercise (drills and parade, *sainyavyayāma*) of the army.

स्वसैन्यानां सम्पदर्थमाह—निर्वृक्षेत्यादि। दरो दरणं भूमेः स्फोटः[12] तद्रहितं, तत्र चतुरङ्गसैन्यव्यायामं[13] संग्रामगुणिनं, कारयेत् करणैश्छिन्नैर्धावनप्लवन[14]खनकाकाशस्थलादियुद्धकरणैः प्रतिदिनमिति ॥ १८।

[12] स्फोटकासाररहितं; कुहरन्ध्ररहितं

[13] तत्र तुरङ्गसैन्यव्यायामं [14] प्लावनावनकासन

यस्मिन्देशे यथाकामं सैन्यव्यायामभूमयः।
परस्य विपरीतश्च[34] स्मृतो[35]देशः स उत्तमः ॥ १९।
आत्मनश्च परेषां च तुल्या[36] व्यायामभूमयः।
सुमध्यमः[37] स उद्दिष्टो देशः शास्त्रार्थचिन्तकैः ॥ २०।
अरातिसैन्यव्यायाम सुपर्याप्तमहीतलः[38]।
आत्मनो विपरीतश्च यः स देशोऽधमः स्मृतः ॥ २१।
नित्यमुत्तममाकाङ्क्षेत् तदभावे तु मध्यमम्।
अधमं बन्धनागारं नोपसेवेत सिद्धये ॥ २२।

---

[34] ताश्च [35] श्रुतो

[36] तुल्यव्यायाम [37] यत्र मध्यम उद्दिष्टो; स मध्यमः समुद्दिष्टः

[38] भुवस्तलः

19. The land which is favourable for the desired movements and exercises of one's own troops, and the reverse is the position of the enemy, is said to be the best or the most advantageous.

20. The land in which advantages for the movement of troops of one's own and that of the enemy, are identical (*tulya*), is of the middle order according to political thinkers.

21. The land which is advantageous for the movement of enemy troops and the reverse is the position of one's own, is said to be of the worst type.

22. A *vijigīṣu* should always desire for the most advantageous region (for military operations), failing which he may go in for the medium type, but never for the worst type, as that would not be propitious for success. On the other hand, he may be entrapped therein.

स्वबलानामनुकूलं देशमभिधातुमाह—यस्मिन्नित्यादि। सुगममेतत् ॥ १९ ।

पक्षद्वयस्याप्यनुकूलं देशमाह—आत्मनश्चेति। जयपराजयोरभावात्। शेषं सुगमम् ॥ २० ।

स्वबलप्रतिकूलं देशमाह—अरातीति। स्पष्टार्थमेतत् ॥ २१ ।

नित्यमुत्तममित्यादि। उत्तममध्यमौ काङ्क्षेत्, नाधमं कदाचित्। यतो बन्धनागारसमदेशः बद्धेन हि योद्धुं न शक्यत इति ॥ २२ ।

इति स्कन्धावारनिवेशो नाम पञ्चविंशं प्रकरणम्।

२६। निमित्तज्ञान प्रकरणम्।

आक्रान्त इव केनापि रोगानीकैरनुद्रुतः[39] ।
अकस्माद्‌द्रवद्द्वेषो[40] राजनीहारसंवृत ॥ २३ ।
विधूत[41] परुषैर्वातैरकस्माच्च पतद्ध्वजाः[42] ।
परस्परभवद्द्रोहो[42a] न तथा तूर्यनिस्वनः ॥ २४ ।
उत्प्रेक्षितभयत्रासो निर्घातोल्काविभूषितः[43] ।
उद्भ्रमः[44] प्रज्वलच्छस्त्रो विदक्षिण शिवारुतः ॥ २५ ।
मण्डलैः काकगृध्राणामाकीर्णो रूक्षवासिभिः[45] ।
मुहुरत्युग्रतादीप्तः संसिक्तो रक्तवृष्टिभिः ॥ २६ ।
परीतराजनक्षत्रः क्रूरैरौत्पातिकैर्ग्रहैः ।
सूर्यदृष्टकबन्धादिरकस्मान्मूढवाहनः ॥ २७ ।

---

[39] नीकैरभिद्रुतः   [40] द्रवदुद्वेगो रजोनीहार

[41] विधूतः ; विधूम्रैः विधूम्रपरु   [42] पतद्ध्वजः

[42a] भवद्द्रोहो   [43] तोल्काविदूषितः ; तोल्काभिदूषितः ; तोल्कादिदूषणम

[44] उद्भ्रमप्रज्वल ; उद्भ्रमत्प्रज्वलच्छस्त्रो   [45] मासीनो रूक्षवासिनाम्

अकस्मान् [46]मत्तमातङ्गः प्रशुष्य[47]द्दानशीकरः ।
इत्यादिविकृतोपेतः स्कन्धावारो न शस्यते ॥ २८ ।

[46] मूढ [47] द्रः संशुष्य ; प्रदुष्य

Prakaraṇa 26.

Nimittajñāna

(Knowledge of signs and portents)

23. (Enumerating the inauspicious portents while encamping it is stated thus). Sudden break out of epidemic diseases (among men and animals), worries and apprehensions without any reasons therefor, fall of snow or hailstones covering the ground,

24. when stormy winds prevail and the sky is overcast with dust storms, where the royal flagstaff (*dhvaja*) breaks down suddenly (by the storm), when mutual dissensions are rampant (among the inmates of the camp) and when trumpets are not sounded (regularly due to the prevailing confusion among the staft),

25. when people suffer from unnecessary fright and alarm, or are hit by thunder and fall of meteors, where weapons blaze forth (*prajvalacch-astra*) as soon as drawn out and emit smoke and where jackals howl from the left side (*vidakṣiṇa śivāruta*), an evil portent,

26. when the capital (or encampment) is infested by crows and vultures and such other unlucky birds, where suddenly heat waves break out and the ground is drenched by shower of blood (from the firmament),

27. when (it is found by astrological calculation that) the royal star (*rājanakṣatra*, as set in the king's horoscope) is influenced by evil and harmful planets, and spectres of headless trunk (*kabandha*) and other signs of evil portent appear in the orb of the sun, and suddenly the draught and riding animals are dumbfounded,

28. when rutting elephants all on a sudden stop emitting ichor and get dried up, and such other evil omens affect the encampment, it is considered unworthy (for its avowed purpose).

स्कन्धावारस्य दुर्निमित्तमभिधातुमाह—आक्रान्त इवेत्यादि । आक्रान्त इति स्कन्धावारो द्विपदचतुष्पदस्वरूपः केनाप्यदृश्यमानेनाक्रान्तोऽवष्टब्ध इव यदा विभाव्यते तदा दुर्निमित्तम्, तथा रोगानीकैर्व्याधिसैन्यैर्जरादिभिरभिद्रुतः, कृतोपद्रवः । अकस्मादिति कारणं विनैव भवेदुद्वेगो जायमानश्चित्तपरितापः । रजोभिर्नीहारेण धूमिकया वृतः संवृतः पिहितः ॥ २३ ।

विधूत इत्यादि । विधूतः परुषैर्वातैरुद्धूतः प्रचण्डैर्मरुद्भिः । अकस्माच्च पतद्ध्वजः पतद्राजध्वजः (पतद्रजा इति पाठे पतन्ति रजांसि यस्मिन् स तथा ।) परस्परभवद्द्रोह इति स्ववर्ग एव भवद्धिंसः न तथा तूर्यनिस्वन इति विस्वरतूर्यध्वनिः ॥ २४ ।

उत्प्रेक्षितभयत्रास इति। स्वोत्प्रेक्षयैव किंनैव भयकारणं भयं त्रासश्च यत्र भवति। निर्घातोल्काभिदूंषितः इति निर्घातेनाकस्मादुत्थत महानादेन उल्काभिश्चाभिमुख्येन दूषितः। उद्धूमः प्रज्वलच्छस्त्र इति। धूमो निर्गच्छन् प्रज्वलन्ति शस्त्राणि यस्मिन्। विदक्षिणशिवारुतः॥ २५।

मण्डलैरित्यादि। रक्तवृष्टिभिराकाशात्पतिताभिः। शेषं सुगमम्॥ २३।

परीतेत्यादि। परीतमाक्रान्तं स्कन्धावारस्य यो राजा तस्य जन्मनक्षत्रं क्रूरैरौत्पातिकैरतिचमूघातकैर्ग्रहैः राहुकेत्वादिभिः। सूर्यमण्डले दृष्टान्यनेककबन्धादीनि यत्र। अकस्मान्मूत्रवाहनः॥ २७॥

अकस्मान्मत्तमातङ्ग इति। अकस्मादेव प्रक्षुभ्यन् दानवीकर इत्यादि विकृतोपेतो दुर्निमित्तयुक्तः स्कन्धावारो न शस्यते पराजयफलकालोऽभ्युदित इति॥ २८।

प्रहृष्ट नरनारीकः प्रशस्तस्वनदुन्दुभिः।
गम्भीरहेषितहयः शस्तबृंहितकुञ्जरः[47a]॥ २९।
पुण्याहब्रह्मघोषाढ्यो नृत्यगीतसमस्वनः[48]।
निर्भीतिको[48a] महोत्साह[49] आकाङ्क्षितजयोदयः॥ ३०।
निरजस्कोऽतिघृष्टश्च[50] प्रादक्षिण्यस्थितग्रहः।
दिव्यान्तरीक्षैरुत्पातैः पार्थिवैश्चाप्यदूषितः[51]॥ ३१।
प्रशस्तकूजद्विहगः प्रदक्षिणशिवारुतः।*
नीचैः प्रवृत्तानुलोममारुतस्तुतमङ्गलः[52]॥ ३२।
हृष्टपुष्टबलः[53] साधुः सुगन्धिज्वलितानलः।
अमद्यमाद्यन्मातङ्ग[54] आसाराभ्युदयान्वितः॥ ३३।
इत्यादि लक्षणोपेतः स्कन्धावारः प्रशस्यते।
शस्ते तस्मिन् द्विषो भङ्गो[55] यो ऽशस्ते विपर्ययः॥ ३४।

---

* Omitted in the B.I. text.

[47a] पूरितद्विपबृंहितः ; पूजितद्विपबृंहितः

[48] समाकुलः [48a] निरीतिको

[49] तिकः सदोत्साह [50] विरजस्कोऽभिवृष्टश्च

[51] पार्थिवैश्च विवर्जितः [52] मारुतः स्तुतमङ्गलः

[53] जनः [54] अमन्दमत्तमातङ्ग

[55] भङ्गोऽशस्ते क्षयो

29. (Auspicious signs are indicated as under). The encampment where men and women are happy and contented and the air is filled with sounds of drums, deep neighing of horses and full throated roaring of war elephants,

30. where recital of Vedic hymns and utterance of *Puṇyāha* (an auspicious day) are heard along with merry sounds of dances and songs

(music), and where prevails an air of undisturbed festivity on the prospect of desired success,

31. where the land is free from dust due to favourable rain, and well-disposed planets shower bounties, where the situation is free from disturbances from celestial, firmamental or terrestrial quarters,

32. where there are plenty of chirping of auspicious birds and movements of jackals on the right side (which is auspicious), and where the wind blows softly and from a favourable direction carrying recitals of auspicious songs,

33. where the forces are healthy, cheerful and honest, where incenses are burnt on blazing fires, where rutting elephants need no intoxicating drinks, and where friendly allies are also prosperous.

34. The encampment, where these (auspicious) signs prevail, is indeed commendable. With these in one's own camp, he may hope to break the bone of the enemy (i.e., defeat him), but without these the reverse will be the result (i.e., the *vijigiṣu* may have to court defeat).

इदानीं शुभनिमित्तोदयात् शुभस्कन्धावारः शुभं युद्धाय कालं सूचयतीति दर्शयन्नाह—प्रहृष्टेत्यादि। प्रहृष्टनरनारीकः प्रफुल्लचित्ताः नरा नार्यश्च यत्र स तथाभूतः। प्रशस्तस्वनदुन्दुभिः श्रवणमधुरध्वनयः दुन्दुभयः भेर्यः; गम्भीरहेषित हयः गम्भीरं शब्दायमानाः हयाः अश्वाः; प्रशस्त्र (प्रशस्त) बृंहित कुञ्जरः श्रुतिसुखकरध्वनयः कुञ्जराः गजाः (पूजितद्विपबृंहितः इति पाठे पूजितमतिप्रशस्तमुत्कृष्टं बृंहितमिष्टं द्विपकूजितं) यत्र ॥ २९ ।

पुण्याहेत्यादि। सर्वं प्रतीतम् ॥ ३० ।

निरजस्क इति। अतिवृष्टः (अभिवृष्टर्वा) अनुकूलवृष्टियुक्तः। अतएव निरजस्क धूलिरहितः; प्रादक्षिण्यस्थितग्रहः अनुकूलतया स्थिताः स्कन्धावाराधिपतेर्ग्रहा यत्र स तथाभूतः। दिव्यैः आन्तरीक्षैः पार्थिवैश्च अदूषित (विवर्जितः) अनाक्रान्तः ॥ ३१ ।

प्रशस्तकुजद्विहग इति। सुगमम् ॥ ३२ ।

हृष्टपुष्टबल इति। आसारः शुभा वृष्टिस्तेन यः सूचितोऽभ्युदयः तदन्वित इति ॥ ३३ ।

इत्यादीति। इतिलक्षणोपेतः स्कन्धावारः प्रशस्यते विजयाय भवतीति। शस्ते तस्मिन स्कन्धावारे द्विषो यातव्यस्य भङ्गः। अशस्ते तद्विपर्ययम् इति ॥ ३४ ।

निमित्तान्येव शंसन्ति शुभाशुभ फलोदयम् ।
तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत् ॥ ३५ ।
(सिद्ध्यसिद्धी[56] निमित्तानि यतः शंसन्ति कर्मणाम् ।
विद्यादात्महिताकाङ्क्षी तस्मादेतानि तत्त्वतः ॥)*

---

[56] सिद्धासिद्धं ; साध्यसिद्धं

*a variant of v. 35

प्रशस्तेन निमित्तेन विशुद्धेनान्तरात्मना ।
व्यवसायमारभ्यमाणं हि सिद्धिं याति समीहितम् ॥ ३६ ।
सहायसम्पत् विज्ञानं[57] सत्त्वं दैवानुकूलता ।
उद्योगो [58]व्यवसायश्च यस्यैते तस्य सिद्धयः ॥ ३७ ।

[57] प्रज्ञानं [58] उद्योगोऽध्यवसायश्च

35. Success or failure of all ventures depend on ominous signs (i.e., as they are auspicious or inauspicious). Hence these are carefully observed and interpreted by a learned ruler desirous of his own welfare.

36. With favourable omens when a king undertakes any action exerting himself along with his trusted retinue he is sure to achieve success in his enterprise.

37. The *vijigisu,* who possesses (the support of) allies, wealth, right judgement (in deciding upon actions), firmness, divine favour, energy and perseverance, is sure to gain success.

निमित्तानीत्यादि । विजिगीषुरेतानि यस्मान्निमित्तान्येव शंसन्ति शुभाशुभफलोदयं तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत्[15] ॥ ३५ ।

प्रशस्तेनेत्यादि । इति प्रतीतम् ॥ ३६ ।

*यथा समग्राः सिद्धयो भवन्ति तथाऽऽह:—*सहायसम्पदित्यादि । यैः सहायैः कार्यसिद्धिर्भवति, तेषामाशु[16]सम्पत्तिः । विज्ञानं तस्मिन्नेव काले प्रकृष्टज्ञानम् । सत्त्वं, दैवानुकूलता सा च समीहितसम्पत्त्यानुमीयते । उद्योगो मनस्युत्साहः । अध्यवसायश्च कार्यकरणानां च प्रस्युन्दनादिक्रिया[17] यस्य विजिगीषोर्गुणाः सम्पद्यन्ते तस्य सिद्धय इति ॥ ३७ ।

[15] समये लक्षयेत् [16] येषामाशु
[17] प्रस्कन्दनादिक्रिया

तन्मूलत्वात् प्रजानां तु राजा स्कन्ध इति स्मृतः[59] ।
आवारोऽमात्यदण्डादिर्वृत्ति[60]रावार उच्यते ॥ ३८ ।
भूतानां भूतिनिष्पत्तेरावारेण महीयसा ।
आवृतस्तु[61] यतः स्कन्धः स्कन्धावारस्ततः स्मृतः ॥ ३९ ।
(अतो आवरितः स्कन्धः स्कन्धावार इति स्मृतः ।)

[59] उदाहृतः [60] वृति [61] यत आवारितः स्कन्धः

38. Considering the subjects to be the root (of the tree) of prosperity, the king is its *skandha* (the trunk-joints from which branches spread out) and the ministers, military power (*daṇḍa*) and other elements are *āvāras* or protective shade (overspread branches and leaves) to provide safety and security to the subjects by covering them.

39. When for all round prosperity of the state the king with his retinue (*skandha*) is brought under the protective shade or covering of the *āvāras*, it is known as *Skandhāvāra*.

स्कन्धावारशब्दं व्याख्यातुमाह—तन्मूलत्वादिति। तन्मूलत्वात् राजा यत्र मूलं कारणं वा यासां, राज्ञा रक्षिताः प्रजा जीवन्तीति प्रजानां मूलं तस्माद् राजा स्कन्धो वृक्षशाखसमूहस्येव राजा स्कन्ध इति स्मृतः। आवरणमावारोऽमात्यदण्डादिश्चतुरङ्गबलम्। आवारो वृतिरुच्यते। कण्टकशाखादिकृता रक्षणीयस्येवेति ॥ ३८।

एतदेव स्पष्टयन्नाह—भूतानामित्यादि। भूतानां भूतिः सम्भूतिः सम्पत्तिर्वा तन्निष्पत्ते[18]रावारेणामात्यादिप्रकृतिसमूहेनावारितः परिवृतः स्कन्धो राजा कारणं भवतीति वाक्यशेषः। अतः कारणात् स्कन्धावारः सपरिवारो राजा स्मृत इति ॥ ३९।

[18] निष्पत्तेर्वा रोगमोक्षादिप्रकृतिनिष्पन्नं मोक्षादिप्रकृति ; निष्पत्तेर्वारेण मोक्षादिप्रकृति

समवस्कन्दवासाम्बु[62]वीवधासार निग्रहाः।
एते प्रयत्नतो रक्ष्याः स्कन्धावारस्य मृत्यवः ॥ ४०।
इति प्रयत्नेन[63] निवेशयेद्बलं
शुभाशुभं चास्य[64] तदोपलक्षयेत्[65]।
परस्य चैतन्निपुणं विलोकयेत्
समारभेताशुभ हीनदर्शने ॥ ४१।

इति निमित्तज्ञानं नाम षड्विंश प्रकरणम्।

इति कामन्दकीये नीतिसारे स्कन्धावारसन्निवेशो निमित्तज्ञानञ्च सप्तदशः सर्गः ॥ (मुद्रित पुस्तकानुसारेण इति षोडशः सर्गः)।

---

[62] घासाम्बु [63] इति प्रयत्नतो ; इत्युक्तयत्नेन

[64] चास्य [65] तयोपलक्षयेत्

40. Destruction (by death, disease or defection) of the armed forces, of fodder (for war animals), of water supply and of routes of communication with friendly powers is as dangerous as death (or total ruin) of an encampment. Hence these have to be carefully protected and made secure.

41. The army should be carefully encamped in this way (on lines indicated) and their condition (good or bad, advantageous or disadvantageous) duly watched. Similar careful observation of the enemy's position should also be made and action should be undertaken only when situation is absolutely free from inauspicious portents.

स्कन्धावारविनाशकारणप्रतीकारार्थमाह—समवस्कन्देत्यादि। समवस्कन्दः सौप्तिकादिः शुद्धबलनिपातैः,[19] एको मृत्युः। घासो हस्त्यश्वाद्याहारः। अम्बु पानीयम्। वीवधासारौ कृतव्याख्यौ।

तेषां च निग्रहो निरोधः प्रत्येकं स्कन्धावारस्य मृत्यवो यतोऽन्नपानादिभिर्विना प्राणिनो न जीवन्ति, अत एते प्रयत्नतो रक्ष्याः प्रतीकारद्वारेण निवारणीयाः। अरक्षिताश्च स्कन्धावारस्य मृत्यवो भवन्ति ॥ ४० ।

उपसंहरन्नाह--इतीति। इत्युक्तेन प्रकारेण निवेशयेद्बलं मौलादिकं शुभाशुभं चास्य तदोपलक्षयेत् निवेशकाले। परस्य चैतत् शुभाशुभं निपुणं विलोकयेत्। समारभेत संग्रामम्। अशुभहीनदर्शने तु न किञ्चिदारब्धव्यमिति ॥ ४१ ॥

[10] शुद्धबलबन्निपातं ; बलनिपात ; बलभङ्गनिपात

इति निमित्तज्ञानं नाम षड्विंशं प्रकरणम्।

इति कामन्दकीय नीतिसारटीकायामुपाध्यायनिरपेक्षायां स्कन्धावारनिवेशननिमित्तज्ञानो नाम सप्तदशः सर्गः ॥

अष्टादशः सर्गः

(मुद्रितपुस्तकानुसारेण सप्तदशःसर्गः प्रारम्भः ।)

२७। उपायविकल्पप्रकरणम् ।

महाप्रज्ञान सम्पन्नः सत्त्वदैवोपबृंहितः[1] ।
उद्योगाध्यवसायाभ्यामुपायान्निक्षिपेत् परे ॥ १ ।

[1] सहायैरुपबृंहितः

Sarga XVIII

Prakaraṇa 27.

Upāyavikalpa (Varieties of expedients)

1. A *vijigīṣu*, endowed with intensive wisdom, possessing favourable fortune and firmness of disposition (or armed with the support of strong allies) should with energy and perseverance apply relevant expedients against the enemy.

वैरिपुराभ्याशे स्कन्धावारनिवेशं कृत्वा सहसा न युध्येत किं तूपायप्रयोगपूर्वकं मन्त्रयुद्धारम्भः कर्तव्य इति दर्शयन्नाह—महाप्रज्ञानेति । महाप्रज्ञा॰ं गुणाष्टकयुक्ता प्रज्ञा, शुश्रूषाश्रवणग्रहणधारण-विज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणा इति वचनेन, तया सम्पन्नः । सत्त्वदैवे कृतलक्षणे । ताभ्यामुप-बृंहितः कृततदर्थः[1] । उद्योगाध्यवसायाभ्यामुक्तस्वरूपाभ्यामुपायकारणभूताभ्यामुपायान् सामदान-भेदादीन्[2] निक्षिपेत् प्रयुञ्ज्यात् परे यातव्य इति ॥ १ ॥

[1] कृत इत्यर्थः [2] दानादीन्

चतुरङ्गबलं[2] मुक्त्वा कोशो मन्त्रश्च युध्यते[2a] ।
तत्साधुमन्त्रो मन्त्रेण कोशेन च जयेदरीन् ॥ २ ।

[2] चतुरङ्गं बलं [2a] युज्यते

2. Avoiding the use of the army in its full four complements (*caturaṅga balaṁ*), it is better to fight with the expedients of treasury and wise counsel (*kośo-mantraśca*, i.e., by *sāma* and *dāna*). Hence it would be wise to conquer (or win over) the enemy by duly deliberated expedients of *sāma* or conciliation and *dāna* (*kośa*) or gifts (or bribes).

कस्मात् प्रकाशयुद्धं[3] मुक्त्वा उपायप्रक्षेपोऽभिधीयत इति चेदाह—चतुरङ्गबलमिति । यस्मात् कोशो मन्त्रश्च युध्येते । चतुरङ्गबलं युध्यते[4] । कोशः कथं युध्यते[4a] इति चेत् कोशदानेनात्मसात्-कृता बलव्यतिरिक्ताश्वपुरुषा युध्यन्ते[4b] इति भावः । तथा मन्त्रोऽपि, मन्त्रो मन्त्रिभिः सह निर्णीता

[3] प्रकाराद् युद्धमुक्त्वा [4] युज्यते

[4a] युज्यते [4b] युज्यन्ते

बुद्धिः पराति(भि)-सन्धानलक्षणा। स मन्त्रः शस्त्ररसादिप्रयोगैः शत्रून् विनाशयति। यथा चोक्तं "एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता। प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि।" अपि च—"विषाणदंष्ट्रानखकोटि पाणिभिर्द्विषत्सु दण्डं पशवोऽपि युञ्जते। अयं विशेषः प्रतिबुद्धचेतसां[5] धनूंष्यनारोप्य जयन्ति विद्विषः॥" इति॥२॥

[5] प्रतियुद्ध चेतसां

साम दानञ्च दण्डश्च भेदश्चेति[3] चतुष्टयम्[3a]।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः॥ ३।

---

[3] भेदश्च दण्डश्चेति [3a] चतुर्विधः

3. Conciliation, gifts, (sowing) dissension, use of military power, display of deceitful tactics (*māyā*), neglect (*upekṣā* or diplomatic indifference) and conjuring tricks (*indrajāla*), are known to be the seven expedients.

उपायानभिधातुमाह—सामेति। इति प्रतीतम्॥३॥

परस्परोपकाराणां[4] कीर्तनं गुणकर्मसु[5]।
[6]सम्बन्धस्य समाख्यानमायत्याः[7] सम्प्रकाशनम्[8]॥ ४।
वाचा पेशलया साधु तवाहमिति चार्पणम्।
इति सामप्रयोगज्ञैः[9] साम पञ्चविधं स्मृतम्॥ ५।

---

[4] प्रणिपातस्तु सर्वेषां सत्कर्मगुण

[5] कीर्तनं गुणकीर्तनम्; दर्शनं गुणकीर्तनम्

[6] प्राक्सम्बन्ध समाख्यानम् पूर्वसम्बन्धकथनम्

[7] मायते; मायतैश्च [8] सम्प्रदर्शनम्; स्वसम्बन्ध प्रकल्पनम्

[9] प्रभेदज्ञैः

4-5. *Sāma* (conciliatory measures) is of five kinds according to experts in the application of conciliation, viz., (i) rendering mutual benefit, (ii) extolling of merits, (iii) establishment of family relationship (marriage ties), (iv) mutual disclosure of plans and their expected results (which may be shared between them), and (v) expression of sweet and agreeable words as well as offering mutual service.

सामस्वरूपमाख्यातुमाह—परस्पर इति। परस्परोपकाराणामिति भवद्भिरस्माकमस्माभिश्च भवतामिति दर्शनं तदाद्यं साम। गुणकीर्तनमिति वंशरूपविद्यावित्त-चरित्रादिगुणानां कीर्तनं श्लाघनं द्वितीयं साम। पूर्वसम्बन्धकथनमिति पूर्वेषां सम्बन्धा यौन-मौख-स्रौवादयस्तेषां कथनं ख्यापनं तृतीयं साम। आयत्या सम्प्रकाशनं आयतिः उत्तरफलं तस्याः प्रकटनमिति। स्वसम्बन्धप्रकल्पनमिति पाठे अस्माकं पिता तव भ्राता भवतीति चतुर्थं साम॥४॥

वाचेति। इति स्पष्टम्॥५॥

[10]यः सम्प्राप्तधनोत्सर्ग उत्तमाधममध्यमः ।
प्रतिदानं तथा तस्य गृहीतस्यानुमोदनम्[11] ॥ ६ ॥
द्रव्यादानमपूर्वं[12] च स्वयं ग्राहप्रवर्तनम् ।
देयस्य प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम् ॥ ७ ॥

---

[10] सम्प्राप्तो यो धनो [11] स्यानुवर्तनम्

[12] द्रव्यदान

6-7. *Dāna* (gifts) is also of five kinds, viz., (i) gifts of acquired wealth (cash or kind) of superior, middling or inferior types (i.e., richly valued, of medium value and ordinary commodities) or similar gifts in return of what had been obtained, (*pratidāna*) (ii) confirmation or acquiescence of taking away of wealth (or commodities) (without prior sanction), (iii) gift of some wonderful objects (gems, jewels etc), (iv) acceptance of gifts and (v) remission of dues (*pratimokṣa*).

दानमपि पञ्चविधमभिधातुमाह—य इति। यः सम्प्राप्तधनोत्सर्गस्तत् प्रतिदानमुच्यते। स सम्प्राप्तो यथा भवत्युत्तमोऽधमो मध्यमो वा संख्यातः सारतो वा तथा सम्प्राप्तधनोत्सर्गः। सम्प्राप्तिषु यथाकथञ्चिदपि भवतु, प्रतिदानं तथैवात्राविनष्टस्य[6]यत्तद् अयमेको दानभेदः स्वत्वादुत्तीर्णमपि दीयत इति। गृहीतस्यानुवर्तनमिति स्वयमेवादत्तादानतया[7] गृहीतमपि कार्यवशात् यदनुवर्तते, साधुकृतं यत् स्वयमेवेदं गृहीतम्। मया पूर्वमेव सङ्कल्पितमित्येवंविधेनानुवर्तनेन युक्तमिति द्वितीयो दानभेदः ॥ ६ ॥

द्रव्येति। द्रव्यदानमपूर्वमिति यदभिनवं दीयते तत्तृतीयम्। तथा स्वयंग्राहप्रवर्तनं परविषयादौ यत् त्वया गृहीतं तत्[8] तवान्विष्यते मयेति चतुर्थम्। देयस्यैव प्रतिवर्षं दातव्यस्य प्रतिमोक्षस्तदपि दानमेवेत्येवं दानं पञ्चविधं स्मृतम् ॥ ७ ॥

[6] पिनष्टस्य [7] दत्तदानतया

[8] तत्तु अधुना नवान्विष्यत

स्नेहरागापनयनं सङ्घर्षोत्पादनं तथा।
सन्तर्जनं च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः ॥ ८ ॥

---

8. *Bheda* (creation of dissension in the enemy camp), according to experts, is of three varieties, viz., generating loss of fellow feeling and affection (by sowing feelings of mutual distrust), fomenting mutual rivalries and clashes (*saṁgharṣa*), and causing worry and fear (*santarjanaṁ*, so that hesitation prevents taking any action).

भेदमभिधातुमाह—स्नेहेति। स्नेहः सौहृद्यजा प्रीतिः। रागो [9]गुणग्रहणप्रभवोऽनुरागः। तयोरपनयनम्। सङ्घर्षोत्पादनं तयेति मिथःकर्मसु यदि सङ्घर्षः स्पर्धा उद्भाव्यते तस्यापि भेदो भवति। सन्तर्जनं च तथथा यथनेन सहैककार्यो भवसि[10] महद् भयं ते भविष्यतीति। एवं भेदज्ञैर्भेदस्तु त्रिविधः स्मृत इति ॥ ८ ॥

[9] गुणप्रभवो [10] भवति मन्ये तत्ते भविष्यतीति

वधोऽर्थग्रहणं[12a] चैव परिक्लेशस्तथैव च ।
इति दण्डविधानज्ञैर्दण्डोऽपि[12b] त्रिविधः स्मृतः ॥ ९ ।
प्रकाशश्चाप्रकाशश्च पूर्वो[12c] द्विविध इष्यते[12d] ।
प्रकाशदण्डान्[12e] कुर्वीत लोकद्विष्टांस्तथा रिपून् ॥ १० ।

[12a] हरणञ्चैव [12b] विभागज्ञै ; विज्ञानज्ञैर्दण्डस्तु
[12c] पूर्वं ; दण्डो ; वधो
[12d] उच्यते [12e] दण्डं कुर्वीत लोकद्विष्टे तथा रिपौ

9. *Daṇḍa* (punishment or the use of coercive power) is also of three varieties according to experts in the law of punishment, viz., capital punishment, money fines or usurpation of wealth, and imposition of rigorous punishments causing bodily and mental sufferings (*parikleśa*, imprisonment, torture and banishment etc).

10. Execution or capital punishment is of two varieties, viz., openly and by secret method. Open method (*prakāśadaṇḍa*) may be applied against one who has fallen from grace of the public (*lokadviṣṭān*) and also against an enemy.

दण्डमभिधातुमाह—वध इति । वधो विनाश एकाङ्गस्याशेषाङ्गस्य वा । अर्थहरणं अर्थोऽपि बहिश्चराः प्राणास्तद्धरणमपि दमनक्रियैव । परिक्लेशस्तथैव च, कर्मणा यातनादिना व्यायामप्रसारादि-[11] सम्पादनरूपो वा । इत्येवं दण्डविधानज्ञैर्दण्डोऽपि त्रिविध इति ॥ ९ ॥

वधदण्डमपि [12]द्विविधं प्रतिपादयन्नाह—प्रकाश इति । प्रकाशः सकलजनविदितः । अप्रकाशः केनाप्यविदितः । तत्र प्रकाशदण्डान् कुर्वीत लोकविद्विष्टान्[13] चौरपारदारिकादीन् तथा रिपून् भूम्यनन्तरादीनिति ॥ १० ॥

[11] व्यायामादि सम्पादन [12] मपि दमनक्रियैव परिक्लेशस्तद्विविधं
[13] लोकद्विष्टान्

[13]यैरुद्विजेतेह लोको ये चैव नृपवल्लभाः ।
बाधन्ते[14] व्यधिकं ये च तेषूपांशुः प्रवर्तते[14a] ॥ ११ ।
विषेणोपनिषद्योगैः शस्त्रेणोद्वर्तनेन वा ।
तथोपांशु नयेद्दण्डं यथाऽन्यो न विभावयेत् ॥ १२ ।

[13] उद्वेज्यते ह्रतंलोको यैर्ये स्युर्नृप, उद्वेज्यते च लोको यैर्ये च स्युर्नृप
[14] बाधन्तेऽभ्यधिका ये तु [14a] प्रशस्यते

11. Against those persons who cause loss of lives and have become source of anxiety to the common people, even if they are king's favourites or relations, and such powerful men who cause obstruction to the growth of prosperity (of the state), secret methods of assassination (*upāṅgśu daṇḍa*) should be adopted.

12. *Upāngśu daṇḍa* may be applied by poisoning, by mystic rituals, by assassination (through secret agents) and by other contrivances, but in such a way as others may not know them (i.e., as the identity is not discovered).

अप्रकाशदण्डो येषु प्रयोज्यस्तानभिधातुमाह—यैरिति। यैर्हतैर्लोक उद्वेगं याति न हलोभादिति, ये च नृपवल्लभा भूत्वा बाधन्तेऽभ्यधिकम्। प्रजा इति शेषः। हि ये वा, तेषु उपांशुः गुप्तवधः स्मृतो नान्येष्वपि प्रशस्यते। उपांशु शब्दस्य च व्युत्पत्तिः—'अशू' व्याप्तौ पठितः। उप समीपे व्याप्तिर्यस्य तदेकदेशवर्तित्वात् उपांशु, न प्रकटमिति ॥ ११ ॥

उपांशुवधस्वरूपमभिधातुमाह—विषेणेति। विषेण कृत्रिमेणाकृत्रिमेण वा। उपनिषद्योगैः अभिचारणभूमांशुदूषणादिभिः[14]। शस्त्रेण गूढप्रयुक्तेन। उद्वर्तनेन वा स्पर्शवियुक्तेन वा। तथोपांशुदण्डं नयेत् प्रयुञ्ज्यात् यथा अन्यो न विभावयेत् ॥ १२ ॥

[14] भूपांशु द्रवणादिभिः

ब्राह्मणे जातिमात्रेऽपि धार्मिके चान्त्यजेऽपि हि[15]।
धर्मोज्जिगीषया विद्वान्[16] न वधं दण्डमादिशेत् ॥ १३ ।

[15] वा [16] धीमान्

13. Capital punishment should not be inflicted on Brāhmaṇas and men of religious disposition as well as on the low caste people (*antyaja*) by an intelligent ruler desirous of religious (*spiritual*) merit.

यत्र दण्डो न प्रयोज्यस्तदाह—ब्राह्मण इति। धर्मोज्जिगीषया[15] धर्ममुन्नतिं नेतुमिच्छया धीमान् न वधं दण्डमादिशेद्राजेति ॥ १३ ।

[15] परधर्मोज्जिगीषया

उपेक्षया वा हन्तव्या येषूपांशुः प्रशस्यते[17]।
उपेक्षां चापि निपुणः प्रत्यक्षं परिवर्जयेत् ॥ १४ ।

[17] प्रवर्तते

14. Apparent neglect (*Upekṣā*) should be shown against the offender on whom *upāngśu daṇḍa* (secret punishment) is to be applied. But the show of neglect should be perfect (*nipuṇah*) so that it (the ulterior motive) is not disclosed.

उपांशुप्रकारमभिधातुमाह—उपेक्षयेति। अन्यैर्हन्यमाना अनुग्राह्या इत्यर्थः। प्रत्यक्षोपेक्षया तु शङ्कनीयः स्यादित्यर्थः ॥ १४ ॥

प्रविशन्निव[18] चेतांसि दृष्ट्वा[18a] साधु पिबन्निव।
वमन्निवामृतं साम प्रयुञ्जीत प्रियं वचः ॥ १५ ।

[18] प्रलिम्पन्निव [18a] दृष्ट्या

वागनुद्वेगजननी सामेति परिकीर्त्यते ।
सामाख्यं[19] सूनृतं सत्यं प्रियं स्तोत्रं च कीर्त्यते ॥ १६ ।
आत्मनो विषयमिव[20] कुर्वन् दद्यात् समीहितम् ।
जलवत् पर्वताञ्छवून् भिन्द्यादनुपलक्षितः ॥ १७ ।

[19] साऽख्याने सुनृते सान्त्वे प्रिये स्तोत्रे च ; सामाख्यासूनृतं सान्त्वं कीर्तितम्

[20] विक्रयमिव

15. A wise ruler should (at first), after proper review of the situation, apply conciliation (*sāma*) to the enemy with sweet and agreeable words so as to reach the core of his heart as if through the drink of flowing nectar.

16. Words that relieve worries (i.e., agreeable words), *anudvega-janani*) are known to be (the first principle of) conciliation. Statements of mutual benefit, truthful words (assurances of cooperation), sweet and eulogistic remarks, are also forms of conciliation.

17. (As a measure of conciliation), services should be offered as if one has sold himself (to the enemy *vikrayamiva*). But the aim should be to create rift in the ranks of the enemy without being identified, (*anupa-lakṣita*) just like drops of water penetrating rocks imperceptibly.

उपायाः प्रयोगकाले संस्कृत्य प्रयोक्तव्या इत्येतद्दर्शयन्नाह—प्रविशन्निति । प्रविशन्निव चेतांसि प्रकृतत्वात् अमृतस्राविणा साम्ना चन्दनाधिकस्पर्शेनेति द्रष्टव्यम् । दृष्ट्या साधु पिबन्निव सामप्रयोगार्हंनयनेन । इयं च दृष्टिः स्निग्धाख्या षट्त्रिंशद्दृष्टिमध्ये कृतलक्षणा । तथथा—"व्याकोशा स्नेहमधुरा स्मितसारा-[16] भिलाषिणी । सानन्दाश्रुकृता[17] दृष्टिः स्निग्धेयं रतिभाविता[18] ॥" इति । स्रवन्निवामृतं साम प्रयुञ्जीत । तस्य च स्वरूपं किमित्याह—प्रियमिष्टं वचः सामेत्युच्यते ॥ १५ ॥

तच्च साम विशिष्टगुणयोगात् पुनः त्रिविधमिति दर्शयन्नाह—वागिति । सैव सामाख्या वाक् सुनृतं, सान्त्वं यथाक्रमं प्रिये स्तोत्रे च कीर्त्यते । सामैव यदा प्रियं भवति तत् सूनृतमुच्यते । यदा स्तोत्रं तदा सान्त्वमिति ॥ १६ ॥

आत्मनो विषय (विक्रय) मिवेति । स्पष्टमेतत् ॥ १७ ॥

[16] स्मिततारा [17] सानन्दभ्रूकृता

[18] भावना

दण्डपाणिरिवाधृष्यो दण्ड्यं दण्ड्येषु पातयेत् ।
प्रत्यक्षामपि[21] चोपेक्षामप्रत्यक्षामिवाचरेत् ॥ १७।१ *
साम्नार्थसिद्धये विद्वान् यतेत यतमानसः ।
सामसिद्धिं प्रशंसन्ति सर्वतश्च[21a] विपश्चितः ॥ १७।२ *

[21] प्रत्यक्षमपि…प्रत्यक्षमिव [21a] सर्वतस्तु

* Omitted in the B. I. text.

17/1. Punishments should be inflicted in deserving cases as unbiassedly as the Lord of Death (the weilder of *daṇḍa*). Even where punishment is meted out openly it should be done with indifference as if unnoticed.

17/2. A wise ruler always gains his ends by firmly adhering to the expedient of *sāma* or conciliation. For purposes of success *sāma* (of the four *upāyas* or expedients) is always commended by the wise.

दण्डपाणिरिवेति ॥ १७।१

साम्नार्थसिद्धय इति ॥ १७।२

क्षीराब्धिः[21b] मथितः साम्ना फलायामरदानवैः ।
निजघ्निरे धार्तराष्ट्रान्[22] सामप्रद्वेषिणोऽचिरात् ॥ १८ ।

[21b] क्षीरोदो [22] धार्तराष्ट्राः

18. It is by the policy of conciliation that the Gods and the Demons succeeded in churning the ocean, whereas the sons of Dhṛtarāṣṭra, averse to conciliation, met with their doom (at the hands of the Pāṇḍavas) in no time.

अत्रैव दृष्टान्तमभिधातुमाह--क्षीराब्धीति (क्षीरोद इत्यादि)। दुग्धोदधिरमरदानवैः साम्ना प्रियवचनैः स्तोत्रपुरस्सरं प्रसाद्य पश्चान्मथितं फलार्थम्। अमृतादिरत्र फलं तदर्थमिति। निजघ्निरे धार्तराष्ट्राः कौरवाः सामप्रद्वेषिण इति। निजघ्निर इति विनाशमुपगता अचिरादेव ॥ १८ ॥

दारुणं विग्रहं विद्वान् दानेन प्रशमं नयेत् ।
इन्द्रोपचारे शुक्रस्य दानेन सममीयिवान्[23] ॥ १९ ।
अपराधेन दुहितुः कुपिते[24] भृगुनन्दने ।
वृषपर्वाप्रदानेन[25] दानवेन्द्रोऽभवत् सुखी ॥ २० ।
उपगम्यापि[26] दातव्यं बलिने शान्तिमिच्छता ।
समूल एव[27] गान्धार्या अप्रयच्छन् गतः क्षयम् ॥ २१ ।

---

[23] शममीयिवान्; शममेयिवान्

[24] क्रुद्धे च ।

[25] च दानेन

[26] उपच्छन्द्यापि

[27] समूलमेव गान्धारिरप्रयच्छन्

19. A wise ruler should remedy even a great calamity by means of *dāna* (gifts and/or bribery). Indra, the Lord of the Gods mitigated the imminent suffering (of the Gods) at the hands of Śukra, (the preceptor of the Demons) by gift.

20. When for the fault of the daughter (i.e., Śarmiṣṭhā) of Vṛṣaparvan, the Demon king, who insulted Devayānī, Śukra's daughter, the son of Bhṛgu (Śukra, the preceptor of the Demons), was infuriated, and the Demon king pacified him by the gift of his daughter.

21. A ruler, desirous of peace, should offer gifts, in conformity with rules therefor, to the more powerful rival. The sons of Gāndhārī (i.e., Duryodhana and others) by refusing the gift (of five villages only to the Pāṇḍavas) met with their ruin.

दारुणमिति। दारुणमप्रतिविधेयं विग्रहं विरोधं विद्वान् विजिगीषुः दानेन प्रशमं नयेत्। इन्द्रोऽपचारे शुक्रस्य—इन्द्रो देवराजः शुक्रस्यापचारे देवानामुपद्रवलक्षणे धीरैरौत्पातिकैरौपनिषदिकैर्मारणोच्चाटनविद्वेषणादिभिस्तथा मृतदैत्यसञ्जीवनादिभिश्च कृतमहापकारे सति शुक्रस्य शिष्यकचहस्तेन मृतसञ्जीवनविद्यादानं तेन करणभूतेन शममुपशममेयिवान् आगत इति दानमाहात्म्यम्॥ १९॥

तथा अपराधेनेति। अपराधेन दुःखेन। दुहितुर्दानवेन्द्रस्य वृषपर्वणः सुतायाः शर्मिष्ठाभिधानायाः कुपिते च भृगुनन्दने, वृषपर्वा दानवेन्द्रः प्रदानेन स्वदुहितुरेवाभवत्सुखी। तद्यथा—दानवानामिन्द्रः स्वामी वृषपर्वाभिधानः, तत्सुता शर्मिष्ठा, शुक्रकन्या देवयानी, तयोः कलहे शर्मिष्ठया देवयानी कोपात् कूपे पातितेति श्रुत्वा शुक्रेण मन्त्रित्वं परित्यक्तमिति स्वसुतां शर्मिष्ठां सहस्रकर्मिकायुक्तां देवयान्यै दासीं दत्त्वा अनुनयं प्राहित इति॥ २०॥

उपगम्येति। उपगम्य छन्दानुवर्तनमनेकप्रकारमपि कृत्वा दातव्यं बलिने शक्तित्रयसम्पन्नाय शान्तिमिच्छता आत्मनोऽभ्युदयमिच्छता। समूल एव सकलसहित एव दुर्योधनो गान्धार्योऽपत्यम् अप्रयच्छन् पञ्चापि ग्रामान् क्षयं गतः। तस्माद्दानादात्मा रक्षणीय इति भावः॥ २१॥

किञ्चित् प्रयच्छन् भूयस्या तृष्णया परिलोभयन्[28]।
भिन्द्याच्चतुर्विधान् भेदान्[29] प्रविश्योभयवेतनैः॥ २२॥

---

[28] विप्रलोभयन्; तृष्णयातिप्रलोभयन्

[29] भेद्यान्

22. The four types of alienable people (*bhedyān*), excited, avaricious, suffering from fear, and formerly insulted [as enumerated in the two following *ślokas*] should be won over and alienated by small gifts, and alluring them for more in future on the secret report of double agents (*ubhayavetana*).

भेदप्रयोगमभिधातुमाह—किञ्चिदिति। किञ्चित् प्रयच्छन्नपि किञ्चित्स्वल्पमधिकदानेन शत्रुवृद्धिर्मा भवत्विति भूयस्या तृष्णया विप्रलोभयन् बहुतरामाशां जनयन् भिन्द्याद्विश्लेषयेत् [10]चतुर्विधान् चतुः प्रकारान् भेद्यान् कृत्यपक्षिकान्। तथा च कौटिल्यः—"क्रुद्धलुब्धभीतापमानिताः परेषां कृत्या" इति। कैः करणभूतैरित्याह—उभयवेतनैर्विजिगीषौ यातव्ये च वेतनं जीविका येषां ते। प्रविश्यान्तरात्तां गत्वेति॥ २२॥

[10] येत् धावितवान् चतुर्विधान् येन्वातवान्।

अलब्धस्वपणो[30] लुब्धो मानी चाथावमानितः[31] ।
क्रुद्धश्च कोपितो [32]यस्मात् तथातीतोऽवमाषितः[33] ॥ २३ ।
यथाभिलषितैः कामैर्भिन्द्यादेतांश्चतुर्विधान् ।
परपक्षे स्वपक्षे च यथावत् प्रशमं नयेत् ॥ २४ ।

[30] अलब्धवेतनो [31] चाप्यवमानितः
[32] कोपितोऽकस्मात् [33] तथा भीतश्च भीषितः ; तथा भीरुश्च

23-24. The greedy, who have been deprived of their dues, the honourable persons who have been dishonoured, the excited persons who have been irritated without any reason, and those who have been abused in the past or are fearful (cowardly) or frightened (*bhītaśca bhīṣitaḥ*), these four types of people who are alienated, whether of the enemy camp or of one's own camp, such people must be appeased (and won over) by fulfilment of their desires.

एतदेव व्याख्यातुमाह—अलब्धवेतन इत्यादि । विशिष्टदानं वेतनम् । अलब्धवेतनो भेद्यो भवति । मानी चाप्यवमानितस्तथा । क्रुद्धश्च कोपितोऽकस्मात् कारणं विनैव भेद्यो भवति । भीतश्च भीषितो भेद्यो भवति ॥ २३ ॥

यथाभिलषितैः कामैरिति । येषां यः कामः ॥ २४ ॥

भेदं कुर्वीत यत्नेन मन्त्र्यमात्यपुरोधसाम् ।
तेषु भिन्नेषु भेदो[34] हि युवराजे तथोर्जिते ॥ २५ ।
अमात्यो युवराजश्च भुजावेतौ महीपतेः ।
मन्त्री नेत्रं हि [34a]भिन्नेऽस्मिन्नेकस्मिन्नपि तद्वधः ॥ २६ ।
सर्वावस्थं हि[35] मेधावी तत्कुलीनं विकारयेत् ।
विकृतस्तु[36] कुलीनस्तु स्वयोनिं ग्रसतेऽग्निवत् ॥ २७ ।
तत्कुलीनेन तुल्यस्तु पुमानभ्यन्तरोषितः ।
तस्मादेतौ परं[37] भिन्द्याच्छमं चात्मनि सन्धयेत्[38] ॥ २८ ।

[34] भिन्नं हि [34a] हि तद्भिन्न एतस्मिन्नपि तद्वधः ; एकस्मिन्नपि
[35] तु [36] विकृतस्तत्कुलीनस्तु
[37] परे [38] सन्नयेत्

25. Efforts should be directed to alienate ministers, counsellors and priests (of the enemy camp or of one's own), for, if they are alienated, even the Crown Prince, endowed with power and influence, is also alienated.

26. The (Chief) minister and the Crown Prince are the arms of the ruler (i.e., executive organs) and the counsellors are his eyes. Their

alienation (even of any one of them) amounts to death (or veritable cause for destruction) to the ruler.

27. A wise ruler should attempt to seduce alienated people of all ranks, particularly one belonging to the royal family (relatives), because alienation of any one of the same family leads to ruination of the whole family as if it is caught by fire.

28. People who nurture anger at heart (against the ruler) are also as dangerous as the alienated relatives. Hence such elements belonging to the enemy camp should be won over and of one's own initiative should be appeased (by conciliation).

भेदमित्यादि। भेदं कुर्वीत यत्नेन मन्त्र्यमात्यपुरोधसां यातव्यसम्बन्धिताम्। तेषु भिन्नेषु भिन्नं हि सकलं भवतीति वाक्यशेषः। तथा युवराजे यातव्य सम्बन्धिनि। ऊर्जिते बलवति भिन्ने भिन्नं भवति ॥ २५ ॥

प्रधानभेदेन प्रयोजनमभिधातुमाह—अमात्य इत्यादि। अमात्यो मुख्यमन्त्री। युवराजो यौवराज्येऽभिषिक्तः कुमारः। भुजावेतौ सर्वस्यापि महीपतेः[20]। मन्त्री नेत्रं हि। तदिति तेषां भिन्न एकस्मिन्नपि तद्वध इति महीभुजो वधो विनाशः, मन्त्र्यादि प्रतिबद्धत्वादखिल-परिजनस्येति ॥ २६ ॥

अप्रधानेऽपि यत्र भेदे[21] साफल्यमभिधातुमाह—सर्वावस्थमिति। सर्वा अविनीतत्व व्यसनित्व भीरुत्वादिका अवस्थाः परिणता यस्यासौ सर्वावस्थितदशामयमपि मेधावी विजिगीषुस्तत्कुलीनं यातव्यकुलभवं दायादमित्यर्थः। विकारयेत् भेदपूर्वकं विग्रहे प्रवर्तयेत्। विकृतो गृहीतविकारस्तत्-कुलीनस्तु स्वयोनिं ग्रसतेऽग्निवत्। यथा अग्निः काष्ठादुत्पन्नः काष्ठमेव दहति तथाऽसौ यत्र कुले समुत्पन्नस्तदेव दहति ॥ २७ ॥

तत्कुलीनेनेत्यादि। यथा तत्कुलीनो विकारं नीतोऽग्निरिव स्वकुलमेव दहति तेन समानः पुमानिति पुरुषगुणयुक्तः शौर्यातिशयसम्पन्नः परशुरामसमानोभ्यन्तरोषितः[22]। तस्मादेतौ तत्-कुलीनातिकुद्धमहापुरुषौ परे यातव्ये भिन्यात् तथा—आत्मनि च कुद्धं कुलीनं अतिकुद्धं च महापुरुषं शमं ग्राहयेत् यथा परप्रयुक्तो भेदो न भवतीति ॥ २८ ॥

[20] महीयसः [21] यात्राभेदे

[22] समानोऽत्यन्तरोषी तत्संज्ञः

तत्रोपजापः कर्तव्यो यः कोपानुग्रहक्षमः।
स कल्याणः शठो वेति परीक्ष्यः सूक्ष्मया धिया ॥ २९ ॥
कल्याणस्तु यथाशक्ति करोति सफलं वचः।
शठः पक्षौ वलयति[23] ह्यवयार्थोपलिप्सया ॥ ३० ॥

[23] ह्यवप्यर्थ

29. Secret overtures should be made to win over such people who are capable of doing harm or showing favours, but of course only after

an intelligent review or scrutiny of their antecedents, that is, whether they are sincere or dishonest (by nature).

30. One who is sincere keeps his promises as far as practicable with all his powers, but the dishonest person deceives both the parties out of his own covetuousness.

एतदेव समर्थयन्नाह—तत्रोपजाप इत्यादि। तत्र पुरुषैः स्वकीयै[23]र्भेदार्थमुपजाप, उप समीपं गत्वा जापः सन्देहालापादीनां जपनं व्यक्तवचनं कर्तव्यम्। यः कोपानुग्रहक्षमः। यदीयः कोपः पर परिग्रहे[24] विनाशकरः। अनुग्रहः स्वपरिग्रहेऽभ्युदयकरः। स विचार्यमाणः पूर्वोक्तमुख्यातिवल्लभादीनामेव सम्भवति। सः (यः) इदानीं परमुख्यादिरु[25] पजापात् भिन्न आयातः परीक्षणीयः सूक्ष्मयातिनिगूढया धिया प्रज्ञया, सर्वस्याऽबलीयसप्रवेशादित्यर्थः। कल्याणः शठो वेति, किमयं कल्याणः शुद्धाशयो वा अव्यभिचारी उत शठो वञ्चकोऽतिसन्धायक इति परीक्ष्यः प्रत्यक्षपरोक्षागमप्रमाणैः सूक्ष्मयातिनिर्मल्याह्लादनक्षमया धिया प्रज्ञया ॥ २९ ॥

[23] पुरुषैः परकीयैः ; पुरुषे स्वकीयैः

[24] स्वपरिग्रहे [25] मुख्यादिभिसप

कल्याणशठयोः स्वरूपमभिधातुमाह—कल्याणस्त्विति। कल्याणकारकत्वात् कल्याण उच्यते। यथाशक्ति शपथनतिक्रमेण स्वामिनः सफलं वचः अभीष्टं सम्पादयति इत्यर्थः। शठोऽतिसन्धायकः पक्षौ विजिगीषुपक्ष तया व्यक्तं चालयति विश्लेषयति द्वावपि, अर्थोपलिप्सया लुब्धत्वाद् यत्रैवार्थलिप्सां करोति तत्कार्यकारी भूत्वा परपक्षं भेदयतीत्यर्थः ॥ ३० ॥

[40]पूर्वसेनापतिर्नीचः कालयापनमाश्रितः।
मिथ्याभिशस्तः श्रीकाम आहूयाप्रतिमानितः ॥ ३१ ।
राजद्वेषी तत्कुलीनो दूष्यते[41] यश्च भूभुजा।
आहितव्यवसायश्च[42] तथा करनिवेशितः[43] ॥ ३२ ।
रणप्रियः साहसिक आत्मसम्भावितस्तथा।
विच्छिन्नधर्मकामार्थः क्रुद्धो मानी विमानितः ॥ ३३ ।
भीतः स्वदोषाभित्रस्तः[44] कृतवैरोऽभिशान्त्वितः[45]।
अतुल्येन सहाशक्त[46]स्तुल्यमानो निराकृतः ॥ ३४ ।

---

[40] पूर्वं सम्भावितोऽनीचः ; पूर्वसँल्लापितो

[41] द्विष्यते [42] व्यवहारश्च

[43] कारनिवेशितः

[44] स्वदोषवित्रस्त

[45] वैरोऽभिसान्तितः ; रोऽतिसान्त्वितः ; रोऽतिशङ्कितः

[46] सहासक्तस्तुल्यमानानिराकृतः ; महाशक्त ; सहादिष्टस्तुल्यमानो

अकारणान्निरुद्धश्च[47] कारणाच्च विशोषितः[48] ।
अकारणात् परित्यक्तः[49] पूजार्होऽप्रतिपूजितः[50] ॥ ३५ ।
हृतद्रव्यकलत्रश्च महाभोगाभिकाङ्क्षितः ।
परिक्षीणो बहिर्बन्धुर्बहिर्द्रव्यो बहिस्कृतः ॥ ३६ ।
इति भेद्याः समाख्याता भिन्द्यादेतान् परस्थितान्[51] ।
आगतान् पूजयेत् कामैर्निजांश्च परिसाधयेत्[52] ॥ ३७ ।

---

[47] अकारणनिरुद्धश्च ; अकारणाद्विरुद्धश्च

[48] विशोषतः [49] परित्यक्तः

[50] पूजार्होऽप्रतिमानितः

[51] बहिःस्थितान् ; परे स्थितान्

[52] प्रशमं नयेत् ; परिसान्त्वयेत्

31. (Alienable parties, *bhedyāh*, are enumerated as follows) : An army chief removed from service, one to whom earlier assurance has not been honoured, a lowly or dishonest person or even an honest person (*anīca*) who has been made to wait indefinitely without any assignment (earlier assured), one who has been falsely prosecuted, one disappointed in achieving propsperity (with the king's promised aid), and one who had been invited and later neglected.

32. One against whom the king is spiteful (i.e., who is in his bad books) or one of royal family aspiring for the throne and as such is jealous and hostile to the king (*rājadveṣī tatkulīna*). one who is involved in diverse trades (and accumulating wealth), and who is under penal impositions (*karaniveśita*) or an employee under penal posting in mines etc., (*ākaraniveśita* as indicated in the commentary).

33. One who loves war for war's sake (*raṇapriya*), one who is of dare-devil nature, one who is self-conceited, one who is frustrated in gaining either of the three ends of life, one who is angry or dissatisfied (for some reason or other) and a respectable person suffering from show of disrespect.

34. A coward, one who is apprehensive (of punishment) for his own faults or offences, one who is afraid of reactions of created enemies (hostile actions in return of his earlier hostilities), one who is made to work in the company of others of unequal rank (i.e., lowly), and who is removed from the company of his equals (i.e., suffering from a feeling of frustration in both cases).

35. One who is confined without any cause or even with a cause confined more rigorously (than he deserves), or dismissed without any cause, and one who is honourable but neglected.

36. One whose wife and property have been usurped (or confiscated), one who hankers after great enjoyment (i.e., highly ambitious), one who is much reduced in power and resources (i.e., almost insolvent, *parikṣīṇa*), one who has friends and properties outside (the dominion) and one who has been banished.

37. Such persons are known to be alienable parties (*bhedyāh*), and should be alienated from the enemy camp, and when they come over should be honoured by fulfilment of their desires, but men of such character in one's own camp should be appeased by conciliatory measures.

भेदो येष्वेव प्रयोक्तव्यस्तानभिधातुमाह—पूर्वेति। पूर्वसेनापतिः भूतपूर्वसैन्याध्यक्षः, पूर्वं प्रागेव सम्भाषितो "दास्यामीति" अभिहितः पश्चात् काल्यापनं कालातिनयनमास्थितः। कालेऽतीव क्षीयमाणे नीचः कुप्यति। अनीचस्तु स्वामिविषये कथञ्चनापि कोपं न करोति। विवेकी चेदात्मन एव कुप्यति मयार्थप्रापकं पुण्यं न कृतमिति। तथा मिथ्याभिशस्तो दोषं विनैव पातकीति स्थापितदोषः। श्रीकाम इति लक्ष्मीकामोऽपि सेवकः काल्यापनमाश्रित इति वर्तते। असावपि निराशत्वाद्भेद्यो भवति। आहूयाप्रतिमानित इति। महतादरेणाहूयाप्रतिमानितोऽवज्ञया दृष्टः, पूजा न कृतेति भेद्यो भवति ॥ ३१ ॥

राजद्वेषीत्यादि। राजद्वेषी तथा राजा सर्वदा द्विष्यते येन स विरक्तत्वाद् भेद्यो भवति। तत्कुलीनो राज्ञोऽयमिति (कुलं च धन्यसौ, कुलेन मान्यसौ) दायादत्वात् भेद्य एव। दूष्यते (द्विष्यते) यश्च भूभुजेति स्वामिना यः सर्वदा द्विष्यते। स वृत्तेर्निराशत्वाद् भेद्यो भवति। आहितव्यवसायो भेद्यो भवति। तथाऽकर निवेशितः आकरस्य हिरण्याकरस्य आदायापि[26] यः आकरपः क्रियते स भेद्यो भवति ॥ ३२ ॥

रणप्रिय इति। रणप्रिय इति स त्यक्तात्मत्वात् भोगप्रियो भवति भोगसम्पादकधनलाभदर्शनेन भेद्यो भवति। साहसिक इति सहो बलं तेन चरतीति असावपि भोगप्रिय इति तथैव भेद्यः सम्भवति। आत्मसम्भावित इति आत्मानमात्मनैव सम्भावयति विद्याशौर्यादिभिरन्यो मत्समानो नास्तीति भरणेनातुष्टो भेद्यो भवति। विच्छिन्नधर्मकामार्थः धर्मः अर्थः कामो वा विच्छिन्नो यस्य राज्ञा स तदुद्वेगाद् भेद्य भवतीति। मानी विमानित इति मानार्थयोग्यो[27] विमानितः क्रियतेऽसौ भेद्यो भवति ॥ ३३ ॥

भीत इति। भीत स्वदोषवित्रस्तो भेद्यो भवति। कृतवैरोऽभिसान्त्वित इति पूर्वं कृतं वैरं विरोधो येन पश्चादभिसान्त्वितः कृतसख्यः स हि सामर्षशेषहृदयो भेद्यो भवति। अतुल्येन सह आदिष्टः कर्मणि नियुक्तः उद्वेजनाद् भेद्यो भवति। [28]तुल्यमानाभिराकृत इति तुल्य[29]मानाभिराकृतो भेद्य एव ॥ ३४ ॥

अकारणादिति। अकारणाभिरुद्धो दोषं विना कृतनिरोधः। कारणाच्च विशेषतः (कृतनिरोधः) भेद्यो भवति। अकारणात्परिक्त इति भाविनि भूते उपचारो द्रष्टव्यः। अन्यथा[30] भिन्नस्य भेद्यत्वं न घटते। पूजार्होऽप्रतिपूजितो[31] भेद्यो भवति ॥ ३५ ॥

हृतद्रव्यकलत्र इति। हृतद्रव्यकलत्रश्चेति। महाभोगाभिकाङ्क्षित[32] इति महाजीविकाकाङ्क्षी

च भेद्यः। परिक्षीणः निःसत्त्वो भेद्यो भवति। बहिर्बन्धुर्बहिर्द्रव्यः बहिष्कृतः इति त्रितयस्यापि बहिर्भावात् भेद्या भवन्त्येते ॥ ३६ ॥

इतीति। इत्येते भेद्याः समाख्याता आचार्यैः। भिन्द्यादेनान् परे यातव्ये स्थितान् उपजाप-क्रियया। आगतांश्च परकीयान् पूजयेत् ये यस्य कामास्तैः पूजयेत्। निजांश्च भेद्यान् प्रशमं नयेत् क्रोधादीनामपनयनेन ॥ ३७ ॥

[26] हिरण्यस्याकरस्य आदावपि ; आकरस्य हिरण्यस्य आदापाभि यः

[27] मानार्थी यो विमानिक्रियतऽसंभेद्य

[28] अल्प मानान्निराकृत इति अल्पपूजः सर्वदा सौ एव हृतत्वातनिराकृतो भेद्य एव

[29] तुल्यं महाजानिराकृततो निराकृतो भेद्य एव

[30] मिथ्या [31] पूजार्होऽप्रतिमानितो

[32] काकूक्षिक

[33]समतृष्णानुसन्धानं समन्युभयदर्शनम्[34] ।
[35]प्रधानं दानमानञ्च[35a] भेदोपायाः प्रकीर्तिताः ॥ ३८ ।
भेदं कुर्वीत मतिमान् विगृहीतो बलीयसा ।
षण्डामर्कौ सुरैर्भित्त्वा[36] बलवन्तौ पराजितौ ॥ ३९ ।
दण्डेन हि समाहन्याद् भित्त्वा तैः संहतं बलम् ।
भिन्नं हि तत् काष्ठमिव तृणदग्ध[37] विशीर्यते ॥ ४० ।

---

[33] सामतृष्णा [34] नमन्युप्रभयदर्शनम्

[35] प्रकामं दानमानञ्च ; [35a] दानं मानं च ; दानमानौ च

[36] सुरैर्हित्वा [37] घुणजग्धं

38. Striving for identical gains (*samatṛṣṇānusandhānaṁ*) and creating excessive terror (by show of one's coercive power) are the forms of alienation (*bheda*), but the most effective forms are offering of gifts (and bribes) and show of honour.

39. Attacked by a powerful invader, an intelligent ruler should sow dissension in the enemy camp. The powerful demons Saṇḍa and Amarka had been disunited by the gods (by the policy of *bheda*) and were ultimately defeated by them. (The case of demon brothers Sunda and Upasunda is also an illustration of the application of *bheda* by the gods).

40. Creating disunion in the consolidated ranks of the enemy forces (by the policy of *bheda*), the ruler should fall upon and annihilate them. (In such a condition) it breaks down like a wooden block fired with dried grass (*tṛṇadadhnaṁ*) or one infested with white ants (*ghuṇajagdhaṁ*).

भेदोपायानमभिधातुमाह—समतृष्णा इति। सामेति पाठे—साम कृतलक्षणं, भेदोपायो भवति। प्रियंवदेऽनुरागो भवतीति। तृष्णानुसन्धानमिति। यस्य यत्राभिकाङ्क्षाभावा[38]

प्रदर्शनात्तृष्णा तस्या अनुसन्धानमविच्छेदो भेदोपायो भवति। अत्युग्रभयदर्शनमपि भेदोपाय इति। तथा च कौटिल्यः—"शङ्काजननमभिभर्त्सनं च भेद" इति। प्रधानं दानं मानं चेति। भेदोपायानां मध्ये दानमाने प्रधानभूते। भेदोपायाः प्रकीर्तिता। एभिरुपायैर्भेदः सम्पद्यत इति प्रतीतम्॥ ३८॥

भेदविषयमभिधातुमाह—भेदमिति। मतिमान् विजिगीषुः। बलीयसा अत्युपचितशक्तिना विगृहीतो भेदं कुर्वीत। तथा च षण्डामर्कौ सुरैर्भित्त्वा विभिन्नौ कृत्वा बलवन्तौ पराजितौ। तद्यथा—महर्षिपुत्रौ षण्डामर्काभिधानौ शुक्रशिष्यावौशनसे अर्थशास्त्रे परं प्रावीण्यं गतौ। औपनिषदिकाभिस्तम्भनमोहनमारणादिभिर्देवोपद्रवकारकौ। तद्बलाद् दैत्यैः सर्वदा शक्रः स्थानभ्रष्टः क्रियते। ततश्च बृहस्पत्युपदेशादिन्द्रेण यज्ञांशदानात्तौ भिन्नौ। तद्दानेनाद्यापि यज्ञे तौ भागं लभेते। ततश्च ताभ्यां परित्यक्ता दैत्याः शक्रेण सुखेनैव जिताः। इति भेदसामर्थ्यम्॥ ३९॥

भेदस्य फलमभिधातुमाह—दण्डेनेति। अरेः संहतं बलं भित्त्वा भेदोपायैर्भिन्नं कृत्वा दण्डेन एव हि समाहन्यात्। किमर्थमित्याह भिन्नं सत् पश्चाद्धतं घुणजग्धं काष्ठमिव विशीर्यते खण्डशो भवतीति॥ ४०॥

[55] लाघवस्तस्मिन्नाशा ; लाघवस्तदाशा

उत्साहदेशकालैस्तु संयुक्तः सुसहायवान्।
युधिष्ठिर इवात्यर्थं दण्डेनास्तन्नयेदरीन्॥ ४१।
आत्मनः शक्तिमुद्वीक्ष्य दण्डमभ्यधिकं[58] नयेत्।
एकाकी सत्त्वसम्पन्नो[59] रामः क्षत्रं[60] पुराऽवधीत्॥ ४२।

---

[58] दण्डमभ्यधिके ; दण्डमप्यधिके

[59] शक्तिसम्पन्नो

[60] क्षात्रं

41. *Vijigīṣu,* equipped with excellent energy and power, taking advantage of favourable time and place and supported in his venture by strong allies, as had been the case with Yudhiṣṭhira, should subjugate his enemies by application of *daṇḍa* (military power).

42. Reviewing one's own power (and directing it properly), one can subjugate his enemies even if they are more powerful and many in number, just as Rāma (Paraśurāma) of redoubtable power killed the kṣatriyas (twenty one times).

दण्डप्रयोगकालमभिधातुमाह—उत्साहेति। उत्साहः कृतलक्षणः। देशो युद्धयानयोरनुकूलः। कालस्तथैवानुकूलः। तैः संयुक्तः। सुसहायवान् वासुदेवादिसहाययुक्तो युधिष्ठिर इव विजिगीषुर्भवेत् तदा दण्डेनास्तं नयेदरीन् नान्यथेति॥ ४१॥

आत्मन इति। शक्तिमुत्साहाभिधानामुद्वीक्ष्य निरूप्य दण्डमप्यधिके नयेत्। एकाकी प्रभुशक्तिरहितः उत्साहशक्तिसम्पन्नो रामः परशुरामः क्षत्रियकुलं एकविंशतिधावधीत्॥ ४२॥

अलसं विक्रमे [61]श्रान्तं विहितोपाय[62] चेष्टितम् ।
क्षयव्ययप्रसारैस्तु[63] सन्तप्तं[64] परिविप्लुतम् ॥ ४३ ।
भीतं[65] मूर्खं स्त्रियं बालं धार्मिकं दुर्जनं पशुम् ।
मैत्रीप्रधानं कल्याणबुद्धिं शान्त्वेन[66] साधयेत् ॥ ४४ ।

---

[61] विक्रमश्रान्तं [62] विहतोपाय
[63] प्रवासैश्च [64] श्रमेण विपरिप्लुतम् ; सन्तप्तं परिपीडितम् ; श्रमेणापि परि
[65] भीरुं [66] सान्त्वेन

43-44. (The policy of *Säma* conciliation should be adopted in respect of following types of rivals). One who lacks initiative (idler), one who is fatigued (in exerting his physical or martial power), one who is frustrated for failure of all his efforts, one who has suffered from extensive losses and damages resulting from his banishment and one who is dejected having been turned away defeated (from the field of battle), a coward, an impolitic fellow, a woman or a youngster, an excessively pious person (hence averse to warfare), a wicked or dishonest person or one of beastly nature, one who seeks amity with all or strives for every body's welfare (irrespective of being a friend or foe, hence not inclined to open hostility). Such people deserve to be roped in by methods of *sāma*.

इदानीं विषयविभागेनोपायानां प्रयोगमभिधातुं सामप्रयोगविषयानेव तावदाह—अलसमिति। अलसं निरुत्साहम्। विक्रमे श्रान्तं युद्धादिषु निर्विण्णम्। विहतोपायचेष्टितं उपायाः सामादयः चेष्टितं शरीर व्यापारः, तद्विहतं[84] यस्य तम्। क्षयव्ययप्रवासैश्च सन्तप्तमिति प्रतीतम्। परिविप्लुतमिति संग्रामे दत्तभङ्गम् ॥ ४३ ॥

भीतमिति। भीतं प्रतापादेव त्रस्तम्। मूर्खमविज्ञातनीतिशास्त्रम्। स्त्रियं बालमिति प्रतीतम्। धार्मिकं प्राणिहिंसाभीतम्। दुर्जनं दौष्ट्ययुक्तम्। पशुं पशुकल्पम्। मैत्रीप्रधानं स्वभावत एवाकृतवैरम्। कल्याणबुद्धिं सर्वस्याहितबुद्धिरहितम्। एतान् सर्वान् सान्त्वेन कृतलक्षणेन सामविशेषेण साधयेत, विनोपक्षयं सुखसाध्यत्वात्तेषामिति ॥ ४४ ॥

[84] तद्विहितं

लुब्धं क्षीणञ्च दानेन सत्कृत्य[67] वशमानयेत् ।
अन्योन्यशङ्कयोद्विग्नान्[68] दुष्टान् [69]दण्डस्य कारणात् ॥ ४५ ।
पुत्रान् भ्रातॄंश्च बन्धूंश्च सामार्थ्येन[70] च साधयेत् ।
एतैः कः सदृशो लोके दूरं रिपुकृतैरपि[71] ॥ ४६ ।

---

[67] सत्कृत्यैव समानयेत् ; संहतान् वशमानयेत्
[68] शङ्कयाभिन्नान् [69] दुष्टान् वै दण्डदर्शनात्
[70] सामार्थेन च ; तु [71] विकृतैरपि

सामैतेषु प्रयुञ्जीत दैवात् प्रस्खलितेष्वपि।
[72]दुष्करं यान्ति विकृति स्पर्द्धाशीलनिबन्धनात् ॥ ४७ ।

[72] दुष्करां यान्ति विकृतिमार्याः शीलनिबन्धनाः

45. Those who are greedy and/or indigent should be brought under control by favouring them with gifts (*dāna*), and those who are vicious should be alienated by rousing in them mutual fear of (secret) hostility, or (if necessary) by demonstration of *daṇḍa* (coercive power).

46. Sons, brothers and friends should always be appeased as far as possible (by conciliation and gifts). Because who else are equal to them (in importance and influence) when alienated or disaffected at the instance of the enemy ?

47. If by chance these people (sons and others, or some of them) fall off from their standard (of allegiance and trustworthiness), they should be calmed down by conciliation. Otherwise they may get uncontrollably defected out of their insolence and pride.

दानसाध्यानभिधातुमाह—लुब्धं क्षीणं च इति प्रतीतम्। भेदसाध्यान् भिन्द्यात् कथमित्याह—अन्योन्यशङ्कया [85]दुष्टान् दूष्यधर्मव्यवस्थितान् यातव्यकर्मण्यवस्थितान्। गूढप्रणिधिनान्योन्यं शङ्का समुत्पाद्यते। ततश्च विश्लिष्य साध्या भवन्ति। तथा दण्डस्य बधादेर्दर्शनाद् दुष्टान् भिन्द्यात् "एभ्यो भिन्ना भवत, अन्यथा मारयामीति"; भयादपि भेदो भवति। तथा च—"शङ्काजननमभिमत्सनं च भेद" इति कौटिल्यः ॥ ४५ ॥

एकोपायसाध्यानभिधाय द्वियोगानाह—पुत्रानित्यादि। पुत्रान् भ्रातृन् बन्धूंश्च सुश्लिष्यानित्यवेक्ष्य सान्त्रार्थेन साधयेदिति सामदानप्रयोगेण। कस्मादुपायद्वयप्रयोगो, मा भेदो दण्डो वापीत्याह—एतैस्तु पुत्रादिभिः कः सदृशो लोके दूरमत्यर्थं विप्रकृतैर्विरुद्धैरपि ॥ ४६ ॥

सामेति। एतेषु सामैव प्रयुञ्जीतेति भावः। दैवाद्दैववशात्प्रस्खलितेष्वपि। कुत इति? दुष्करां यान्ति विकृतिमार्याः शीलनिबन्धना इति प्रतीतम् ॥ ४७ ॥

[85] दुष्टानां सख्यधर्मव्यवस्थितानां यातव्यकर्मण्यवस्थितानां गूढप्रणिधीनां अन्योन्यशङ्का समुद्यते।

कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता।
अद्रोह[73] इति येष्वेतदाचार्यास्तान् प्रचक्षते ॥ ४८ ।

[73] अलोभ इति येष्वेते तानार्यान् परिचक्षते; आर्यास्तांस्तु प्रचक्षते

48. Those in whom are observed the qualities of nobility, good conduct, kindness, charity, piety, truthfulness, gratitude, and obedience (*adroha*) or absence of lust (*alobha*), may be taken to be of *Ārya* standard (or men of culture).

आर्याणां लक्षणमभिधातुमाह—कुलमित्यादि। प्रतीतम् ॥ ४८ ॥

पौर[74] जानपदांश्चैव दण्डमुख्यांश्च[75] दण्डवित् ।
साधयेत् दानभेदाभ्यां [76]दानभेदविचक्षणः ॥ ४९ ।
अपराद्धांस्तु सुस्निग्धान् स्नेहोक्त्या मानदानतः ।
([77]अपरुद्धांस्तत्कुलीनान् सामन्तांश्च विचक्षणः ।)*
साधयेद् भेददण्डाभ्यां यथायोगेन चापरान् ॥ ५० ।

[74] पौरान् [75] मुख्यांश्च

[76] यथायोगेन चापरान्

[77] अपरुद्धांस्तु

* a variant of l. 1 v. 50.

49. A ruler, conversant with the laws (*dandavit*) should adopt the policies of gifts and dissension (*dāna* and *bheda*) with due process, in regulating the conduct of the citizens and country people, as well as of the army chiefs and others.

50. Good natured persons committing offences (under force of circumstances) should be brought round by show of honour, and gifts blended with affectionate words. [Recalcitrant nobles and feudatory chiefs] and such others should be controlled by means of dissension or by punishment (*bheda* and *daṇḍa*), as deemed necessary, of course with due process.

पौरजानपदामित्यादि । इति प्रतीतम् ॥ ४९ ॥

अपराद्धा (अपरुद्धा)-नित्यादि । अपरुद्धाः पुत्रभ्रात्रादयः परिवर्जितप्राया ये तान्, तत्-कुलीनान् राज्ञो यत्कुलं तद्वान् ये पुत्रभ्रात्रादिव्यतिरेकेणेत्येव दायादात्मनावस्थितास्तान, सामन्तास्तस्यानन्तरास्तान्, आटविका अटवीस्वामिनस्तान् साधयेद् भेददण्डाभ्यां तद्योग्यत्वात्तेषाम् । यथायोगेन चापरानित्युक्तव्यतिरिक्तान् मध्यमोदासीनादीन यथा यत्रोपायो युज्यते प्रयोक्तुमेको द्वौ त्रयश्चत्वारो वा तैः साधयेदिति ॥ ५० ॥

देवताप्रतिमास्तम्भसुषिरान्तर्गतैर्नरैः[78] ।
पुमान् स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शनम्[79] ॥ ५१ ।
[80]वेतालो क्व पिशाचानां देवानाञ्च[81] सुरूपता ।
इत्यादि माया विज्ञेया मानुषी मानुषैश्चरन्[82] ॥ ५२ ।

[78] रान्तर्गता नराः ; पूजयान्तर्गतैर्नरैः

[79] दर्शनः

[80] वेतालः ; वेतालानां पिशाचानां ; वेतालोल्का पिशाचानां

[81] देवानाञ्च सरूपता ; शिवानां च सरूपता ; शिवान्ताञ्च सुरूपता

[82] मानुषेश्चरैः

कामतो रूपधारित्वं शस्त्रास्त्राश्माम्बु[83] वर्षणम् ।
[84]"तमोनिलोनता चैव इति माया ह्यमानुषी[85] ॥ ५३ ।
जघान कीचकं भीम आश्रितः स्त्रीसरूपताम् ।
चिरं प्रच्छन्नरूपोऽभूद् दिव्यया मायया नलः ॥ ५४ ।

---

[83] शस्त्राग्न्यश्माम्बु

[84] तमोऽनिलोऽचलो मेघा (मेघ) इति [85] मायाप्यमानुषी ; च मानुषी

51-52. *Māyā* or deceitful tactics include hiding within images of deities, or within hollow pillars (within the palace) (in order to fall upon the enemy or a suspect unawares), a man disguised under the dress of a woman (to fall upon an enemy or an offender within the harem), and assuming under the cover of night strange and terrible forms of ghosts and demons as well as of gods (to strike terror in the hearts of hostile persons). Such *māyā* tactics are adopted by men in the interest of the ruler.

53. Divine or superhuman *māyā* (under the influence of *mantra* or magical rites) includes, capacity to take any appearance or form at will, to cause artificial shower of arms and weapons or of fire, stone or water, and to create (hallucination of) darkness, storm, hills or clouds.

54. Bhīma (the Pāṇḍava) disguised as a woman (Draupadī) killed the lustful Kīcaka. (It is a form of human *māyā*). King Nala under the influence of divine *māyā* remained invisible for a pretty long time (i.e., till he regained his lost kingdom as well as the hands of Damayantī).

पूर्वसिद्धोपायचतुष्टयप्रयोगमभिधाय स्वयम्परिकल्पितोपायानमभिधातुं मानुषीं मायामाह—देवतेत्यादि। देवताप्रतिमा काष्ठपाषाणादिनिर्मिता। स्तम्भः प्रासादादिषु। सुषिराणि कार्यार्थमेव कारितानि। तदन्तर्गता नरा मानुषी माया। तयाऽबलीयस्त्वाज्जिगीषुर्बलवन्तमभियोक्तारं हन्यात्। तथा च कौटिल्यः आबलीयसाधिकरणेः—"एवं गृहीतदुर्गो वा प्राश्यप्राशं चैत्यमुपस्थाप्य दैवतप्रतिमाच्छिद्रं प्रविश्यासीत। गूढभित्तिं वा दैवतप्रतिमायुक्तं भूमिगृहम्। विस्मृते सुरङ्गया रात्रौ राजावासमनुप्रविश्य सुप्तममित्रं हन्यात्" इत्यादि (कौ. अर्थ १२।५।४३-४४)। मानुषी माया अस्योपायस्य फलम्। तथा पुमान् स्त्रीवस्त्रसंवीत इति अन्तःपुरस्त्रोभिः सहस्त्रीवेषः प्रविश्य तथैव हन्यात् ॥ ५१ ॥

तथा निशि चाद्भुतदर्शन इत्याह—वेताल इत्यादि। वेतालोल्कापिशाचानां शिवानां च सरूपता दुर्गलम्भोपाय इति मानुषी माया मानुषेश्वरैर्नृपतिभिः विज्ञेया। परातिसन्धानार्थमिति वाक्यशेषः ॥ ५२ ॥

दैवीमपि मायामभिधातुमाह—कामत इति। कामत इच्छातो रूपधारित्वं, यदेवेच्छति तदेव रूपं धत्त इति। तथा शस्त्रवर्षणमग्निवर्षणमश्मवर्षणमम्बुवर्षणं मन्त्रादिप्रभावात्। तमोऽन्धकारो वासरेऽपि। अनिलो वायुः। अचलः पर्वतः। मेघ इत्येषां च दर्शनमिति माया ह्यमानुषी दैवीत्यर्थः ॥ ५३ ॥

मायोपायं दर्शयन्नाह—अधानेति। अत्रेतिवृत्तम्-परिवर्तितरूपा विराटगृहे पाण्डवा द्रौपदी-सहिताः स्थिताः। सैरन्ध्रीरूपा द्रौपदी बलात्कीचकेनाभिलषिता। तथा चोक्तम्—सङ्गीतकशालायां त्वयागन्तव्यमिति। अस्मिन्नर्थे भीमाय कथिते भीमेन द्रौपदीवेषधारिणा कीचकभ्रातृशतमेकरात्रौ हतानीति[86] मानुषी माया। चिरं प्रच्छन्नरूपोऽभूद् दिव्यया मायया नल इत्यत्रेतिवृत्तम्—नलो राजा पृथिवीं द्यूतेन हारयित्वा देवीं दमयन्तीं वने त्यक्त्वा कर्कोटकं वने दवाद्रक्षितवान्। तेन च तुष्टेन छद्मनश्शत्रुभयाद्रूप ? परिवृत्तौ क्षत्ता सप्रतिविधानात् तयात्मानं रक्षित्वा भूयोऽपि राज्यमवाप्तवानिति दैवी माया॥ ५४॥

[86] शतमितिरात्रौ दद्यामीति मानुषी

अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणम्।
इत्युपेक्षार्थ[86]कुशलैरुपेक्षा [87]त्रिविधा स्मृता[88] ॥ ५५।
अकार्ये सज्जमानस्तु विषयान्धीकृतेक्षणः।
कीचकस्तु विराटेन हन्यतामित्युपेक्षितः ॥ ५६।
ससज्जं[89] भीमसेनं वा स्वार्थविच्छेदभीतया।
हिडिम्बया निजो भ्राता हन्यतामित्युपेक्षितः ॥ ५७।

---

[86] इत्युपेक्षा तु कुशलै ; इत्युपेक्षासु कुशलै

[87] रुपेक्षास्ति [88] मता

[89] संरब्धो भीमसेनेन

55. *Upekṣā* (diplomatic neglect) according to experts (in this branch of policy) is of three kinds, viz., to show apparent neglect (i) to wrong-doers, (ii) to those addicted to *vyasanas* (lust) and (iii) to those indulging in (unreasonable) warfare.

56. Kīcaka, intent on committing a wrongful act and blinded by passion, was neglected (*upekṣita*) by king Virāṭa only to get him assassinated (by Bhīma).

57. Hiḍimbā (the demoness who fell in love with Bhīma) apprehending failure of her mission (or non-fulfilment of her desire due to hostility of her brother Hiḍimba) allowed her brother to be killed by Bhīmasena, by adopting the policy of neglect.

उपेक्षाभिधानमुपायमभिधातुमाह—अन्याय इत्यादि। अन्याये चौर्यपारदारिकादौ शास्त्र-निषिद्धे। व्यसने द्यूतमृगयादौ। युद्धे वृथाकलहादौ। प्रवृत्तस्या निवारणमित्येतदुपेक्षासु कुशलै-राचार्यैरुपेक्षा त्रिविधा स्मृता। अन्याये प्रवृत्तोपेक्षा, व्यसने प्रवृत्तोपेक्षा, युद्धे प्रवृत्तोपेक्षेति त्रिविधेति ॥ ५५॥

उपेक्षोपायस्य फलं दर्शयन्नाह—अकार्य इत्यादि। अकार्ये पाण्डवानां प्रच्छन्नरूपाणां भार्याया द्रौपद्या ग्रहणे प्रवृत्तः कीचको हन्यतामिति विराटेनोपेक्षितो न्यायोदन्तस्तथा विराटगृहे प्रच्छन्नरूपाः पाण्डवा युधिष्ठिरादयः पुरोहितादयः स्थिताः। द्रौपद्यपि गन्धपेषिका सैरन्ध्री स्थिता कीचकेन बलाद्ग्रहीतु-

मारब्धा। तयाभिहितम्—सङ्गीतकशालायां निशि सम्पादयामीङ्गितमिति। तत्समस्तं विदित्वापि विराट उपेक्षकः स्मृतः। ततः स्त्रीवेषेण वै भीमेन ते कीचकाः शतसंख्याका रात्रावेव दग्धा यथा कोऽपि न जानातीति अन्यायोपेक्षेयमिति ॥ ५६ ॥

युद्धोपेक्षामभिधातुमाह—ससज्जमिति (संरब्ध इत्यादि)। हिडिम्बोऽमर्षाद्युद्धे प्रवृत्तो भीमसेनेन सह। स्वार्थविच्छेदाद् भीतया हिडिम्बया राक्षस्या भीमानुरक्तया स्वार्थविच्छेदः कामसौख्यविच्छेदलक्षणस्तद्भीतया, निजो भ्राता राक्षसो हन्यतामित्युपेक्षितः साहिजीन (स हिडिम्ब) इत्यर्थः। इयं युद्धोपेक्षा। तृतीयोपेक्षापि व्यसनविषया द्रष्टव्येति ॥ ५७ ॥

मेघान्धकारवृष्ट्यग्निपर्वताद्भुतदर्शनम्।
दूरस्थानाञ्च सैन्यानां दर्शनं ध्वजशालिनाम्[90] ॥ ५८ ।
छिन्नपाटितभिन्नानां संस्कृतानाञ्च[91] दर्शनम्।
इतीन्द्रजालं द्विषतो[92] भीत्यर्थमुपकल्पयेत्[93] ॥ ५९ ।

[90] मालिनाम्

[91] संस्रुतानां प्रदर्शनम्; भिन्नामसृजांचापि दर्शनम्; संहृतानां प्रदर्शनम्

[92] द्विषतां [93] मुपदर्शयेत्

58-59. *Indrajāla* or conjuring tricks and devices of hallucination are like display of darkening clouds or shower of fire, or appearance of ghosts on hillsides, sights of marching of troops with flags aloft from a distance, or of soldiers lying slain with severed limbs, or of an organised army (intent on attacking), with a view to terrorize the enemy.

इन्द्रजालाख्यमुपायमभिधातुमाह—मेघान्धकारेत्यादि। प्रतीतम् ॥ ५८ ॥ ५९ ॥

इत्युपायाः समाख्याता राज्ञो[94] नानार्थसाधकाः।
सामैतेषु[95] हि सामज्ञो यथा कामं[96] प्रयोजयेत् ॥ ६० ।
सामभेदौ च[97] कर्तव्यौ साधु दानपुरस्सरौ।
दानेन हि समायुक्तावेतावर्थस्य[98] सिद्धये ॥ ६१ ।
दानरिक्तेन सर्वत्र साम्ना कृत्यं भृशेन[99] वा।
निर्दानं साम नायाति कलत्रेष्वपि संस्थितम्[100] ॥ ६२ ।

[94] नाना नानार्थ [95] साम तेषु हि कालज्ञो

[96] यथाकालं [97] हि कर्तव्यौ; तु कर्तव्यौ दानमानपुरस्सरौ

[98] वेतावप्यर्थसिद्धये [99] तृणेन

[100] संस्थितिम्

60. These are the various well-known expedients (*upāya*) to be adopted for achieving different purposes. But of these a ruler conver-

sant with principles of conciliation (*sāma*) should apply it in proper time (i.e., at first, before he takes to any other policy).

61. Conciliation and alienation must be preceded by offering of gifts and show of honour (*dāna māna*). Because any method accompanied by gifts produces the desired success.

62. Conciliation without gifts always proves to be futile or infructuous. Even the allegiance or steady devotion of the wife is unobtainable by (mere) conciliation without gifts (i.e., if not followed up by gifts).

उपसंहरन्नाह—इत्युपाया इत्यादि। इत्युपायाः समाख्याता इतिप्रकारा एवं प्रकारा अन्येऽप्युपाया भवन्ति। उपेयार्था यैः प्राप्यन्ते ते सर्वेऽप्युपायव्यपदेशं लभन्ते। उपेक्षामायेन्द्रजालानि तु कामन्दकिना गणितानि दृष्टत्वात्। यतो मायेन्द्रजालादिभिरेव राक्षसाः सुरैर्युध्यन्त इति महाभारते श्रूयते। नानाप्रकारा नाना उपाया अर्थसाधकाश्च। सामज्ञस्तु विजिगीषुरेतेषां मध्ये सामैव प्रयोजयेत्॥ ६०॥

सामभेदावित्यादि। सामभेदौ च कार्यवशात् प्रयोक्तव्यौ साधु दानपुरस्सरौ यस्माद्दानेन हि समायुक्तावेतावप्यर्थसिद्धये॥ ६१॥

दानरिक्तेनेत्यादि। सर्वत्र दानरिक्तेन साम्ना कृत्यं तृणेन वा। यत्तृणस्य सामर्थ्यं करणीयं तद्दानरहितस्य साम्नोऽपि। असारत्वान्न कार्यसाधकमित्यर्थः। निर्दानं साम नायाति कलत्रेष्वपि संस्थितिम्। तेनावधीर्यते प्रलापित्वादिति॥ ६२॥

[101]इत्याद्युपायान् निपुणं नयज्ञो
विनिक्षिपेच्छत्रुबले निजे वा[102]।
निरभ्युपायो नियतं प्रयाणं[103]
विचेष्टमानोऽन्ध इवाभ्युपैति॥ ६३।
अवश्यमायान्ति वशं विपश्चिता-
मुपाय सन्दर्शबलेन[104] सम्पदः।
[105]भवन्त्युदारा विधिवत् प्रयोज्यते[106]
फलं हि राज्ञां क्वचिदर्थ सिद्धये॥ ६४।

इत्युपायोविकल्पो नाम सर्गावशं प्रकरणम्।

इति कामन्दकीये नीतिसारे उपायविकल्पो नामाष्टादशः सर्गः॥ (मुद्रित पुस्तकानुसारेण सप्तदशः सर्गः समाप्तः॥)

---

101 इति ह्युपायान्   102 च
103 प्रयातं   104 सन्दंशबलेन
105 भवत्युदारं   106 प्रयोजिते

63. A *vijigīṣu*, well versed in the laws of polity (*nayajña*), should apply these expedients like an expert against the forces of his enemy and also for his own (to gain the desired result). Whereas one who does not follow these expedients however much he may exert, would fall down like a blind man (i.e., would meet with his own ruin).

64. Wealth (prosperity) is invariably acquired by the wise (rulers) applying the devices (like the pincers, *sandaṁśa*) of expedients. These expedients, when adopted in conformity with the rules prescribed, yield magnificent results in fulfilling the desired ends of the king.

उपायसामर्थ्यं दर्शयन्नाह—इत्यत्यु पायानिति (इति ह्यु पायानिति)। इत्युपायानभ्युपायान् मुख्यानुपायान् सामादीन् निपुणं यथा भवति तथा नयज्ञो नीतिशास्त्रज्ञो विनिक्षिपेत् प्रयुञ्ज्यात् शत्रुबले यातव्यसैन्ये निजे च सैन्ये, यो यस्योपायस्य साध्य इति निर्णयं कृत्वा। निरभ्युपाय इति उपायप्रयोग-रहितो नियतं निश्चयेन प्रपातं राज्यभ्रंशादिकं विचेष्टमानो चेष्टां कुर्वाणोऽन्ध इवेति लोचनरहित इव अभ्युपैति प्राप्नोति कूपादिषु पतनमिति ॥ ६३ ॥

अभ्युपायः फलवानित्याह—अवश्यमित्यादि। विपश्चितां नीतिपण्डितानाम्। सन्दंशो लौह-कारोपकरणम्। तेन यथास्थितमपि सुवर्णादि बलादाकृष्य वशीक्रियते तथोपायसन्दंशबलेन सम्पदो विभूतय इति। भवत्युदारमुत्कृष्टं विधिवत् प्रयोजितं शास्त्रोक्तविधिना प्रयुक्तमुपायजातम्। फलं हि यस्माद्राज्ञां विजिगीषूणां क्वचिदेव विध्विशाद् यद्यत् फलं भवति तत् अर्थवृद्धये प्रवृत्तानाम्। ननु (ननु) सदा भवतीति प्राप्नोति भावः ॥ ६४ ॥

इत्युपायविकल्पो नाम सप्तविंशं प्रकरणम्।

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षायां उपायविकल्पोनामाष्टादशः सर्गः ॥

एकोनविंशः सर्गः

(मुद्रितपुस्तकानुसारेण अष्टादशसर्गः प्रारम्भः ।)

२८ । सैन्यबलाबलप्रकरणम् ।

सामादीनामुपायानां त्रयाणां विफले नये ।
विनयेन्नयसम्पन्नो[1] दण्डं दण्ड्येषु दण्डवित् ॥ १ ।

[1] नयमुद्युक्तो ; नयशास्त्रोक्तं दण्डं ; नयशास्त्रोक्तं नयं

Sarga XIX

Prakaraṇa 28 : *Sainyabalābala*

(Points of strength and weakness of the Army)

1. When the three expedients of *sāma, dāna* and *bheda* are found to be ineffective, the ruler versed in the laws of polity and of punishment (or military science) should attempt to subjugate the enemy deserving punishment (or to be proceeded against).

उपायविकल्पानभिधाय चतुर्थोपायकालं तत्प्रयोजनं चाभिधातुमाह—सामेति । सामादीनामुक्तलक्षणानां त्रयाणामुपायानां विफले निरफले[1] नये प्रणयने, उपायकार्यसिद्धौ[2] विनयेद्विशेषेण प्रापयेत् नयं दण्डं नयशास्त्रोक्तं प्रापयेत् । दण्ड्येषु कृतदोषेषु परपक्षेषु यातव्यलक्षणोपेतेषु, क्रोधलोभादिना नेतरेष्विति । जितारिषड्वर्गो यातव्यलक्षणोपेते शत्रौ सुविज्ञाते च दोषे दोषानुरूपं यो दण्डं करोति असौ दण्डविदिति ॥ १ ॥

[1] न निरफले ; अनिरफले [2] विप्रणयने उपायकार्यासिद्धौ

देवानभ्यर्च्य विप्रांश्च प्रशस्त[2]ग्रहतारकम्[3] ।
षड्विधं तु बलं व्यूह्य द्विषतोऽभिमुखं[4] व्रजेत् ॥ २ ।

[2] प्रसन्न [3] तारकाः

[4] द्विमुखं

2. He should (at first) worship the (family or state) deities, honour the Brāhmaṇas (for their blessings), watch the auspicious planets and constellation of stars and march with his six-fold army arrayed in formation (*vyūha*) toward his enemy.

दण्ड्योऽत्र यातव्यलक्षणोऽरिः, तं प्रति दण्डप्रणयनं संग्रामाख्यमभिधातुं पूर्वं विधेयं तावदाह—देवानिति । यातव्यलक्षणोपेते दण्ड्ये शत्रौ संग्रामेण दण्डं कर्तुकामो विजिगीषुः देवानिष्टानभ्यर्च्य ।

अभिहुतानपि कात्यायनीप्रभृतीन्[3]। विप्रांश्च यथोक्तलक्षणान्। प्रशस्ता ग्रहाः सूर्यादयः, तारका नक्षत्राणि अनुकूलानि, तथा चन्द्रबलं यथा तथा ताराबलमपि ग्राह्यम्। षड् विधं वक्ष्यमाणक्रमेण स्वं बलं पत्त्यादि व्यूह्य दण्डादिरचनया रचयित्वा, द्विषतो यातव्यस्याभिमुखं व्रजेद्विजिगीषुरिति ॥ २ ॥

[3] कात्यायन प्रभृतान्

मौलं भूतं (भृतं) श्रेणि सुहृद् द्विषदाटविकं बलम्।
पूर्वं पूर्वं गरीयस्तु बलानां व्यसनस्तथा ॥ ३ ।

---

3. Veterans (soldiers in service hereditarily, *maula*), regular forces (or mercenaries, *bhṛta*), organised bands of martial tribes of the dominion (*śreṇibala*), forces of allies (*suhṛd-bala*), soldiers alienated from the enemy camp (*dviṣad-bala*) and forces of forest tribes (*āṭavika bala*) are the six branches of the army, each of the preceding one is more important than the one following, so also in matters of their defections (*vyasana*).

बलस्वरूपं गुरुलाघवं चाभिधातुमाह—मौलमिति। मूले भवं, मूलभूतपुरुषसम्बन्धादागतं वा मौलम्। भृतं भरणेनोपगृहीतम्। श्रेणि सङ्घधर्मेण व्यवस्थितं कुविन्दपट्टिकाकारसमूह। सुहृद्बलं साहाय्यागतं मित्रबलम्। द्विषद्बलं दण्डोपादानं तु (दण्डोपनतं वा) शत्रुबलम्। आटविकं बलं स्वमण्डलाटवीभोक्तृबलमं साहाय्यागतमेव[4]। पूर्वंपूर्वमुद्दिष्टानां गरीयोगुणैरधिकं, बलानां मध्ये भृतान्मौलं, श्रेणिबलाद् भृतमिति सर्वत्र योज्यम्। व्यसनं तथा पूर्वस्मिन् जायमानं व्यसनं गुणप्रातिलोम्यादिकं च गरीय इति ॥ ३ ॥

[4] सहाप्यागतमेव

सत्कारादनुरागाच्च सह सङ्कूटनाशनात्[5]।
नित्यं तद्भावभावित्वान्मौलं भूत (भृत)-बलाद् गुरु ॥ ४ ।

---

[5] सहसङ्कयनासनात्

4. Because of respect and love for the ruler, with whom close contact by discussion and association is maintained (for generations) and whose thoughts are always shared (in weal or woe), the *maulabala* is considered more reliable than the *bhṛta bala*.

एतदेव समर्थयन्नाह—सत्कारादिति। पितृपैतामहसम्बन्धात् सत्कारार्हमित्यर्थः। अनुरागाच्च परिचयादनुरक्तं भवति। सह राज्ञा सङ्कयनासनं च, सर्वदालापनं समीपे चासनं, ततो निमित्तात्। नित्यं तद्भावभावित्वात् सहचरिक्षयत्वादित्यर्थः। अतो मौलं भृतबलाद् गुणाधिकमित्यर्थः ॥ ४ ॥

सन्निकृष्टतया नित्यं क्षिप्रोत्थानतयापि च।
भृतेभ्य स्वाम्यधीनत्वाद् भूतं (भृतं) श्रेणिबलाद् गुरु ॥ ५ ।

---

5. In consideration of their situation close to the king and of their ever-readiness to exert promptly (whenever their movement is deemed

necessary) and also of their dependence on the ruler for their means of livelihood, the *bhṛta-bala* is more dependable than the *śreṇibala*.

* This line has been dropped in the B.I. text, is the opinion of the editor. It is however restored from the *ṭikā*. Hence the renumbering of the ślokas.

सन्निकृष्टतयेति । नित्यं सन्निकृष्टतया नियतं समीपावस्थितया क्षिप्रोत्थानतया पतितोत्थापकतया, वृत्तेश्च जीविकायाश्च, स्वाम्यधीनत्वात् स्वाम्यायत्तत्वात्, भृतं उक्तलक्षणं, भृतबलं श्रेणिबलाद्गुरु गुणाधिकम् ॥ ५ ॥

तुल्यसंघर्षणामर्षात् सिद्ध (सिद्धि) लाभात्[6] तथैव च ।
बलाज्जानपदत्वाच्च मैत्राच्छ्रेणिबलं गुरु ॥ ६ ।
[7]संख्यातदेशकालत्वादेकार्थोपगमात्तथा ।
[8]बलाद्भतयोग्याच्च शत्रोर्मित्रबलं गुरु ॥ ७ ।
प्रकृत्याऽधार्मिका लुब्धा अनार्याः सत्यभेदिनः ।
तस्मादारण्यकतया तेभ्यः शत्रुबलं गुरु ॥ ८ ।

[6] सुखलाभात् [7] असंख्य देश

[8] बलान्भेदनयोगाच्च ; सन्नेहादभियोगाच्च

6. The *śreṇubala*, who shares the impact of clashes (with the enemy forces), their furies as well as benefits (when victorious) and who are sons of the soil (*jānapada*) is superior to the forces of allies (*mitrabala*).

7. *Mitrabala*, which can be employed in different campaigns to different countries in different seasons, because of the common interest of the allies and the *vijigīṣu*, is superior to the *śatrubala* (the soldiers alienated from the enemy camp) as chances of dissension among the latter cannot be ruled out.

8. In view of the fact that the foresters are by nature dishonest, greedy, uncultured and faithless, the soldiers from the enemy camp are more dependable than the forester troops.

तुल्येति । तुल्यसंघर्षनामर्षात् समसुखदुःखत्वात् सिद्धिलाभात् सिद्धौ विजये, सत्यां लाभात् तुल्यलाभात्, जानपदत्वाच्च एकजनपदवासित्वाच्च, मैत्राद्बलात् श्रेणिबलं गुरु ॥ ६ ॥

संख्यातेति । संख्यातदेशकालत्वात् निर्णीत देशकालत्वात् तथा एकार्थोपगमात् एकार्थलाभप्रयत्नात्, स्नेहनयोगाच्च अनुरागसम्पर्काच्च शत्रोर्बलात् मित्रबलं गुरु ॥ ७ ॥

प्रकृत्येति । यतः आरण्यकतया अरण्यवासितया आटविकाः, प्रकृत्या स्वभावेन अधार्मिकाः पापमतयः, लुब्धाः अर्थलोलुपाः, अनार्याः असदाचाराः, सत्यभेदिनः असत्यप्रतिज्ञाः, तस्मात् कारणात् तेभ्यः आटविकेभ्यः शत्रुबलं गुरु ॥ ८ ॥

उभयं तद्विलोपार्थं कालापेक्षाव्यवस्थितम्[9] ।
विलोपव्यसने[10] चैव तत्रास्य विजयो ध्रुवः ॥ ९ ।
उपजाप कृतात्तस्योद्भयादभ्यां[11] विशेषतः ।
परस्य चाप्युपजपेदुपजापाद् ध्रुवो जयः ॥ १० ।

[9] कालापेक्षं व्यवस्थितम्　　[10] विलोपेऽव्यसने

[11] कृतात्त्स्याद् भयमस्माद्विशेषतः ; कृतात्त्रस्येद्भयादाभ्यां विशेषतः

9. Both classes of troops (i.e., those alienated from the enemy camp and the foresters) wait for the opportunity of plundering the enemy territory, and if they are not defected while plundering, the *vijigīṣu* may be sure of complete victory.

10. There is always the apprehension that these two classes of troops may be defected by intrigues (of the enemies), and the ruler should be particularly careful about it. He should rather make intrigues (to defect such forces) in the enemy camp, because such intrigues lead to sure success.

उभयमिति । उभयं शत्रुबलमाटविकं बलं च, यातव्यविषयविलोपार्थं भवति । देशविलोपात्[5] यातव्यस्य प्रभुशक्तिक्षय इति । ' यदि विजिगीषोः शक्तिमुचयकालं पश्यति तथान्यथा नेति कालापेक्षाव्यवस्थितम् न केवलं विलोपार्थं विजयार्थमपि भवति । तद्यथा—विलोपे क्रियमाणे, व्यसने च शत्रोः । तत्रापीति पञ्चम्यर्थे सप्तमी'। तस्मादप्यरिजयो ध्रुवस्तेनापि यातव्यः साध्यो भवतीत्यर्थः ॥ ९ ॥

[5] दाहविलोपात्

उपजापेत्यादि । उपजापः तेन[6] यजातं भयं तस्मात् त्रस्येत् सावधानो भवेद्विजिगीषुः । उपजापं विघटयेदित्यर्थः । आभ्यामिति द्विषदाटविकबलाभ्याम् । विशेषत इति यस्मात्ते सन्निहिते महतेऽप्यपकाराय प्रभवतः । यातव्यस्योपजवे द्विषदाटविकबले । अदुपजापाद् ध्रुवो विजयो विजिगीषोः ॥ १० ॥

[6] उपजापेति । त्रस्येद्भयाभ्यां, तेन यत्कृतेभयं

स्फीतसारानुरक्तेन मौलेनोपचितः परः ।
तत्तुल्येनैव यातव्यः क्षयव्ययसहिष्णुना ॥ ११ ।
प्रकृष्टेऽध्वनि काले वा गच्छेन्मौलैः समावृतेः[12] ।
मौलास्तु दीर्घकालत्वात् क्षयव्ययसहिष्णवः ॥ १२ ।
एषु वस्तुषु[13] मेधावी भूता (भृता)दीनि विवर्जयेत् ।
दीर्घकालाध्वखिन्नेषु[14] तेषु भेदभयं भवेत्[15] ॥ १३ ।

[12] सुमान्वितैः　　[13] वस्तुष्वेतेषु

[14] दीर्घाध्वकालखिन्नेषु

[15] तेष्वभेदो न सम्भवेत्

11. If the enemy is equipped with loyal *maula* forces swelling with power and energy, the ruler should proceed against him with his own *maula* forces of comparable strength and (particularly) with those who are capable of enduring loss and destruction (i.e., injuries and death as well as loss of provisions).

12. In distant campaigns and in protracted wars, the *vijigīṣu* should march with his well cared for *maula* forces, who owing to their long association (being hereditarily in service) endure loss and destruction (cheerfully).

13. In such cases (i.e., in prolonged or distant campaigns) an intelligent ruler should discard other classes of troops (other than *maula-bala*), because tired of long and protracted marches they may fall a prey to alienation (overtures) by the enemy.

षड्विधेऽपिबले यद् यस्मिन् काल उपादेयं तद्बलोपादानकालमभिधातुमाह—स्फीतेति। स्फीत-सारानुरक्तेन मौलेनोपचितः परः। तत्तुल्येन परतुल्येनैव विजिगीषुणा, क्षयव्ययसहिष्णुना। युग्य-पुरुषापचयः क्षयः हिरण्यधान्यापचयोः व्ययः तौ सहत इति ॥ ११ ॥

प्रकृष्टेऽध्वनीत्यादि। इति स्पष्टम् ॥ १२ ॥

वस्तुष्वेतेष्विति। एतेषु वस्तुषु[7] कार्यविषु मेधावी प्राज्ञः भृतादीनि बलानि पञ्चापि वर्जयेत् न समं नयेत्। कुत इत्याह—दीर्घाध्वकालखिन्नेषु, दीर्घेण अध्वना दीर्घेण च विग्रहकालेन खिन्नेषु श्रान्तेषु भेदभयं भवति यातव्यकृतोपजापेभ्यस्तेयो भयं भवतीत्यर्थः ॥ १३ ॥

[7] वस्तुष्वेतत्

बहुत्वात्[16] परसैन्यानां दीर्घकालाध्व खेदतः[17]।
नित्यप्रवासायासाभ्यां[18] भेदोऽवश्यं हि जायते ॥ १४ ॥

---

[16] बहुत्वादेव सैन्यानां; बहुत्वाद्रिपुसैन्यानां

[17] दीर्घकालाध्व भेदतः कालाध्वखेदना

[18] नित्यं; नित्यप्रवासयानाभ्यां

14. In fighting with numerically superior forces of the enemy and that too for a prolonged period, the soldiers become unhappy, and again, if they are always (or repeatedly) sent out to foreign lands on campaign, they become surely liable to defection (owing to their mental depression).

एतदेव समर्थयन्नाह—बहुत्वादिति। यातव्यसैन्यानां प्राचुर्यात् स्वबलानां च भयं भवति। तथा दीर्घकालाध्वखेदतः। प्रतिदिनं प्रवासः प्रातिकूल्येन वासः तस्मात्, यानस्याश्वादेः प्रातिकूल्यात् नित्य-यानात् नित्ययानाच्च निर्विण्णानां बलानां अवश्यं भेदश्चित्तविश्लेषो जायते। ततश्च परगृहीतेभ्यस्तेभ्य* एव भयं भवेदित्यर्थः ॥ १४ ॥

* न्यस्तेभ्य

प्रभूतं मे[19] भूत (भृत)-बलं मौलमल्पमसारवत् ।
अरेरल्पं विरक्तं वा मौलं प्रायोऽल्पसारवत् ॥ १५ ।
प्रायो मन्त्रेण योद्धव्यमल्पायासेन वै जयः[20] ।
अन्यो[21] देशस्तु कालो वा प्रभूतौ च क्षयव्ययौ ॥ १६ ।
[22]श्रान्तोपजापाद्विश्वस्तं यस्मात् सैन्यं परस्य च ।
अल्पप्रसारो[23] हन्तव्य इत्युपेक्ष्या[24] भृतैर्बलैः ॥ १७ ।

---

[19] चेद् [20] नैव हि ; वेतिहि

[21] अल्पो देशस्तु कालो वा अल्पौ ह्येव क्षयः ; अल्पः कालस्तु देशो वाऽप्रभूतौ

[22] श्रान्तोपजापं ; शान्तोपजापविश्वस्तमस्मत् सैन्यं परस्य वा ; विश्वस्तं सैन्यमस्तीति वा रिपोः

[23] प्रचारो गन्तव्य

[24] इत्युपेयाद् ; इति वा याद्भृतैः

15-17. If the *vijigiṣu* feels confident that his *bhṛtabala* (mercenaries) are numerous (numerically strong), but the *maulabala* is smaller (not enough) and inefficient, and the *maulabala* of the enemy is also inadequate, dissatisfied and generally inefficient, he should adopt *mantra yuddha* (diplomatic warfare, avoiding open war) as, in that case, limited effort will be required (for success). But for campaigns of short duration and in not too distant lands, which are not likely to involve in heavy losses or destruction, and when attempts of the enemy in creating disaffection in his own ranks have been remedied and when allegiance of his own soldiers is established and the equipments of the enemy are insufficient, the *vijigiṣu* should fall upon the assailable (enemy) with his *bhṛtabala*.

ततः स्वभृतबलोपादानकालं चतुर्भिः श्लोकैः सहेतुकमाह—प्रभूतमिति । भृतबलं वेतनोपगृहीतं प्रभूतं मे विद्यते । मौलं पितृपैतामहं संख्यातोऽल्पम् । तदप्यसारवत् साररहितम् । अरेर्यातव्यस्य मौलमल्पं तदपि विरक्तम् । प्रायो बाहुल्येनाल्पसारवत् स्तोकसारयुक्तम् ॥ १५ ॥

तथा प्राय इति । प्रायो बाहुल्येन । मन्त्रेणेति कूटयुद्धेन [9]शस्त्ररसादिप्रणिधानेन लक्षणेन योद्धव्यं न प्रकाशयुद्धेन । मन्त्रेणाल्पायासेन वेति अग्रेणोपेयादिति सम्बन्धः । अल्पो देशः प्रयाणस्य । कालश्चाल्पः प्रयाणस्य[10] । अल्पौ तस्य च क्षयव्ययौ ॥ १६ ॥

श्रान्तेति । श्रान्तं तदुपजापविश्वस्तं च । श्रान्तं युद्धक्लेशादिभिः । उपजापेन विजिगीषुकृतेनात्मसात्कृतत्वाद्विश्वस्तम् । यस्मात् कारणात् सैन्यं परस्य तस्मात् भृतैर्बलैर्यायादिति सम्बन्धः । तथा अल्पसारो हन्तव्य इति । "सर्वतो वनाऽऽजीवः प्रसार" इति प्रसारलक्षणम् । तृणकाष्ठघासफलाद्यर्थं सर्वतः प्रसरणं प्रसारः । स यातव्यस्य हन्तव्यः, सङ्कटप्रदेशावस्थितत्वात् । इति यायादिति । बलैर्वा तस्याल्पत्वात् इति ॥ १७ ॥

[9] शस्त्रेतुरसादि, शस्त्रातिरिक्तप्राणिघातेन लक्षणेन [10] प्रयाणस्य

स्फीतं श्रीणि (श्रेणि)-बलं शक्यमाधातुं पानवर्त्मनि[25] ।
ह्रस्व[26] प्रवासव्यायामादिति सैन्यं[27] समुत्पतेत् ॥ १८ ।

---

[25] यानवस्तुनोः ; वस्तुनि ; वास्तुनोः

[26] ह्रस्वौ प्रवास व्यायामाविति ; प्रयास

[27] श्रेण्या

18. When the *śreṇibala*, equipped with chariots and other means of transport, is found to be swelling with power and capable of negativing overtures of the enemy, and the campaign is likely to be of a short duration and involving short stay abroad and limited effort, the *vijigīṣu* should launch upon it with his *śreṇibala.*

श्रेणीबलोपादानकालमभिधातुमाह—स्फीतमिति । प्रयाणकर्मणि ह्रस्वौ प्रयासव्यायामाविति । प्रयास (प्रवास) क्लेशः । व्यायामो युद्धम् तौ ह्रस्वावेव । इति श्रेण्या समुत्पतेत् श्रेणिबलमुपादाय गच्छेदिति सम्बन्धः । श्रीणिबलं पानवर्त्मनि च मुद्रितपुस्तकपाठौ न समीचीनाः ॥ १८ ॥

स्वप्रभूतं[28] सुहृत्सैन्यं शक्यमाधातुमात्मनि[29] ।
[30]अल्पमेवाल्पयुद्धश्च मन्त्रेणेति सुहृद्बलैः ॥ १९ ।
मित्रसाधारणे कार्ये मित्रायत्ते फलोदये ।
अनुग्राह्ये च पाण्डित्ये[31]मित्रेणैव सह व्रजेत् ॥ २० ।

---

[28] प्रभूतं हि ; सुप्रभूतं [29] सम्यगाधातुमात्मनि

[30] अल्पः प्रवासो मन्त्राच्च भूयो व्यायामयोधनम् ; अल्पायासोपपन्नं च मन्त्रेणेति

[31] पीड्ये च

19. If the *vijigīṣu* is sufficiently equipped with *suhṛdbala* (soldiers contributed by the allies) and they are found to be capable of holding on resolutely in the interests of the ruler, in shorter campaigns (when stay abroad will be of shorter duration), he should deploy his *suhṛdbala* and adopt diplomatic warfare by application of *mantra* (*kūṭayuddha*).

20. When a venture or campaign in the common interest (common to both the *vijigīṣu* and his ally), is undertaken or in which success depends on the ally, and in which favour needs to be shown to an ally and the reverse (i.e., persecution) on some other, the *vijigīṣu* should set out with his ally.

सुहृदुपादानकालमभिधातुमाह—स्वप्रभूतमिति (सुप्रभूतमिति)। सुप्रभूतं सुहृत्सैन्यं, तच्च शक्यमाधातुं स्थापयितुमात्मनि आत्मकार्यसम्पादने निर्वैरं कर्तुं सामादिभिः । अल्पः प्रवासः सन्निहितत्वात् यातव्यस्य । युद्धं मन्त्रेणेति सम्बन्धयेत् । कूटयुद्धेन । कूटयुद्धं च तीक्ष्णरसदादि प्रयोगः[11] । एवम्भूते कार्ये सुहृद्बलैर्यायादिति वाक्यशेषः ॥ १९ ॥

मित्रसाधारण इति। मित्रस्यात्मनश्च साधारणं समानफलोदयं कार्यं यस्मिन् कार्ये। तथा मित्रायत्ते फलोदये तथानुग्राह्ये पौष्णे च मित्रान्तरे विजिगीषु मित्रेणैव सह व्रजेत् ॥ २० ॥

[11] रसादानादित्यादि प्रयोगः ; रसनानात्वादित्यादि

प्रभूतेनारिसैन्येन [32]प्रेषयेन्महतो रिपून्।
[33]श्वशूकरवधापेक्षी नय वावचनमयेत्[34] ॥ २१ ।
अविचित्तं[35] कोपभयादभ्यासेन[36] रिपोर्बलम्।
वासयेत् कर्षयेच्चैनं[37] दुर्गकण्टकशोधनैः[38] ॥ २२ ।

---

[32] योधयेन् [33] श्वसूकर
[34] नयं चण्डालवन्नयेत् [35] अत्युजितं ; अभ्युत्थितं कोपबलाद्
[36] दभ्याशे तु [37] कर्षयेच्चैव
[38] मर्दनैः

21. In fighting a strong and powerful enemy, the *vijigīṣu* may employ his *aribala* (soldiers alienated from the enemy), if it is in sufficient strength and are under complete domination (of the *vijigīṣu*), and then he may look for results (confidently) just as the *Caṇḍāla* awaits killing of the boar by his trained (hunting) dogs.

22. As concentration of soldiers alienated from the enemy may lead to excitement and irritation (among them or among the inhabitants of the kingdom), the ruler should employ them in plundering the enemy territory and in weeding out the thorns (obstacles and difficulties) in the forest forts, or frontier stations. (That is, such forces should always be kept engaged with difficult assignments lest they become a source of danger to the state).

द्विषद्बलोपादानकालमभिधातुमाह—प्रभुतेनेत्यादि। अरिसैन्येन योधयेन्महतो रिपून् युद्धे नियोजयेत्। श्वशूकरवधापेक्षी चण्डालः यथा श्वशूकरवधं भक्ष्यत्वादपेक्षते तथा विजिगीषुर्यातव्यस्य शत्रोर्वधमपेक्षते साहाय्यागत दण्डोपनतशत्रोरपि वधमपेक्षत एव। अतश्च दृष्टान्तान्नयेदिति चण्डालवद्विजिगीषुर्नयेत् प्रापयेत् ॥ २१ ॥

अभ्युत्थितमिति। प्रभोः कोपभयात् अभ्यासे समीपे अभ्युत्थितं उपस्थितः (अविचित्तं इति मुद्रितपुस्तकपाठः, अविरुद्धचित्तं इत्यर्थः)। रिपोर्बलं, वासयेत् स्वराज्ये निवासयेत् कर्षयेच्च यातव्यदुर्गकण्टकमर्दनैः (शोधनैः)। दुर्ग्याटविकाद्यकण्टकमर्दने तन्मर्दनप्रेषणे कृशं भवत्विति ॥ २२ ॥

नित्यमाटविकं सैन्यं दुर्गकण्टकशोधनैः[39]।
परदेशप्रवेशे च पुरा कुर्वीत[40] पण्डितः ॥ २३ ।

---

[39] शोधने [40] पुरस्कुर्वीत

23. The foresters (*āṭavika bala*) should also be employed in similar *task* of weeding out thorns (*kaṇṭakaśodhana*) in the fortified areas of the enemy dominion. While entering the enemy territory they are placed in the forefront by a wise *vijigīṣu*.

आटविकबलोपादानकालमभिधातुमाह—नित्यमित्यादि। आटविकं सैन्यमिति सर्वदा दुर्गे यातव्यसम्बन्धिनि। कण्टकशोधने दूष्याटविकादिकण्टकमर्दने। परदेशप्रवेशे च यातव्यजनपदप्रवेशे। पुरोऽग्रतः कुर्वीत पण्डितो विजिगीषुः। (पुराकुर्वीत इति मुद्रितपुस्तकपाठः न समीचीनः)। पाण्डित्यं चात्र मरणात्मकभावस्य गोपनमिति ॥ २३ ॥

एतन्मौलादि षड्वर्गं[41] चतुरङ्गबलं विदुः[42] ।
षडङ्गं[43] मन्त्रकोशाभ्यां पदात्यश्वरथद्विपैः ॥ २४ ।
इति षड्विधमेतद्धि यथा योगबलं[44] बली ।
सुनिश्छिद्रं[45] प्रतिव्यूह्य यायाज्ज्यायोबलं[46] प्रति ॥ २५ ।
योगमस्य विजानीयात् सर्वं मन्त्रादिना[47] नृपः ।
कृताकृत[48]प्रचारञ्च सम्यक्[49] सेनापतेस्तथा ॥ २६ ।

[41] षड्भेदं चतुरङ्गं बलं
[42] स्मृतम्
[43] षडङ्गं मन्त्र
[44] यथायोगं बलं विदुः
[45] सुनिश्चितं
[46] यायात् परबलं प्रति ; प्रतिबलं प्रति
[47] सर्वयन्त्रादिना ; सर्वं यन्त्रादिना ; मन्त्र्यादिना
[48] कृताकृतं
[49] साधु सेनापतेस्तथा, सदा सेनापतेरपि

24. Thus there are six classes of army beginning with *maulabala* and others, each equipped with four-fold divisions of foot soldiers, cavalry, charioteers and elephant forces and supported by *mantra* (diplomatic counsel) and *kośa* (financial resources) constitute *Ṣaḍaṅga bala* (six limbs of the army).

25. Against a powerful enemy the *vijigīṣu* should employ these six classes of forces duly equipped and arranged in faultless formations.

26. A *vijigīṣu* should keep himself informed of the movements (and abilities, *mantrādinā*) of (all the branches of the army) as well as of the machines (*yantrādinā*, weapons and implements) of war, and also of the probable results of the campaign led by the competent commander.

उपसंहरन्नाह—एवन्मौलादीति। इत्युक्तेन प्रकारेण मौलादिषड्भेदं षट्प्रकारं चतुरङ्गबलं स्मृतम्। पदात्यश्वरथद्विपैरङ्गैः। एतदेव षडङ्गं भवति मन्त्राङ्गेन कोशाङ्गेन च सह। कथं मन्त्र-कोशयोरङ्गत्वमिति चेत्, यथा चाङ्गैः चतुर्भिः शत्रवः क्षयं नीयन्ते तथा मन्त्रेण कोशेण चेति ॥ २४ ॥

इतीत्यादि। इत्युक्तक्रमेण षड्विधं बलमपि[1?]। एतदनन्तरोक्तम्। हि स्फुटम्। यथा-योगमिति यस्य बलस्य येन बलेन सहयोगो युज्यते कर्तुं शीलबल सम्पन्नम्। सुनिश्छिद्रमिति छिद्रं

रन्ध्रं येन परस्यावकाशो भवति तन्निर्गतं यस्मात् तत्। प्रतिव्यूह्येति पररचितव्यूहस्य प्रत्यनीकभूतं व्यूहं विरचय्य यायात् परबलं प्रतीति (परबलमित्यत्र ज्यायोबलमिति मुद्रितपुस्तकपाठः) ॥ २५ ॥

योगमस्येत्यादि; अस्यानन्तरोक्तस्य[13] बहुविधस्य योगं सम्बन्धं स्वकीयैः परकीयैर्वा सह सर्वमशेषं विजानीयात् विजिगीषुर्मन्त्रादिना गूढपुरुषप्रणिधानात्[14] नृपो राजा। तथा कृताकृतमिति प्रतीतम्। स्वामी कृतमकृतं वा प्रचारं च, कः क्व प्रचरतीति गत्यागतादिकं तच्च विजानीयात्। साधु यथा भवति तथा सेनापतेरपीति, सकलबलसमुदायः सेना तस्याः पतिस्तस्य कृताकृतप्रचारादिकं विजानीयादिति सम्बन्धः ॥ २६ ॥

इति सैन्यबलाबलमष्टाविंशं प्रकरणम्।

[12] बलमपि बलम् [13] अथानन्त

[14] प्रणिधानेन

२९। सेनापतिप्रचारप्रकरणम्

कुलोद्गतं जानपदं मन्त्रज्ञं मन्त्रसम्मितम्[50]।
दण्डनीतेः प्रयोक्तारमध्येतारं च यत्नतः[51] ॥ २७ ।
[52]सत्त्वशौर्यक्षमास्थैर्यमाधुर्यार्थ[53]गुणान्वितम्।
प्रभावोत्साहसम्पन्नमाजीव्यमनुजीविनाम् ॥ २८ ।
मित्रवन्तमुदारास्यं[54] बहुस्वजनबान्धवम्।
व्यवहारिकमक्षुद्रं[55] पौरप्रकृतिसङ्गतम्[56] ॥ २९ ।
नित्याकारणवैराणामकर्तारमनाविलम्।
[57]श्रुतानुबन्धिकर्माणमल्पामित्रं बहुश्रुतम् ॥ ३० ।

[50] मन्त्रिसम्मतम्; सत्तमम् [51] तत्त्वतः
[52] सत्यसत्त्वक्षमा [53] माधुर्यार्थं
[54] मुदाराढ्यं [55] व्यवहारिणमक्षुद्रं
[56] सम्मतम् [57] शुभानुबन्धि

Prakarana : 29

Senāpati prācāra : The qualifications of a Commander-in-Chief

27. (In selecting a Commander-in-Chief the following qualifications are considered essential). He should be of a noble family belonging to the same country, well-versed in laws of diplomacy (*mantrajña*) and acceptable to the ministers (*mantri-sammatam*) ; he should be conversant

with the theories and principles of application of *Dandanīti* (laws of polity) and eloquent in exposition of them.

28. He should be endowed with the qualities of truthfulness, firmness, forgiveness, composure (of feelings), amiability, cultured bearing, power of influence and energy and one who is depended upon by his followers.

29. One possessing numerous friends, liberal-hearted and rich with affection, whose own relatives and well-wishers are also numerous, one who is generous (free from meanness) in behaviour, and urban-oriented in conduct (*paura-prakṛti-saṁgatam*).

30. One who is not quarrelsome by nature (so as to be involved in quarrels always) or one who does not indulge in hostilities without (sufficient) reasons, or one who is not ruffled in any circumstance (i.e., does not get unnecessarily excited), on the other hand, one who always engages himself in acts in conformity with the sacred tradition (*śrutānubandhi*) or imbued with motive of welfare (*śubhānubandhi*) and has limited number of enemies, and one who is proficient in different branches of knowledge.

सेनाया लक्षणमभिधाय सेनापतेरपि सप्तदशश्लोक परिकल्पितकुलकेन लक्षणमभिधातुमाह—कुलोद्गतमित्यादि। कुलोद्गतमुभयकुलविशुद्धान्वयोत्पन्नम्। जानपदं स्वजनपदभवम्। मन्त्रज्ञं पञ्चाङ्गमन्त्राभिज्ञम्। मन्त्रसम्मितम्। मन्त्रिसम्मतमिति पाठे मन्त्रिणामभिमतम्। स्वामिहितत्वात्। दण्डनीतेः शास्त्रस्य प्रयोक्तारमध्येतारं च साधु यथा भवति तथा तत्त्वतः ॥ २७ ॥

सत्त्वेत्यादि। इति प्रतीतम् ॥ २८ ॥

मित्रवन्तमिति। शेषं इत्यपि प्रतीतम् ॥ २९ ॥

नित्याकारणवैराणामिति। अत्रानाविलमित्यस्तब्धम् निर्दोषमिति यावत्। श्रुतानुबन्धिकर्माणं शास्त्रानुगतकर्मकारिणम्। शेषं प्रतीतम् ॥ ३० ॥

आरोग्यं[58] व्यायतं शूरं त्यागिनं कालवेदिनम्।
कल्याणाकृतिसम्पन्नं [59]स्वसम्भाव्यपराक्रमम् ॥ ३१ ॥
गजाश्वरथचर्यासु शिक्षितं सुजितश्रमम्।
[60]बाहुयुद्धनियुद्धेषु शीघ्रप्रक्रमणक्षमम्[61] ॥ ३२ ॥
युद्धभूमिविभागज्ञं सिंहवद् दृढविक्रमम्।
अदीर्घसूत्रं निस्तन्द्रम[62]मर्षणमनुद्धतम् ॥ ३३ ॥

---

[58] अरोगं [59] सत्सम्भाव्य

[60] बाहुयुद्धे नियुद्धे च

[61] शीघ्रप्रक्रमणक्षमम्

[62] निस्तन्द्रम ; निस्तन्द्रमुत्थापनममर्षणम्

हस्त्यश्वरथशस्त्राणां सम्यग् लक्षणवेदिनम् ।
[63]चरस्थिरविवेकज्ञं कृतज्ञमनुकल्पकम्[64] ॥ ३४ ।
[65]धर्मकर्मसमायोगं कुशलं कुशलानुगम् ।
सर्वयुद्धक्रियोपेतं शक्तं तत्परिकर्मणि ॥ ३५ ।

---

[63] नरान्तरविवेकज्ञं [64] मनुकम्पकम्
[65] वर्मकर्मसमायोगे

31. One who is healthy (free from diseases), stout, valorous, kind-hearted, acquainted with the advantages of acting in proper time, dignified in bearing and firmly confident of his own power.

32. One who is perfectly trained in handling war elephants, and horses as well as war chariots, indefatigable, expert in fighting with drawn swords (collectively) and in duel combats (*niyuddha* or *malla-yuddha*) and agile and swift in movements, (in the field of battle).

33. One who is well-informed of the divisions of the field of battle (i.e., about the situation of the different wings of the army), capable of charging the enemy with firm and heroic steps like the lion (which falls on its prey all on a sudden), never losing time for action or prolonging it unnecessarily, always watchful or wide awake (about enemy's movements), neither too soft nor too stiff in attitude.

34. One who is adept in distinguishing the marks and qualities (good or bad) of elephants, horses and weapons as well as of reading the minds of different roving and stationary enemy agents (*carasthira-vivekajña*) and/or of different personnel (associated with the armed forces), one who is grateful and sympathetic to his own men).

35. One who is skilful in taking actions in conformity with injunctions of *dharma* and/or an expert in the use of defensive armours and coats of mail (*varma-karma*) and is associated with similarly skilled followers and is expert in fighting and supervising all forms of warfare.

आरोग्यमिति । आरोग्यं अरोग एव अनामयम् । व्यायतमिति प्रांशुम् । शेषं प्रतीतम ॥ ३१ ॥

गजाश्वेति । गजाश्वरथानां चर्यासु गतिषु शिक्षितम् । सुजितश्रमं पराभूतपरिश्रमम् । नियुद्धं मल्लयुद्धम् । शेषं स्पष्टम् ॥ ३२ ॥

युद्धभूमीति । निस्तन्द्रमनालस्यम् ॥ निस्तन्त्र इति मुद्रितपुस्तकपाठः न समीचीनः । शेषं प्रतीतम् ॥ ३३ ॥

हस्त्यश्वरथशस्त्राणामित्यादि । इति प्रतीतम् ॥ ३४ ॥

धर्मकर्मसमायोगमिति । धर्मेण समायोगः सम्बन्धो येषां कर्मणां तत्र कुशलम् । शेषं प्रतीतम् ॥ ३५ ॥

स्वभावचित्तज्ञतया युक्तमश्वनृदन्तिनाम्[66] ।
तन्नाम्नां चापि वेत्तारं तद्विधानोपपादकम् ॥ ३६ ।
देशभाषास्वभावज्ञं लिपिज्ञं सुदृढस्मृतिम् ।
निशाप्रचारकुशलं कुशलज्ञान[67]निश्चितम् ॥ ३७ ।
उदयास्तमयज्ञानं[68] नक्षत्राणां ग्रहैः सह[69] ।
दिग्देशमार्ग[70]विज्ञानसम्पन्नं तन्निषेवितम्[71] ॥ ३८ ।
क्षुत्पिपासा[72]श्रमत्रासशीतवातोष्णवृष्टिभिः[73] ।
अनाहितभयग्लानिं[74] सत्पुंसाममयप्रदम् ॥ ३९ ।
भेत्तारं[75] परसैन्यानां[76] दुःसाध्या[77] हितनिश्चयम् ।
भग्नानांञ्च[78] स्वसैन्यानां सम्यग्विष्टम्भलक्षणम्[79] ॥ ४० ।

---

[66] युक्तमश्वेषु दन्तिषु

[67] शकुनज्ञान ; संज्ञानगतिनिश्चितम् ; कुलज्ञानविनिश्चितम्

[68] मयज्ञम [69] सदा

[70] काल [71] तज्ज्ञसेवितम् ; तज्ज्ञसेवितम्

[72] क्लमत्रास ; प्रकृष्टाश्वशीतवातोश्मावृष्टिभिः

[73] वृत्तिभिः [74] भयत्रास ; क्रान्तिं तत्संविमाभय ; समुद्विग्ना

[75] हन्तारं [76] परपैक्ष्यानां

[77] दुःसाधाहित [78] भग्नानां च ; हतानां च ; हतान्तं च

[79] सोढुविष्ट ; सम्यग्विष्टम्भनक्षमम्

36. One who is gifted with the power of reading the mind (or mood) of war horses and elephants as well as of men (military personnel), and also is acquainted with their respective names (and designations), and is capable of remedying their needs and wants.

37. One who knows languages and characteristic traits of peoples of different countries and also of their scripts (i.e., able to decipher and read them), who possesses strong retentive memory, capability of conducting nocturnal actions (*niśāpracāra*), and of (*śakunajñana*) or knowledge of interpreting the language of (ominous) birds (foreboding good or evil).

38. One who knows the time of sunrise and sunset as well as of the position of stellar constellations and planets (and their influences) and is acquainted with directions and routes of march and assisted by experts in such matters.

39. One who is never frightened or fatigued by hunger or thirst, strain (of march), of fear (of enemy actions), as also of inclemencies of weather (i.e., extremely hot, cold, stormy or rainy), and one who is

capable of assuring and inspiring others (in the company to endure such inconveniences).

40. One who can break through enemy formations and undertake to perform difficult tasks confidently, and who can restore confidence among such men of his own ranks, who feel frustrated or depressed.

स्वभावचित्तज्ञतयेत्यादि। तद्विधानं हस्त्यश्वादीनां चादनकूदनिकादि[15] (चादनचोदनिकादि) तदुपपादकम्। शेषं प्रतीतम् ॥ ३६ ॥

देशभाषास्वभावज्ञमिति। उदयास्तमयज्ञानमिति। क्षुत्पिपासेत्यादि। भेत्तारं परसैन्याना-मिति ॥ इति प्रतीतम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

[15] विधानं ऊदनिका; चादनं ऊदनिका; चीदनिमौदनिका; चादनीमौदनिका

अवस्कन्दाभियोक्तारं[80] भेत्तारं[81] सैन्यकर्मणाम्।
चरदूतप्रचारज्ञं[82] महारम्भफलोपगम् ॥ ४१ ।
शश्वत्स्वसिद्धिकर्माणं[83] सिद्धिकर्मनिषेवितम्[84]।
परापरेषु[85] निर्विण्णं श्रीमद्राज्यार्थं[86]तत्परम् ॥ ४२ ।
[87]इत्यादि लक्षणोपेतं कुर्वीत ध्वजिनीपतिम्।
ध्वजिनीश्च सदोद्युक्तः [88]स गोपयेद् दिवानिशम् ॥ ४३ ।
नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत्।
सेनापतिस्तत्र तत्र गच्छेद् व्यूहीकृतैर्बलैः ॥ ४४ ।

इति सेनापतिप्रचारो नामैकोनत्रिंशं प्रकरणम् ॥

---

[80] मन्तारं; योक्तारं [81] वेत्तारं

[82] परवृत्तप्रचारज्ञं; चरवृत्तप्रपञ्चज्ञं

[83] सिद्धकर्माणं सिद्धकर्म [84] निषेवणम्

[85] पराभवेष्वनि [86] श्रीमद्राराजार्थ

[87] इत्येवलक्षणो [88] स गोपायेद्

41. One who is capable of protecting the camp (from sudden enemy actions), of detecting the secret movements of the armed forces as well as of the enemy agents and of undertaking ventures of great promise (i.e., likely to yield important benefits).

42. One who always strives for achieving success in ventures undertaken and in consolidating the gains of successful achievements (*śiddha-karma*), one who is never depressed or disengaged even when defeated, rather who always exerts in protecting the interests of the ruler.

43. A man possessing these qualities should be chosen as the Commander-in-chief of the army (*dhvajinīpati*), as under such a leader the army becomes powerful and ever alert, and the kingdom is always protected.

44. In riverine or island forts, hill forts or forest forts, wherever any sign of danger is observed, the Commander-in-chief should march to that direction with the forces in regular formation (*vyūhīkṛtabala*).

अवस्कन्दाभिगोप्तारमित्यादि। अवस्कन्दः सौप्तिकादिकः, तत्र गोप्तारं रक्षकम्। वेत्तारं सैन्यकर्मणां सैन्यकर्माभिज्ञम्। भेत्तारमिति मुद्रितपुस्तकपाठो न सम्यक् ॥ ४१ ॥

शश्वत्संसिद्धकर्माणमिति। श्रीमद्राज्यार्थतत्परमिति। श्रीमतः राज्ञः विजिगीषोरिति यावत्, राज्यार्थे राज्यरूपविषये तत्परमिति ॥ ४२ ॥

इत्येवं लक्षणोपेतमित्यादि ॥ शेषं प्रतीतम् ॥ ४३ ॥

नद्यद्रिवनदुर्गेषु यत्र यत्रेत्यादि। व्यूहीकृतैर्बलैः व्यूहरचितैर्बलैः। अन्यत् प्रतीतम् ॥ ४४ ॥

इति सेनापतिप्रचारो नामोनत्रिंशं प्रकरणम् ॥

३०। प्रयाणव्यसनरक्षण प्रकरणम्।

नायकः पुरतो यायात् प्रवीरपृतनावृतः।[89]
मध्ये कलत्रं स्वामी च कोशः फल्गु महद्धनम्[90] ॥ ४५ ।
पार्श्वयोरुभयोरश्वा वाजिनां[91] पार्श्वयो रथाः।
रथानां पार्श्वयोर्नागा[92] नागानां चाटवीबलम् ॥ ४६ ।

[89] प्रवीरपुरुषावृतः ; पुरुषायुतः

[90] फल्गु च यद्बलम् [91] अश्वानां

[92] पार्श्वतो नागा

Prakaraṇa 30

Prayāṇavyasana-rakṣaṇa. (Remedies of lapses in marches)

45-46. While on march the regiment leaders (*nāyaka*) with veteran heroic soldiers should compose the vanguard and the king with his camp, including the women of the harem, treasury and (royal) bodyguards, should be in the middle, flanked on either side by the cavalry, the cavalry by the charioteers, the charioteers by the elephant forces and the elephant forces by the forester companies.

स्कन्धावारप्रयाणमभिधातुमाह—नायक इत्यादि। नायक इति आतावेकवचनम्। सहस्रबलनेता नायकः स प्रवीरपुरुषावृतः पुरतोऽग्रतो यायात्। प्रवीरपृतनावृतः इति मुद्रितपुस्तकपाठे तु प्रकृष्टा वीरा यत्र सा तत्र भूतया पृतनया सेनया आवृतः सन्। मध्ये स्कन्धावारस्य कलत्रमन्तःपुरादिसकलं

पुरस्सारं, स्वामी च विजिगीषुः। कोशः समुदयः। फल्गु च यद्बलमसारं[16] च यद्बलं तच्च मध्ये यायादिति। महद्धनमिति पाठो न सम्यक्॥ ४५॥

पार्श्वयोरित्यादि। इति प्रतीतम्॥ ४६॥

[16] यद्बलं ससारं च

पश्चात् सेनापतिः सर्व[93] पुरस्कृत्य कृती स्वयम्।
यायात् सन्नद्ध[94]सैन्यौघः खिन्नानाश्वासयञ्छनैः॥ ४७।

---

[93] सार्द्धं पुरस्कृत्य क्षितीश्वरम्   [94] सन्नद्ध

47. The Commander-in-chief should keep himself at the rear (of the composition). with all expert warriors before him, and he would lead the well-equipped army providing inspiration to the tired (or wounded) members.

पश्चात् सेनापतिरित्यादि। इति प्रतीतम्॥ ४७॥

यायाद् व्यूहेन महता मकरेण पुरो भये।
श्येनेनोभयपक्षेण[95] सूच्या वा धीरवक्त्रया[96]॥ ४८।

---

[95] श्येनेनोद्धृतपक्षेण   [96] वीरवक्त्रया

48. Anticipating danger ahead, the army should be arrayed in the formation of *Makara-vyūha* of wide front, or that of an eagle (or hawk) with outstretched wings (*śyenenoddhṛtapakṣa*), and in case of narrow defiles in the formation of *Sūcīvyūha* (pointed like a needle).

प्रयाणप्रयोगक्रममभिधातुमाह—यायादित्यादि। महता मकरव्यूहेन वक्ष्यमाणलक्षणेन पुरो भये यायात्। श्येनेन व्यूहेनोद्धतपक्षेण[17] बलवत्पक्षेणानीकेन[18] तथा सूच्या व्यूहेन वा धीरवक्त्रया[19] धीरा वक्त्रे अग्रे यस्यास्तया वेति॥ ४८॥

[17] 'श्येनेनोभयपक्षेण' इति मुद्रितपुस्तकपाठो न सम्यक्

[18] बलवत्पक्षानीकेन   [19] 'धीरवक्त्रया' पाठो इत्यपि न समीचिनः

पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितम्[97]।
सर्वतः सर्वतोभद्रं भयव्यूहं[97a] प्रकल्पयेत्॥ ४९।

---

[97] सन्निभम्   [97a] भये व्यूहं

49. Anticipating danger from the rear, the army should be arranged in the formation of *Sakaṭavyūha* (chariot or cart shaped), and if danger is apprehended from either flank, it should be in the formation known as *Vajravyūha* (or of the shape of the thunderbolt), and in case of probability of danger from all sides it should be designed in the *Sarvatobhadra* formation.

पश्चाद्भये त्वित्यादि । पश्चाद्भये तु शकटं व्यूहं प्रकल्पयेत् । पार्श्वयोर्भये वज्रसंज्ञकं व्यूहं सर्वतो भये सर्वतोभद्रं व्यूहं प्रकल्पयेदिति सम्बन्धः ॥ ४९ ॥

कन्दराशैलगहन[98] निम्नगावनसङ्कटे ।
दीर्घेऽध्वनि[99] परिश्रान्तं क्षुत्पिपासाहितक्लमम्[100] ॥ ५० ॥
व्याधिदुर्भिक्षमरकैः पीडितं[101] दस्युविद्रुतम् ।
पङ्कपांशुजलस्कन्नं[102] व्यस्तं पुञ्जीकृतं पथि ॥ ५१ ॥
प्रसुप्तं भोजनव्यग्रमभूमिष्ठमसंस्थितम् ।
[103]चौराग्निभयवित्रस्तं वृष्टिवातसमाहतम्[104] ॥ ५२ ॥
एवमादिषु जातेषु व्यसनेषु[105] समाकुलम् ।
स्वसैन्यं साधु[106] रक्षेत् परसैन्यञ्च घातयेत् ॥ ५३ ॥

इति प्रयाणव्यसनरक्षणं नाम त्रिंशं प्रकरणम् ॥

---

98 कन्दरे शैलगहने 99 दीर्घाध्वनि
100 हितक्लमम् ; हितश्रमम्
101 मरकपीडितं ; मरणपीडितं ; मरकैः पीडितं दस्युभिर्द्रुतम्
102 पांसुजलच्छन्नं ; जलाच्छन्नं
103 चोराग्नि ; चौराग्नि 104 समाहतम् ; समाकुलम्
105 व्यसनेष्वसमाकुलः 106 संरक्षेत्

50-51. Due care should be taken in protecting the armed forces while marching up and down through hilly regions infested with caves and crevices or through dense forests, and while the forces are tired of long marches suffering from hunger, thirst and physical strain, when there is shortage of provisions or outbreak of diseases and deaths among them, or if they are harassed by robbers, or compelled to drink impure water, and if the forces are scattered (units being separated from one another) or huddled together (i.e., the formation is disturbed).

52-53. If the soldiers tend to fall asleep (unguarded) or become eager for their meals or feel uncomfortable in inhospitable regions, and thus are lacking in alertness, or if they are afflicted with (unusual feelings of) fear of thieves, fire, rain, or storm, or such other distresses, the wise *vijigiṣu* should take necessary measures for the protection of his own forces, and for the destruction of the forces of the enemy.

व्यसने रक्षणमधिकृत्याभिधातुमाह—कन्दरेत्यादि । कन्दरः पर्वतदरी तत्र । शैलः पर्वतस्तैर्गहने प्रचुरे । निम्नगा नद्यः, वनानि वृक्षगुल्मादिभिर्दुर्गाणि, तैः सङ्कटे सङ्कीर्णे प्रवेशोऽवस्थानं बलस्य व्यसनमुच्यते । तथा दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासाहितश्रमम् । क्षुत्पिपासाहितक्लममिति मुद्रितपुस्तकपाठे क्लमः क्लान्तिः यस्य तत् ॥ ५० ॥

सङ्कटान्यभिधातुमाह—व्याधीत्यादि। प्रसुप्तमित्यादि। एवमादिष्वित्यादि। इति प्रतीतम ॥ ५१ ॥ ५२ ॥ ५३ ॥

इति प्रयाणव्यसनरक्षणं नाम त्रिंशं प्रकरणम् ॥

३१। कूटयुद्धविकल्प प्रकरणम्।

विशिष्टो देशकालाभ्याम्भ्यां भिन्नारिप्रकृतिर्बली।
कुर्यात् प्रकाशयुद्धञ्च[107] कूटयुद्धं विपर्यये[108] ॥ ५४।

---

[107] युद्धं हि ; युद्धं तु [108] विपर्ययः

Prakarana 31

Kūṭayuddha vikalpa (Deceitful tactics in warfare).

54. When a *vijigīṣu* finds himself endowed with requisite powers and with favourable situation as regards time and place, and the *prakṛti* or elements of the enemy disaffected and lacking in coordination (*bhinnā*), he may indulge in open war (*prakāśayuddha*), otherwise i.e., the reverse being the condition, *kūṭayuddha* or deceitful war (i.e., by dubious methods) should be adopted.

कूटयुद्धविकल्पमभिधातुमाह—विशिष्ट इत्यादि। देशकालबलाभ्यामिति द्रष्टव्यम्। देशबलेन कालबलेन च यातव्यबलापेक्षया विशिष्टोऽधिकः। भिन्नारिप्रकृतिरिति भिन्ना यातव्यस्य मित्रादि-प्रकृतयो येन। बली उपचितशक्तित्रयः। एवम्भूतो विजिगीषुः प्रकाशयुद्धं कुर्यात्, विजयस्यासन्दिग्ध-त्वात्। कूटयुद्धं तु वक्ष्यमाणलक्षणं विपर्यये पूर्वोक्तस्यान्यथात्वे कुर्यादिति सम्बन्धः ॥ ५४ ॥

तेष्ववस्कन्दकालेषु[109] परं हन्यात् समाकुलम्[110]।
अभूमिष्ठं सभूमिष्ठो[111] स्वभूमौ चोपजायते[112] ॥ ५५।
प्रकृति प्रग्रहाहृष्ट[113] स्पर्शो[114]र्वनचरादिभिः।
हन्यात् प्रवीरपुरुषैर्भङ्गदानापकर्षणैः ॥ ५६।

---

[109] साध्ववस्कन्दकाले हि [110] समाहितम्
[111] अभूमिष्ठं हि भूमिष्ठं ; अभूमिष्ठं हि स्वभूमिष्ठं
[112] तद्भूमौ चोपजापतः [113] हाकृष्टं
[114] पार्ष्णी

55. When the enemy forces are found to be unprepared (or resting in camps), and/or in unfavourable ground or situation (*abhūmiṣṭha*), the

vijigiṣu should take prompt steps for annihilating them (by surprise attack). Even if they are on their own ground (favourable situation) steps should be taken for alienating them by harassment in their own land.

56. When the *vijigiṣu* is able to alienate the foresters and other border tribes (forces) of the enemy through bribes and harassments, the elements of state (*prakṛti*) of the enemy are also harassed, he should charge with his own heroic soldiers and annihilate the enemy.

तेष्वित्यादि। तेष्ववस्कन्दकालेषु अनन्तरोक्तबलव्यसनकालेषु परं हन्यात् समाकुलमिति प्रतीतम्। अभूमिष्ठं युद्धव्यायामायोग्यभूमिष्ठम्। स्वभूमिष्ठः युद्धयोग्यभूमिस्थितः। तं तद्भूमौ यातव्यानुकूलभूमौ वा उपजापः प्रकृतिभेदस्तस्मात्[20] ॥ ५५ ॥

प्रकृतिप्रग्रहेत्यादि। प्रग्रहाहृष्टं इति मुद्रितपुस्तकपाठे अहृष्टमित्यर्थः क्षुब्धम्। पुनरपि स्पर्शैः पाठे स्पर्शः धर्तव्यः अन्यत् प्रतीतम् ॥ ५६ ॥

[20] 'अभूमिष्ठं सभूमिष्ठं स्वभूमौ चोपजायते' इति मुद्रितपुस्तकपाठो न समीचिनः

पुरस्तु[115] दर्शनं दत्त्वा तल्लक्ष्यकृतनिश्चयात्[116]।
हन्यात् पश्चात् सवीरेण[117] बलेनोत्पत्य[118] वेगिना ॥ ५७ ॥
पश्चाद्वा सङ्कुलीकृत्य हन्यात् सारेण पूर्वतः।
आभ्यां पार्श्वाभिघातौ[119] तु व्याख्यातौ कूटयोधने ॥ ५८ ॥

---

[115] पुरस्ताद्
[116] तल्लक्ष्यकृतनिश्चयः
[117] प्रवीरेण
[118] नौत्पीड्य ; नाप्लुत्य
[119] पार्श्वविघातौ

57. With the demonstration of a frontal attack (as a ruse) and making the enemy firmly believe that (thus keeping the enemy forces engaged in that direction), the *vijigiṣu* should employ his heroic band of soldiers to charge swiftly (to surprise) the enemy forces from the rear.

58. In the same way making the enemy concerned about his rear (i.e., making the ruse of a rear attack and keeping the enemy engaged in that direction) the enemy may be assailed by frontal attack with the best of soldiers. Similar methods of *kūṭayuddha* may be adopted on either flank (right and/or left).

पुरस्ताद्दर्शनमित्यादि। पुरस्तादग्रतो योद्धुमिति दर्शनं स्वसैन्यैर्दत्त्वा, तल्लक्ष्यकृतनिश्चयमिति, येन विजिगीषुबलेन दर्शनं दत्तं तल्लक्ष्यकृतो निश्चयो येन यातव्येन तम्, पश्चादिति गत्वा प्रवीरेण[21] श्रेष्ठबलेन वेगवता बलेन हन्यादिति सम्बन्धः ॥ ५७ ॥

[21] 'सवीरेण' इति मुद्रितपुस्तकपाठः।

पश्चाद्वेति। पश्चाद्वा सङ्कुलीकृत्य समाकुलं कृत्वा पूर्वतोऽग्रतः सारेण बलेन हन्यादिति। आभ्यां पश्चात्पुरोभिघाताभ्यां पार्श्वाभिघातौ व्याख्यातौ ज्ञेयौ। तद्यथा—वामतो बलं प्रदर्श्य दक्षिणतः, दक्षिणतो बलं प्रदर्श्य वामतो हन्यादित्यर्थः। कूटयोधने कूटयुद्धे ॥ ५८ ॥

पुरस्ताद्द् विषमे देशे पश्चाद्धन्यात्तु वेगवान् ।
पुरः पश्चाच्च विषम एवमेव तु पार्श्वयोः ॥ ५९ *

---

* This line and the following three lines have been omitted in the B.I. text but commented upon in the *ṭikā*, hence the renumbering of the *Ślokas*.

(मुद्रितपुस्तके श्लोकस्य शेषार्द्धं पतितम्; शेषार्द्धस्थाने श्लोकान्तरस्य शेषार्द्धं मुद्रितमिति ।)

59. If the region ahead (of the army of the *vijigiṣu*) is considered difficult or unfavourable, the *vijigiṣu* should swiftly change over to charging from the rear, and from the front, if the region behind is unfavourable. So also with regard to sides (i.e., the position being difficult on left, charge should be made from the right and *vice versa*).

पुरास्तादिति । पुरस्तादग्रतो विषमे दुर्गमे देशे पश्चाद् हन्यात् वेगवान् विजिगीषुः । पश्चाच्च विषमे पुरोऽग्रतो हन्यात् । एवमेव तु पार्श्वयोरिति, वामतो विषमे दक्षिणतो हन्याद् दक्षिणतो विषमे वामतो हन्यादिति ॥ ५९ ॥

प्रथमं योधयित्वा वा दूष्यामित्राटवीबलैः ।
श्रान्तं सन्नं निराक्रन्दं हन्यादश्रान्तवाहनः ॥ ६० *

---

* श्लोकोऽयं मुद्रितपुस्तके पतितः

60. The *vijigiṣu* should at first engage his forces composed of soldiers condemned, alienated from enemies and foresters in the encounter with the enemy forces and thus get them tired, exhausted and cut off from their base and then assail upon the enemy with his own troops fresh with energy.

प्रथममित्यादि । प्रथमं पूर्वमेव दूष्यामित्राटवीबलैर्योधयित्वा युद्धं कारयित्वा श्रान्तं जातश्रमं सन्नं विषण्णं निराक्रन्दं मित्रबलरहितं, आक्रन्दो मित्रविशेष एवोच्यते । हन्यादश्रान्तवाहन इति प्रतीतम् ॥ ६० ॥

दूष्यामित्रबलैर्वाऽपि भङ्गं दत्त्वा प्रयत्नवान् ।*
जितमित्येव विश्वस्तं हन्याच्छत्रु व्यपाश्रयः[120] ॥ ६१ ।

---

* अयमपि श्लोकस्य पूर्वार्द्धं मुद्रितपुस्तके पतितमिति ।

[120] हन्यात् सत्रव्यपाश्रयः ; सत्त्वव्यपाश्रयः ; छत्रव्यपाश्रयः

61. Getting his own forces of condemned and alienated soldiers defeated in the encounter, when the enemy feels confident that "I am victorious" and retires to his *satra* (fort) (to relax), the energetic *vijigiṣu* should fall upon him and crush him.

दूष्यामित्रबलैरिति । दूष्यामित्रबलैः करणभूतैर्भङ्गं दत्त्वा प्रयत्नवानिति आत्मनः प्रकृष्टो यत्नोऽभ्यासी, जितमेवेति विश्वस्तं परं हन्यात् छत्रव्यपाश्रयो बलादिच्छन्नः ॥ ६१ ॥

स्कन्धावारपुरग्राममास्यमानं प्रजाविषु[121] ।
विलोम्य[122] तु परानीकमप्रमत्तोऽवनाशयेत्[123] ॥ ६२ ।

[121] सस्यसार्थप्रजादिषु ; प्रजाविषु

[122] विलोपनपदानीक

[123] मत्तो विनाशयेत्

62. Enticing away the subjects of the enemy out of their fortifications and normal stations-cities and markets, villages and pastures (through secret agents) the cool-headed *vijigīṣu* should plunder and destroy the dominion of the enemy.

स्कन्धावारेति । स्कन्धावारपुरग्रामसस्यसार्थं प्र(व्र)जादयः प्रतीताः । स्कन्धावारपुरग्राममास्यमानमिति मुद्रितपुस्तकपाठो न सम्यक् । तेषु विलोपनपरं लुण्ठनव्यापृतमनीकं परं स्वयमप्रमत्तो विनाशयेत् इति ॥ ६२ ॥

फल्गुसैन्यप्रतिच्छन्न[124] कृत्वा वा सारवद्बलम् ।
मर्दयन्तं[125] तद्विलोपे प्रसेवुत्पत्य[126] सिंहवत् ॥ ६३ ।

[124] परिच्छन्ने

[125] मन्दयत्नं तद्विलोपे ; मन्दमन्नविलोपने ; तद्विलोपे समासक्तं

[126] हन्यादुत्प्लुत्य

63. If by defeating the ordinary (or second rate soldiers *phalgu-sainya*), which had been kept in the front to cover up his (*vijigīṣu's*) superior troops, the enemy becomes complacent and slack in his efforts, the *vijigīṣu* should fall upon him like the lion.

फल्गुसैन्यप्रतिच्छन्नमिति । फल्गु असारं सैन्यं तेन प्रतिच्छन्नं सारवद्बलं कृत्वा तेन तद्विलोपे फल्गुबलविनाशे समासक्तमासक्तिं गच्छन्तं हन्यादुत्प्लुत्य सिंहवदिति प्रतीतम् ॥ ६३ ॥

मृगयासम्प्रयुक्तं[127] वा हन्याच्छन्नं व्यपाश्रयः[128] ।
अथवा गोग्रहाकृष्ट्या तल्लक्ष्यं[129] मार्गबन्धनात् ॥ ६४ ।

[127] सम्प्रसक्तं

[128] च्छन्नमपाश्रयम् ; हन्यातच्छन्नव्यपाश्रयः हन्यात्सत्त्वसमाश्रयः

[129] तलक्ष्यं

64. The enemy deeply addicted to hunting may be assailed upon within the forest by secret means (i.e., from a hidden place) or by cattle raids in order to engage his attention (so that efforts of the enemy are directed in its resistance), and then blockading his routes from all sides.

मृगयासम्प्रसक्तं वेत्यादि। मृगयासम्प्रसक्तं पापर्ध्यां सक्तं वा हन्यात्कान्यपाश्रयो वनादि-संलीनः। अथवा गोग्रहाकृष्ट्या गोग्रहं कारयित्वा या शत्रोराकृष्टिस्तया करणभूतया तद्रक्षं गोगणकृतवृष्टिं मार्गबन्धनात्[22] हन्यादिति प्रतीतम ॥ ६४ ॥

[22] मार्गवन्धनात्

अवस्कन्दभयाद्रात्रौ[130] प्रजागरकृतश्रमम् ।
दिवा प्रसुप्तं वा हन्यान्निद्राव्याकुलसैनिकम् ॥ ६५ ॥*

---

[130] भयाद् रात्रिं

* This line has been omitted in the B.I. text.

अस्य श्लोकस्य शेषार्द्धं मुद्रितपुस्तके पतितम्।

65. When as a result of nocturnal encounters the enemy troops feel exhausted due to keeping awake at night and fall asleep or feel sleepy in daytime the *vijigiṣu* should suddenly fall upon them to annihilate them.

अवस्कन्दभयादित्यादि। इति प्रतीतम् ॥ ६५ ॥

[131]अहस्सन्नाहतश्रान्तमपराह्णे विनाशयेत् ।
निशि विश्रम्भसंसुप्तं[132] तत् सौप्तिकविधानवित् ॥ ६६ ।
सपादकोशावरणैर्नागैः[133] कुर्यात्तु सौप्तिकम् ।
[134]कोपादुग्रजवोपेतैर्नरैर्वा[135] खड्गपाणिभिः ॥ ६७ ।

---

[131] पूर्वाह्णे आहतं ; अहस्सन्नाहनश्रान्त ; अहः सन्नाहतः आसन्नाहतिविश्रान्त

[132] विस्रम्भसुप्तं वा ; विस्रब्धसुप्तं वा

[133] मार्गैः इति मुद्रितपुस्तकपाठः न सङ्गतः

[134] कुर्यादुग्र ; कौर्यादुग्र [135] नृभिर्वा

66. The enemy troops, wounded or exhausted (in serious combats) in the first half of the day, should be attacked for annihilation in the second half (i.e., before they could recuperate), so also those troops compelled to keep awake due to noctural raids, as advised by experts (in organising nocturnal attacks *sauptika-vidhānavid*).

67. To lead camouflaged elephants equipped with leg-guards (of leather) or swift horses with riders armed with swords, to the enemy camp at night are known as methods of *sauptika* (nocturnal raids).

अहः सन्नाहत इत्यादि। निशीत्यादेः हन्यादिति सम्बन्धः। सौप्तिकलक्षणमनन्तरमेव वक्ष्यते ॥ ६६ ॥

सपादेति। पादानां चर्ममयाः कोशा आवरणास्तत्सन्नाहाः। तत्र युक्तैर्नागैः सौप्तिकं सुप्तवध-विनाशं कुर्यात्। अश्वैर्वाप्रजवोपेतैरतिवेगिभिः। नरैर्वा खड्गपाणिभिः सौप्तिकं कुर्यादिति सम्बन्धः ॥ ६७ ॥

प्रति सूर्यं [136]महावातं हन्यात् सम्मीलितेक्षणम् ।
[137]इत्येवं कूटयुद्धेन हन्याच्छत्रून् लघूत्थितः ॥ ६८ ।

[136] प्रतिसूर्यमहावातं ; महावातप्रतिसम्मीलितेक्षणम्
[137] निहन्यादिति कूटेन युद्धेनारीन् लघूत्थितः

68. When the enemy troops are found to be afflicted by the scorching rays of the sun or by cyclonic storms, the *vijigīṣu*, consolidating his forces, should assail upon them. These are the methods of *kūṭayuddha* or guileful warfare to be adopted swiftly (*laghūtthita*) in annihilating an enemy.

प्रतिसूर्यमहावातमित्यादि । प्रतिसूर्यमहावातं प्रति सम्मीलितेक्षणं हन्यादिति । एवं कूटेन युद्धेनारिं लघूत्थित इति प्रतीतम् ॥ ६८ ॥

[138]नीहारस्तिमिरं गावः श्वभ्राद्रिवननिम्नगाः ।
वदन्ति सत्रमित्यादि सत्रं सत[139] प्रकीर्तितम् ॥ ६९ ।

[138] नीहारतिमिराङ्गारश्वभ्राग्निवन [139] छद्म -

69. *Satras* or temporary forts, or camouflaged encampments and hiding places, are described to be covered up with mist or smoke-screen, darkness. herds of cattle (a form of camouflage) or mounds of ash or dust (according to a variant reading), caves and pits, fire, forest or low swampy lands. In such *satras* the *vijigīṣu* should take cover (and lie in wait for falling upon the enemy). *Satras* may thus be of seven types.

नीहारेत्यादि । सत् विद्यमानं त्रायति छादयति इति सत्रम् । नीहारो धूमिकः । तिमिरं गावः इत्यत्र तिमिराङ्गारः इति पाठान्तरम् । शेषं प्रतीतम् ॥ ६९ ॥

पुनरावर्तमानस्य निराशस्य तु जीवने[140] ।
अनार्यो जायते वेग इति भग्नं न पीडयेत् ॥ ६९।१ *
अल्पागमातिव्ययता क्षयो वृद्धिर्विपर्यये ।
समायव्ययतास्थानं कर्मसु ह्येयमात्मनः ॥ ६९।२ *
द्वावपि प्रस्तुतौ बध्यप्रमत्तौ व्यवसायवत् ॥ ६९।३ *

* These three verses do not appear in the B.I. text, but included as supplements to *Śloka* 69 on the basis of a manuscript.

[140] जीविते

69/1. The soldiers of the enemy who have turned their backs or have become hopeless of life or have lost their mobility (besieged from all sides) should not be struck down as they have (practically) surrendered (*bhagna*).

69/2. The enemy whose sources of income have dwindled and expenses have increased manifold, are said to be suffering from depletion of finances or financial breakdown (*kṣaya*) and disruption of growth potential (*vṛddhi-viparyaya*), and the

69/3. enemy whose potentiality of income and expenditure as also his dominion and activities stand at par with that of the *vijigiṣu*, both such enemies if found to be seriously hostile, deserve to be assailed and dealt with firmly and energetically.

साधुप्रवृत्तो[141] व्यवसायवर्ती
यानप्रकारेण[142] परं निहन्यात् ।
चरैः समावेदिततत्प्रचारः
शङ्केत तेनैव ततोऽप्रमत्तः[143] ॥ ७० ।

[141] साध्वप्रमत्तो [142] येन प्रकारेण

[143] ततोऽप्रमेयः

70. The wise, cool-headed and energetic *vijigiṣu* should assail upon the enemy by the different methods (of *kūṭayuddha*) on the basis of reports and signals from similarly cool-headed secret agents about the movements of the enemy.

उपसंहरन्नाह—साध्वप्रमत्त इत्यादि। साधु यथा भवति तथा अप्रमत्तः व्यवसायवती व्यवसाये स्थितः ('यान प्रकारेण' इति मुद्रितपुस्तकपाठः न समीचिनः ।) कूटयुद्धादिना परं निहन्याद्विजिगीषुः । चरैः समावेदिततत्प्रचारः शत्रुप्रचारः । शङ्केत शङ्कां कुर्वीत ततो यातव्यात् । तेनैव प्रकारेण प्रतीकारं कुर्वीताप्रमत्तः इति ॥ ७० ॥

नियतमिति[143a] निहन्यात् कूटयुद्धेषु शत्रून्
न हि निरयति धर्मच्छद्मना[144] शत्रुनाशः ।
अव्यक्तिमिव सुप्त[145] पाण्डवानामनीकं
निशि सुनिशितशस्त्रो द्रोणसूनुर्जघान ॥ ७१ ।

इति कूटयुद्धविकल्पो नामैकत्रिंशं प्रकरणम् ॥

इति कामन्दकीये नीतिसारे एकोनविंशः सर्गः ॥ मुद्रितपुस्तकानुसारेण अष्टादशः सर्गः समाप्तः ॥

[143a] सुनियतमुपहन्यात् कूटयुद्धेन ; सुनिपुणमुप ; नियन्तुमुपहन्यात्

[144] धर्मं छद्मना शत्रुघातः [145] मवसुप्तं

71. Thus the *vijigīṣu* should always adopt guileful tactics (*kūṭa-yuddha*) in annihilating his enemy, and by killing the enemy by deception, he will not be trangressing *dharma* (righteousness, for there is nothing unfair in war). The son of Droṇa (Aśvatthāma) killed with his sharp weapons the sons of the Pāṇḍavas completely unawares, while they were asleep.

कूटयुद्धैः शत्रुवधे पापं भवतीत्याशङ्क्याह—नियतमिति। नियतं निश्चयेनोपनिहन्यादुपेत्य-विनाशयेत् शत्रून् कूटयुद्धादिभिः इति शेषः। हि यस्मान्नातिरयति नाच्छादयति धर्मं छद्मना शत्रुनाशः इति वेदार्थः। अत्र दृष्टान्तमपि दर्शयन्नाह—अचकितमिवसुप्तं पाण्डवानामनीकं निशि सुनिशितशरस्त्रो द्रोणसूनुर्जघानेति ॥ ७१ ॥

इति कूटयुद्धविकल्पो नामैकत्रिंशं प्रकरणम् ॥

इति कामन्दकीये नीतिसारटीकायामुपाध्यायनिरपेक्षायां सैन्यबलाबल-सेनापतिप्रचार-प्रयाणव्यसनरक्षण-कूटयुद्धविकल्पो नामैकोनविंशः सर्गः ॥

विंशः सर्गः

(मुद्रितपुस्तकानुसारेण ऊनविंशसर्गः प्रारम्भः)

३२। गजाश्वरथपत्तिकर्मप्रकरणम्।

प्रयाणे पूर्वयायित्वं[1] वनदुर्गप्रवेशनम्[2] ।
अकृतानाञ्च मार्गाणां तीर्थानाञ्च प्रवर्तनम् ॥ १ ।
तोयावतारसन्तारावेकाङ्गविजयस्तथा ।
अभिन्नानामनीकानां भेदनं भिन्नसंग्रहः ॥ २ ।
विभीषिकाविघातश्च प्राकारद्वारभञ्जनम् ।
कोशनीतिर्भयत्राणं हस्तिकर्मप्रचक्षते ॥ ३ ।

[1] पूर्वयायित्वं ; पूर्वभूषणयायित्वं ; पूर्वभीषणयायित्वं

[2] वनदुर्गे प्रवेशनम्

Sarga XX

Prakaraṇa : 32

Gajāśvarathapatti-karma

(Position and functions of the elephant force, cavalry, charioteers and infantry during the march)

1-3. Functions of war elephants (*hastikarma*) have been described to be marching at the front (van of the army composition) during campaigns, dashing into (or making forced entry) into forest-forts (*vanadurga*, situated within dense forests and to be approached by felling trees), opening up of tracks (by clearing road blocks etc) where there is none, negotiating water-logged areas, fording rivers by swimming (in order to attack *jaladurga*, island forts) which is possible only by the one wing of the army (i.e., by the elephant forces), breaking through and dispersing the consolidated ranks (of the enemy forces) and gathering the scattered troops (of the enemy, so that they may not escape), terrorising and trampling upon the soldiers (of the enemy), pulling down the gates of ramparts (of the enemy fortifications) and protecting the treasury (i.e., liquid cash reserves), carried with the army (for meeting expenses during the campaign) and to guard against fear of enemy actions.

कूटयुद्धविकल्पानभिधायानन्तरसर्गेण प्रकाशयुद्धं प्रतिपादयितुं बलाङ्गानां कर्माणि युद्धादि च दर्शयिष्यन् तत्र हस्तिकर्मैव श्लोकत्रयेण दर्शयितुमाह—प्रयाण इति। प्रयाणे पूर्वयायित्वं परेषां त्रासजननार्थम्। वनदुर्गप्रवेशनं हस्तिनां कर्म द्रुमभञ्जनसमर्थत्वात्। अकृतानां च मार्गाणां तीर्थानां च प्रवर्तनं महाकायत्वात् ॥ १ ॥

तोयेति। तोयावतारसन्ताराविति—तोये दुरवतारेऽवतारं कुर्वन्ति, दुस्तरं सन्तारं कुर्वन्ति महाकायत्वादेव। एकाङ्गविजयस्तथा—एकेनैव हस्त्यङ्गेन परसैन्यं जीयत इति। अभिन्नानां परानीकानां भेदनं हस्तिघटाप्रेरणात्[1]। भिन्नानां स्वसैन्यानां विक्षिप्तानां संग्रह एकीकरणं हस्तिघटाभिरेव ॥ २ ॥

विभीषिकेति। विभीषिका हस्तिघटादर्शनेन शत्रूणां भयोत्पादनम्। अभिघातश्च परसैन्यस्य। प्राकारद्वारभञ्जनं परदुर्गस्य। कोशनीतिः कोशनयनम्। प्रयाणे भयत्राणं हस्तिबलेनैव भवति। हस्तिकर्म प्रचक्षते पूर्वाचार्या इति। ॥ ३ ॥

[1] हस्तिघटादिप्रेरणात्

चतुरङ्गस्य सैन्यस्य निषेधो बलरक्षणम्।
अभिन्नभेदनं[3] भिन्नसन्धानं रथकर्म तत् ॥ ३ क *

---

[3] अभेद्यभेदनं····· कर्म च

* रथकर्माभिधायकश्लोकः मुद्रितपुस्तके हस्तलिखितपुस्तकेषु च पतितः; परन्तु श्लोकस्य व्याख्यानं वर्तते।

* This verse is omitted in the B.I. text, but restored from the *ṭīkā*. It is numbered as verse no. 4 in the *ṭīkā*. To maintain the serial numbers of the text we mark it no. 3A.

3A. Functions of the charioteers are to resist the advance of the fourfold army (of the enemy), to protect the troops (of own army), to break through (the enemy) ranks and to find out (and encircle) the scattered enemy soldiers.

रथकर्माभिधातुमाह—चतुरङ्गस्येति। चतुरङ्गस्य सैन्यस्य परानीकस्य निषेधः प्रतिषेधः। बलरक्षणं[2] स्वकीयबलरक्षणम्। अभिन्नभेदनं भिन्नसन्धानं हस्तिकर्मवद् द्रष्टव्यमिति रथकर्मैव तत् ॥ ३क ॥

[2] बलपरीक्षणं

वनदिङ्मार्गप्रचयो[4] वीवधासाररक्षणम्।
अनुयानापसरणे शीघ्रं [5]कार्योपपादनम् ॥ ४ ।
दीनानुसरणं घातः[6] कोटीनां जघनस्य च।
इत्यश्वकर्म पत्तेश्च सर्वदा शस्त्रधारणम् ॥ ५ ।

---

[4] विचयो [5] शीर्षकार्यौ

[6] दीनानुसरणं घातः

4-5. Functions of the cavalry are to find out the directions and routes through forest tracts, to protect the supply line for provisions and also for the support of the allies, to follow the routed troops (of the enemy), to perform swiftly other duties (of carrying messages and errands) and to penetrate into the enemy formation and strike down

solidiers in the front wings (*koṭi*) or at the rear (*jaghana*). Function of the infantry (foot soldiers) is (in addition to what has been stated) to carry arms always.

वनेति। वनानां दिशां मार्गाणां विचयो निरूपणमश्वकर्मेति सम्बन्धः। वीवधासाररक्षणमिति प्रतीतम्। अनुयानापसरणे इति—परसैन्यस्य त्रासोत्पादनार्थमनुपश्चाद्‌यानमनुयानम्, भङ्गदर्शनेन परबलान्याकृष्याभिहन्तुमपसरणम्[3]। शीघ्रंकार्योपपादनमिति शीघ्रं सम्पादनीयानां कार्याणामुपपादनं चाश्वकर्म ॥ ४ ॥

[3] परबलानाकृष्य हन्तुरपसरणम ; परबलमाकृष्य

दीनेति। दीनानुसरणमिति दीनमनुकम्पनीयं यत् स्वबलं[4] (तस्मात् परबलस्य) तस्य दूरापसर्पणार्थमनुपश्चाद्‌गमनमनुसरणम्। भातः कोटीनामिति उभयपक्षस्थित बलानाम्। जघनस्य चेति पृष्ठभागस्थित बलस्य, इत्यश्वकर्म। पत्तेश्च पदातिबलस्य सर्वदा शस्त्रधारणं कर्मेति ॥ ५ ॥

[4] परबलं

शोधनं कूपतीर्थानां मार्गाणां शिबिरस्य च।
यवसादि च यत्किञ्चिद् विज्ञेयं विश्वकर्मवत्[7] ॥ ६ ।

[7] विष्टिकर्म तत्

6. Functions of the *viṣṭi* (labourers, non-combatants or sappers and miners) include purification or repair, rebuilding, etc. of pits and marshes (on the track), construction of roads and setting up or pitching of tents and performing other miscellaneous duties, whatever they may be.

शोधनमिति। कूपतीर्थानां शोधनं खननक्रिया। मार्गाणां शिविरस्य चेति स्कन्धावारस्थानस्य। यवसादिषु पलालादिषु। आदिग्रहणात् काष्ठकण्टकशाखादिषु च यत्किंचित् कर्म विज्ञेयं विष्टिकर्म तत्। विष्टयः कर्मकरा उच्यन्ते। ('विश्वकर्मवत्' इति मुद्रितपुस्तकपाठः न समीचिनः ॥ ६ ॥)

[8]जातिस्थानं वयस्थान प्राणिनां मर्मवेगिता।
तेजः शिल्पं[9] शीघ्रगत्वं स्थैर्यं साधु विधेयिता[10] ॥ ७ ।

[8] जातिः सत्त्वं वयः स्थानं प्राणिता वर्ष्मवेगिता ; प्राणवर्मविवेकिता

[9] शिल्पमुदग्रत्वं [10] विधेयता

7. For all ranks (of men and animals) the following qualities are essential—purity of ancestry (i.e., capability of discharging duties of their respective orders), devotion to duty (*sattvaṁ*), youthful agility (according to age), consciousness of their position (*sthānaṁ*), sincerity (or allegiance), stoutness (of plysique) and swiftness (or promptness in action), virility, skilfulness, (in discharging respective duties), energy, firmness and judiciousness (in determining the line of action).

बललक्षणान्यभिधातुमाह—जातिरिति। जातिरिति प्रत्येकं यथोचित[5] शुद्धता। तद्यथा—मनुष्याणां जातिरुभयकुलविशुद्धत्वम्[6]। हस्तिनां भद्रादिका अश्वानां सुभूमिजत्वम्। रथानां

सारदार्वादिकारुघटितत्वं च। सत्त्वमुत्तमत्वम्। वय इति पूर्वं वयस्तरुणत्वमित्यर्थः। स्थानमुत्पत्तिस्थानस्योत्तमत्वम्। प्राणिता बलवत्त्वम्। वर्ष्म शरीरप्रांशुता[7]। वेगिता वेगवत्त्वम्। ('जातिस्थानं', 'प्राणिनां', 'मर्मवेगिता' इति मुद्रितपुस्तकपाठा न समीचिनाः।) तेजस्तैक्ष्ण्यम्। शिल्पमिति स्वे विषये[8] कृतविद्यता। उदग्रत्वमुन्नतत्वम्। स्थैर्यं स्थितेरविचलत्वम् साधुविधेयता साधु यथा भवति तथोक्तकारिता ॥ ७ ॥

[5] यथास्थित [6] जातिः विशुद्धकुलत्वम्

[7] शरीरिणां प्रांशुता [8] स्वरथाश्वरथे विषये ; स्वशस्त्राश्वरथे विषये

स्वव्यञ्जनाचारवतां[11] पत्त्यश्वरथ[12]वाजिनाम्।
इति लक्षणमेतेन युक्तान्[13] कर्मसु योजयेत् ॥ ८ ।

---

[11] सुव्यञ्जनाचारतेति [12] पत्तिकुञ्जर

[13] युक्तं

इति गजाश्वरथपत्तिकर्माणिनाम द्वात्रिंशं प्रकरणम् ॥

8. The *vijigīṣu* should carefully observe the qualities and behaviour of the ranks of his infantry, charioteers, elephant forces and cavalry and see that they (the respective contingents) are endowed with these essential features, and then only he would deploy them to their respective duties.

स्विति। सुव्यञ्जनाचारवत्तेति शोभनानि व्यञ्जनानि लक्षणानि आचारश्च येषां तेषां भावस्तत्ता। पत्त्यश्वरथदन्तिनामिनि लक्षणम्—एवम्प्रकारं लक्षणं भवति। एतेन लक्षणेन युक्तान् कर्मसु योजयेदिति प्रतीतम् ॥ ८ ॥

इति गजाश्वरथपत्ति कर्मप्रकरणम् ॥

३३। पत्त्यश्वरथगजभूमि प्रकरणम्।

[14]सस्थूणछिन्नवल्मीकवृक्षगुल्मापकण्टका।
सापसारा पदातीनां भूर्नैव[15] विषमा मता ॥ ९ ।

---

[14] सस्थूलस्थाणुवल्मीक [15] भूर्णातिविषमा

Prakaraṇa 33

Pattyaśvarathagaja-bhūmi

(Tracks convenient for movement of infantry cavalry, contingents of chariots and elephants)

9. The track for marching the army or infantry should be cleared

of stumps of trees, stone and earth mounds, shrubs and bushes free from thorns, (in order that they may hide themselves), but it must be provided with routes for retreat (if necessary) and levelled of ups and downs.

इदानीं तु बलानुगुणभूमीरभिधातुमाह[9]—सस्थूलेति। स्थूलाः स्थाणवः स्कन्धाधश्छिन्नवृक्षाः। बल्मीकवृक्षगुल्मादयः प्रतीतास्तैस्सह वर्तत इति। अपकण्टकाः कण्टकरहिताः। सापसारा सहापसारभूम्या वर्तत इति। भूर्भूमिर्नीतिविषमा मता अभिमता पदातीनां युद्धायेत्यर्थः ॥ ९ ॥

[9] बलानां गुणमभिधातुमाह

[16]अल्पवृक्षोपलाच्छिद्रालतिकाविदरा[17] स्थिरा।
निःशर्करा[18] च निः पङ्का सापसारा च वाजिभूः ॥ १० ।

---

[16] स्वल्प [17] क्षिप्रलङ्घनीयदरा ; लङ्घनीविदरा ; क्षिप्रलाऽच्छिद्रा प्रघनाविदरा

[18] निःशर्करा विपङ्का च ; निर्गता च विपङ्का च

10. The track for cavalry movement may have smaller trees and stones, shallow (not deep) pits, which may easily be jumped over by horses, but the ground must be levelled and firm (so that hoofs of horses do not slip), free from gravels or mire, and provided with routes for retreat (*sāpasārā*).

अश्वानुगुणां भूमिमाह—अल्पेति। अल्पा वृक्षा उपलाश्च यस्यां सा। अच्छिद्राः प्रघना। विदरा स्फोटनरहिता। स्थिरा अविशरणा। निःशर्करा सूक्ष्मपाषाणरहिता। निष्पङ्का कर्दमरहिता। सापसारा अपसरणप्रदेशयुक्ता। एवंभूता वाजिनां भूरनुकूलेति ॥ १० ॥

निःस्थाणुसिकतापङ्का निर्वल्मीकोपलासना[19]।
केदारव्रततिश्वभ्रवृक्षगुल्मादिवर्जिता[20] ॥ ११ ।
निरुद्याना[21] निर्दरणा [22]खुरचङ्क्रमणक्षमा।
[23]सर्वप्रचारयोग्या च रथभूः सम्प्रकीर्तिता ॥ १२ ।

---

[19] ला समा [20] गुल्मविवर्जिता

[21] निरुत्खाता [22] दूर

[23] स्थिरा चक्रसहा चैव रथभूमिः प्रकीर्तिता

11-12. The track for movement of chariots is described to be free from sandy soil and also of marshes and mire, from earth mounds or gravels, from water-logged areas and areas infested with wild creepers, pits, trees and thorny bushes. It should be devoid of ditches and caves, and the soil should be advantageous for trotting of horses and hard enough to bear the moving wheels of (horse-drawn) chariots.

रथानुकूलां भूमिमभिधातुमाह—निरिति। इति प्रतीतम् ॥ ११ ॥

निरुत्खातेति। उत्-ऊर्ध्वसाम्यं निम्नत्वात् अधोगतं चक्रं यत्र खातं करोति स उत्खातस्तद्रहिता। निर्दरणा खुरचङ्क्रमणक्षमा स्थिरा, चक्रसहा चैव रथभूः सम्प्रकीर्तितेति प्रतीतम् ॥ १२ ॥

रथानां वाजिनां भूमिः स्थिरा सर्वत्र हस्तिनाम् ।
न हय स्थानभूरेषा न नागानां विदुर्बुधाः ॥ १३ ।
(रथानां शस्यते भूमिर्भुवः सर्वास्तु हस्तिनाम् ।
नागम्या नाम भूरेषां तेन नागाः स्मृता बुधे ॥)*

13. The track suitable for chariots and cavalry is also suitable for elephants, but on the track which is not negotiable by horses or chariots the wise men advise the use of elephants.

* variant of verse no. 13. No commentary of v. 13 appears in the *ṭikā.*

मुद्रितपुस्तके त्रयोदशसंख्यकश्लोकःअसङ्गतत्वात् हस्तलिखितपुस्तकेऽविद्यमानत्वाच्च न व्याख्यातः ॥ १३ ॥

मर्दनीयतरुच्छेद्यव्रततिपङ्कवर्जिता[24] ।
उर्वरा[25] गम्यशैला च विषमा गजमेदिनी ॥ १४ ।

[24] व्रततिः पङ्क

[25] निर्दरा गम्यशैला तु ; सुगम्यशैलाविषमा हस्तिभूरिति कीर्तिता ॥

14. The track for elephant forces may have trees and creepers, which can easily be felled or uprooted (by elephants) and hills and other obstacles which can be comfortably negotiated by them, but it should be free from marshy stretches.

गजानुरक्तां भूमिमभिधातुमाह—मर्दनीयेति । मर्दनीयतरुच्छेद्यव्रततिः, पङ्कवर्जिता, निर्दरा, गम्यशैला च विषमा निम्नोन्नतत्वयुक्तापि गजमेदिनीति प्रतीतम् ॥ १४ ॥

*[द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे ।
भिन्नसंधारणस्तस्मान्न युध्येताप्रतिग्रहः[26] ॥ क ।
नागम्या नाम भूरेषां तेन नागाः स्मृता बुधैः ।
तस्मादेता भुवोऽत्यर्थं नागानां सम्प्रकीर्तिताः ॥ ख ।
तुरगादीनि भिन्नानि प्रतिगृह्णाति यद्बलम् ।
प्रतिग्रह इति ख्यातः स तु कार्यो भरक्षमः ॥ ग ।
तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते ।
तस्माद्विद्वान् जयाकाङ्क्षी न युद्धेताप्रतिग्रहः ॥ घ]

[26] युध्येताप्रतिग्रहः

* These four verses appear in other printed editions within parentheses.

जयार्थी नैव युद्ध्येत मतिमानप्रतिग्रहः ।
युध्येतावश्यकत्वाद्वा तदातिबलवेष्टितः ॥ १५ ।
[27](जयार्थी नृपतिस्तिष्ठेद् दूरं गत्वा प्रतिग्रहः[28] ।
[29]भिन्नं च प्रतिगृह्णीयान्न हि युध्येत तं विना ॥)†

इति पत्त्यश्वरथगजभूमयो नाम त्रयस्त्रिंशं प्रकरणम् ।

---

[27] विजयार्थीति यस्तिष्ठेत्

[28] प्रतिग्रहे ; प्रतिग्रहै [29] भिन्नसन्धारणस्तम्मन्नियुद्धेताप्रतिग्रहः

† a variant of v. 15 mentioned in the *ṭīkā* of the B.I. edition.

A. In the field of battle the king (*vijigiṣu*) should be stationed at a distance of 200 *dhanus* (= 96 *aṅgulas* × 200 = 19200 *aṅgulas*, or 400 yards, taking an *aṅgula* measure to be three-fourth of an inch) away at the back or rear of the army, guarding his soldiers afflicted by enemy action. It may thus be possible for him to reorganise and revitalise his own troops ; but he should never take any action unsupported by his own forces.

B. Wise men advise the use of elephants in negotiating impassable tracts and for this purpose essentiality of the elephant force is well-known.

C. Horses are useful in capturing the defeated enemy soldiers. Thus they are particularly capable of encircling captives of war (*pratigraha*).

D. Even when the enemy's *vyūha* (array of troops) appears to be vacant (or thinned of personnel) or scattered, an intelligent *vijigiṣu* (desirous of victory) should not hazard involvement in the encounter unguarded.

15. An intelligent *vijigiṣu* should stand apart at a fair distance from his warring soldiers and not get involved in any encounter unguarded. He may engage himself only when absolutely necessary, and that too with strong military support.

युद्धे राजस्थानमभिधातुमाह—जयार्थीति । विजिगीषुर्वक्ष्यमाणलक्षणान्तं धनुषां व्यूहस्यालक्षितो-द्देशेन गत्वा (व्यूहस्य लक्षणतो देशतो गत्वा) तिष्ठेत् । परैरुपहतं स्वसैन्यं गृह्णातीति राजा प्रति-ग्रहः । विह्वलं सन्धारयतीति । भिन्नसन्धारणो यस्मात् अप्रतिग्रहस्थानस्थितो राजा न युध्येत । वा यदि आवश्यकत्वात् युध्येत तदा अतिबलवेष्टितः सन् युध्येत इत्यर्थः । तं विना न युध्येत ॥ १५ ॥

इति पत्त्यश्वरथगजभूमयो नाम त्रयस्त्रिंशं प्रकरणम् ।

३४ । दानकल्पनाप्रकरणम् ।

गजेष्वारोपितः साधु [30]शीघ्रयानैरधिष्ठितः ।
यत्र राजा तत्र कोशः कोशाधीना हि राजता ॥ १६ ।

---

[30] शीघ्रगतै

Prakaraṇa 34

Dānakalpanā

(Scales of rewards for the fighting forces)

16. (While on march) Treasure (chests or liquid cash for war purposes) should be placed on elephants guarded by swift riders (cavalry) mounted by honest and trusted men close to the king, for sovereignty is dependent upon treasure (*kośādhīnā hi rājatā*).

युद्धे कोशस्यापि स्थानमभिधातुमाह—गजेष्विति। युद्धे कोशः गजेष्वारोपितः कार्यः सुरक्षो भवतीति। शीघ्रयानं तुरगोष्ट्रादीनां तैरधिष्ठितः रक्षा सौकर्यार्थमेव। यत्र राजा तत्र कोशः। हि यस्मात् कोशाधीना राजता। यस्य कोशः स एव राजा भवतीत्यर्थः ॥ १६ ॥

प्रत्यग्रे कर्मणि कृते श्लाघ्यमानः[31] कृतादरः।
योधेभ्यस्तु ततो दद्यात् को हि दातुर्न युध्यते ॥ १७ ॥

[31] श्लाघमानः

17. Warriors displaying remarkable performances and commendable feats should be offered due recognition and also cash rewards, for, who does not render his best in fighting when liberally rewarded ?

युद्धे कोशविनियोगमभिधातुमाह—प्रतीति। प्रत्यग्रे अभिनवे कर्माणि शत्रुवधादौ कृते निर्वर्तिते। स्वयोगादिभिः श्लाघमानो वर्णयन्। बधे[10] कृतादरः कृतसम्मानः। योधेभ्यः ततो दद्यात् स्वकोशं प्रयच्छेत्। हि यस्मात् को नाम पुरुषो दातुर्विजिगीषोर्न युध्येत, अपि तु सर्वोऽपि युध्यत एव। धनप्राप्तीच्छयेत्यर्थः ॥ १७ ॥

[10] वर्द्धयमानः बध्ये

दद्यात् प्रहृष्टो नियुतं वर्षाणां[32] राजघातिने[32a]।
तदर्धं तत्सुतवधे सेनापतिवधे तथा ॥ १८ ॥
प्रवीराणां तु मुख्यस्य शतं शतगुणं वधे।
तदर्धं कुञ्जरवधे प्रदानं[33] स्यन्दनस्य च ॥ १९ ॥
सहस्रश्च चापिवधे[34] पत्तिमुख्यवधे स्मृतम्[35]।
गवां[36] विंशतिकं सर्वं भोगद्वैगुण्यमेव च ॥ २० ॥

[32] भराणां ; धर्माणां ; शूरानां [32a] राजघातने

[33] प्रदेयं ; प्रधानस्यन्दनस्य च

[34] साहस्रोऽश्ववधः शल्यः ; अश्ववधे देयः

[35] बधः स्मृतः ; बधे तथा

[36] शिरोविंशतिकं शेषं

गुण्यं[37] हेम च कुप्यञ्च यो यज्जयति तस्य तत्।
दद्यात् वस्त्वनुरूपं हि[38] हृष्टो योधान् नराधिपः[39] ॥ २१ ॥

इति दानकल्पनामाम चतुस्त्रिंशं प्रकरणम्।

---

[37] युग्यं [38] वा

[39] योधान् प्रहर्षयेत्

18. Anybody killing the enemy king should be paid a *niyuta* or a million 1000000 coins cheerfully by the *vijigīṣu,* and half the sum (500000) on killing the Crown Prince or the Commander-in-chief. [*Niyuta* has been interpreted as *lakṣaṁ* and *niyutārdhaṁ* as *pañcāśat sahasrāṇi* in the commentary, which is not correct.]

19. One killing the chiefs (or captains) of valiant troops, should be paid a sum of 10,000 (*Śataṁ śataguṇaṁ*) and half of it (5000) for killing an elephant (rider) or a charioteer. [The Commentary states that the reward for killing a charioteer would be a sum of 2500 (*sārdhaṁ sahasradvayam,* which does not follow from the text].

20. One thousand should be the reward for killing a bowman (*cāpivadhe*) or a horseman and one hundred for the captain of an infantry unit (*pattimukhya*), and for the rest (i.e., a foot soldier) a score of cows (*gavām viṁśatikam*) or a sum of twenty per head in cash or alternatively other objects of enjoyment.

21. Heads of cattle, (*yugyaṁ*), gold and raw materials procured as booty or trophy may be allowed to be retained by them who collect or they may be given other things of identical worth cheerfully in order to instil a sense of satisfaction in them.

दानसंख्यामभिधातुमाह—दद्यादिति। शत्रुबले यो राजा[9] तद्घातिने तद्विनाशकाय। तच्छिरसि समानीते भराणां आहतद्रव्यविशेषाणां नियुतं लक्षं प्रहृष्टो दद्यात्। तदर्धं नियुतार्धं पञ्चाशत् सहस्राणीत्यर्थः। तत्सुतवधे यातव्यपुत्रवधे। तथा सेनापतिवधे तदेव ॥ १८ ॥

प्रवीराणामिति। प्रवीराणां तु प्रकृष्टवीराणां ये मुख्यास्तेषां वधे शतं शतगुणं दशसहस्राणि दद्यादिति सम्बन्धः। तथा तदर्धं कुञ्जरवधे पञ्च सहस्राणीर्थः। स्यन्दनस्य वधे रथस्य वधे सार्धं सहस्रद्वयं नयात् ॥ १९ ॥

तथा चोक्तम्[10]—साहस्र इति। सहस्रं चापि वधे धन्विवधे इत्यर्थः (पाठान्तरानुसारेण चैवाश्ववधः)। शत्यः पत्तिमुख्यवध इति प्रतीतम्। शिरोविंशतिकं [11]सर्वमनुष्यस्यापीति। भोगद्वैगुण्यमेव च। भोगो जीविका, स द्विगुणः कार्यः ॥ २० ॥

[9] राजा तस्य घातकाय हन्त्रे सर्वाणां आहित

[10] तथा चोक्तम्—साहस्रोऽश्ववधे राज्ञः शत्यः पत्तिमुख्यवधः स्मृत इति

[11] सर्वं वा भोगैर्द्विगुण्यं भोगो जीविका तस्या द्विगणता कार्या ॥

युग्यमिति। (गुण्यं इति मुद्रितपुस्तकपाठो न सम्यक्।) स्वयोधानां[12] कृतयथोक्तकर्मणां— युग्यं वाहनं, हेम सुवर्णं, कुप्यं च सुवर्णभिन्नमायुधाभरणादि यो यद् जयति तस्यैवतज्ज्ञेयमिति। दद्याद्वस्त्वनुरूपं वेति वस्तु[13] (द्रव्य) कार्यं वा तदनुरूपं कार्यानुरूपं वा दद्यात् हृष्टः। योधांश्च हर्षयेत्[14] तानापि हर्षयुक्तान् कुर्यादिति सम्बन्धः ॥ २१ ॥

इति दानकल्पना नाम चतुस्त्रिंशं प्रकरणम् ॥

[12] नां ; कृतकार्यानुगुणं वाहनं हेम

[13] वस्तुद्रव्यानुरूपं कार्यानुरूपं वा यथा हृष्टस्तथातानपि हर्षयुक्तान् · वस्तुकार्यं तत्तु पश्चात दद्यात्

[14] हर्षयेत् सर्वं दद्यादिति सम्बन्धः।

३५। व्यूहविकल्प प्रकरणम्।

पश्चात् तद्विधमुत्सर्पन् स्थापयेत्तु बलिनं युधि।
(पश्चारत्नि धनुस्तस्मिन्[39a] धन्विनं स्थापयेद युधि।)
[40]त्रिगुणाश्वौ रथगजौ योज्यौ पञ्चसु[41] पञ्चसु ॥ २२ ।
शमान्तरञ्च[42] पुरुषस्तुरङ्गस्त्रिशमान्तरः।
कुञ्जरः स्यन्दनश्चैव स्मृतौ पञ्च शमान्तरौ ॥ २३ ।
सर्वनीतिविदामेतत्सम्मतं परिकीर्तितम् ॥ २४ ।
तथा च[43] खलु युध्येरन् पत्त्यश्वरथदन्तिनः।
यथा भवेदसम्बाधो[44] व्यायामो विनिवर्तने ॥ २५ ।

[39a] धनुःस्थाने धन्विनं [40] त्रिगुणेऽश्वं गजरथौ

[41] पञ्च च [42] स्तु

[43] वा [44] भवेन्न सम्बाधो

Prakaraṇa 35

Vyūhavikalpa

(Varieties of array of the army.)

22. (In the array of infantry) archers (bowmen) should be posted at a distance of 1 *dhanu* measuring 5 *aratnis* (i.e., $24 \times 5 = 120$ *aṅgulas* or 5 yards), and horses at a distance of three times or 3 *dhanus* i.e., $3 \times 5 = 15$ *aratnis* each, and elephants or chariots each at a distance of five times or 5 *dhanus* i.e., $5 \times 5 = 25$ *aratnis*.

23. The distance between each of the foot-soldiers should be one *śama* (14 *aṅgulas*), with horses each at an interval of three *śamas* and elephants and chariots at an interval of five *śamas* each.

24. This principle (of deployment of troops within the *vyūha*) has the approval of all experts in polity (military science).

25. In this way the infantry, cavalry and elephant force should be arranged so that they do not clash among themselves or cause obstruction in movements or exercises or (at the time of) retreat (if and when necessary).

बलाङ्गानाम् परस्परमसङ्कुलार्थं व्यूहरचनामभिधातुमाह—पञ्चत्नीति। (पश्चात्तद्विधमित्यादि मुद्रितपुस्तकपाठो न सम्यक्।) निष्कनिष्ठमुष्टिः चतुर्विंशत्यङ्गुलोऽरत्निर्हस्तस्तैः[15] पञ्चभिः कल्पितं धनुर्दशमानम्। तस्मिन् धनुषि पञ्चारत्निप्रमाणे भूभागे इत्यर्थः। धन्विनं धनुर्धरं स्थापयेदुपनयेद् युद्धार्थं युधि संग्रामे। त्रिगुणे धनुषि पञ्चदशारत्नि प्रमाणे[16] संस्थापयेदश्वम् गजरथौ तु योज्यौ पञ्चसु पञ्चसु[17] धनुष्षु पञ्चविंशत्यरत्नि प्रमाणे भूभाग इत्यर्थः ॥ २२ ॥

शमान्तरस्त्वियति। शमश्चतुर्दशाङ्गुल प्रमाणम्। तत् समानेऽपरस्मात् पुरुषादन्तराले पुरुषः कार्यः। तुरङ्गस्त्रिशमान्तरः कार्यः। (समान्तर इतिपाठो न सम्यक्)। कुञ्जरात्कुञ्जरः सप्तत्यङ्गुलान्तरः कार्यः। तथा स्यन्दनात्-स्यन्दनश्च ॥ २३ ॥

श्लोकोऽयं टीकायां न वर्तते ॥ २४ ॥

उक्तान्तरालापवादमाह—तथा चेति। विशिष्ट आयामो युद्धार्थं प्रसरणं व्यायामः। तथा च विश्रामार्थमपसरणं विनिवर्तनम्। यथा सम्बाधः सङ्कीर्णता न भवति तथा युध्येरन्। विस्तीर्णायां रणभूमौ उक्तप्रमाणादधिकमपि अन्तरालं कार्यम्। न सङ्कीर्णायामिति भावः ॥ २५ ॥

[15] अरत्निर्निष्कनिष्ठोहस्तस्तैः; निष्कनिष्ठो यो हस्तस्तैः

[16] पञ्चारत्निमिते भूभागे स्थापयेद

[17] पञ्चगुणेषु पञ्चविंशत्यरत्नि प्रमाणे भूभाग

[45]सङ्करेण च युद्धेरन्[45a] सङ्करः सङ्कुलावहः।
महासङ्कुलयुद्धे[46] तु संश्रयेरन् महाकुलान्[47] ॥ २६ ।

[45] असङ्करेण [45a] युध्येत

[46] महासङ्करयुद्धे च [47] महागजान्

26. In fighting a battle the array of troops should not be confused or mixed up (i.e., the composition should not be disturbed), because confusion in the ranks of the army in the array is dangerous. In cases of fierce combats causing confusion mighty elephants should be resorted to (i.e., the units of infantry and cavalry should take cover behind the war elephants).

असङ्करेणेति। (इत्यत्र 'सङ्करेण' इति मुद्रितपाठो न सम्यक्।) सङ्करणं सङ्करोऽन्यस्थान-विक्षेपणमसौ सङ्करः सङ्कुलावहः। किमुक्तं भवति? आकुलत्वान्मोहो भवति। अतोऽसङ्करेण

युध्येरन् । महासङ्कुलयुद्धे तु संश्रयेरन् महागजानिति । आकुलत्वेनानाथाः पत्त्यश्वरथा महागजानाश्रयेरन् । आकुलत्वापनोदनार्थमिति भावः ॥ २६ ॥

अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः ।
इति कल्पास्तु[48] पञ्चाश्वा विधेयाः कुञ्जरस्य च ॥ २७ ।
पादशो भावयेदश्व[49] पुरुषा दश पञ्च च ।
विधानमिति नागस्य कथितं स्यन्दनस्य च ॥ २८ ।

[48] कल्प्यास्तु [49] पादगोपाश्च तावन्तः ; पादचाराश्च

27. Three foot soldiers should march in front of each horseman as *pratiyoddhā* (vanguard) and five horsemen in front of each elephant. Such are the rules of array.

28. In the array of elephants, each of them should have a supporting force (*pādagopā* or *pādacārā*) of five horsemen and fifteen foot soldiers, so also for each of the chariots.

बलानां प्रतियोधविधानमभिधातुमाह—अश्वस्येति । अश्वस्य प्रतिकक्षभूता योद्धारः पादचारा इत्यर्थः, पुरुषास्त्रयो भवन्ति । इत्यग्रतः एवम्भूताः पञ्चाश्वा विधेयाः कुञ्जरस्य च ॥ २७ ॥

पादगोपाश्चेति[18] । पादगोपाश्च तावन्तः पृष्ठतः पुरुषाः पञ्चदश कार्याः । एवमेकस्य नागस्य पञ्चाश्वास्त्रिंशच्च पुरुषाः भवन्तीति, एकनागपरिकल्पने इदं विधानमिति नागस्य कथितम् स्यन्दनस्य च पादगोपास्तावन्तः ॥ २८ ॥

[18] पादचाराश्च ['पादशो भावयेदश्व' इति मुद्रितपुस्तकपाठः न सम्यक् ।]

(अनीकमिति विज्ञेयमिति कल्प्या नव द्विपाः ।)*
[50]तथानीकस्य रन्ध्रं तु पञ्चचापं प्रचक्षते ।
सर्वव्यूहविधामज्ञा युद्धकर्मसु कर्मणः ॥ २९ ।

[50] अणीकस्य च रन्ध्रं च

* अस्य श्लोकस्य पूर्वार्द्धं नास्तीति ।

* This line is omitted in the B.I. text, but is commented upon in the *ṭikā*.

* अयं श्लोको मुद्रितपुस्तके नास्ति ।

29. An array of elephants should be composed of nine elephants, three in a line, with an intervening space of five *dhanus* (*pañca-cāpa* i.e., 25 yards) between the lines.

अनीकमितीति । अनीकं व्यूहाङ्गमित्युक्तक्रमेणाश्वपदातियुक्ता नवद्विपा अनीकमिति प्रकल्प्य कल्पनीयाः । तथा चानीकस्य रन्ध्रं चानीकानामन्तरालानि च पञ्चचापानि पञ्चविंशत्यरत्नि प्रमाणानि भवन्तीत्यर्थः ॥ २९ ॥

इत्यनीकविधानेन[51] स्थापयेद्व्यूहसम्पदः ।
उरस्यकक्षपक्षांश्च[51a] तुल्यानेतान् प्रचक्षते ॥ २९ क

[51] विभागेन [51a] कक्ष्य पक्ष्यांश्च

* The verse does not appear in the B.I. edition but is commented upon in the *ṭīkā*.

29A. The forces in a *vyūha* should be arrayed thus in distinct units of *urasya* (the central part), *kakṣa* (two rear wings) and *pakṣa* (two front wings), five wings being of equal inportance.

इत्यनीकविभागेनेति । नवद्विपपरिकल्पितेन । स्थापयेदिति व्यूहसम्पदो बलर्द्धीः । उरस्यं व्यूहस्योरसि मध्ये रचितं भवति तदुरस्यमित्युच्यते । कक्षायां कक्ष्यम् । उरसः पार्श्वयोर्भवे कक्ष्ये अनीके, कक्षस्थानयोर्भवत्वात् । कक्षयोरुपान्ते पक्षस्थानप्रभवत्वात् पक्ष्ये अनीके । एतान्युरस्यकक्ष्यपक्ष्याणि तुल्यानि समद्विपसंख्याकानि परिचक्षत इति ॥ २९ क ॥

उरः कक्षौ च पक्षौ च[52] मध्यं पृष्ठं प्रतिग्रहः ।
कोटी च[52a] व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह इष्यते[52b] ॥ ३० ।
उरश्च कक्षपक्षौ च[53] व्यूहोऽयं सप्रतिग्रहः ।
गुरोरेष[54] च शुक्रस्य कक्षाभ्यां[54a] परिवर्जितः ॥ ३१ ।

[52] कक्ष्यच पक्ष्यच [52a] कोटीश्च

[52b] उच्यते [53] उरस्य कक्षपक्षैस्तु ; कक्ष पक्षांस्तु

[54] गुरोरेव च [54a] पक्षाभ्यां

30. According to experts in planning *vyūhas*, each *vyūha* is composed of seven parts or units viz., *urah* (central), *kakṣa* (flanks), *pakṣa* (frontal wings), *madhya* (middle unit, behind the central one), *pṛṣṭham* (rear middle), *pratigraha* (the reserve at the rear including the royal camp at a distance) and *koṭī* (outer sides of front wings).

31. According to Bṛhaspati, inclusive of *urah, kakṣas, pakṣas* and *pratigraha*, there are seven units of the *vyūha*. Śukra, however, excludes *kakṣas* and hence according to him, there are five units only.

उर इत्यादि । उर इत्युरस्यम् । कक्ष्यमिति—उरस्यस्योभयपार्श्वस्थितं द्विविधमप्येकतयेष्यते । तथैव पक्ष्यम् । कोटिः पक्षयोर्बहिस्थितमनीकं कोटिसंज्ञितम् । तद् द्विविधमप्येकतयेष्टम् । मध्यमिति । उरसः पृष्ठतोऽवस्थितमनीकं मध्यम् । मध्यस्यापि पृष्ठतोऽवस्थितं पृष्ठमुच्यते । प्रतिग्रह इति । पृष्ठाख्यानीकात् द्विशतधनुर्व्यवहितं पृष्ठतोऽवस्थितं राजावस्थानत् प्रतिग्रह उच्यते । इत्येवं व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह इष्यते । तद्यथा—उरस्य कक्ष्य पक्ष्य कोटि मध्य पृष्ठ प्रतिग्रहाख्यैरिति ॥ ३१ ॥

आचार्यमतान्यभिधातुमाह—उरस्येति । उरस्यं कक्ष्यं पक्ष्यं प्रतिग्रहश्चेत्येवंविधो व्यूहो विज्ञातो गुरोर्बृहस्पतेः । अत्र प्रोरस्य प्रपक्ष्यापरपर्यायाः मध्य पृष्ठ कोटयः उरस्यकक्ष्यपदैः संगृहीताः इति

सप्ताङ्गः। शुक्रस्य मतेनायमेव व्यूहः पक्षाभ्यां (कक्ष्याभ्यां) परिवर्जितो भवति। तथा च कक्ष-प्रकक्षाभ्यां विना पञ्चाङ्ग इत्यर्थः ॥ ३२ ॥

अभेद्याः कुलजा मेध्या[55] लब्धलक्ष्याः[56] प्रहारिणः।
सेनाङ्गपतयः कार्या दृष्टयुद्ध[56a] प्रतिक्रियाः ॥ ३२ ।
प्रवीरपुरुषैरेतैस्तिष्ठेयुः[57] परिवारिताः।
अभेदेन[58] च युध्येरन् रक्षेयुश्च परस्परम् ॥ ३३ ।
फल्गु सैन्यस्य[59] यत्किञ्चिन्मध्ये व्यूहस्य तद्भवेत्।
युद्धवस्तु च यत्किञ्चित् प्रायस्तज्जघने[60] भवेत् ॥ ३४ ।

[55] मौला [56] लक्षाः
[56a] युद्धदृष्ट [57] रेते तिष्ठेयुः
[58] अभेदेनैव [59] सैन्यं च
[60] प्रशस्तं जघने

32. Persons indefatigable, belonging to (warrior) family, hereditarily in service, possessing sure aim and capable of reacting promptly (i.e., taking necessary retaliatory measures) watching the development of war, should be appointed commanders of different units of the army (*Senāṅgapati*).

33. They (commanders) should take their positions in the midst of expert warriors (*Pravīra puruṣa*), fighting indefatigably and guarding one another.

34. Ordinary soldiers (*phalgu sainya,* not as efficient as *pravīras*) should be placed in the middle or central division of the *vyūha* and the war machines (catapults etc), whatever those may be, should be in the rear part.

अभेद्या इत्यादि। लब्धलक्ष्या इति प्रहर्तुं कल्पिता लक्ष्या लब्धा यैः। तमभिहर्तुं प्रारब्धा इत्यर्थः। सेनाङ्गपतय इति हस्त्यश्वादि सेनाङ्गानां चतुर्णां पतयोऽधिष्ठातारः कार्याः। शेषं प्रतीतम् ॥ ३२ ॥

सेनाङ्गप्रतिविधेयमाह—प्रवीरैरित्यादि। श्लोकार्थं प्रतीतम् ॥ ३३ ॥

फल्गुसैन्यमिति। फल्ग्वसारं सैन्यं च यत् पत्यश्वरथद्विपादिकं मध्ये व्यूहस्य सप्ताङ्गस्य तद्भवेत्। युद्ध (व्यूह ?) मध्याङ्गपरिकल्पना तत्रैवेति भावः। युद्धवस्तु यत्किञ्चिच्छस्त्रावरणौषध-जलाहारादि प्रायस्तज्जघने पृष्ठानीके भवेत्। जघन परिकल्पनादिप्रसङ्गो व्यूह एवेति ॥ ३४ ॥

युद्धार्थं युद्धकुशलं षण्डानीकं[61] प्रयोजयेत्[61a]।
युद्धं हि नायकप्राणं[62] हन्यते[62a] तदनायकम् ॥ ३५ ।

[61] युद्धकुशलो मुण्डानीकं [61a] नियोजयेत्
[62] नायकप्राणं [62a] हन्येत

35. To meet the exigencies of war an expert warrior may be set up as a dummy (*muṇḍānīkam*) of the king (so that his own forces may be inspired to feel the royal presence and the enemy's attention is diverted). War is the soul of the *nāyaka* (*vijigīṣu*), i.e., war depends upon the integrity of the *nāyaka* and without him (*a-nāyaka*) the army is annihilated.

प्रतिमहानीकस्यैव विशेषमाह—युद्धार्थमित्यादि। युद्धं संग्रामस्तदर्थं युद्धकुशलो विजिगीषुः, वीरपुरुषकल्पितं छत्रचामरादिरहितं सुसन्नद्धं मुण्डानीकमित्युच्यते, तत्प्रयोजयेत्। तत्रस्थो राजा नरैर्न विभाव्यते। ततश्च रक्षितो भवति। हि यस्मात्, युद्धं नायकप्राणं, विजिगीषुरेव नायकः स्वप्राणभूतः। हन्येत तदनायकं तत्र[10] प्रतिग्रहस्थान एव अनायकं सैन्यं हन्येत। तद्भयात् सर्वे युध्यन्त इति भावः ॥ ३५ ॥

व्यूहोऽनुपृष्ठमचलः पत्त्यश्वरथदन्तिभिः।
तथाप्रतिहतो ज्ञेयो हस्त्यश्वरथपत्तिभिः ॥ ३६ ।
उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयो रथान्।
हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः ॥ ३६ क * ।
मध्ये देशे[63] हयानीकं रथानीकं तु कक्षयोः।
पक्षयोश्च गजानीकं व्यूहोऽन्तभिदयं स्मृतः ॥ ३७ ।
उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयो रथान्।
रथाभावे तु मतिमान्[63a] नागानेव प्रकल्पयेत् ॥ ३८ ।
विभज्य प्रक्षिपेन्मध्ये[64] पत्त्यश्वरथकुञ्जरान्।
(मध्ये कुर्वीत नागेन्द्रान् पत्त्यश्वरथवारितान् ॥)✤
यदि स्याद् दण्डबाहुल्यं तदावापः[65] प्रकीर्तितः ॥ ३९ ।
धनुः[66] सूची च दण्डश्च शकटो मकरध्वजः।
[67]इत्यादयो महाव्यूहास्तदाकारान् प्रकल्पयेत् ॥ ४० ।

---

[63] मध्यदेशे [63a] सर्वत्र

[64] प्रक्षिपेद् व्यूहे रथपत्त्यश्वकुञ्जरान्

[65] स चावापः ; सेनावापः स कीर्तितः

[66] श्येनः सूची च वज्रश्च शकटं मकरध्वजः

[67] इत्येवमादयो व्यूहाः शास्त्रज्ञैः समुदाहृताः

*श्लोकोऽयं मुद्रितपुस्तके पतितः। परन्तु टीकायां व्याख्यातः।

The *śloka* is omitted in the B.I. text, but commented upon in the *ṭīkā*.

✤ अस्य श्लोकस्य उत्तरार्द्धस्थाने अपरार्द्धं मुद्रितपुस्तके मुद्रितं तदर्द्धन्तु अत्र सङ्गतम्। अस्य शेषार्द्धन्तु एकचत्वारिंशदङ्कित श्लोकस्य पूर्वार्द्धस्थाने मुद्रितम्।

36. The *vyūha* in which the infantry, cavalry, chariots and elephants are arrayed one behind the other is known as *Acala vyūha* i.e., the infantry is placed in either *pakṣa* or wings in the front, cavalry in the *uraṣya* or middle, chariots on either *kakṣa* or rear wings and elephant in the *pṛṣṭha* or rear middle. If on the other hand, elephants are placed in the front and infantry at the rear it will be *Apratihata vyūha*. (Such an array will be irresistible).

*36A. When the mighty elephant force constitutes the central part (of the front) with chariots in either *kakṣa* (rear wings) and cavalry in either *pakṣas* (front wings), it is known as *Madhyabhedi-vyūha* (which is capable of penetrating into the enemy's array).

37. When the cavalry forces constitute the middle part, chariots the *kakṣas* and elephants the *pakṣas*, it is known as *Antabhid vyūha* (which crushes the enemy flanks).

38. In place of chariots horses may be posted and foot soldiers in the places marked for horses, and in all other places elephants may be deployed in the absence of chariots.

39. In this way the *vyūha* should be arrayed in divisions of chariots, infantry, cavalry and elephants. Elephant forces may also be placed in the middle surrounded by regiments of infantry, cavalry and chariots. If however forces are found to be surplus after deployment in the *vyūha*, they are known as *Avāpa* forces, (which may be kept in reserve for replenishment of respective units, as and when necessary).

40. According to experts in planning *vyūhas*, the major arrays (*mahāvyūhā*) ore described to be bow-shaped (*dhanu*), needle-pointed (*sūci*), shaped like a staff (*daṇḍa*), cart-shaped (*śakaṭa*) and that bearing *makara* ensign (*makaradhvaja*). Two other arrays are mentioned in another edition, viz., hawk-shaped (*śyena*) and thunder-shaped (*vajra*), according to the suitability of time and place.

दण्डाकाररहितान् व्यूहानभिधातुमाह—व्यूहोऽनुपृष्ठमचल इति। अनुपृष्ठमिति वीप्सा द्रष्टव्या। अनुपृष्ठमनुपृष्ठं पत्त्यश्वरथदन्तिभिर्विन्यस्तैरयं व्यूहोऽचलोनामको भवति। तद्यथा पत्तीनां पृष्ठतोऽश्वाः। अश्वानां पृष्ठतो रथाः। रथानां पृष्ठतो दन्तिनः। अचलत्वं च सर्वेषां पृष्ठतः स्थितैः दन्तिभिरिति भवति। तथा हस्त्यश्वरथपत्तिभिः अप्रतिहतो नामकः व्यूहः ज्ञेयः ॥ ३६ ॥

उरसीत्यादि। उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयो रथान् हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः, मध्यं शत्रुबलस्य भिनत्तीति ॥ ३६ क ॥

अन्तभिदं व्यूहमभिधातुमाह—मध्यदेश इत्यादि। परानीकमन्तःस्थितैर्हस्तिभिरन्ते भिनत्तीति व्यूहोऽयमन्तभिदिति ॥ ३७ ॥

चक्राङ्गानां कस्यचिदभावे व्यूहविधौ विधेयमाह—रथस्थान इति। रथस्थाने हयान् रथाभावे दद्यात्, हयाभावे हयाभावे हयस्थाने पदातीन्, रथाभावे नागानेव दद्यात् सर्वत्रेति प्रतीतम् ॥ ३८ ॥

चक्राणां बाहुल्ये विधेयमाह—विभज्येति। अनीके पत्त्यश्वरथकुञ्जरान् विभज्य साकारे च व्यूहे

प्रक्षिपेत् यदि स्यादल्पबाहुल्यं बलप्राचुर्यं स व्यूह आवापः प्रकीर्तितः, अधिकबलानामावपनात् प्रक्षेपणात् ॥ ३६ ॥

महाव्यूहस्य भेदानभिधातुमाह—धनुरिति (श्येनरिति वा)। श्लोकार्थसुगमः ॥ ४० ॥

मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः।
कथिताः[67a] प्रकृतिव्यूहा भेदास्तेषां[67b] प्रकीर्तिताः ॥ ४१ ।
यः स तं व्यूह्य मतिमान् काले स्थाने प्रकल्पयेत् ॥ ४१ क ।
तिर्यग्वृत्तिश्च[68] दण्डः स्याद् भोगत्वाद्वृत्तिरेव[69] च।
मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ॥ ४२ ॥*
प्रदरो दृढकोऽसह्यश्चापो वै[70]तद्विपर्ययः।
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ॥ ४३ ।
विशालविजयः सूची स्थूणाकर्णश्चमूमुखः।
सुखाख्यो[71] वलयश्चैव दण्डभेदाः सुदुर्जयः ॥ ४४ ।

---

* अस्य श्लोकस्य शेषार्धं मुद्रित पुस्तके नास्ति

67a चत्वारः 67b भेदास्त्वेषां

68 स्तु

69 भोगोर्द्धावृत्ति ; भोगोऽन्वा ; भोगोऽभ्यावृत्तिः ; भोगत्वाद्वृत्ति इति पाठः न सम्यक्

70 श्चापस्तत्कुक्षिरेव च 71 ऋषास्यो ; रयासो

41. *Prakṛti vyūhas* are considered by the wise to be of four varieties, viz., *maṇḍala, asaṁhata, bhoga* and *daṇḍa*.

41A. The intelligent ruler should plan his array of army considering the suitability of time and place.

42. The special feature of the *Daṇḍavyūha* is the angular projection of both its wings (as the bird flies), and that of the *bhogavyūha* is that its wings are shaped like the raised hood (*bhoga*) of the serpent, and that the *vyūha* is arranged in a semicircular composition (*ardhāvṛttireva*). *Maṇḍala vyūha* is almost a circular composition with attacking points on all sides (*sarvatomukha*). The composite array in which the different wings of the army charge simultaneously but separately is called the *Asaṁhata-vyūha*.


43-44. Different forms of the *daṇḍavyūha* are *pradara, dṛḍhaka, asahya, cāpa,* or alternatively *cāpakukṣi, pratiṣṭha, supratiṣṭha, śyena, vijaya, sañjaya, viśālavijaya, sūcī, sthūṇākarṇa, camūmukha, sukhākhya ṛṣāsyā*), *balaya* and *sudurjaya*.

साकारव्यूहानां तद्भेदानां चोद्देशमभिधातुमाह—मण्डल इत्यादि। मण्डलश्चासंहतश्च मण्डलासंहतौ वक्ष्यमाणलक्षणौ। भोगो दण्डश्चैतावपि वक्ष्यमाणलक्षणावेवेति चत्वार एव मनीषिभिः प्रकृतिव्यूहा विकृतिरहिता प्रकीर्तिताः ॥ ४१ ॥


दण्डादिव्यूहानां स्वरूपमभिधातुमाह—तिर्यग्वृत्तिरित्यादि। तिर्यग्वृत्तिर्वर्तनमवस्थितिर्यस्यासौ दण्डः। दण्डस्य वंशादिकस्य वामदक्षिणभागावस्थितस्य तिर्यग्वृत्तिर्भवति। तादृशस्यैव दण्डस्य व्यूहस्य भवतीत्यर्थः। यथा—

पक्षः (१) कक्षः उरस्य कक्षः पक्षः (१)

प्रतिग्रहः (१)




व्यूहचित्र १




व्यूहचित्र २

भोगोऽर्द्धावृत्तिरेवञ्चेति[20]। भोग इति सर्पभोगाकारत्वात्। सा च वृत्तिता (अर्द्ध-वृत्तित्वावदस्य)[21] दण्डस्य व्यूहस्य सर्पभोगस्येवेत्यर्थः। तिर्यग्वृत्तिलिखितोऽपि अर्द्धावृत्तो[22] द्रष्टव्यो ऊर्ध्वदृष्टियौं भोगो व्यूहः। यथा



व्यूहचित्र ३

मण्डलः सर्वतोवृत्तिरिति। मण्डलाकारे सर्वतोमुखत्वात् सर्वतोमुख इत्यर्थः। तद्यथा



व्यूहचित्र ४

संहताकारे व्यूहे पृथग्वृत्तिरसंहत इति। उरस्यानीकान्तरालात् पृथग्वृत्तिर्व्यवहित इत्यर्थः। तद्यथा

असंहतो व्यूहः ॥ ४२ ॥



व्यूहचित्र ५

[30] भोगोन्वावृत्तिभिरेव [31] अन्वावृत्ति

[32] अन्वावृत्तो

दण्डप्रकृतिभेदान् व्यूहानभिधातुमाह—प्रदर इत्यादि। विशालविजय इत्यादि च। इत्यादि च। इत्येते दण्डस्य विकृतौ सप्तदश भेदा भवन्ति ॥ ४३ ॥ ४४ ॥

अतिक्रान्तः प्रतिक्रान्तः कक्ष्याभ्याञ्चैकपक्षतः[72] ।
अतिक्रान्तश्च[73] पक्षाभ्यां त्रयोऽन्यस्तु[73a] विपर्ययः ॥ ४५ ।
पक्षोरस्यैरतिक्रान्तः प्रविष्टोऽन्यो विपर्यये ।*
स्थूणापक्षो धनुः पक्षो[74] द्विस्थूणो दण्ड ऊर्द्ध्वगः ॥ ४६ ।
द्विगुणान्तस्त्वतिक्रान्त[75] पक्षोऽन्योस्य विपर्ययः[75a] ।
द्विचतुर्दण्ड इत्येवं[76] ज्ञेया लक्षणतः क्रमात् ॥ ४७ ।

---

[72] कक्षाभ्यां कक्षपक्षतः ; पक्षाभ्याञ्चैव पक्षतः

[73] स्तु [73a] त्रयोऽन्येतु विपर्यये

[74] धन्वपक्षो [75] द्विगुणान्त्यस्त्वभि

[75a] विपर्यये [76] इत्येते

45. The *Daṇḍavyūha* may be arrayed to charge with the *kakṣa* wings, or simultaneously with the *kakṣa* and *pakṣa* wings, or only with the *pakṣa* wings, then they will be designated as *pradara, dṛḍhaka* and *asahya* respectively, failing which three alternative forms of array (viz., *cāpa, cāpakukṣi* and *pratiṣṭha*), may be arranged.

46. Another alternative form (*supratiṣṭha*) is advancing the *pakṣa* wings and supported by the *kakṣa* wings in depth, attacking with the *urasya* unit. Failing, the next alternative (*śyena*) may be adopted or it may be *sthūṇāpakṣa* (or *vijaya* in which both wings are strengthened with three units), or *dhanuhpakṣa* (or *sañjaya* in which wings are arranged in the shape of bows) or *dvisthūṇa* (or *viśālavijaya* with wings doubly strengthened) or *daṇḍa-urdhaga* (or *sūcī*) arrayed pointedly in the form of a staff or a needle.

47. When the projecting ends of *pakṣas* are doubled, it is *sthūṇākarṇa*, when trebled it is *camūmukha*, and the latter when reversed, it is *ṛṣāsya*. With double or fourfold *daṇḍa* formation it is *valaya* or *durjaya*.

प्रदरादीनां लक्षणान्याह—अतिक्रान्त इत्यादि। अतिक्रान्तः कक्षा(पक्षा)भ्यामविपर्यय इत्यर्थः। स एव दण्डः कक्षा(पक्षा)भ्यामतिक्रान्तत्वातिक्रम्यगतः प्रदरो भवति उभयकक्षस्य परानीक प्रदरणात्। तस्याकारः—

(१) प्रदरः।

क · क

प उ प

प्र

प्रतिक्रान्तः (कक्षपक्षत इति)। (कक्षाणां) पक्षाणां प्रतिक्रमणं पश्चाद्गमनम्। ततो दृढको भवति। तस्याकारो यथा—

(२) दृढकः।

उ

पक पक

प्र

अतिक्रान्तश्च(स्तु) पक्षाभ्यामतिक्रम्य गताभ्यां पक्षाभ्यामसह्यो व्यूहः यथा असह्योऽयं—

(३) असह्योऽयम्।

प प

क उ प

प्र

त्रयोऽन्ये तु विपर्यय इति। व्यूहत्रितयस्य विपर्यये (प्रदरविपर्यये) चापः, कक्षाभ्यां प्रतिक्रान्तत्वात्। चापसंज्ञा चाकारप्रतिपादनात्। यथा—

(४) चापः।

प उ प

क क

प्र

दृढकविपर्यये चापकुक्षिः, अतिक्रान्त (कक्ष) पक्षत्वात्। यथा—

(५) चापकुक्षिः।

प कप

उ

प्र

असह्य विपर्यये प्रतिष्ठः प्रतिक्रान्त पक्षत्वात्। तदाकारो यथा—

(६) प्रतिष्ठः।

क उ क

प प

प्र

पक्षोरस्यैरतिक्रान्तः प्रविष्टोऽन्य इति। पक्षाभ्यामतिक्रान्त उरस्येन प्रविष्टः अन्यः सुप्रतिष्ठः। यथा—

(७) सुप्रतिष्ठः।

प प
क क
उ
प्र

पुनरन्यो विपर्यये। पक्षाभ्यां प्रविष्ट उरस्येनातिक्रान्तः श्येन इति। श्येनाकारत्वात् श्येनाख्यः यथा—

(८) श्येनोऽयम्।

उ
क क
प प
प्र

स्थूणापक्षः। पक्षयोः स्थाने स्थूणाव्यूहो यस्यासौ स्थूणाव्यूहो यस्यासौ स्थूणापक्षः। यथा—
(९) विजयाख्योऽयम्।

॥ क उ क ॥ क उ क ॥ क उ क ॥
प्र

व्यूहचित्र ६

धनुः पक्ष इति। चापव्यूहौ पक्षयोः स्थाने यस्यासौ धनुः पक्षः। एवम्—
(१०) सञ्जयाख्योऽयम्।

प उ प क उ क प उ प
क क क क
प्र

व्यूहचित्र ७

द्विस्थूण इति। द्विगुणितस्थूणो विशालविजयाख्यो व्यूहः। यथा—
(११) विशालविजयः।

॥ = = = = = ॥
प्र

व्यूहचित्र ८

दण्ड ऊर्द्धग इति। ऊर्द्धगो दण्ड इत्येवं सूची व्यूहो भवति। यथा—

(१२) सूची व्यूहः ॥ ४३।



व्यूहचित्र ९

द्विगुणान्त्य इति। द्विगुणवन्त्यौ पक्ष्यौ यस्य। स्थूणाकर्णाख्योयम्। यथा—


(१३) स्थूणाकर्णः।



व्यूहचित्र १०

अभिक्रान्तपक्ष इति। यथा—


(१४) अयं चमूमुखो व्यूहः।



व्यूहचित्र ११

अन्योऽस्य विपर्यय इति। अस्य चमूमुखस्य विपर्यये ऋषास्यः, त्रिप्रतिक्रान्तपक्षत्वात्। यथा-

(१५) ऋषास्योऽयम्।



व्यूहचित्र १२

द्विचतुर्दण्ड इतीति। द्विदण्डोऽत्र दण्डौ अयं वलयः। यथा—


(१६) वलयः।



व्यूहचित्र १३

चतुर्दण्डो(सु)दुर्जयः। तद्यथा—

(१७) (सु) दुर्जयः॥



व्यूहचित्र १४

गोमूत्रिकोऽहिसञ्चारी[77] शकटो मकरस्तथा।
भोगभेदाः समाख्यातास्तथा परिपतन्तकः[78] ॥ ४८।
(गोमूत्रिका गवां मूत्ररेखाकारो विभाव्यते।
अहेश्च सरणस्थानं चाहिसार्यभिधीयते॥)
दण्डपक्षो युगोरस्यः शकटस्तद्विपर्ययः[79]।
मकरो व्यवकीर्णश्च[80] शेषः कुञ्जरराजिभिः[80a] ॥ ४९।

---

[77] काऽहिसारः च ; कार्द्धराजी च

[78] परिपतन्तिकः

[79] स्तद्विपर्यये

[80] व्यवकर्णी च ; व्यवकीर्णी च

[80a] कुञ्जरवाजिभिः

48. Different varieties of *Bhogavyūha* are *gomūtrikā, ahisārī, śakaṭa, makara* and *paripatatantaka* (*gomūtrika* is that which takes the shape of flowing urine of cows, and *ahisārī* reflects the serpentine movement).

49. When the wings (*kakṣas* and *pakṣas*) are arranged like daṇḍas with double units of *urasya* (middle), it is *śakaṭa* or chariot-shaped *vyūha*, and in the reversed order (i.e., double units of *urasya* at the base) it is *makaravyūha*, and the last one, the *paripatuntaka vyūha* is a form of *makara vyūha*, the central part of which is strengthened by concentration of units of elephants and of cavalry forces (*kuñjara-vājibhiḥ*).

भोगभेदानामुद्देशमाह—गोमूत्रिकेत्यादि। इति प्रतीतम्॥ ४८॥


एतेषां निर्देशमाह—गोमूत्रिका गवामित्यादि। गोमूत्रिका गवांमूत्ररेखाकारो विद्यते यस्याः सा। अहिसर्पणस्थानं चाहिसार्यभिधीयते। अनयोः प्रस्तारस्तद्यथा—

(१) गोमूत्रिकाव्यूहः।



व्यूहचित्र १५

(२) अहिसारी व्यूहः।



व्यूहचित्र १६

दण्डपक्ष इत्यादि। दण्डपक्षो युगोरस्यः शकट इति। दण्डव्यूहः सकलपक्षस्थाने यस्यासौ दण्डपक्षः। युगोरस्य इति युग्मोरस्यः। उरस्यं द्विगुणं विधेयमित्यर्थः। अर्थापत्त्याकक्षानीके विधेये। स शकटस्तस्याकारो यथा—

(३) शकटव्यूहः।

क उ उ क

प प

प्र

तद्विपर्यये मकर इति। सर्वशकटसंख्यो विपर्ययमुखो मकरः। तद्यथा—

(४) मकरः।

प प

क उ उ क

व्यवकीर्णश्च शेषः कुञ्जरवाजि(राजि)मिरिति। पारितः पताकाकारोऽयं शेषः परिपतन्तिकाख्यो व्यूहो मध्ये कुञ्जरवाजि(राजि)भिर्व्यवकीर्णो मध्यदेशे कुञ्जरैरधिष्ठितो वाजिभिर्वमवतिमकर एवेति।

प = प (५) परिपतन्तिकः॥

क उ उ क

प्र


मण्डलव्यूहभेदौ च सर्वतोभद्रदुर्जयौ।
गजानीको[81] द्वितीयस्तु प्रथमः सर्वतोमुखः॥ ५०।

[81] अष्टानीको

50. *Maṇḍala vyūhas* are of two types, *sarvatobhadra* and *durjaya*, the first one is provided with *mukhas* or attacking points on all sides of the *vyūha* and the special features of the second one (*durjaya*) is that it is eight pronged (*aṣṭānīka*) (double units in each of the two *kakṣas* and two *pakṣas*), or spearheaded by war elephants (*gajānīka*).


मण्डलभेदावाह—मण्डलेति। मण्डलव्यूहभेदौ सर्वतोभद्रदुर्जयौ। प्रथम सर्वतोमुखः। गजानीक वा अष्टाणीको दुर्जयः। तद्यथा—

(१) सर्वतोभद्रः



व्यूहचित्र १७

(२) दुर्जयः।



व्यूहचित्र १८

अर्द्धचन्द्रक उद्धारो[82] वज्रो भेदास्त्वसंहतेः[83]।
तथा कुक्कुट (कर्कट) शृङ्गी च काकपादी च गोधिका॥ ५१।
त्रिचतुः पञ्चसैन्यानां[84] ज्ञेया आकारभेदतः।
इति व्यूहाः समाख्याता व्यूहभेद प्रयोक्तृभिः॥ ५२।

[82] उद्धानो [83] संहते


[84] पञ्चसेनाभिर्ज्ञेया

51. ***Ardhacandraka, uddhāna*** (or ***udyānaka***) and ***vajra*** are the varieties of ***asaṁhata vyūha*** and so also ***kukkuṭaśṛṅgī*** or ***karkaṭaśṛṅgī, kākapādī*** and ***godhikā***.

52. Variety of shapes of (*asaṁhata*) *vyūhas* depends on whether it is three-pronged or four-pronged or five-pronged. These are the different forms of *vyūhas*, according to experts in the technology of *vyūhas*.


असंहतभेदानभिधातुमाह—अर्द्धचन्द्रक इत्यादि। प्रतीतम् ॥ ५३ ॥

प्रवेशनिष्कासप्रसरणवत्सैन्यसंख्याभिस्तानाह—त्रिचतुः पञ्चेत्यादि। त्रिसैन्योऽर्द्धचन्द्रकः अर्द्धचन्द्राकृतिः। तद्यथा—




व्यूहचित्र १६

उद्धार (उद्धान)-श्चतुः सैन्यः। तद्यथा—




व्यूहचित्र २०

पञ्चसैन्यो वज्रः। तद्यथा—




व्यूहचित्र २१

अथवा वज्रं नाम शतकोटिकाण्ड—प्रत्युप्तासिव्यूहसमाकृत वज्रादि धनुर्वेदोक्तायुधाकारो वज्रव्यूहो यथा—




व्यूहचित्र २२

त्रिसैन्यएव कर्कटशृङ्गाख्यस्तयथा—




व्यूहचित्र २३

तथा चतुः सैन्यः काकपदिका यथा—



व्यूहचित्र २४

तथा पञ्चभिः गोधिका यथा—



व्यूहचित्र २५

एते सप्तदशप्रोक्ता दण्डव्यूहाश्च[84] पञ्चधा ।
तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभिः[85] ॥ ५३ ।
असंहतास्तु षड् व्यूहा भोगव्यूहाश्च पञ्चधा ।
व्यूहज्ञैस्ते प्रयोज्याः स्युर्युद्धकाल उपस्थिते ॥ ५४ ।
[श्येनः सूची मुखो वज्रः शकटो मकरोऽम्बुजः ।
इत्यादयः स्मृता व्युहास्तदाकारान् प्रकारयेत् ॥] ५४ क

इति व्यूह विकल्पो नाम पञ्चत्रिंशं प्रकरणम् ।

---

[84] स्तु [85] समासतः

53-54. There are seventeen varieties of *daṇḍavyūha,* two of *maṇḍala vyūha,* six of *asaṁhata vyūha* and five of *bhoga vyūha,* (a total of 30 varieties). The ruler, conversant with *vyūha* formations, should array his army (as necessary in consideration of the advantages of time and place) when war breaks out.

54/1. *Śyena, sūcīmukha, vajra, śakaṭa* and aquatic *makara,* are the *vyūhas* that are designed according to their respective forms and features.

एते इत्यादि । असंहतास्त्वित्यादि । श्येन इत्यादि । प्रतीतम् ॥ ५३ ॥ ५४ ॥ ५४ क ।
इति व्यूहविकल्पो नाम पञ्चत्रिंशं प्रकरणम् ।

३६ । प्रकाशयुद्ध प्रकरणम् ।

पक्षादीनामनीकेन[86] हत्वा शेषं परिक्षिपेत् ।
तरसा (उरसा) च समाहत्य कोटिभ्यां परिवेष्टयन्[87] ॥ ५५ ।
परकोटिमुपक्रम्य[88] पक्षाभ्यामप्रतिग्रहः[89] ।
कोटिभ्यां जघने[90] हन्यादुरसा च प्रपीडयेत् ॥ ५६ ।

---

[86] मध्यकेन हत्वा शेषैः [87] परिवेष्टयेत्
[88] परकोटि समाक्रम्य ; प्रतिकोटि
[89] पक्षाभ्यां सप्रतिग्रहः [90] जघनं

Prakaraṇa 36.

Prakāśa yuddha : The conduct of open war

55. Penetrating (the enemy formation with either *pakṣa* (wing) of the army, and consolidating his central (*urasa*), the *vijigīṣu* should throw (i.e., employ the rest of the units to attack and besiege the enemy ranks with his own *koṭi* units.

56. Charging the outer flanks (*parakoṭi*) by both the *pakṣa* units, without disturbing his *pratigraha* (the reserve unit at the rear), or along with his reserve unit (*sapratigrahoḥ*) he should assail the rear flanks and bring pressure on the central part (of the enemy *vyūha*) in order to force them to surrender.

पक्षादीनामित्यादि । परकोटि इत्यादि । प्रतीतम् ॥ ५५ ॥ ५६ ॥

एवं व्यूह[91] प्रयत्नेन यत्नवानवनीपतिः[91a] ।
विदारयेद्व्यूहजातं बलैश्च[92] द्विषताम् बलम् ॥ ५७ ।
यतः फल्गु यतोऽभिन्न[93] यतो दुष्टै[94]रधिष्ठितम् ।
ततो रिपुबलं हन्यादात्मानं[95] चापि बृंहयेत् ॥ ५८ ।

[91] एवं व्यूह्य ; एवं व्यूह प्रयोगैश्च

[91a] यत्नवान् पृथिवीपतिः ; यत्नवान् ध्वजिनीपतिः

[92] व्यूहकृतैर्बलैर्विद्विषतो [93] यतो भिन्न

[94] दूष्यै [95] चात्मनश्चोपबृंहयेत् ; चोपपादयेत्

57. An energetic ruler should carefully array his forces in proper *vyūha* formation and with his own arrayed forces crush the forces of the enemy.

58. The ordinary, separated or detached, and corrupt soldiers of the enemy should be crushed by the ruler's own superior forces.

एवमिति । यतः फल्गु इत्यादि । प्रतीतम् ॥ ५९ ६० ॥

अरिं (सारं) द्विगुणसारेण फल्गु सारेण पीडयेत् ।
संहतं च गजानीकैः प्रचण्डैरेव[96] दारयेत् ॥ ५९ ।
दुर्जयान् करिणः सिंहवसासिक्तैर्महागजैः[97] ।
आहन्यात् करिणां[98] वार्यसमूहैः[98a] साध्वधिष्ठितैः ॥ ६० ।

[96] रपसारयेत् ; रवदारयेत् ; प्रयत्नेनावदारयेत्

[97] मत्तगजैः [98a] सैन्यसमूहैः

[98] करिणीनां वा

59. The superior forces of the enemy should be assailed by the doubly superior forces (of the *vijigīṣu*) and the ordinary soldiers by the superior. The consolidated units of the enemy should be liquidated by units of furious elephants.

60. The invincible elephants (of the enemy) should be charged by rutting elephants besmeared with lion's fat (or covered by lion's skin

simhavasāsiktaiḥ) or captured by employing she-elephants (*kariṇīnām*) mounted by expert riders.

सारं द्विगुण सारेणेत्यादि । दुर्जयानित्यादि । प्रतीतम् ॥ ६१ ॥ ६२ ॥

[99]सलोहजालैर्द्वृढवद्धदन्तैः
सुकल्पितैरूर्जित पादरक्षैः[100] ।
प्रवीरयोधैर्मदर्दुर्निवारै-
र्हन्याद् गजेन्द्रै र्द्विषतामनीकम् ॥ ६१ ।
एकोऽपि वारणपतिर्द्विषतामनीकं
व्यक्तन्निहन्ति[101]मदसत्त्व गुणोपपन्नः ।
नागेषु हि क्षितिभुजां[102] विजयो निबद्ध-
स्तस्माद् गजाधिबलो नृपतिः सदा स्यात् ॥ ६२ ।

इति प्रकाशयुद्धं नाम षट्त्रिंशं प्रकरणम् ॥

इति कामन्दकीये नीतिसारे गजाश्वरथपत्तिकर्माणि, पत्त्यश्वरथगजभूमयः, दानकल्पना, व्यूहविकल्पः, प्रकाशयुद्धं नाम विंशः सर्गः समाप्तः ॥

समाप्तश्चायं कामन्दकीय नीतिसारः ॥

---

[99] सर्वाङ्गनद्धैर्दृढवद्धदन्तैः ; वन्धदन्तै [100] सूर्जित पादपोषैः

[101] युक्तं निहन्ति [102] क्षितिभूतां

61. The forces of he enemy should be crushed by tusker elephants, irresistible due to rutting, covered by defensive iron network and attended by well-trained and energetic followers and expert warriors.

62. A leader war elephant in rut possessing fighting qualities can kill detachments of enemy forces alone. A ruler's (*vijigīṣu's*) victory depends on his elephant forces. Hence a ruler should always be endowed with a strong contingent of elephants.

सर्वाङ्गनद्धैरित्यादि । एकोपीत्यादि । प्रतीतम् ॥ ६१ ॥ ६२ ॥

इति कामन्दकीय नीतिसार टीकायामुपाध्याय-निरपेक्षायां गजाश्वरथपत्तिकर्माणि-पत्त्यश्वरथगजभूमयः-दानकल्पना-व्यूहविकल्प-प्रकाशयुद्धं नाम विंशः सर्गः । समाप्तोऽयं ग्रन्थः ॥

GLOSSARY OF SELECT TERMS ON POLITY AND ADMINISTRATION :

The Figure in Roman within brackets indicates the *Sarga* where the ***term*** occurs and the numerical figures indicate respectively the ***prakaraṇa, śloka*** and the pages, e.g., the *term* Abhṛta (XVI, 22 : 67 : 296) is to be consulted in *Sarga* XIV, *Prakaraṇa* 22 *Śloka* 67 and at page no. 296.

Abhṛta (XIV, 22 : 67, 296)
— ill-paid soldiers : one of the *vyasanas* of the army

Adeśastha (IX, 14 : 26, 38) : 188, 192
a refugee prince with whom no alliance should be made.

Adevamātṛka (IV, 7 : 52 : 84)
— Area not dependent on rains for cultivation (irrigated land)

Ādiṣṭa Sandhi (IX, 14 : 15 : 185)
Peace concluded with a more powerful enemy on condition of the weaker king ceding a part of his kingdom to the stronger.

Ākranda ; (VIII, 12 : 17 : 156 ; X, 15 : 30) 215.
an ally in the *daśamaṇḍala* especially at the rear.

Antaḥprakopa (IX, 14 : 67) 200 ; XVI, 24 : 20 : 331
internal dissension or disturbances.

Antarvaṁśika Sainya (XVII, 25 : 9), 354
— armed guards of the interior for the security of the ruler.

Apanaya (I, 1 : 38) 19
— injustice.

Ariṣaḍvarga (I, 1 : 57) : 27
[Śatruṣaḍvarga (I, 1 : 60) : 28
— Six passions : lust, anger, greed, delight, conceit and arrogance.

Arisampad (V, 8 : 4) : 97
— enemy prosperity.

Aṣṭavarga (V, 8 : 79) : 121
— Eight sources of state income, —agriculture, trade routes, fortifications, dams and reservoirs, enclosures for elephant, mines, forests and reclamation of uninhabited settlements.

Ativigrahī (IX, 14 : 74) : 203
a war-monger (king)

Ātmāmiṣa-Sandhi (IX, 14 : 16 : 186)
treaty concluded by a weaker ruler with a stronger power by offering himself along with his armed forces.

Ātmasampad (I, 1 : 23-24) : 12
— essential qualities of a king.

Audakadurga (IV, 7 : 59) : 87
— a type of fort ; protected by flowing waters.

Aurasam (IV, 7 : 74) : 92
— a class of friends : related by blood.

Avinaya (I, 2 : 71 : 33)
— lack of self-restraint, indisciplined.

Āyadvāra (V, 8 : 74) : 120
— Sources of state income : departments of revenue collection etc.

Āyattam (I, 1 : 12) : 7
— dominion of a king

Āyukta (V, 8 : 82 : 85) : 123, 124
— State officials (oppressive) : one of the sources of fear to the subjects.

Bāhyaprakopa (XVI, 24 : 21) : 332
— external disturbances

Bhaujaṅga-vṛtti (X, 15 : 35 : 266) policy of snakes, i.e., biting on the slighest provocation.

Bhinna-kūṭa (XIV, 22 : 71 : 296)
— army in a confused state.

Bhiṣagbheda (IX, 14 : 70 : 201) Estrangement or defection of the court-physician and secret administration of poison.

Bhūguṇa (IV, 7 : 50 : 84)
— Qualities of arable land.

Caryā (XVI, 24 : 48 : 345)
— regular exercise or parade of the army.

Daṇḍa (IV, 7 : 65-67 : 89) (VI, 10 : 15 : 131).
(a) punishment
(b) army
(c) rod or staff, sceptre

Daṇḍam prāṇāntikam (XV, 23 : 16 : 309)
— capital punishment.

Deśa (vaṁsa-kramāgatam (IV, 7 : 74 : 92)
— alliance in consideration of the situation in the *maṇḍala* and/or subsisting for generations.

Dravya-prakṛti (V, 8 : 2 : 96, VIII, 12 : 24 : 159)
(a) operative organs : five in number (ministers, treasury, etc.) for each of the twelve sovereigns in the *maṇḍala* according to the school of Manu.
(b) material properties.

Droha (XI, 16 : 34 : 232)
— treacherous rivalry.

Dvīpa (XIV, 21 : 50 : 290)
— deltaic regions and irrigated lands.

Gṛhamedhin (II, 4 : 26 : 44 ; III, 6 : 37 : 65)
(a) an honest householder
(b) performer of sacrifices as prescribed for the *gṛhastha*.

Guhyakarma (V, 8 : 31 : 106)
— secret policies of the king.

Indriyajaya (I, 1 : 22 : 19)
— perfect control over the sense organs : discipline of mind.

Kākākṣīvat (XI, 16 : 24 : 228)
— like a crow's eyeball : sight moving between the right and left eyes.

Kaṇṭakaśodhana (XIV, 21 : 47 : 230)
— removal of thorns in administering a kingdom : suppression of anti-social elements of the state.

Kapāla-Sandhi (IX, 14 : 15 : 183)
— Alliance concluded between two powers of equal resources and on terms of *status quo*.

Karṣaṇa-pīḍana (XVI, 24 : 3 : 325)
— causing damage and destruction of enemy territories.

Kāryānuṣṭhānamāyati (XIV, 21 : 23 : 283)
— One of the functions of ministers : Planning for

work to be undertaken in future.

Kaurmasaṅkoca (X, 15 : 38 : 217)
— the policy of a tortoise, followed by a king, i.e., withdrawing limbs within its shell : withdrawing from battle and taking shelter within his own fortifications.

Kīlairayomukha (XVII, 25 : 17 : 356)
— pointed iron-tipped pegs.

Kośajña (IV, 7 : 63 : 88).
— Expert in public finance

Koṣṭhāgāra (V, 8 : 77 : 120)
— the grain store, a part of the treasury under the charge of an adhyakṣa.

Kriyāmūḍha (XII, 17 : 32)
— incompetent.

Kruddha maula (XIV, 22 : 70)
a section of the permanent forces dissatisfied and estranged.

Kṣīṇakośa (V, 8 : 88)
— depletion or weakness in financial resources.

Kṣiptottaram (V, 8 : 26)
— Prompt and pointed reply.

Madhyama (VIII, 12 : 18)
an uncommitted ruler more powerful than *vigigīṣu* and *ari* within the inter-statal circle of twelve rulers (*dvādaśa rājamaṇḍala*.

Mādhyastham (VIII, 12 : 80 : 178)
feigned impartiality or apparent indifference.

Mahājana (X, 15 : 14)—
a strong power.

Mahāmātras (XIII, 19 : 44)
— high officials.

Maitrasambaddham (IV, 7 : 74)
— ally made by political compacts.

Māṇḍalikas (VIII, 12 : 54)—
governors.

Mantra (XIV, 21 : 23)
— deliberations for the purpose of formulation of state policies.

Mantraphala (XIV, 21 : 23)
State policies formulated by deliberations.

Mantraśakti (I, 1 : 5)
— Power of counselling.

Mantrimaṇḍala (XII, 17 : 48)
— Council of ministers.

Mantri-sampat (IV, 7 : 31)
— qualities of councillors.

Māyā (XIV, 21 : 43 : 288)
— Trickery.

Medini (I, 1 : 5 : 3)
— world or state.

Nāvāvṛtam (XVI, 24 : 39 : 341)
— fleet of boats.

Niyuddha (XIV, 21 : 43)
— Technique of wrestling.

Pakṣa (XVI, 21 : 28 : 336).
— loyal supporters or parties associated with the ruler.

Paracakrābhighāta (XIV, 21 : 287 : 36)
— Breaking the organization of the partisans of enemies.

Paribhūṣaṇa (Paraduṣaṇa)— Sandhi (IX, 14 : 18)
— Peace by surrendering total yield of the land.

Parikraya-Sandhi (IX, 14 : 17)
— Peace concluded by surrendering part of wealth, forests and mines or the whole of accumulated wealth.

Paropajāpa (XIV, 21 : 31)
— Fomenting disaffection in enemy's territory.
Pārṣṇīgrāha (XIV, 22 : 90) (VIII, 17, 156)
— rear enemy in the *maṇḍala*
Pārthiva (I, 1 : 14)
— treasury, national wealth, ruler of earth.
Paścātprakopa (XIV, 24 : 14)
— danger from the rear.
Pīḍākarasaha (IV, 7 : 55)
— People ungrudgingly bearing the burden of taxation even when excessive levies are imposed.
Pīḍāvaiṣayiki (X, 15 : 3)
— Erosion of material wealth.
Prabhuśakti (I, 1 : 23-24)
— Majesty.
Pracchannāḥ (XII, 17 : 44)
— secret agents.
Pracchannapradara (XVII, 25 : 17)
— camouflaged pits and holes.
Prahatagrajavam (XIV, 22 : 68)
— regiment having no leader.
Prakṛti (VIII, 12 : 4)
— elements of the state.
Prakṛtivyasana (XIV, 21 : 46)
— Calamities afflicting the state elements.
Praśāstṛ (XIV, 21 : 45)
— Superintendent or Magistrate of armaments.
Pratīkāra-Sandhi (IX, 14 : 10)
— alliance in consideration of a benefit mutually rendered.
Pravrajita (XIII, 19 : 34)
— wandering spies of mendicant type.
Puruṣāntara-Sandhi (IX, 14 : 13)
— Peace on condition of offering services of military chiefs on demand.

Rahasya (V, 8 : 36)
— Secret duties.
Rahasya-karaṇa (X, 15 : 11)
— demonstration of magical spells.
Rahasya-prayoga (X, 15 : 11)
— application of secret expedients.
Rājanakṣatra (XVII, 25 : 27)
— Royal star as aspected in the horoscope of the king.
Rājaśalyam (VI, 9 : 13)
— removing the thorns by the side of the state.
Rājavidyā (I, 1 : 7)
— Science of polity
Rājavidyāvid (I, 1 : 8)
— expert in the science of polity.
Rakṣitam (IV, 7 : 14)
— alliance in return of protection during affliction.
Ripudveṣī (IV, 55)
— Inhabitants wrathful to enemies or free from vices.

Sāḍguṇya (XIV, 21 : 42)
— Six positive political expedients.
Sahasotplutya (XII, 17 : 26)
— Sudden or unpremeditated assault.
Saimhyavṛtti (XI, 16 : 33)
— crushing the enemy pouncing upon him like a lion.
Śakyasāmanta (IV, 7 : 7)
— Possession of strong feudatories.
Saṁgata-Sandhi (IX, 14 : 6)
— alliance of perpetual amity for pulling their resources together.
Saṁgha-dharma (VIII, 12 : 56)
— law of collective existence.

Saṁsadaṁ (XIII, 18 : 6)
— the royal court.
Saṁsthā (XIII, 19 : 35)
— Stationary spies.
Samyakśodhana-maṇḍala (VIII, 12 : 86)
— Circle of state kept in perfect order favourable to the *vijigīṣu*.
Saṁyoga-Sandhi (IX, 14 : 12)
— alliance for marching unitedly.
Sañcārāh (XIII; 19 : 34)
— wandering spies.
Santāna-Sandhi (IX, 14 : 15)
— alliance by offering daughter in marriage or matrimonial alliance.
Śāsanavāhaka or Śāsanāhāraka (XIII, 18 : 3)
— emissaries of errands.
Śaśtravijñānam (XIV, 21 : 42)
— Technicalities of armament production.
Satrī (XIII, 19 : 34)
— wandering spies of black magician type.
Skandhāvāraniveśana (XVII, 25 :
— Establishment of an encampment.
Skandhopaneya-Sandhi (IX, 14 : 17)
— peace concluded by paying indemnity in instalments.

Suhṛt (IV, 7 : 1)—ally
Sukhopagamya (XVI, 24 : 49)
— a ruler who is easily ac cessible.
Śūnyamūlam (XIV, 22 : 71)
— army becoming hopeless of shelter or support.
Śūnyaniveśa (V, 8 : 78)
— reclamation of uninhabited lands.

Svāmī (IV, 7 : 1-3)—king.
Svāmisampad (IV, 7 : 21)
— qualities of a king.
Svavīvadhāsāra (XVI, 24 : 5)
— Safety of supply routes for a marching army.

Tīkṣṇa (XVIII, 19 : 34)
— wandering spies of reckless type.

Ubhayāri (XI, 16 : 20)
— Power hostile both to the *vijigīṣu* and his enemy.
Ubhayavetana (XI, 16 : 27)
— double agent.
Udāsīna (VIII, 12 : 19)—neutral power
Upadhā (IV, 7 : 26-27)—tests for appointment.
Upagraha-Sandhi (IX, 14 : 17)—Peace concluded by surrendering the entire resources to the enemy.
Upahāra-Sandhi (IX, 14 : 5)—alliance accompanied by offer of gifts.
Upāṅgśudaaṇḍa (VI, 10 : 10; XIII, 19 : 39)
— Secret murder or punishment,
— or by open trial implicating the criminals with culpable charges and inciting the public against them.
Upanyāsa-Sandhi (IX, 14 : 9)
— alliance between two for achieving a common purpose.
Utsāhaśakti (IV, 7 : 23)—energy.

Vaṇikpatha (V, 8 : 78)—trade routes.

Vārtā (XIV, 21 : 27)—Economic vocations.

Vārtā-śāstra (I, 1 : 12 ; II, 3 : 1-4) — Cattle rearing, agriculture and trade.

Vātaśvilka (XVII, 25 : 12)—Rider on a swift horse as fast as wind.

Vetasivṛtti (X, 15 : 35)—Policy of canes, i.e., to yield to a stronger power.

Vicchinnavividhāsāram (VIV, 22 : 71) — disruption of sources of supply of provisions.

Vigraha-yonayah (IX, 15 : 3-5)—Causes or sources of war.

Vijigiṣu (VIII, 12 : 3)—ambitious ruler with expansive designs.

Viṣada or Rasada (XII, 19 : 34)—wandering spies of poisoner type.

Viśada (XIII, 19 : 34)—wandering spies in the guise of persons of noble character.

Visandhih (XVI, 24 : 54) — the situation when the enemy does not like to come to terms.

Viśuddhimārga (XVI, 24 : — of supply of provisions and replenishment of the army by allies.

Vītavyasana (XIV, 20 : 7) — a ruler free from all passions.

Viviktadarśana (V, 8 : 36)—Secret place or inner chamber.

Vṛddhi (I, 1 : 9) — prosperity.

Yānāpahāra (X, 15 : 8)—damage to means of transport.

Yāna-vyasana (XV, 23 : 20) — addiction to game hunting.

Yātavya (XIII, 18 : 1) — the enemy against whom marching is contemplated.

Yuddha mārga (XIV, 21 : 41) — mode of war fare.

Yukta-daṇḍa (II, 5 : 37) — a ruler, just in punishment.

TERMS RELATING TO VYŪHA AND WARFARE

Abhūmiṣtha (XIX : 31 : 55 : 405)
— Unfavourable ground or situation.

Acala vyūha (XX : 35 : 36 : 427)
— the infantry, cavalry, chariots and elephants arrayed one behind the other.

Ahisārī (XX : 35 : 48 : 435)
— a form of Bhogavyūha : reflecting serpentine movement : *vide* diagram p. 436.

Aṅgula (XX · 33 : 418)
— mathematical measurement : 1 aṅgula = ¾ inch.

Antabhid vyūha (XX : 35 : 37 : 427)
— Cavalry forces constituting the middle part, Chariots the Kakṣas and elephants the Pakṣas :
Crushes the enemy flanks.

Apratihata vyūha (XX : 35 : 36 : 427)
— elephants placed in the front and infantry at the rear.

Ardhacandraka (XX : 35 : 51 : 437)
— a variety of Asaṁhatavyūha ; *vide* diagram, p. 438.

Ardhāvṛtti (XX, 35 : 42 : 429)
— vyūha arranged in semi circular composition *cf* : Bhogavyūha

Aribala (XIX : 28 : 21 : 395)
— Soldiers alienated from the enemy :
One of the six branches of the army.

Asahya (XX, 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 432

Asaṁhata vyūha (XX, 35 : 42 : 429)
— different wings of the army charging simultaneously but separately

Asaṁhata vyūha, *varieties* of : (XX : 35 : 51 : 437)
(1) Ardhacandraka, (2) Uddhāna, Udyānaka, (3) Vajra, (4) Kukkuṭa-(Karkaṭa)śringī. (5) Kākapādī, (6) Godhikā

Aṣṭānīka (XX, 35 : 50 : 437)
— eight pronged units of the *durjaya vyūha*

Āṭavika—bala (XIX : 28 : 3 : 389)
— forces of forest tribes :
One of the six branches of the army.

Āvāra (17 : 26 : 39 : 362)
— protective shade.

Āvāpa [forces] (XX : 35 : 39 : 427)
— forces found surplus after deployment in the vyūha : kept in reserve for replenishment of respective units as and when necessary.

Balaya (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 435.

Bheda (XVIII, 27 : 8 : 367)
— Creation of dissension in the enemy camp :
One of the four upāyas.

Bhogavyūha (XX : 35 : 42 : 429)
— wings shaped like the raised hood of the serpent : the vyūha arranged in a semi-circular composition.

Bhogavyūha, *forms of* : (XX : 53 : 48 : 435)
(1) gomūtrikā, (2) ahisārī, (3) śakaṭa, (4) makara, (5) paripatantaka

Bhṛta (XIX : 28 : 3 : 389)—bala
(1) Regular forces ; (2) Mercenaries :
One of the six branches of the army.

Cāpa (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 432.

Cāpakukṣi (XX : 35 : 43-44 ; 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 434.

Camūmukha (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha ; *vide* diagram, p. 434

Caturaṅga bala (18 : 27 : 365)
— four complements of an army :
(1) Foot-Soldiers; (2) Cavalry; (3) Charioteers ; (4) Elephant forces.

Cāpi (XX : 34 : 20 : 420)
— bowman.

Daṇḍa (XVII : 17 : 26 : 362)
— military power.

Daṇḍanīti (XIX : 29 : 22 : 397)
— laws of polity.

Daṇḍa vyūha (XX : 35 : 40 : 427)
— staff-like array of soldiers.

Daṇḍavyūha (XX : 35 : 42 : 429) ; (XX : 35 : 40 ; 427)
— (1) angular projection of both its wings (as the bird flies) (2) staff-like array of soldiers

Daṇḍavyūha, *forms of* : (XX : 35 : 43-44 : 429)
(1) Pradara (2) Dṛḍhaka (3) Asahya (4) Cāpa (5) Cāpakukṣi (6) Pratiṣṭha (7) Supratiṣṭha (8) Syena (9) Vijaya (10) Sañjaya (11) Viśālavijaya (12) Śūcī (13) Sthūṇākarṇa (14) Camūmukha (15) Sukhākhya or Rsāsya (16) Balaya (17) Sudurjaya

Dāna (18 : 27 : 365)
— gifts or bribes :
One of the four Upāyas

Dhanu (XX : 33 : 14A : 418)
— a mathematical measurement :
1 *dhanu* =
= 5 *aratnis*
= 120 aṅgulas

Dhanuvyūha (XX : 35 : 40 : 427)
— bow-shaped array of soldiers

Dṛḍhaka (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 432.

Durjaya (XX : 35 : 50 : 437)
— a form a Maṇḍalavyūha : eight pronged units—double in each of the two *kakṣas* and two *pakṣas* : spearheaded by war-elephants : *vide* diagram, p. 437

Dviṣad—bala (XIX : 28 : 3 : 389)
— Soldiers alienated from the enemy camp :
vide Aribala.

Godhikā (XX : 35 : 52 : 437)
— a variety of Asaṁhata vyūha : *vide* diagram, p. 440

Gomūtrikā (XX : 35 : 48 : 435)
— a form of Bhogavyūha : taking the shape of flowing urine of cows : *vide* diagram, p. 436

Indrajāla (XVIII : 27 : 3 : 366)
— Conjuring tricks :
One of the seven upāyas.

Jaldurga)XX : 32 : 413)
— island forts

Kabandha (17 : 26 : 27 : 358)
— headless trunk, apparition of

Kākapādī (XX : 35 : 52 : 437)
vyūha : *vide* diagram, p. 440.

Kakṣa (XX : 35 : 29A : 425)
— two rear wings of a vyūha.

Koṭi (XX : 35 : 30 : 425)
— outer sides of front wings of a vyūha.

Kūṭayuddha (XIX : 31 : 54 : 405)
— deceitful tactics in warfare

Madhya (XX : 35 : 30 : 425)
— middle unit of a vyūha ; behind the central one.

Madhyabhedi-vyūha (XX : 35 : 36A : 427)
— the mighty elephant force constituting the central part of the front with chariots, in either *kakṣas* and cavalry in either *pakṣas* : capable of penetrating into the enemy's array.

Mahāvyūhā (XX : 35 : 40 : 427)
— major arrays of the soldiers in a battle-field : (1) bow-shaped ; (2) needle-pointed ; (3) shaped like a staff ; (4) cart-shaped ; (5) makara-ensign ; (6) hawk-shaped ; (7) thunder-shaped

Makaravyūha (XIX : 30 : 48 : 403 ; XX : 35 : 40 : 427 ; XX : 35 : 49 : 435)
— (1) a form of Bhogavyūha ; *vide* diagram, p. 436.
diagram, p. 436.
(2) Array of soldiers resembling makara ensign.

Maṇḍala vyūha (XX : 35 : 42 : 429)
— almost a circular composition with attacking points on all sides.

Maṇḍala vyūha, *forms of* (XX : 35 : 50 : 437)
(1) Sarvatobhadra :
(2) Durjaya

Mantra (XIX : 28 : 19 : 394)
— diplomatic counsel.

Mantrajña (XIX : 29 : 27 : 397)
— One well versed in laws of diplomacy.

Maula (XIX, 28 : 3 : 389)—bala
(1) Veterans ; (2) Soldiers in Service hereditarily :
One of the six branches of the army.

Māyā (18 : 27 : 366)
— deceitful tactics
One of the seven *upāyas*.

Muṇḍānikam (XX : 35 : 35 : 426)
— dummy of the king

Niyuddha (XIX : 29 : 32 : 398)
— duel combats.

Pakṣa (XX : 35 : 29A : 425)
— two front wings of a vyūha.

Paripatantaka (XX : 35 : 49 : 435)
— a form of Makara vyūha : central part strengthened by concentration of units of elephants and cavalry forces : *vide* diagram. p. 437.

Pattimukhya (XX : 34 : 20 : 420)
— infantry commander.

Phalgusainya (XIX : 31 : 63 : 408)
— Ordinary soldiers.

Pradara (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 432.

Prakāśayuddha (XIX : 31 : 54 : 405)
— open war.

Prakṛtivyūha (XX : 35 : 41 : 329)
four varieties—
(1) maṇḍala vyūha ; (2) asaṁhata vyūha ; (3) bhogavyūha ; (4) daṇḍavyūha.

Pratigraha (XX : 35 : 30 : 425)
— the reserve at the rear of a vyūha including the royal camp at a distance.

Pratigraha (XX : 33 : 14c : 418)
— captives of war.

Pratiṣṭha (XX . 35 : 43-44 : 429)
— a form of Daṇḍavyūha : *vide* diagram.p. 432.

Pravīra Puruṣa (XX : 35 :33 : 426)
— expert warriors.

Pādacārā (XX : 35 : 28 : 421)
— supporting force.

Pādagopā (XX : 35 : 28 : 424)
— supporting force.

Pṛṣṭham (XX : 35 : 30 : 425)
— rear middle unit of a vyūha.

Ṛsāsya XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 434.

Ṣaḍaṅgabala (XIX : 28 : 24 : 396)
— Six limbs of the army : (1) foot-soldiers ; (2) Cavarly ; (3) Charioteers ; (4) elephant forces ; (5) diplomatic counsel (*mantra*) ; (6) treasury.

Śakaṭa vyūha (XIX : 30 : 49 : 403, XX : 35 : 40 : 49 : 427 : 435
— cart-shaped array of soldiers.
— a form of Bhogavyūha : kakṣa and pakṣa wings like daṇḍas with double units of middle akin to chariot-shaped : *vide* diagram, p. 436.

Śama (XX : 35 : 23)
— 14 aṅgulas.

Sañjaya (XX : 35 : 43-44 : 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 433.

Sarvaotobhadra (XX : 35 : 50 : 437)

Satra (XIX : 31 : 61 : 407)
— fort (temporary)

Sauptika (XIX : 31 : 67 : 409)
— nocturnal raids.

Sāma (18 : 27 : 365)
— Conciliation :
One of the four *upāyas*.

Śreṇi bala(XIX : 28 : 3 : 389)
— Organised bands of martial tribes of the dominion :
One of the six branches of the army.

Sthūṇākarṇa (XX : 35 : 43-44 ; 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 434.

Sūcī (XX : 35 : 43-44 ; 429)
— a form of the Daṇḍavyūha : *vide* diagram, p. 434.

Sūcī vyūha (XIX : 30 : 48 : 403 ; XX : 35 : 40 : 427)
— needle-pointed array of soldiers.

INDEX

ERRATA

Page	Line	Read	For
1	17	चतुर्मुखमुखाम्भोज	चतुर्मुखाम्भोज
5	17	चान्ये	चाण्ये
„	25	अर्थस्तु	अर्थतस्तु
9	14	वैजवनः	वजवनः
„	30	अनुष्ठेय पक्षं	अनुष्ठ यपक्षं
11	5	ततोत्थित	ततोस्थित
13	2	difficulties	diffilulties
17	2	बुद्धीन्द्रियाणां	बुद्धीन्द्रियानां
„	25	इन्द्रियसंग्रह	इन्द्रिसंग्रह
21	9	दायिनीं	दायिणीं
22	10	द्रूम	द्रुम
30	4	नृपती	नृपतौ
„	5	प्राणापाय	प्राणोपाय
39	26	वक्ष्यमाण	ईक्ष्यमान
40	23	वेदाङ्गानि	वेदाङ्गाणि
44	4	समेखलो	समेथलो
48	6	॥ ३८ ॥	॥ ६४ ॥
„	5	धर्मनाशे	धर्मपाशे
49	11	दण्डेन	दृण्डेण
58	28	आशीविषः	आशीविषः
61	1	प्रियमेवाभि	प्रियमेवावि
62	18	प्रयच्छन्ति	प्रयच्छति
63	8	गुरून	गुरुन
„	28	in	is
64	„	विधायित्वं	विधायितं
66	8	अविनीत	अविणीत
68	21	एतदेव	एतदेन
70	8	संश्रयणीय	संश्रयनीय
73	6	द्रष्टाः	कृष्टाः
75	4	अपकाराणां	अपकारानां

Page	Line	Read	For
82	25	सन्	सम्
84	28	prevalence	prevalance
95	13	स्पृहणीय	स्पृहनीय
98	2	पेशल्मास्वा	पेशल्मारवा
„	20	म्लेच्छादिर्न	म्लेच्छादिर्ण
101	16	prosperous	prospererous
„	29	वक्ष्यमाण	वक्ष्यमान
102	16	घ्नन्ति	घ्नति
103	21	असत्य	अमत्य
„	29	वर्जनीय	वर्जणीय
104	27	अभाषणीयम्	अभाषणींम
108	23	करोतीत्येतद	करोतीत्येदद
109	26	विरक्तस्या	विरक्तरया
113	23	कर्मसु	कर्मंमु
„	32	भर्तुश्चित्ता	भर्तुश्चिता
117	19	एवंरूपाया	पूर्वरूपाया
118	9	त्यजन्ते	ज्ञजन्त्ये
„	31	जात्यस्य	जातस्य
124	29	विश्वास्यै	विश्वारयै
132	6	*Rajaputra*	*Rājputra*
„	30	पितरं	तरं
138	2	विवर्णता	विर्णता
142	12	सुपरीक्षित	सुपरिक्षीत
145	26	रूपा, रूप	रुपा, रुप
148	4, 6	जघान	जखान
149	1	विभज्य	विभज्या
„	4	आसक्तिर्न	आसक्तिर्ण
„	20	प्रबुध्यते	प्रबुयते
„	26	राजपुत्र	रासपुत्र
152	22	seven	even
153	17	दाक्ष्यमूर्जः	दाक्ष्यमर्जः
„	36	दातुं	दातं
154	4	अक्षौहर	अक्षौह

Page	Line	Read	For
155	33	मित्रारिमित्र	मित्ररिमित्र
156	1	पश्चादा	पश्चादा
,,	2	वनयोश्च व[18]	विजिगीषोस्तु[18]
,,	9	*Vijigīṣu*	*Vijigīṣ's*
,,	21	मित्रमरिमित्रमित्रं	मित्रमरिमेत्रं
157	11	मधमस्य प्रचारश्च	मधमस्य प्रचारस्य
158	6	मधम्यः[23]	मध्यमः
,,	7	षट्कं[23a]	षट्कं[23]
,,	9	opinion of both	opinion both
159	5	अमात्याद्याश्च	अमात्याद्याश्च
,,	15	मण्डलम्	मरडलम्[11]
,,	18	द्रव्यप्रकृतयोः	द्रव्यप्रकृयो
160	1	ममात्याद्याः	ममत्याद्याः
,,	7	मन्यन्ते	मन्यते
,,	15	अष्टादशानामिति	अष्टादशनामिति
,,	17	राष्ट्रदुर्गा	राष्ट्रहुर्गा
164	16	*Ṣādguṇy*	*Sādguṇya*
165	15	परित्राणा	परित्राना
,,	19	यायाद्	याथाद्
172	2	due to	due
,,	13	कर्शनं	कशनं
,,	26	मपहर्तुं	मपहर्तं
177	22	should	shoult
181	13	प्रतिरञ्जयन्	प्रतिरञ्जन्
183	27	*Kāñcana*	*Kañcana*
186	19	जानान्यपग्रहः	पानान्युपग्रहः
187	4	लक्षणमाह	लशणमाह
193	32	righteous	righteons
194	18	thorny	throny
195	32	गच्छन्ति	गच्छति
198	13	महोपगच्छेत्	महोपच्छेत्
198	16	A *vijigīṣu* aspiring for an extensive empire may achieve his goal.	Death and .... the

Page	Line	Read	For
201	9	प्रधानपुरुषस्य	प्रधानपुरुस्य
202	29	पक्षे	पशे
207	4	yanasya	yaasya
„	22	रूपः	रुपः
„	32	दूषणं	दुषणं
214	19	विचक्षणः	विचअणः
226	12	commentary	communtary
236	14	*Ṣāḍguṇya*	*Sāḍguṇya*
241	10	यथाशास्त्रमेव	यथाशास्त्रमेव
252	17	friends'	friends,
258	16	प्रहिणुयात्	प्रतिणुयात्
„	28	नृपतेर्दूतो	नृपतेर्दतो
264	26	कर्तुमीहते	कर्तमीहते
273	15	षण्ढाः	ण्षढाः
„	19	निःसारयेयुः	निःसारेयुः
„	23	वृद्धिर्येषां	वृद्धिर्येयां
277	27	उत्थाना	उत्याना
284	7	छिन्नपक्ष	छिन्नषक्ष
290	7	नियोगाद	नितोगाद
293	18	वृत्त-	कृत-
299	18	तद्देश्योपदेशात्	तद्देशोपदेशात्
300	14	disappointment	diappointmen
314	14	वहिर्दरान्त	वहिर्द्धरान्त
340	17	time, as that only	time only
356	26	सञ्चारमात्मनः	सञ्चारमात्मनः